No. 5.] [Price Rupee one.

CHOWKHAMBA SANSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

UNDER THE SUPERINTENDENCE OF

KASHI PANDIT SAMAJ.

॥ श्रीः ॥

शब्दकौस्तुभः

सर्वतन्त्रस्वतन्त्रश्रीमद्भट्टोजीदीक्षितविरचितः ।

SHABDAKOUSTUBHA

BY

PANDIT BHATTOJEE DEEKSHIT

EDITED AND REVISED

BY

PANDIT RAMA KRISHNA SHASTRI

ALIAS TATYA SHASTRI PATWARDHANA

Professor Government Sanskrit-College, Benares.

FASCICULAS III.

PUBLISHED AND SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT BOOK-DEPOT.

BENARES:

AGENT—OTTO HARRASSOWITZ, LEIPZIG:

PRINTED AT THE RAJ-RAJESHWARI PRESS

AND

CHANDRAPRABHA PRESS COMPANY LIMITED.

1898.

REGISTERED ACCORDING TO ACT XXV. OF 1867.

इति श्रीशब्दकौस्तुभे द्वितीयस्याध्यायस्य
तृतीयपादे प्रथममाह्निकम् ॥

कर्तृकरणयोस्तृतीया ॥ रामेण बाणेन हतो वाली । प्रकृत्यादिभ्य उपसङ्ख्यानम् ॥ प्रकृत्याभिरूपः । क्रियाया अश्रवणात् कर्तृकरणयोरभावात् षष्ठीह प्राप्ता । ननु गम्यमानकरोतिक्रियाकरणत्वात् सिद्धम् । करणान्तरव्युदासाय हि प्रकृतेरेव करणत्वं विवक्षितम् । स्वभावेनायमभिरूपः कृतो न त्वलङ्कारादिनेत्यर्थात् । इदन्तर्हि प्रायेण याज्ञिकाः । प्रायशब्दो बव्हर्थः । बहवो याज्ञिका इत्यर्थः । ननु याज्ञिकशब्दाभिधेयमध्ययनं प्रति बाहुल्यं करणम् । सङ्घीभूय यज्ञमधीयतईत्यर्थात् । यद्यपि विशिष्टवेषं काञ्चिद्दृष्ट्वा प्रायेणायं याज्ञिक इत्यध्यवस्यति । तत्रापि गम्यमानज्ञानक्रियां प्रति करणत्वात् सिद्धम् । आचारादिबाहुल्येन याज्ञिकोयमिति जनैर्ज्ञाप्यतइत्यर्थात् । के चित्तु प्रायेणशब्दो विभक्तिप्रतिरूपको निपातो नूनमित्यर्थे वर्त्ततइत्याहुः । दृश्यते च प्रायेण सामग्र्यविधौ गुणानामिति । प्रायेण निष्क्रामति चक्रपाणाविति च । इदं तर्हि गोत्रेण गार्ग्यः, प्रथमा षष्ठी वा प्राप्नोति । नान्विहापि अनेनाहं ज्ञाये इत्यर्थात्सिद्धम् । इहन्तर्हि समेन विषमेणैति, अत्र समविषमाभ्यां द्वितीया प्राप्ता । ननु पथोपि गमने करणत्वात् समेन पथेत्यर्थोस्तु । इदन्तर्हि द्विद्रोणेन धान्यं क्रीणाति । पञ्चकेन पशून् गृण्हाति । द्वयोर्द्रोणयोः समाहार इति द्विद्रोणं पात्रादिः । द्वौ द्रोणौ कृत्वेत्यर्थः । इह द्वितीया षष्ठी वा प्राप्ता । पञ्च परिमाणमस्य पञ्चकः सङ्घः । तत्र सङ्घसङ्घिनोरभेदविवक्षायां पशूनित्यनेन सामानाधिकरण्यात् द्वितीया प्राप्ता । एतदपि प्रत्याख्यातं

भाष्ये । द्विद्रोणाद्यर्थे मूल्ये द्विद्रोणादिशब्दः तस्य च क्रयं प्रति करणत्वं द्विद्रोणादीनां च यन्मूल्यं तेन द्विद्रोणाद्येव क्रियतइत्यर्थभेदोपि नास्तीति ॥

सहयुक्ते ऽप्रधाने ॥ सहार्थेन युक्ते ऽप्रधाने तृतीया स्यात् । पुत्रेण सहागतः पिता । पितुरत्र क्रियासम्बन्धः शाब्दः, पुत्रस्य तु आर्थ इति तस्याप्राधान्यम् । सहे ऽप्रधानइत्येव वाच्ये युक्तग्रहणादर्थग्रहणम् । पुत्रेण सार्धम् । विनापि सहशब्देन तदर्थावगतौ स्यादेव, तथा च सौत्र प्रयोगः । वृद्धो यूनेति । प्रधानग्रहणं शक्यमकर्तुम् । न चैवं पितुरपि तृतीयापित्तिः । तत्र प्रातिपदिकमात्रापेक्षत्वादन्तरङ्गत्वेन प्रथमोपपत्तेः ॥

येनाङ्गविकारः ॥ येन शरीरविकारो लक्ष्यते ततस्तृतीया स्यात् । अर्शआद्यजन्तः सूत्रे अङ्गशब्दः । तद्विकारलक्षकश्च प्रकृत्यर्थभूतोवयव एव गृह्यते सन्निधानात् । स चार्थाद्विकृत एव न ह्यविकृतेनावयवेन शरीरस्य विकारः सम्भवति । तदेतदभिसन्धाय वृत्तावुक्तम् । येनाङ्गेन विकृतेनेत्यादि । अक्ष्णा काणः । पादेन खञ्जः । पाणिना कुणिः । सामान्योपक्रमे वाक्ये अक्ष्णेत्युक्ते भवत्याकाङ्क्षा, निरूपयति वा काणो वेति । तत्र काण इत्यादिप्रयोगो न विरुध्यते । यद्यप्यक्ष्येव काणं तथापि तद्योगाच्छरीरेपि व्यवहारो निरूढः । षष्ठ्यपवादो योगः । अक्षिसम्बन्धिकाणत्ववानित्यर्थात् ॥

इत्थम्भूतलक्षणे ॥ कञ्चित् प्रकारं प्राप्त इत्थंम्भूतस्तल्लक्षणे तृतीया स्यात् । जटाभिस्तापसः । जटाश्चाप्यतापसत्ववान् ॥

संज्ञोन्यतरस्यां कर्मणि ॥ सम्पूर्वस्य जानातेः कर्मणि तृतीया वा स्यात् । पित्रा पितरं वा सञ्जानीते । सम्प्रतिभ्यामनाध्यान इति तङ् । कृद्योगे तु परत्वात्षष्ठी । पितुः संज्ञाता ।

यन्तु हरदत्तेनोक्तम्, आध्याने परत्वाद्धीगर्थेति षष्ठी मातुःसञ्जानातीति । तन्न । तत्र शेषाधिकारात् । कर्मत्वविवक्षायां तृतीयाद्वितीययोरवश्याभ्युपेयत्वात् । भिन्नविषयया षष्ठ्या विप्रतिषेधस्यान्याय्यत्वाच्चेति दिक् ॥

हेतौ ॥ हेत्वर्थे तृतीया स्यात् । धनेन कुलम् । विद्यया यशः । हेतुरिह लौकिकः फलसाधनीभूतः न तु तत्प्रयोजको हेतुश्चेति कृत्रिमः । तस्य चकारेण कर्तृसंज्ञाविधानात्कर्तृकरणयोरित्येव तृतीयायाः सिद्धत्वात् । न च लौकिकहेतोरपि करणत्वान्तुल्यो दोष इति वाच्यम् । लौकिकस्य द्रव्यादिसाधारण्यात् । निर्व्यापारसाधारण्याच्च । करणस्य तु क्रियामात्रविषयत्वात् व्यापारानियतत्वाच्च । आह च । द्रव्यादिविषयो हेतुः कारकं नियताक्रियामिति ॥ अनाश्रिते तु व्यापारे निमित्तं हेतुरुच्यतइति च । तथा फलमपीह हेतुशब्देन गृह्यते । अध्ययनेन वसति । इदञ्च प्रत्यय इति सूत्रे कैयटे स्पष्टम् ॥

अकर्तर्यृणे पञ्चमी ॥ कर्तृवर्जितं यदृणं हेतुभूतं ततः पञ्चमी स्यात् । तृतीयापवादः । शताद्बद्धः । अकर्तरीति किम् । शतेन बन्धितः । शतमिह उत्तमर्णाय धार्यमाणत्वादृणन्तत्प्रयोजको हेतुश्चेति चकारेण कर्तृसंज्ञं च । ननु पूर्वसूत्रे लौकिकस्य हेतोर्ग्रहणमित्युक्तम् । अयन्तु शास्त्रीयः । सत्यम् । शास्त्रीयस्यापि लौकिकत्वमस्त्येव । व्यापकं हि लौकिकं न तु विरुद्धम्। अथ वा इहार्थतया पूर्वसूत्रेपि सामान्यग्रहणमस्तु ॥

विभाषा गुणे ऽस्त्रियाम् ॥ गुणहेतावस्त्रीलिङ्गे पञ्चमी वा स्यात् । जाड्याज्जाड्येन वा बद्धः । पाण्डित्यात्पाण्डित्येन वा मुक्तः । गुणइति किम् । धनेन कुलम् । अस्त्रियां किम् । बुद्ध्या मुक्तः । इह सत्वे निविशतेपैतीति लक्षितो गुणो गृह्यते ।

तदनुरूपत्वादुदाहरणप्रत्युदाहरणयोः । इह विभाषेति योगो विभज्यते। तेनागुणेपि क्वचिद्भवति एवं स्त्रियामपि। एतच्च हेतुमनुष्येभ्य इतिसूत्रे हररदत्तग्रन्थे स्पष्टम् । के चित्तु। गुणशब्दोत्र परतन्त्रमात्रपरः । यस्य द्विगुणस्य भावादित्यत्र यथा। तेन वन्हिमान्धूमादित्यादावपि पञ्चमी सिद्धेत्याहुः । कथन्तर्हि नास्तीह घटोनुपलब्धे रिति । अत्राहुः । स्त्रियामपि क्वचिद्भवति विभाषागुणइतियोगविभागात् । बाहुलकं प्रकृत्तेस्तनुदृष्टेरिति वार्त्तिकप्रयोगश्चेह ज्ञापक इति ॥

षष्ठी हेतुप्रयोगे ॥ हेतौ द्योत्ये षष्ठी स्यात्। अन्नस्य हेतोर्वसति ॥

सर्वनाम्नस्तृतीया च ॥ सर्वनाम्नो हेतुशब्दस्य च प्रयोगे हेतौ द्योत्ये तृतीया स्यात् षष्ठी च। केन हेतुता वसति कस्य हेतोः। निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम् । किंनिमित्तं वसति। केन निमित्तेन। कस्मै निमित्तायेत्यादि। एवं किं कारणम्। को हेतुः। किं प्रयोजनमित्यादि। असर्वनाम्नोप्येतद्भवति। वृत्तिकारेणेह पाठेपि भाष्यकारेण हेताविति पठितत्वात्। प्रायग्रहणाद्वसर्वनाम्नः प्रथमाद्वितीये नस्तः। अन्नेन कारणेन वसति। अन्नाय कारणायेत्यादि। वार्त्तिकेपर्यायो पादानं प्रपञ्चार्थम्। प्रयोजनादिशब्दानुरोधेनार्थपरत्वस्वीकारात् ॥

अपादाने पञ्चमी ॥ स्पष्टम्। ग्रामादागच्छति । ल्यब्लोपे कर्मण्यधिकरणे चोपसंख्यानम् ॥ प्रासादात्प्रेक्षते आसनात्प्रेक्षते। प्रासादमारुह्य प्रासने उपविश्य प्रेक्षतइत्यर्थः। गम्यमानापि क्रिया कारकविभक्तिनिमित्तं प्रविशपिण्डीतिवत्। तेन कुतो भवान्, पाटलिपुत्रादित्यादि सिद्धम्। इह हि प्रत्यक्षादिसिद्धमागमनमुपजीव्यावधावेव प्रश्नोत्तरे प्रवर्तते। एतेन प्रभाख्यानयोश्चे-

ति वार्तिकं प्रत्याख्यातम्। अपेक्षितक्रियाया दानत्वेनैव सिद्धत्वात्। अन्यथा कश्चन्द्र इत्यादावतिव्याप्तेश्च। यतश्चाध्वकालनिर्माणं तत्र पञ्चमी तद्युक्तादध्वनः प्रथमासप्तम्यौ कालात्सप्तमी च वक्तव्या वनाद्ग्रामो योजनं योजने वा। कार्त्तिक्या आग्रहायणी मासे। कृत्तिकाभिर्युक्ता पौर्णमासी कार्त्तिकी। पौर्णमास्या लुबविशेषइति लुङ् न भवति। सास्मिन्पौर्णमासीत्यधिकारे विभाषाफाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्य इति निर्देशात्। अग्रे हायनमस्या इति आग्रहायणी। प्रज्ञादेराकृतिगणत्वात् स्वार्थिकोण्, आग्रहायण्यश्वत्थादिनिपातनाण्णत्वम्। तद्युक्तादिति। तेन पञ्चम्यन्तेन अर्थद्वारेण युक्तात्काले वर्त्तमानान्मासादिशब्दादित्यर्थः। अत्र भाष्ये कार्त्तिक्याः प्रभृतीति प्रयोगात्प्रभृतियोगे पञ्चमीति कैयटः। प्रभृतीत्यर्थग्रहणम्। तत आरभ्येत्यर्थ इति कैयटात्। स्कन्धात्प्रभृत्येव सपल्लवानीति कुमारः॥

अन्यारादितरर्त्ते दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते॥ एतैर्योगे पञ्चमी स्यात्। अन्य इत्यर्थग्रहणम्। इतरग्रहणन्तु प्रपञ्चार्थम्। न चेतरस्त्वन्यनीचयोरित्यमरोक्तेर्नीचार्थकस्येदं ग्रहणमिति वाच्यम्। अस्मात्तारो मन्दो वेत्यादाविव पञ्चमीविभक्तइत्यनेनैव सिद्धत्वात्। देवदत्तादन्यो भिन्नो विलक्षणोर्थान्तरं वेत्यादि। न चैवं घटः पटो नेत्यत्रातिप्रसङ्गः। नञोप्यन्योन्याभावार्थकत्वात्। घटाद्भेद इत्याद्यनुरोधेन धर्मिपर्यन्तविवक्षाया अयोगादिति वाच्यम्। नञो द्योतकताया उक्तत्वात्। आरादेवदत्तात्। इह दूरान्तिकार्थैःषष्ठ्यन्यतरस्यामिति प्राप्तः। आराद्दूरसमीपयोः। ऋते कृशानोर्न हि मन्त्रपूतम्। अत्र ऋतेयोगे पाक्षिकी द्वितीयापीत्युक्तं प्राक्। दिशि दृष्टः शब्दो दिक्शब्दः। तेन सम्प्रति देशकालवृत्तिनापि योगे भवति। ग्रामात्पूर्वो देशः। चैत्रात्पूर्वः

फाल्गुनः । कथन्तर्हि पूर्वं कायस्येति । उच्यते । अवयववाचिभिर्योगे न भवति तस्यपरमाम्रेडितमिति निर्देशात् । अञ्चूत्तरपदस्य दिक्शब्दत्वेपि षष्ठ्यतसर्थप्रत्ययेनेत्येतद्बाधनार्थं पृथग्ग्रहणम् । प्राक् प्रत्यग्वा ग्रामात् । न च तेन सध्र्यूङ्ङित्यादौ पञ्चम्यर्थे तस्किन्न स्यादिति वाच्यम् । दिक्शब्दसाहचर्येण प्रागादीनामेव ग्रहणात् । आच्, दक्षिणा ग्रामात् उत्तरा वा । आहि, दक्षिणाहि उत्तराहि ग्रामात् । दक्षिणादाच् । आहिचदूरे उत्तराच्चत्याजाही ॥

षष्ठ्यतसर्थप्रत्ययेन ॥ एतद्योगे षष्ठी स्यात् । दक्षिणतो ग्रामस्य । उत्तरतः । दक्षिणोत्तराभ्यामतसुच् । एवं पुरःपुरस्तादुपर्युपरिष्टात् ॥

एनपा द्वितीया । एनबन्तेन योगे द्वितीया स्यात् । षष्ठ्यपीष्यते । सा त्वेनपेति योगं विभज्य साधनीया । दक्षिणेन ग्रामं ग्रामस्य वा । एवमुत्तरेण । एनबन्यतरस्यामदूरेपञ्चम्या इत्येनप् । कथन्तर्हि तत्रागारं धनपतिगृहादुत्तरेणास्मदीयम् । स्यधिकारात्परेण वासरूपविधिर्नावश्यं भवतीत्यादि । एनबपि परशब्दात्पाक्षिकः । यदा तद्विधावुत्तराधरदक्षिणादिति नानुवर्तते । सत्यम् । अत एव चिन्त्यमेवेदमिति हरदत्तः । उत्तरेणेति तृतीयैकवचनान्तं तोरणेनेत्यनेन समानाधिकरणमित्यन्ये । अपरे तु धनपतिगृहानिति शसन्तं पठन्ति ॥

पृथग्विनानानाभिस्तृतीयान्यतरस्याम् ॥ अन्यतरस्यांग्रहणं समुच्चयार्थम् । निपातानामनेकार्थत्वात् । मण्डूकप्लुत्या पञ्चम्यनुवर्तते । एभिर्योगे तृतीयापञ्चम्यौ स्तः । वृत्तिकारस्त्वाह । पृथग्विनानानाभिरिति योगविभागाद् द्वितीयापीष्यतइति । पृथग्ग्रामेण रामाद्रामं वा । एवं विना नाना ।

हिरुङ् नानां च वर्जनइत्यपरः। नानानारीर्निष्फला लोकयात्रेति प्रयोगः ॥

करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य ॥ अद्रव्यार्थेभ्य एभ्यः करणे तृतीयापञ्चम्यौ स्तः। स्तोकेन स्तोकाद्वा मुक्तः। असत्वेति किम्। स्तोकेन विषेण हतः ॥

दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् ॥ एतैर्योगे षष्ठी स्यात्पञ्चमी च। पृथग्विनेत्यत्र पञ्चमी समुच्चीयतइत्युक्तम्। इहाप्येकप्रघट्टकत्वात्तथैवेति द्रष्टव्यम्। दूरमन्तिकं वा ग्रामस्य ग्रामाद्वा ॥

दूरान्तिकार्थेभ्यो द्वितीया च ॥ एभ्यो द्वितीया स्याच्चकारात्पञ्चमीतृतीये। प्रातिपदिकार्थे विधिरयम्। ग्रामस्य दूरं दूराद्दूरेण वा। अन्तिकमन्तिकादन्तिकेन वा। उत्तरत्राप्येतदनुवृत्त्या तत्तद्विषयेपि द्वितीयादयः स्युः। तथा चाधिकरणेपि प्रयुज्यते। दूरादावसथान्मूत्रामिति। आवसथस्य दूरइत्यर्थः। असत्ववचनग्रहणमनुवर्तते। तेनेह न। दूरः पन्थाः। दूराय पथे देहि। दूरस्य पथः स्वमिति ॥

सप्तम्यधिकरणे च ॥ चकाराद् दूरान्तिकार्थेभ्यः। कटे आस्ते। दूरान्तिकार्थेभ्यः प्राग्विभक्तित्रयमुक्तम्। अनेन च सप्तमीति तेभ्यश्चतस्रो विभक्तयः फलिताः। क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानम् ॥ इनिति इन्नन्तः शब्दः। विषयो वृत्तिभूमिर्यस्य क्तान्तस्य तस्येत्यर्थः। अधीती व्याकरणे। अधीतमनेनेति विग्रहः। श्राद्धमनेन भुक्तमित्यतो ऽनेनेति वर्त्तमाने इष्टादिभ्यश्चेति सूत्रेण कर्त्तरीनिप्रत्ययः। ततस्तद्धितार्थेन सहैकार्थीभूतस्याधीतस्य निष्कृष्य व्याकरणादिना सम्बन्धाभावात्। क्तप्रत्ययेनानाभिहितं व्याकरणम्। तत्र कृ-

तपूर्वीकटमितिवद् द्वितीया प्राप्ता। गुणभूतयापि हि अध्ययनक्रियया कर्मणः सम्बन्धो न विरुद्धः। सहाधीतवान् व्याकरणमित्यादौ यथा। आह च, अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः। क्रिया सम्बध्यते तद्वत् कृतपूर्व्यादिषु स्थितेति॥ न विविच्य ग्रहो यस्याः सा अविग्रहा। गुणीभूतेत्यर्थः। ननु कालकर्मणोपि सप्तमी प्राप्नोति मासमधीती व्याकरणइत्यादौ। मैवम्। तस्य बहिरङ्गत्वात्। न चैवं तत्र द्वितीयापि न स्यादिति वाच्यम्। तद्विधाने लक्ष्यानुरोधेन व्यक्तिपक्षस्याश्रयणात्। साध्वसाधुप्रयोगे च॥ साधुः कृष्णो मातरि असाधुर्मातुले। अत्र साधुत्वासाधुत्वयोर्मात्रादिविषयत्वेपि क्रियाया अभावेनाधिकरणत्वाभावाद्वचनम्। साधुनिपुणाभ्यामित्येव सिद्धे अनर्थार्थमत्र साधुग्रहणम्। तेन तत्त्वकथनेपि भवति। सूत्रे अर्चाग्रहणन्तु निपुणार्थम्। साधुग्रहणन्तु तत्र वार्त्तिकं दृष्ट्वा सूत्रस्याप्रवृत्तेरिति ध्येयम्। अर्हाणां कर्तृत्वे अनर्हाणामकर्तृत्वे तद्वैपरीत्ये च। सत्सु तरत्सु असन्त आसतइत्यादि। यद्यपीदं यस्यचभावेनेत्येव सिद्धम्। तथापि लक्ष्यलक्षणभावाविवक्षायामपि यथा स्यादिति वचनमित्याहुः। निमित्तात्कर्मयोगे॥ निमित्तमिह फलम्। तद्वाचिनः सप्तमी स्यात्। यदि तस्य कर्मणा सह योगो योगविशेषः संयोगसमवायात्मकः। चर्मणि द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्। केशेषु चमरीं हन्ति सीम्निपुष्कलको हतः॥ चर्मफलकं द्वीपिकर्मकं हननमित्यर्थः। अत्र हेतुतृतीया प्राप्ता। तत्र हि फलमपि हेतुशब्देन गृह्यते। अध्ययनेन वसतीत्यादिसिद्धयइति प्रत्यय इति सूत्रे कैयटे स्थितम्। अत्र द्वीपिचर्मणोः समवायः संबन्धः। चमरशब्दाज्जातिलक्षणो ङीष्। पुष्कलकः शङ्कुः। ससीम्नि सीम-

ज्ञानार्थं हतो निहतः निर्खत इत्यर्थः। निहन्यमानेन शङ्कुना सह सीम्नः संयोगः संबन्ध इति हरदत्तादयः। दुर्गवाक्यप्रबोधे तु कुलचन्द्रस्त्वाह। सीमा अण्डकोशः पुष्कलको गन्धमृगः। उक्तं च मेदिनीकोशे, सीमा घाटास्थितिक्षेत्रेष्वण्डकोशेषु च स्त्रियामिति। अथ पुष्कलको गन्धमृगे क्षपणकीलयोरिति च। कर्मयोगे किम्। वेतनेन धान्यं लुनाति ॥

यस्य च भावेन भावलक्षणम् ॥ यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमी स्यात्। निर्ज्ञातकाला क्रिया अनिर्ज्ञातकालायाः क्रियायाः कालपरिच्छेदकत्वात् लक्षणमित्युच्यते। गोषु दुह्यमानासु गतः। एवं देशपरिच्छेदिकापि सति गुणे द्रव्यत्वमस्ति ॥

षष्ठीचानादरे ॥ अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः। इह सूत्रे अनादरइति पूर्वेण सत्सप्तमी। अनादरे सति यो भावं लक्षयतीति। तथाच तदाधिक्यं फलितम्। रुदति रुदतो वा प्राव्राजीत्। रुदन्तं पुत्रादिकमनादृत्य सन्यस्तवानित्यर्थः ॥

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ॥ एतैः सप्तभिर्योगे षष्ठीसप्तम्यौ स्तः ॥ षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं वचनम्। गवां गोषु वा स्वामी, ईश्वरो वेत्यादि। दायमादत्ते इति दायादः। सोपसर्गादप्यत एव निपातनात्कः। गवामित्येतत्तु यद्यपि समुदायस्य विशेषणं तथापि दीयतइति दाय इति व्युत्पत्त्या अवयवार्थभूतमंशं स्पृशत्येव। तेन गवात्मकस्यांशस्यादातेति फलितोर्थः। गवां प्रसूतः। गाः एवानुभवितुं जात इत्यर्थः ॥

आयुक्तकुशलाभ्यां चासेवायाम् ॥ आभ्यां योगे षष्ठीसंप्त-

म्यौ स्त आसेवायां गम्यमानायाम्। आसेवा तात्पर्यम्। आयुक्तो व्यापारितः। कुशलो निपुणः। आयुक्तः कुशलो वा हरिभजनस्य हरिभजने वा। आसेवायां किम्। आयुक्तो गौः शकटे। ईषदुद्युक्त इत्यर्थः॥

यतश्च निर्द्धारणम्॥ जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्द्धारणं, यतो निर्द्धारणं ततः षष्ठीसप्तम्यौ स्तः। नृणां नृषु वा ब्राह्मणः श्रेष्ठः। गवां गोषु वा कृष्णा बहुक्षीरा। गच्छतां गच्छत्सु वा धावन् शीघ्रः। अमीषां छात्राणां देवदत्तः पटुः॥

पञ्चमी विभक्ते॥ विभागो विभक्तं निर्द्धार्यमाणस्य यत्र भेद एव न तु शब्दोपात्तसामान्यरूपाक्रान्तता तत्र निर्द्धारणाश्रयात् पञ्चमी स्यात्। माथुराः पाटलिपुत्रकेभ्य आढ्यतराः। न ह्यत्र गवां कृष्णेत्यादिष्विव सामान्यविशेषभावः किन्तु शब्दोपात्तधर्मयोर्विरोध एव। इदञ्च सूत्रं बुद्धिकल्पितमपायमाश्रित्यापादानप्रकरणे प्रत्याख्यातम्। आह च। बुद्ध्या समीहितैकत्वात् पञ्चालान् कुरुभिर्यदा। पुनर्विभजते वक्ता तदापायः प्रतीयतइति॥

साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः॥ आभ्यां योगे सप्तमी स्यादर्चायां गम्यमानायां न तु प्रतेः प्रयोगे। मातरि साधुर्निपुणो वा। पुण कर्मणि शुभे। अस्मान्निपूर्वादिगुपधलक्षणः कः। अर्च पूजायामस्माद्धौवादिकाद्गुरोश्चहल इत्यप्रत्ययः। चौरादिकान्तु ण्यासश्रन्थेति युच् स्यात्। अर्चायां किम्। निपुणो राज्ञो भृत्यः। इह तत्त्वकथने तात्पर्यम्। साधुशब्दप्रयोगे त्वनर्चायामपि सप्तमी भवत्येव। साध्वसाधुप्रयोगे चेति वार्त्तिकादिति प्रागेवोक्तम्। अप्रत्यादिभिरिति वक्तव्यम्॥ नेह। साधुर्निपुणो वा मातरम्प्रति पर्यनुवा॥

प्रसितोत्सुकाभ्यां तृतीया च ॥ आभ्यां योगे तृतीया स्याच्चात्सप्तमी । प्रसित उत्सुको वा हरिणा हरौ वा । तत्परे प्रसितासक्तावित्यमरः । उत्सुकसाहचर्यात्प्रसितोपि तत्पर एवेह गृह्यते तेन प्रकर्षेण सितः शुक्ल इत्यर्थे न भवति ॥

नक्षत्रे च लुपि ॥ नक्षत्रे प्रकृत्यर्थे सति यो लुप्संज्ञया लुप्यमानस्य प्रत्ययस्यार्थस्तत्र वर्तमानात्तृतीया सप्तम्यौ स्तोधिकरणेर्थे । मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् ॥ मूले श्रवणे इति वा । नक्षत्रेण युक्तः काल इत्यणो लुबविशेषइति लुप् । अधिकरणे किम् । पुष्यः । पुष्यं प्रतीक्षते । पुष्याय स्पृहयति । अत्र केचित् सूत्रे पञ्चम्यर्थे सप्तम्यौ । लुबन्तान्नक्षत्रवाचिन इति व्याचख्युः तेषां लुबन्तविशेषणान्न स्यात् , उत्तराभ्यां फाल्गुनीभ्यां नोत्तराभ्यां गच्छेदिति यथेति हरदत्तः ॥

इति श्रीशब्दकौस्तुभे द्वितीयस्याध्यायस्य
तृतीयपादे द्वितीयमान्हिकम् ॥

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा ॥ प्रातिपदिकार्थमात्रे लिङ्गमात्रादिषु च प्रथमा स्यात् । द्वन्द्वान्ते श्रुतत्वात्प्रत्येकं मात्रशब्दः सम्बध्यते । स चावधारणे । मात्रं कार्त्स्न्येवधारणइत्यमरः । प्रातिपदिकार्थादीन्येव तन्मात्रमित्यस्वपदविग्रहः । मयूरव्यंसकादयश्चेति समासः । प्रातिपदिकार्थः सत्ता । उक्तं हि । तस्यां सर्वे शब्दा व्यवस्थिता इति । तां प्रातिपदिकार्थे च धात्वर्थे च प्रचक्षते इति च ॥ उच्चैः । नीचैः । अत्र हि परिमाणविशेषोपहितं सत्तामात्रं प्रतीयते इत्याहुः । अन्ये तु नियतोपस्थितिकः प्रातिपदिकार्थ इत्याहुः । अस्मिन्पक्षे वृक्षः कुड्यं भित्तिरित्यादीनां नियतलिङ्गानां प्रातिपदिकार्थमात्रे प्रथमेत्येव सिद्धम् । लिङ्गमात्रइति तु तटस्तटीतटमित्याद्यर्थम् । न

ग्रत्र पुंस्त्वादि नियतोपस्थितिकम् । अतः लिङ्गमात्राधिक्येपि विधीयते । परिमाणमात्रे द्रोणो व्रीहिः । इह हि द्रोणलक्षणं यत्परिमाणन्तत्परिच्छिन्नो व्रीहिरित्यर्थः । प्रकृत्यर्थस्य द्रोणस्य प्रत्ययार्थे परिमाणे अभेदेन संसर्गेण विशेषणता प्रत्ययार्थश्च व्रीहिषु परिच्छेद्यपरिच्छेदकभावेन संसर्गेण विशेषणमिति बोध्यम्। वचनमात्रे, एकः द्वौ बहवः। वचनं सङ्ख्या। तथैव प्राचां व्यवहारात् । तत्र प्रकृत्या उक्तायामपि सङ्ख्यायां यथा स्यादित्येतदर्थमिदं वचनम् । इह सूत्रे अर्थलिङ्गयोः प्रथमेत्येतावदेवावश्यकम् । इतरत्तु व्यर्थम् । तथाहि । प्रातिपदिकग्रहणं तावद्व्यर्थम् । ङ्याप्प्रातिपादिकाद्धि स्वादयो विधीयन्ते । तत्रार्थे इत्यपेक्षायां यस्मात्स्वादिविधिस्तदर्थ इति लभ्यते एव। परिमाणमप्यनर्थकं, गौर्वाहीक इत्यादाविव मुख्यार्थमात्रे प्रथमायां सत्यां पदान्तरसमभिव्याहारेण गौणार्थप्रतीत्युपपत्तेः । वाहीके गोत्वस्येव व्रीह्यादौ द्रोणत्वादेरारोपसंभवात् । एवं वचनग्रहणमपि व्यर्थम् । न केवला प्रकृतिः प्रयोक्तव्येति प्रत्ययः परश्चेति सूत्रे वक्ष्यमाणतया प्रत्ययस्यावश्यकत्वात् । अनन्वितवचनप्रयोगापेक्षया अनुवादकप्रयोगस्यैव न्याय्यत्वात् । मात्रग्रहणमपि व्यर्थम् । सम्बोधनेचेति ज्ञापकेन कर्माद्याधिक्ये प्रथमाया अप्रवृत्तेः । ननु वीरः पुरुष इत्यादौ अभेदसंसर्गस्याधिकस्य भानात् प्रथमा न स्यादिति चेन्न । संसर्गस्य वाक्यार्थत्वेन बहिरङ्गत्वात् प्रथमप्रवृत्तसंस्कारबाधानुपपत्तेः। वार्त्तिककारस्त्वाह । अभिहिते प्रथमेति। वृक्षस्तिष्ठति कृतः कटः शत्यः प्राप्तोदको ग्राम इत्यादौ तिङादिभिरभिहिते कर्त्रादौ प्रथमा भवतीत्यर्थः । एवञ्च वीरः पुरुष इत्यादौ सत्यप्याधिक्यअभिहितत्वात् प्रथमा सिद्धेति । न च वृक्षः पुष्प

इत्यादावव्याप्तिः। अस्तीत्यध्याहारात्। अत्र भाष्यम्। अभिहितेनाभिहितेतिप्रसङ्ग इति। तथाहि। प्रासादआस्तइत्यत्र सदिक्रियायाश्चासीक्रियायाश्चैकमधिकरणं प्रासादाख्यं तच्च सदेरुत्पन्नेन घञाभिहितम्। आसेर्लटा त्वनाभिहितम्। तत्र सप्तमीं बाधित्वा परत्वात्प्रथमा स्यात्। अतिङ्समानाधिकरणे प्रथमेत्युच्येत। तदपि न। देवदत्तः पचतीत्यादिषु तिङां दौर्लभ्यापत्तेः। तथाहि। देवदत्तः पच लट् इति स्थिते यावत्तिङो न कृतास्तावत्तिङ्समानाधिकरण्याभावात् प्रथमैवेति नियमो न प्रवर्तेत। तथा च देवदत्तशब्दादविशेषोत्पन्नाः सर्वे स्वादयः सन्त्येवेति शतृशानचौ स्याताम्। तन्निमित्तभूतस्याप्रथमान्तेन सामानाधिकरण्यस्य सत्वात्। तिङ्विधेस्तु लिङादिष्ववकाशः। स एव प्रथमैवेति नियमस्यापि विदोलटोवेत्यादेस्तु विदिमात्रप्रयोगे चरितार्थता। यथा वेत्थ वेदेत्यादि। स्थानिन्यपि मध्यमोत्तमयोर्विधानादर्थात्प्रकरणाद्वा निर्ज्ञातस्य प्रयोगानावश्यकत्वाच्च। पाक्षिकश्चायं दोषः। शत्रादिविधौ हि अप्रथमेत्यादिः पर्युदासः प्रसज्यप्रतिषेधो वेति द्वैतम्। तत्र द्वितीये उक्तदोषस्यासङ्गतेः प्रथमाया अपि सत्वेन शत्रादिनिषेधसम्भवात्। यत्तु भाष्ये पर्युदासपक्षे विभक्तिनियमे दोषो नेत्युक्तन्तच्चिन्त्यम्। तत्र हि द्वितीया कर्मण्येवेत्यादिं वचनव्यक्त्याश्रयणात् देवदत्ते द्वितीया मा भूत्। षष्ठी तु स्यादेव। सा हि शेष एवेति नियम्यते। यत्र च विभक्त्यन्तरस्य नियमो न प्रवृत्तः स शेषः। ततश्च तिङः सामानाधिकरण्यात् प्राक् शेषलक्षणषष्ठ्यां सत्यां दुर्वारौ शतृशानचाविति॥

सम्बोधने च॥ इह प्रथमा स्यात्। हे राम॥

सामन्त्रितम् ॥ सम्बोधने या प्रथमा तदन्तं शब्दरूपमामन्त्रितसंज्ञं स्यात् । यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं दुर्लभं तथापि महासंज्ञाकरणाल्लभ्यते आमन्त्रणमामन्त्रितम् । अभेदोपचारात्तत्साधने शब्दे वृत्तिः । विभक्त्यन्तेन चामन्त्र्यते न तु केवलया विभक्त्येति । संज्ञाप्रदेशाः । आमन्त्रितस्य चेत्यादयः । सेति किम् । प्रातिपदिकार्थसूत्रेणापि या सम्बोधने प्रथमा तदन्तस्यापीयं संज्ञा यथा स्यात् । हे पचन् हे पचमान । इह हि शतृशानचोः सम्बोधने विधानादभिहितः सोर्थेन्तर्भूत इति पूर्वेणैव प्रथमा । यदि तु विभक्तिरहितयोस्तयोः कर्त्राद्यभिधानएव सामर्थ्यं यथा द्विर्वचनरहितस्य लोटः, तेनेहापि सम्बोधनेचेति पक्षः । तदा सेति मास्तु । अनन्तरस्य विधिर्वेति प्रवृत्तेपि रूपनिष्पत्तेः ॥

एकवचनं सम्बुद्धिः ॥ आमन्त्रितप्रथमाया यदेकवचनं तत्सम्बुद्धिसंज्ञं स्यात् । हेपटो । सम्बुद्धौचेति वर्तमाने ह्रस्वस्य गुणः । सु सम्बुद्धिरिति वाच्ये एकवचनग्रहणमेकोर्थ उच्यते येन तावन्मात्रस्य प्रत्ययस्य संज्ञार्थम् । अन्यथा प्रक्रमाभेदाय तदन्तस्य स्यात् ॥

षष्ठी शेषे ॥ कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः शेषस्तत्र षष्ठी स्यात् । राज्ञः पुरुषः । ननु प्रत्ययनियमपक्षे शेषएवेत्यवधारणार्थमस्तु नाम शेषग्रहणम् । अर्थनियमपक्षे तु षष्ठ्याश्चान्यस्य च प्राप्तौ षष्ठ्येवेति नियमसम्भवात्किन्तेनेति चेन्न । उत्तरार्थमवश्यकर्तव्यस्य शेषग्रहणस्य स्पष्टार्थमिहैव ग्रहणम् । न चाप्रधानार्थं शेषग्रहणम् । तेन द्वयोः पर्यायेण वा न स्यादिति वाच्यम् । प्रत्ययार्थस्य प्राधान्येनाप्रधानादेव षष्ठ्या न्याय्यत्वात् । अप्रकृत्यर्थं पुरुषं प्रति तु राज्ञ

इति षष्ठ्यर्थस्य विशेषणत्वमुचितमेवेति दिक् ॥

ज्ञोविदर्थस्य करणे ॥ जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात् । समासनिवृत्त्यर्थमिदं प्रकरणमिति ननिर्धारणइति सूत्रे प्रतिपदविधाना चेति वार्तिकस्य प्रत्याख्यानावसरएवोपपादितम् । सर्पिषो ज्ञानम् । वस्तुतः करणीभूतं यत्सर्पिस्तत्सम्बन्धिनी प्रवृत्तिरित्यर्थः । ज्ञानपूर्विकायां प्रवृत्तौ जानातेर्लक्षणा ॥

अधीगर्थदयेशां कर्मणि ॥ एषां कर्मणि शेषे षष्ठी स्यात् । इङ् स्मरणे, ककार इहैव विशेषणार्थः । अधिशब्दोच्चारणन्तु सामान्यापेक्षज्ञापकं इङ्किावध्युपसर्गे न व्यभिचरत इति । अत एव स्मृत्यर्थदयेषामिति नोक्तम् । सूत्रभङ्गपक्षेपि हि कित्वं कर्त्तव्यमेव इण्वदिक इत्यत्र विशेषणार्थम् । एरित्युक्तेः कटीगतावित्यत्र प्राप्तिष्टस्यायतेर्ग्रहणापत्तेः । मातुः स्मरणम् । सर्पिषोदयनमीशनं वेत्यादिवृत्त्यादिग्रन्थेष्विह प्रकरणे उदाहरणं प्रत्युदाहरणञ्च यद्यपि तिङन्तं दृश्यते तथापि तत्सर्वमुपलक्षणतया ऽभियुक्तैर्व्याख्यातमेव ॥

कृञः प्रतियत्ने ॥ करोतेः कर्मणि शेषे षष्ठी स्यात् गुणाधाने । एधो दकस्योपस्करणम् । एधाश्चोदकञ्चेति विग्रहे जातिरप्राणिनामित्येकवद्भावः । उपात्प्रतियत्नेत्यादिना सुट् ॥

रुजार्थानां भाववचनानामज्वरेः । भावकर्तृकाणां ज्वरिवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात् । चौरस्य रोगस्य रुजा । रुजो भङ्गे । भिदादिपाठात्प्रकृतसूत्रएव निपातनाद्वाङ् । रुजाशब्दो व्याधौ रूढः । सूत्रे भाववचनानामिति कर्तरि ल्युट् । प्रकृत्यर्थस्तु न विवक्षितः । तर्हि भावो वक्ता सम्भवति । तस्मात् प्रत्ययस्य साधुत्वनिर्वाहाय वचिर्बोध्यः ।

अज्वरिसन्तापोरिति वाच्यम् ॥ रोगस्य चौरज्वरः । चौरसन्तापो वा । रोगकर्तृकञ्चौरसम्बधि ज्वरादिकमित्यर्थः । तपेर्हेतुमण्ण्यन्तादेरच् । इह समासो भवत्येव ॥

आशिषि नाथः ॥ आशीरर्थस्य नाथतेः शेषे कर्मणि षष्ठी स्यात् । सर्पिषो नाथनम् । आशिषीति किम् । माणवकनाथनम् । तत्सम्बन्धिनी याञ्चेत्यर्थः । यद्यपि कर्मत्वविवक्षायां कर्तृकर्मणोरिति यदा षष्ठी तदा समासो भवत्येव तथापि तत्र कृदुत्तरपदप्रकृतिस्वरः । समासान्तोदात्तत्वं तु याञ्चादावेव न त्वाशिषीति निष्कर्षः ॥

जासिनिप्रहणनाटक्राथपिषां हिंसायाम् ॥ हिंसार्थानामेषां शेषे कर्मणि षष्ठी स्यात् । जसु ताडने, जसु हिंसायामिति च चुरादिः, तस्येदं ग्रहणं न तु दैवादिकस्य जसु मोक्षणइत्यस्य । जासीति निर्देशात् हिंसायामिति वचनाच्च । चौरस्योज्जासनम् । निप्राभ्यामुपसृष्टो हनो निप्रहणः । हन्तेरत्पूर्वस्येति णत्वम् । निप्रौ संहतौ विपर्यस्तौ व्यस्तौ च । चौरस्य निप्रहणनं प्रणिहननं निहननं प्रहणनं वा । प्रणीत्यत्र नेर्गदेति णत्वम् । नट अवस्यन्दने चुरादिः । नट नृत्तावित्यस्य तु घटादेरग्रहणम् । दीर्घनिर्देशात् । चौरस्योन्नाटनम् । क्रथ हिंसायामिति घटादौ पठ्यते तस्येह निपातनाद्वृद्धिरिति वृत्तिकारः । अत एव क्रथ हिंसायामिति युजादौ स्वरितेतं वदन् देवस्तत्रैवानुदात्तेतं पठन् शाकटायनश्च मतान्तरपरतया नीतो माधवादिभिः । चौरस्य क्राथनम् । मित्वन्तु चिण्णमुलोरिति दीर्घविकल्पार्थम् । अक्राथि अक्राथि । क्रथं क्रथम् । क्राथं क्राथम् । इह हि निपातनं बाधित्वा परत्वादीर्घविकल्पः । यत्तु न्यासकृतोक्तं क्राथीति विकृतनिर्देशात् मित्वेपि वृद्धिर्यत्र तत्रैव षष्ठी । चक्रन्ते तु वृद्ध्यभावात् चोरमचिक्रथदिति । तन्मन्दम् । समास-

निवृत्तये प्रकरणमिदमिति सिद्धान्तात् तिङन्तानामनुदाहरणत्वात् चङन्तेपि शेषषष्ठ्या दुरपन्हवत्वादिति माधवः। न च क्राथेरेव शेषे षष्ठी न तु ह्रस्वस्येति व्याख्यानात्प्रकरणं भित्वा प्रकृते तिङन्तमप्युदाहरणमस्त्विति न्यासस्याशयो वाच्यः। एवमपि द्वितीयाया दुर्लभत्वात् प्रक्रमभेदे मानाभावाच्चायद्यपि हरदत्तेनोक्तं घटादिपाठः घटादयः षित इति आतिदेशिकषित्वे अङ् यथा स्यादित्येतदर्थ इति। तदपि मन्दम्। घटादयः षित इति हि मध्ये सूत्रितम्। तेन पूर्वेषामेव षित्वं न तु परेषामपि, परश्चायमिति दिक्। वृषलस्य पेषणम्। हिंसायां किम्। धानापेषणम्। अन्तोदात्तः शेष। इत्यनुवृत्तेः कर्मत्वाविवक्षायां द्वितीयैव। तथा च भट्टिः। अम्बो द्विजान्देवयजी जिहन्म इति। निजौजसोज्जासयितुं जगद्द्रुहामिति माघस्तु शेषत्वे बोध्यः॥

व्यवहृपणोः समर्थयोः॥ शेषे कर्मणि षष्ठी स्यात्। द्यूते क्रयविक्रयव्यवहारे चानयोस्तुल्यार्थता बोध्या। शतस्य व्यवहरणं पणनं वा। शतसम्बधी क्रयविक्रयरूपेण विनियोगो देवनं वेत्यर्थः। समर्थयोः किम्। शलाका व्यवहारः। गणनेत्यर्थः। ब्राह्मणपणनम्। स्तुतिरित्यर्थः। आयादयआर्धधातुकेवेति आयस्य विकल्पः॥

दिवस्तदर्थस्य॥ इह शेषे इति न सम्बध्यते। उत्तरसूत्रद्वयारम्भात्। पूर्वसूत्रएव दिवेः पाठे तदर्थस्येति न कर्तव्यमिति यद्यपि लाघवं तथापि योगविभाग उत्तरार्थः। शेषासम्बन्धार्थश्च। व्यवहृपणिसमानार्थस्य दिवः कर्मणि षष्ठी स्यात्। इह त्रिसूत्र्यां तिङन्तमप्युदाहरणम्। शतस्य दीव्यति। तदर्थस्य किम्। ब्राह्मणं दीव्यति॥

विभाषोपसर्गे॥ पूर्वयोगापवादः। शतस्य शतं वा प्रतिदीव्यति॥

द्वितीया ब्राह्मणे ॥ ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्मणि द्वितीया वा स्यात् । षष्ठ्यपवादः । गामस्य तदहः सभायां दीव्येयुः । सोपसर्गस्य छन्दसि व्यवस्थितविभाषयापि सिद्धे निरुपसर्गार्थ आरम्भः ॥

प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने ॥ इष्यतेर्दैवादिकस्य गत्यर्थस्य लोण्मध्यमपुरुषैकवचनं प्रेष्येति तत्साहचर्याद् ब्रुविरपि तथाभूतो गृह्यते । देवतासम्प्रदानं यस्यार्थस्य तत्र वर्तमानयोः प्रेष्यब्रूहीत्येतयोः कर्मणोर्हविर्विशेषस्य वाचकाच्छब्दात् षष्ठी स्यात् । अग्नये छागस्य हविषो वपायामेदसः प्रेष्यानुब्रूहि वा । प्रेष्यब्रुवोः किम् । अग्नये छागं हविर्वपामेदो जुहुधि । हविषः किम् । अग्नेये गोमयानि प्रेष्य । देवतासम्प्रदाने किम् । माणवकाय पुरोडाशान्प्रेष्व । हविषः प्रस्थितत्वेन विशेषणे प्रतिषेधो वक्तव्यः ॥ इन्द्राग्निभ्यां छागं हविर्वपाम्मेदः प्रस्थितं प्रेष्य । इह सूत्रे शेषग्रहणं न सम्बध्यते । तिङन्तेन समासस्याप्रसक्तत्वात् । इदञ्च भाषायामपि प्रवर्तते । उत्तरत्र छन्दोग्रहणात् ॥

चतुर्थ्यर्थे बहुलं छन्दसि ॥ षष्ठी स्यात् । पुरुषमृगश्चन्द्रमसे गोधाकालकादार्वाघाटस्ते वनस्पतीनाम् । वनस्पतिभ्य इत्यर्थः । बहुलग्रहणाच्चन्द्रमसश्चतुर्थी । षष्ठ्यर्थे चतुर्थीत्यपि वक्तव्यम् ॥ या खर्वेण पिबति तस्यै खर्वः । व्यत्ययवचनात्सिद्धम् ॥

यजेश्च करणे ॥ इह छन्दसि बहुलं षष्ठी स्यात् । घृतस्य घृतेन वा यजते ॥

कृत्वोर्थप्रयोगे कालेधिकरणे ॥ इह षट्सूत्र्या विच्छिन्नमपि शेषग्रहणमनुवर्त्तते । उत्तरसूत्रे कर्मग्रहणात् । कर्त्तरिचेति हि नोक्तम् । शेषसम्बद्धं कर्मग्रहणं मानुवृत्तदिति प्राञ्चः । वस्तुतो व्याख्यानमेव शरणम् । सन्निहितस्याधिकरणस्य निवृत्तये वा कर्मग्रहण-

सम्भवात् । पञ्चकृत्वोह्नो भोजनम् । द्विरह्नो भोजनम् । शेषे किम् । अन्यथा विधिरेवायं स्यात् । तथा च द्विरह्न्यधीतइति सप्तमी न स्यात् । षष्ठ्या बाधात् ॥

कर्तृकर्मणोः कृति ॥ शेषइति निवृत्तम् । कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात् । भवतः शायिका । अपां स्रष्टा । कर्तृकर्मणोः किम् । शस्त्रेण भेत्ता । स्यादेतत् । इह कर्तृकर्मभ्यां क्रिया आक्षिप्यते । तद्वाचीह धातुरेव । धातोश्च द्वये प्रत्ययाः । कृत्तिङश्च । तत्र तिङः प्रयोगे नलोकेति प्रतिषेधेन भाव्यम् । ततश्च परिशेषात् कृद्योगएव षष्ठी भविष्यति तत् किं कृद्ग्रहणेन । मैवम् । तद्धितान्तस्य वारणीयत्वात् । यथा कृतपूर्वीकटमिति । ननु कृतः कटः पूर्वमनेनेत्यस्मिन्विग्रहे क्तस्य कर्मणि विधानात्तेनैव कर्मणोऽभिहितत्वात् द्वितीयया न भाव्यम् । एवं तदपवादभूतया षष्ठ्यापि । इहाप्यनभिहिताधिकारात् । किञ्च कृतशब्दस्य कटसापेक्षतया समासो दुर्लभः । एवं तद्धितोपीति चेत् । अत्रोक्तं हरिणा । विशेषकर्मसम्बन्धे निर्भुक्तेपि कृतादिभिः । विशेषनिरपेक्षोन्यः कृतशब्दः प्रवर्तते ॥ अकर्मकत्वे सत्येवं क्तान्ते भावाभिधायिनि । ततः क्रियावता कर्त्रा योगो भवति कर्मणाम् ॥ अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः । क्रिया सम्बध्यते तद्वत् कृतपूर्व्यादिषु स्थितेति ॥ अस्यार्थः । कृतादिभिः शब्दैः कटादिसमभिव्याहारात् विशिष्टकर्मसम्बन्धे निष्कृष्य भुक्तेपि अनुभूतेपि कृतः पूर्वंकटोनेनेत्यवस्थायामिति भावः । तस्यामवस्थायां वृत्तिविरहात् । कर्मसामान्यवचनोन्य एव कृतशब्दः प्रवर्तते वृत्तिं लभते । अविवक्षितकर्मतायां नेह पच्यतइत्यादावपि कर्मसामान्ये प्रत्ययाभ्युपगमादिति भावः । अविवक्षितकर्मणां भावे प्रत्यय इति म-

तान्तरमाह, अकर्मकत्वइति । ननु कर्मसामान्ये भावे वा क्तप्रत्यये कृते सापेक्षत्वाभावात्सुप्सुपेति समासे कृते पूर्वादिनिः सपूर्वाच्चेति कर्त्तरि इनिप्रत्ययोस्तु नाम । कटस्य तु प्रथमपक्षे क्तेनाभिधानं दुर्वारम् । यथा शक्यञ्च क्षुदुपहन्तुमित्यत्र क्षुधः कृत्यप्रत्ययेन। मैवम्। तद्धितार्थेनैकार्थीभूतस्य कृतशब्दार्थस्य निष्कृष्य कटेन सम्बन्धाभावात्। तदेतदाह,ततः क्रियावतेति । नन्वेवं क्रिययापि योगाभावे कथं द्वितीयेत्याशङ्क्याह । अविग्रहेति । विशिष्य ग्रहो ग्रहणं तद्रहितामाधान्येनागृह्यमाणापीत्यर्थः । अयं भावः । गुणभूतयापि क्रियया कारकाणां सम्बन्धो दृश्यते । यथा कटं कृतवानिति । कृतपूर्वीशब्दश्चायं पूर्वं कृतमनेनेत्यस्मिन्नर्थे व्युत्पादितः । पूर्वं कृतवानित्यनेन समानार्थः सम्पद्यते । तत्र करोतिक्रियापेक्षमस्ति कटस्य कर्मत्वम् । अनभिहितञ्च तत् । अतो ऽसति कृद्ग्रहणे षष्ठी स्यादेवेति स्थितम् । स्यादेतत् । ओदनः पच्यतेतमां, गुरुर्धरित्रीक्रियतेतरान्त्वयेत्यादावपि ओदने धारित्र्यादेः कर्मणः क्रिययैव योगाद् द्वितीयैव स्यात्। क्रियाविशेषणीभूतेन लकारार्थेन कर्मान्वयश्चेत् क्तार्थेनाप्यस्तु । क्रियार्थाः कारकेष्विव शक्तेरपि शक्तिमत्युत्थिताकाङ्क्षकत्वाविशेषात्। किञ्चास्तु नाम कथञ्चित् क्तार्थपरित्यागेन वृत्तिः । राजपुरुषादौ संख्याविशेषस्य मासजातादौ गुणप्रधानभावादेश्च बहुशस्त्यागदर्शनात् । तथापि कृद्ग्रहणं व्यर्थमेव। नलोकेति निष्ठायोगे निषेधसिद्धेः। निष्ठान्तधातूपात्तक्रियायोगे न भवतीति हि तदर्थः । ग्रामं गतवानित्यादावपि कारकाणां क्रिययैवान्वयात् । न च पाचयति यज्ञदत्तो देवदत्तेनेत्यत्र णिच्प्रकृत्यर्थं प्रति कर्तुः प्रयोज्यात्षष्ठीं वारयितुं कृद्ग्रहणम्। णिच् तु न कृदिति वाच्यम्। लयोगे नेत्येव निषेध-

सिद्धेः। लप्रकृत्या लान्तपदेन वा या क्रियोपात्ता तद्योगे नेत्यर्थात्। सा च क्रिया गुणभूता प्रधानभूता वेत्यत्र नाग्रहः। गौणमुख्यन्यायस्तु नाश्रीयते। लक्ष्यानुरोधात्। स्वरितेनाधिकः कार इति व्याख्यानाच्च। अत एव तत्र तृतीया लभ्यते। भेदिका देवदत्तस्य यज्ञदत्तस्य काष्ठानामित्यत्रोभाभ्याङ्कर्तृभ्यां षष्ठ्यप्यत एव। तस्माद्व्यर्थं कृद्ग्रहणमिति। अत्राहुः। कृत्येव यथा स्यात्तद्धिताधिक्ये मा भूदिति कृद्ग्रहणम्। व्याकरणं प्राज्ञः। प्रज्ञादिभ्यश्चेति स्वार्थेण् एवञ्च वदतां मते ओदनस्य पाचकतम इत्यत्रापि षष्ठी नेति लभ्यते। कृतपूर्वीतिवत्कर्तव्यपूर्वीत्यादेर्भ्युपगमे तु तव्यदाद्यन्तेन समासादिनौ कृते कृद्ग्रहणव्यावर्त्यतापि सम्भवति भाष्यं त्विहोदासीनमेवेत्यभियुक्तप्रयोगा अन्वेषणीयाः। यन्तार्हं धयै रामोदमुत्तममिति भट्टिः। उच्यते। अनित्येयं षष्ठी। तदर्हमिति निर्देशात्। द्विकर्मकेभ्यस्तु कर्तरि कृति कृते प्रधाने नियताषष्ठी गुणे तूभयथा भवेदित्यकथितसूत्रएवोक्तम्॥

उभयप्राप्तौ कर्मणि॥ उभयोः प्राप्तिर्यस्मिन्कृति तत्र कर्मण्येव षष्ठी स्यात्। आश्चर्यो गवां दोहोऽगोपेन। अकाकारयोः प्रयोगे प्रतिषेधो नेति वक्तव्यम्॥ भेदिका बिभित्सा वा रुद्रस्य जगतः। कथन्तार्हं क्तिना बाधा न भवतीति स्थागापापचोभावइति सूत्रे वृत्तिः। तथा सुटा सीयुटो बाधा न भवतीति सुट्तिथोरित्यत्र वृत्तिः। अत्र रक्षितः। अप्रत्ययादित्यकारप्रत्ययस्येह ग्रहणं प्राथम्यात्। बाधाशब्दे तु गुरोश्चहल इत्यकार इत्याह करणत्वविवक्षायां तृतीयेति वा बोध्यम्। शेषे विभाषा। स्त्रीप्रत्ययविषयमेवेदमित्येके। विचित्रा सूत्रस्य कृतिः पाणिनेः पाणिनिना वा। के चिदविशेषेण विभाषामिच्छन्ति। शब्दानामनुशासनमाचार्येणाचार्यस्य वा॥

क्तस्य च वर्तमाने ॥ वर्तमानार्थक्तस्य योगे षष्ठी स्यात्। नलोकेति निषेधस्यापवादः। राज्ञां मतो बुद्धः पूजितो वा। मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमाने क्तः। कथन्तर्हि नपुंसके भावे क्तस्य योगे षष्ठी। छात्रस्य हसितमिति शेषविज्ञानात्सिद्धम्। कर्तृत्वविक्षायां तृतीयैव। छात्रेण हसितमिति ॥

अधिकरणवाचिनश्च ॥ क्तस्य योगे षष्ठी स्यात्। इदमेषां शयितम्। इह कर्तरि षष्ठी सकर्मकेभ्यस्त्वधिकरणे क्ते कृते कर्तृकर्मणोर्द्वयोरपि षष्ठी। अनभिहितत्वाविशेषात्। इदमेषां भुक्तमोदनस्य। उभयप्राप्तौ कर्मणीत्ययं तु नियमः कर्तृकर्मणोः कृतीत्यस्या एव प्राप्तेः। इह गत्यर्थेषु धातुष्वयं भवति। इदमेषां गतमित्यधिकरणे। इदमेते गता इति कर्तरि। इदमेभिर्गतमिति कर्मणि। इहैभिर्गतमिति नपुंसके भावे। कर्तृविवक्षाया इदमेषां गतमिति तत्रैव शेषविवक्षायाम् ॥

नलोकाव्ययनिष्ठाखलर्थतृनाम् ॥ जिघृक्षितरूपाविनाशप्रसङ्गात् तृनामिति णत्वं न कृतम्। एषां प्रयोगे षष्ठी न स्यात्। कर्तृकर्मणोः कृतीति प्राप्ता प्रतिषिध्यते। लादेशाः, ओदनं पचन् पचमानः पेचानः पेचिवान्। कथन्तर्हि बभ्रिर्वज्रं पपिः सोमं ददिर्गा इति। नहि किकिनौ लकारौ नापि तदादेशौ। नैष दोषः। किकिनौ लिट्चेत्यनेन लिट्कार्यातिदेशः क्रियते न तु लिट्संज्ञा। विशेषातिदेशे च सामान्यमप्यतिदिश्यतइति। उ, कटं चिकीर्षुः। कन्यामलंकारिष्णुः। उक, वाराणसीमागामुकः। कमेर्भाषायामनिषेधः ॥ लक्ष्म्याः कामुकः। अव्यय, कटं कृत्वा। तोसुन्कसुनोरप्रतिषेधः॥ पुरा सूर्यस्योदेतोराधयः। पुरा क्रूरस्य विसृपोविरप्शिन्। निष्ठा, ओदनं भुक्तवान्। देवदत्तेन कृतम्। खलर्थ, त्वया सुकरम्। ईषत्पानः सोमो भव-

ता। तृच्इति प्रत्याहारः शतृशानचावित्यारभ्य तृनो नकारात्। तेन शानन्प्रभृतीनामपि ग्रहणम्। सोमं पवमानः। पूङ्यजोः शानन्। नटमाध्नानः। ताच्छील्यादिषु चानश्। अधीयन्पारायणम्। इङ्धार्योरिति शता। तृन्, पाता सुतमिन्द्रो अस्तु सोमम्। द्विषः शतुर्वा। मुरस्य मुरं वा द्विषन्। सर्वत्र कारकषष्ठ्याः प्रतिषेधः। शेषे षष्ठी तु स्यादेव। ब्राह्मणस्य कुर्वन्। सत्यानुरक्ता नरकस्य जिष्णवः। छात्रस्य हसितम्। जनिकर्तुरित्यादि। इक्ष्वाकूणां दुरापेर्थे त्वदधीना हि सिद्धयः। अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयमिति च। यद्वा। इक्ष्वाकूणां सिद्धय इत्यन्वयो न तु इक्ष्वाकूणां दुरापइति। तथा वागधिपस्य विस्मयमित्यन्वयो न तु वागधिपस्य दुर्वचमिति दिक्। इह उश्च उकश्च ऊकाविति व्युत्पाद्य लुश्च ऊकौ चेति विग्रहीतव्यम्। ऊकारेण च कृतो विशेषणात्तदन्तविधिः। व्यपदेशिवद्भावात्केवलेनापि निषेधः॥

अकेनोर्भविष्यदाधमर्ण्ययोः। भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थे नश्च योगे षष्ठी न स्यात्। एधानाहारको व्रजति। व्रजङ्गामी। द्वितीयासमासप्रसङ्गे व्युत्पादितमेतत्। आधमर्ण्ये, शतं दायी। भविष्यदिति स्वर्यते। तेन भविष्यदधिकारविहितस्य ग्रहणान्नेह। वर्षशतस्य पूरकः। पुत्रपौत्राणां दर्शकः। अयं हि ण्वुल्तृचावित्यविशेषेण विहितो न तु तुमुण्वुलाविवद्भविष्यदधिकारस्थः। इह यथासंख्यं वारयितुं भाष्ये योगो विभक्तः। अकस्य भविष्यति, इत आधमर्ण्ये चेति॥

कृत्यानां कर्तरि वा॥ षष्ठी वा स्यात्। कर्तृकर्मणोःकृतीति नित्यं प्राप्ते विभाषेयम्। कर्तव्यमिदं कृष्णेन कृष्णस्य वा। कर्तरीति किम्। गेयो माणवकः साम्नाम्। भव्यगेयेति कर्तरि

यद्विधानादनभिहितं कर्म। इहापि भाष्ये योगविभागः कृतः। तद्यथा, कृत्यनाम्॥ उभयप्राप्तौ, नेत्यनुवर्तते। नेतव्या व्रजं गावः कृष्णेन। इह प्रधाने कर्मणि गवाख्ये कृत्यः। अप्रधानकर्मणः कर्तुश्च। कृत्येनानभिधानात्षष्ठी प्राप्ता निषिध्यते। ततः कर्तरि वा॥ षष्ठी स्यात्। अन्यत्सर्वं निवृत्तम्॥

तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्। तुल्यार्थैर्योगे तृतीया वा स्याच्छेषे। पक्षे षष्ठी। तुल्यः सदृशः समो वा कृष्णेन कृष्णस्य वा। अतुलोपमाभ्यां किम्। तुला उपमा वा कृष्णस्य नास्ति। कथन्तर्हि तुलां यदा रोहति दन्तवाससेति कालिदासः। स्फुटोपमं भूतिसितेन शम्भुनेति माघश्च। अत्राहुः। तोलनं तुला। अस्मिन्नेव सूत्रे णिलुगङोर्निपातनात्साधुरिति माधवः। उपमितिरुपमा। तत्र धात्वर्थं प्रति करणीभूतयोः दन्तवासःशम्भुशब्दयोस्तृतीया युक्तैव। यथा उपमीयतेनेनेत्यादौ। प्रकृतसूत्रं तु शेषे षष्ठ्यपवादभूततृतीयाविधायकं। नेह प्रवर्त्ततइत्यन्यदेतत्। यद्वा। सहयुक्तेप्रधानइति तृतीयास्तु। स्ववालभारस्य तदुत्तमाङ्गजैः समञ्चमर्येव तुलाभिलाषिण इत्यत्र यथा। उक्तं हि विनापि तद्योगं तृतीया। वृद्धौयूनेति निदर्शनादिति। तुल्यार्थैरित्यर्थग्रहणात् द्योतकानामिवादिशब्दानां योगे न गौरिव गवयः यथा गौस्तथा गवय इति। वेति वर्तमाने अन्यतरस्यां ग्रहणमुत्तरसूत्रे चकारेण स्वस्यानुकर्षणार्थम्। अन्यथा हि तृतीयैवानुकृष्येत। सन्निहितत्वात्॥

चतुर्थी चाशिष्यायुष्यमद्रभद्रकृशलसुखार्थाहितैः॥ सुखपर्यन्तानां द्वन्द्वाः। ततोर्थशब्देन बहुव्रीहिः। तथा च द्वन्द्वान्ते श्रूयमाणात्प्रत्येकमर्थशब्दः सम्बन्ध्यते। मद्रभद्रशब्दयोः पर्यायतया सूत्रेन्यतरो न पठनीयः। के चित्तु अर्थशब्दोपि पृथगेव निमि-

त्तम्। व्याख्यानाच्च सर्वत्रार्थग्रहणमित्याहुः। आशिषिगम्यमानायामेतैर्योगे शेषे चतुर्थी वा स्यात्। पक्षे षष्ठी। आयुष्यं चिरं जीवितं देवदत्ताय देवदत्तस्य वा भूयात्। एवं मद्रं भद्रं कुशलं निरामयं सुखं शं अर्थः प्रयोजनं हितं यथ्यं भूयादित्यादि। हितयोगे चतुर्थी वक्तव्येत्यस्य अनाशिषि चारितार्थत्वादाशिष्यनेन विकल्प एव। आशिषीति किम्। देवदत्तस्यायुष्यमस्ति॥

इति श्रीशब्दकौस्तुभे द्वितीयस्याध्यायस्य
तृतीये पादे तृतीयमान्हिकम्॥
समाप्तश्चायं पादः॥

द्विगुरेकवचनम्॥ वक्तीति वचनम्। बाहुलकात्कर्तरि ल्युट्। सामान्ये नपुंसकम्॥ समाहारद्विगुरेकार्थप्रतिपादकः स्यात्। तद्धितार्थेति सूत्रे हि भावसाधन एवंसमाहार इति स्थितम्। तथा च न्यायासिद्धमेतत्। कर्मसाधनताभ्रमं वारयितुमारभ्यते सनपुंसकमित्यस्य प्रवृत्त्यर्थं च। दृश्यते च भ्रमनिवृत्तयेपि सूत्रकृतो यत्नः। यथा उपकादिभ्योऽन्यतरस्याम द्वन्द्वइति। तत्र हि अद्वन्द्वइत्यस्य द्वन्द्वग्रहणं नानुवर्त्ततइत्यर्थो भाष्ये स्थितः॥

द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्॥ प्राण्यङ्गानां द्वन्द्व एकार्थः स्यात्। एवं तूर्याङ्गानां सेनाङ्गानाञ्च। पाणिपादम्। मार्दङ्गिकपाणविकम्। रथिकाश्वारोहम्। इह प्राणिसेनयोरङ्गं नामावयवः। तूर्यस्य तु अङ्गं नामोपकारकं बोध्यम्। मार्दङ्गिकेत्यादौ मृदङ्गवादनं शिल्पमित्यर्थे शिल्पमिति ठक्। पाणिपादमित्यादौ जातिरप्राणिनामित्येव सिद्धे व्यतिकरनिरासार्थं वचनम्। हस्त्यश्वं हस्त्यश्वायेत्यत्र तु सेनाङ्गत्वेपि परत्वात्पशुलक्षणो विकल्प इति विभाषावृक्षेत्यत्र भाष्यकैयटयोः स्थितम्।

अथ कथं रथवाजिपत्तिकरिणीसमाकुलमित्यत्र । नपुंसकह्रस्वत्वेन हि भाव्यम् । उच्यते । रथादिसहिताः करिण्य इति मध्यमपदलोपी समासो बोध्यः । यद्वा । रथश्च वाजी चेत्यादि विग्रहः । जातावेकवचनम् । फलसेनादीनां बहुप्रकृतिरिति वक्ष्यमाणत्वान्नैकवद्भावः । एतेन पातितैरथनागाश्वैरिति । इत्थं रथाश्वेभनिषादिनां प्रगे इति माघश्च व्याख्यातः । इहापि मध्यमपदलोपादेकवचनान्तेन विग्रहाद्वा । यद्वा कृतद्वन्द्वानामेकशेषः । तथा च तिङस्त्रीणित्रीणीति सूत्रे लुटःप्रथमस्येति सूत्रे च भाष्यम् । उभयं हीष्यते बहूनि शक्तिकिटकानीति । माघटिप्पणे रथतुरङ्गाश्वेभे निषीदन्तीति णिन्यन्तेनोपपदसमास इति समाधानान्तरं सारम् । यद्यपि चार्थेद्वन्द्व इत्येवेतरेतरयोगे समाहारे च द्वन्द्वो विहितः । समाहारस्यैकत्वाच्च सिद्धमेकवचनं तथापि नियमार्थमिदं प्रकरणम्, प्राण्यङ्गादीनामेकवचनद्वन्द्व एव । समाहारद्वन्द्व एवेत्यर्थः । न च समाहारे एषामेवेति विपरीतं ग्राह्यम् । तिष्यपुनर्वस्वोरिति सूत्रे बहुवचनग्रहणात् । तद्धि समाहारैकवचनक्रियावृत्तये क्रियते तिष्यपुनर्वस्विदामिति ॥

अनुवादे चरणानाम् ॥ चरणानां द्वन्द्व एकवत्स्यात् । चरणशब्दः कठकालापादिषु शाखाभेदेषु मुख्यः । तदध्यायिषु पुरुषेषु गौणः । उभयेषां चैषां गोत्रञ्च चरणैः सहेति जातिसंज्ञा । तत्र शाखाभेदवाचिनां जातिरप्राणिनामित्येकवद्भावस्य सिद्धत्वाद्गौणेपि पुरुषवृत्तिरेवेह गृह्यते । उदगात्कठकालापम् । प्रत्यष्ठात्कठकौथुमम् । इह यदा कठकालापेषूदितेषु प्रतिष्ठितेषु चावाभ्यां तत्र गन्तव्यमिति संवादं कृत्वा तञ्च विस्मृत्य कश्चिदास्ते तत्र प्रतीदमुच्यते । ननूदगात्कठकालापन्त-

त्किमास्यतइति । अतो भवत्यनुवादः । कठेन प्रोक्तमधीयते कठाः । वैशम्पायनान्तेवासित्वाण्णिनिः । कठचरकाल्लुक् । तदधीतेतद्वेदेत्यण् । प्रोक्ताल्लुक् । कलापिशब्दात्कलापिनोण् । नान्तस्य टिलोपे सब्रह्मचारीत्यादिना टिलोपः । अध्येत्रणो लुक् । एतेन कौथुमो व्याख्यातः । यदा तु उदयप्रतिष्ठे नानूद्येते, किन्तु अज्ञाते ज्ञाप्येते तदा प्रत्युदाहरणम् । उदगुः । कठकालापाः ॥ स्थेणोरद्यतन्यामेवेति वाच्यम् ॥ स्थेणोः किम् । अनन्दिषुः कठकालापाः । अद्यतन्यां किम् । उद्यन्ति कठकालापाः ॥

अध्वर्युक्रतुरनपुंसकम् ॥ अध्वर्युशब्दो यजुर्वेदलक्षकः । तत्रोत्पन्नो विनियुक्तो वा यः क्रतुः तद्वाचिनामनपुंसकलिङ्गानां द्वन्द्व एकवत्स्यात् । अर्काश्वमेधम् । साह्नातिरात्रम् । अध्वर्युक्रतुः किम् । इषुवज्रौ । उद्भिद्बलभिदौ । सामवेदएषां विधानम् । अनपुंसकमिति किम् । राजसूयवाजपेये । इमौ हि शब्दावर्द्धर्चादिषु पठितौ । यदा नपुंसकलिङ्गौ तदा प्रत्युदाहरणम् ॥

अध्ययनतोऽविप्रकृष्टाख्यानाम् ॥ अध्ययनेन निमित्तेन येषामविप्रकृष्टा प्रत्यासन्ना आख्या तेषां द्वन्द्व एकवत्स्यात् । पदकक्रमकम् । पदान्यधीते पदकः । क्रमादिभ्योवुन् । एवं क्रमकः । क्रमकवार्त्तिकम् । वृत्तिः संहिता, तामधीते वार्त्तिकः । उक्थादिपाठाद्ठक् । पदान्यधीत्य क्रमोध्येतव्य इति स्पष्टा प्रत्यासत्तिः । क्रमकवार्तिकमित्यत्र तु संहितामनधीत्य क्रमोध्येतुं न शक्यतइत्येव प्रत्यासत्तिर्बोध्या । अध्ययनतइति किम् । पितापुत्रौ । अविप्रकृष्टाख्यानां किम् । याज्ञिकवैयाकरणौ ॥

जातिरप्राणिनाम् ॥ प्राणिवर्जजातिवाच्यवयवको द्वन्द्व एकवत्स्यात् । आराशस्त्रि । आराप्रतोदः । जातिः किम् । नन्दकपाञ्चजन्यौ । संज्ञाशब्दावेतौ । खड्गोस्यनन्दकः शङ्खः पाञ्चजन्यः प्रकीर्तितः ॥ अप्राणिनां किम् । ब्राह्मणक्षत्रियविट्शूद्राः । नञ्विवयुक्तन्यायेन द्रव्यजातीनामेकवद्भावो न गुणक्रियाजातीनाम् । रूपरसौ । गमनाकुञ्चने । जातिप्राधान्यएवायमेकवद्भावः । यदा तु द्रव्याविशेषविवक्षा तदा बदरामलकानि । जातिविवक्षायान्तु बदरामलकम् । इहैकवद्भावो वैकल्पिक इति भाष्यस्वरसः । तथा च विभाषाट्टक्षमृगेति सूत्रे बहुप्रकृतिरित्यादि वार्तिकमुपक्रम्य बदरामलकं बदरामलकानीत्युदाहृतं भाष्ये । बदरामलकानीति प्राप्ते इत्यर्थं व्याचक्षाणानां मते तु नित्यमेवेति तत्रैव कैयटः । अत एव तस्यभावस्त्वतलाविति सूत्रभाष्यस्थओषधिवनस्पतीनामिति प्रयोगः सङ्गच्छते । भाष्यप्रयोगन्नैकवद्भाव इति वदन् कैयटस्तु जातिविवक्षायामपि एकवद्भावाभावं मेने । एवं लटःशतृशानचाविति सूत्रस्थभाष्यकैटादिग्रन्थो बोध्यः । कथं तार्हि रञ्जितानुविविधास्तरुशैला इति भारविः । नह्यत्र व्यक्तिविशेषविवक्षा । सत्यं, तरुसहिताः शैला इति बोध्यम् ॥

विशिष्टलिङ्गो नदीदेशोग्रामाः ॥ अग्रामा इत्येकवचनस्य स्थाने सौत्रं बहुवचनम् । विशिष्टलिङ्गानां भिन्नलिङ्गानां नदीवाचिनान्देशवाचिनाञ्च ग्रामवर्जितानां द्वन्द्व एकवत्स्यात् । सूत्रे चत्वारोपि शब्दा अवयवधर्मेणावयविनि द्वन्द्वे बोध्याः । नदीदेश इत्यसमासानिर्देशः । उध्यश्च इरावती च उध्येरावति । कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रम् । भिन्नलिङ्गाःकिम् । गङ्गायमुने । मद्रकेकयाः । नदीदेशइति किम् । कुक्कुटमयूर्यौ । अग्रामाः किम् । जाम्बवं नगरं शालुकिनी ग्रामः जाम्बव शालूकिन्यौ । अत्र

पूर्वपदार्थस्य अग्रामत्वेपि उत्तरपदार्थस्य ग्रामत्वात्तदाश्रयः प्रतिषेधः । तदुक्तं, उभयतश्च ग्रामाणां प्रतिषेधो वक्तव्य इति। नदीग्रहणमदेशत्वात् । जनपदो हि देशः । अत एव पर्वतानां न । कैलासश्च गन्धमादनं च कैलासगन्धमादने ॥

क्षुद्रजन्तवः ॥ एषां द्वन्द्व एकवत्स्यात् । यूकालिक्षम् । आनकुलात् क्षुद्रजन्तवः ॥

येषाञ्च विरोधः शाश्वतिकः ॥ येषां नित्यं वैरं तेषां द्वन्द्व एकवत्स्यात् । गोव्याघ्रम् । गजसिंहमित्यादि । विरोधो वैरं न तु सहानवस्थानादिः । छायातपावित्यादावातिव्याप्तेः । शश्वदिति त्रैकाल्यमाह । तत्रभवइत्यर्थे कालाठञ् । तान्तात्परत्वेपि निपातनादिकादेशः । अव्ययानां भमात्रइति प्राप्तस्य टिलोपस्याभावश्च सामान्यापेक्षमिकस्य केनाबाधे ज्ञापकमिदम् । तेन कान्दाविकादि सिद्धमिति कश्चित् । वस्तुतस्तु कन्दुःस्वेदनी तत्र संस्कृतं भक्षा इत्यण् । कान्दवम् तदस्यपण्यमिति ठक् । शाश्वतिकः किम् । चैत्रमैत्रौ कलहायेते । एतेन देवासुरैरमृतमम्बुनिधिर्ममन्थेति भारविप्रयोगो व्याख्यातः । तेषां हि अमृतादिप्रयुक्तः कादाचित्को विरोधो न तु नित्यः । मन्थनप्रवृत्तिकाले तद्विरहात् । इह पशुशकुनिद्वन्द्वावकाशो महाजोरभ्रं महाजोरभ्राः । हंसचक्रवाकं हसचक्रवाकाः। येषांचेत्यस्यावकाशः श्रमणब्राह्मणम् । मार्जारमूषकम् । अश्वमहिषं काकोलूकमित्यत्रोभयप्रसङ्गे परत्वात्पशुशकुनि विभाषा प्राप्ता चकारेण पुनर्विधानाद्येषांचेति नित्यमेव भवति ॥

शूद्राणामनिरवसितानाम् ॥ अबहिष्कृतानां शूद्राणां द्वन्द्व एकवत्स्यात् । तक्षायस्कारम् । रजकतन्तुवायम् । शूद्रशब्दोत्र त्रैवर्णिकेतरपरः न तु शूद्रत्वजातिपरः । अनिरवसितानामिति प्र-

तिषेधात्। निरवपूर्वात्स्येतः कर्मणि क्तः। निरवसानं बहिष्करणं तच्चेह पात्राद्विवक्षितम्। यैर्भुक्ते पात्रं न शुध्यति भस्मना शुध्यते कांस्यमित्यादिस्मृतिकारोक्तसंस्कारेणापि। ते पात्र द्वहिष्कृताः। अनिरवसितानां किम्। चण्डालमृतपाः॥

गवाश्वप्रभृतीनि च॥ एतानि द्वन्द्वरूपाणि कुतैकवद्भावानि साधूनि स्युः। गवाश्वम्। गवाविकम्। गवैडकम्। अजाविकम्। अजैडकम्। एषां पशुद्वन्द्वविभाषायां प्राप्तायां वचनम्। कुब्जवामनम्। कुब्जकैरातम्। पुत्रपौत्रम्। श्वचाण्डालम्। स्त्रीकुमारम्। दासीमाणवकम्। उष्ट्रखरम्। शाटीप्रच्छदम्। इहाप्राणिजातिवाचिनामबहुप्रकृत्यर्थः पाठः। उष्ट्रशशम्। मूत्रशकृत्। मूत्रपुरीषम्। यकृन्मेदः। मांसशोणितम्। दर्भपूतीकम्। अर्जुनपुरुषम्। तृणोलयम्। दासीदासम्। अत्र पुमान्स्त्रियेत्येकशेषो न। कुटीकुटम्। मांसशोणितम्। भागवतीभागवतम्। गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तामिति वार्त्तिकम्। गणपाठे रूपमेषां विवक्षितं न तु पूर्वोत्तरपदनिर्देशमात्रे तात्पर्यमित्यर्थः। तेन अवङादेशाभावपक्षे न भवति। अपशवो वा अन्ये गोआश्वेभ्यः पशवो गोअश्वाः॥

विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्॥ वृक्षादीनां सप्तानां द्वन्द्वः। अश्ववडवेत्यादि द्वन्द्वत्रयं च विभाषा एकवत्स्यात्। वृक्षादौ विशेषाणां ग्रहणम्। तथाहि। वृक्षादिशब्दैः प्रत्येकं द्वन्द्वो विशेष्यते। न चैको वृक्षशब्दो द्वन्द्वः। न च द्वयोः सहप्रयोगः। एकशेषात्। एवंपर्याययोरपि। विरूपाणामपि समानार्थानामेकशेषारम्भात्। नापि वृक्षश्च धवश्चेत्यादिसामान्यविशेषयोर्वा-

चनिकद्वन्द्वनिषेधस्योक्तत्वात् । न च प्राच्यभरतेष्विति निर्देशादनित्यः स इति वाच्यम् । तथापि वृक्षधवमित्यादिप्रयोगादर्शनेन निषेधस्यैव प्रकृते प्रवृत्तेः । तस्माद्विशेषाणामेवेह ग्रहणं स्थितम् । प्लक्षन्यग्रोधम् प्लक्षन्यग्रोधाः । रुरुपृषतम् । रुरुपृषताः । कुशकाशम् । कुशकाशाः । व्रीहियवम् । व्रीहियवाः । दधि घृतम् । दधिघृते । गोमहिषम् । गोमहिषाः । तित्तिरिकपिञ्जलम् । तित्तिरिकपिञ्जलाः । अश्ववडवम् । अश्ववडवौ । पूर्वापरम् । पूर्वापरे । अधरोत्तरम् । अधरोत्तरे । अत्र वार्त्तिकम् । बहुप्रकृतिः फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानामिति ॥ एषां बहुप्रकृतिरेव द्वन्द्व एकवदित्यर्थः । नेह । बदरामलकौ । रथिकाश्वारोहौ । प्लक्षन्यग्रोधावित्यादि । इदं वार्त्तिकं विध्यन्तरशेषभूतं न तु स्वातन्त्र्येण विधायकम् । विधित्वे हि स नित्यश्चेत्तर्हि वनस्पत्यादीनामेतत्सूत्रोपात्तानामपि बहुप्रकृतित्वे विकल्पं बाधित्वा नित्यं स्यात् । अबहुप्रकृतिकत्वे च सौत्रो विकल्पः स्यात् । वैकल्पिकत्वे तु फलादीनामपि जातिरप्राणिनामित्यादिलक्षणान्तरप्राप्तनित्यमेकवद्भावं बाधित्वा बहुप्रकृतिकत्वे विकल्पः स्यात् । न च बदरामलकं बदरामलकानीति भाष्यदर्शनादिष्टापत्तिरिति वाच्यम् । तत्र बदरामलकानीति क्वाचित्कः पाठः । सोऽपि बदरामलकानीत्येवं प्राप्ते जातिलक्षणो नित्य एकवद्भाव इति व्याख्येय इति कैयटेनोक्तत्वात् । यत्तु नित्यएकवद्भावे प्राप्ते विकल्पोऽनेन क्रियतइति मतान्तरं कैयटेनोक्तम् । तदापाततः । बदरामलके तिष्ठत इति तदुत्तरभाष्यविरोधात् । उक्तरीत्या प्रकृतवार्त्तिकस्य बहुप्रकृतिके विकल्पाविधिपरत्वे हि अन्यत्र नित्य एकवद्भावो दुर्वारः स्यादिति दिक् । तत्रापि यदि विभाषा-

वृक्षेत्यत्र पाठेत्वादस्यैव शेषः स्यात्तदा वनस्पत्यादिष्ववहुप्रकृतित्वे विकल्पाभावेपि जातिरप्राणिनामिति नित्यो विधिः स्यात् । तस्मात्सर्वप्रकरणशेषोयम् । एषां फलादीनां द्वन्द्वोनेन लक्षणान्तरेण वा एकवद्भवन् बहुप्रकृतिरेवेति । तेन प्लक्षन्यग्रोधावित्यत्र अयं विकल्पो जातिरप्राणिनामिति नित्यश्च न भवति । एवं व्रीहियवौ कुशकाशावित्यादि । प्रकृतसूत्रोपात्तानान्तु इत्थं विषयविभागः । येत्राप्राणिनस्तेषां जातिरप्राणिनामिति नित्यं प्राप्ते विकल्पो विधीयते । स च तेषां तैरेव । तथा च वृक्षादीनामन्यैः सह द्वन्द्वे यथा प्राप्तं नित्यं विकल्पो वा तद्यथा व्रीहिकुशप्लक्षमित्यत्र जातिरप्राणिनामिति नित्यः । प्लक्षशब्दस्पर्शे प्लक्षशब्दस्पर्शा इत्यत्र तु० चार्थेद्वन्द्व इत्युभयत्र । न चेह जातिरप्राणिनामित्यस्य प्रवृत्तिः । अद्रव्यजातित्वात् । अप्राणिनामिति हि पर्युदास इत्युक्तम् । पशुग्रहणन्तु हस्त्यश्वादिषु सेनाङ्गलक्षणस्य नित्यविधेर्बाधनार्थम् । मृगशकुनिग्रहणं त्ववशिष्यते । तत्रेत्थं वचनं व्यज्यते । यो विभाषाप्राप्त एकवचनो द्वन्द्वः स मृगाविशेषाणां तैरेव नान्यैरिति । तेनैषामन्यैः सह इतरेतरयोग एवेति फलितम् । एवं पूर्वापरमधरोत्तरमित्यत्रापि पशुद्वन्द्वत्वादेव सिद्धे अश्ववडवग्रहणं प्रतिपदविधानार्थम् । तेनैकवद्भावपक्षे पूर्ववदश्ववडवावित्येतद्बाधित्वा सनपुंसकमिति प्रवर्तते । तच्छब्दो हि एकवद्भावभाजं परामृशति । तेन एकवद्भाववन्नपुंसकत्वमपि प्रतिपदविहितं सम्पद्यते । पूर्ववदश्ववडवाविति त्वेकवद्भावविरहपक्षे प्रवर्त्तते । अश्ववडवौ । अश्ववडवान् ॥

विप्रतिषिद्धं चानधिकरणवाचि ॥ विरुद्धार्थानामद्रव्यवा-

चिनां द्वन्द्व एकवद्वा स्यात्। अत्रेदं नियमशरीरम्। य एकवचनो द्वन्द्वो विभाषा प्राप्तः स यदि विप्रतिषिद्धवाचिनां भवति तदा अद्रव्यवाचिनामेवेति। तेन द्रव्यवाचिनामितरेतरयोग एव। शीतोष्णे उदके स्तः। विप्रतिषिद्धं किम्। नन्दकपाञ्चजन्यम्। इह द्रव्यवाचित्वेपि पाक्षिकः समाहारद्वन्द्वो भवत्येव। यत्तु वृत्तौ कामक्रोधाविति प्रत्युदाहृतं तत्रापि शीतोष्णं सुखदुःखमित्यादाविव पाक्षिकस्यैकवद्भावस्य दुर्वारत्वात्। नियमार्थं हि प्रकृतसूत्रमिति स्थितम्। न च अद्रव्यवाचिनाञ्चेद्भवति तर्हि विप्रतिषिद्धानामेवेति तदाशयः कल्प्यः। शीतोष्णे उदके इत्यत्र पाक्षिकैकवद्भावापत्त्या अनधिकरणवाचीति किं शीतोष्णे उदके इत्येवंरूपस्वोक्तिविरोधापत्तेः। सौत्रानुपूर्वीस्वरसभङ्गप्रसङ्गाच्चेति दिक्॥

न दधिपयआदीनि॥ एतानि नैकवत्स्युः। दधिपयसी। मधुसर्पिषी। सर्पिर्मधुनी। इह त्रिषु व्यञ्जनत्वाद्विकल्पः प्राप्तः। ब्रह्मप्रजापती। शिववैश्रवणौ। स्कन्दविशाखौ। न चेह विरूपाणामपीति एकशेषः शङ्क्यः। स्कन्दश्चैव विशाखश्च द्वौ सुतौ संबभूवतुरिति महाभारतस्वरसेनापर्यायत्वनिर्णयात्। परिव्राट्कौशिकौ। प्रवर्ग्योपसदौ। शुक्लकृष्णे। इध्मावर्हिषी। निपातनादीर्घः। दीक्षातपसी। श्रद्धातपसी। मेधातपसी। अध्ययनतपसी। उलूखलमुसले। आद्यवसाने। श्रद्धामेधे। ऋक्सामे। वाङ्मनसे। इह ब्रह्मप्रजापत्यादिषु समाहारद्वन्द्वनिषेधमुखेनेतरेतरयोगद्वन्द्वो व्यवस्थाप्यते। तत्साहचर्याद्दधिपयसी इत्यादावपि तथैव। तेन तत्र व्यञ्जनत्वप्रयुक्तविकल्पे निषिद्धेपि जातिलक्षणो नित्य एकवद्भावोस्त्विति न शङ्कनीयम्। किञ्चनेह लक्षणविशेषे आग्रहः। एकवद्भाव-

मात्रस्य निषेधात् । यथा नषट्स्वस्रादिभ्य इत्यत्र स्त्रियां यदुक्तं तन्नेति सामान्यतो निषिद्ध्यते । तथा च वक्ष्यति दोषास्त्वत्वे तस्मान्नोभाविति । ननु भवेदेवं यदि जातिरप्राणिनामिति विधिः स्यात् । निषेधस्तु सः । तथा च तेनेतरेतरयोगे प्रकृतसूत्रेण समाहारे च निषेधाद्धिपयआदीनां द्वन्द्व एव न लभ्येत । अत्रोच्यते । नियमवाक्यानां विधिरूपेण निषेधरूपेण वा प्रवृत्तिरिति पक्षद्वयं तावत्प्रत्ययलक्षणसूत्रे उपपादितम् । द्युद्भ्योलुङीत्यादौ भाष्यारूढं च । तत्र जातिरप्राणिनामित्यादौ विधिमुखतापक्षस्यैव लक्ष्यानुरोधेनाश्रयणात्तस्य च नदधीत्यादिना निषेधात्सर्वं सुस्थम् ॥

अधिकरणैतावत्त्वे च । द्रव्यसङ्ख्यावगमे नैकवत्स्यात् । दश दन्तोष्ठाः । ननु वर्त्तिपदार्थस्य सङ्ख्याविशेषे बोधनीये इतरेतरयोगद्वन्द्व एवेति न्यायसिद्धम् । अन्यथा हि दश पञ्चपूल्य इति द्विगाविव प्रधानभूते समाहारएव दशत्वसङ्ख्या अन्वियात् न तु समुदायिषु तर्तिक निषेधेन । सत्यम् । नानेन समाहारद्वन्द्वो निषिध्यते किन्तु प्राण्यङ्गादीनां समाहार एवेति योसौ नियमः स एव निषिध्यते । असति हि निषेधे पञ्चस्विहास्याङ्गुलिकरेष्वभिरूपाभिक्षाधुनामाधुकरीसदृक्षेत्यादीनामसाधुत्वं स्यात् । समाहार एवेति नियमेनेतरेतरयोगे द्वन्द्वस्य दुर्लभत्वात् । तथा च सङ्ख्यावगतावेकवदेवेति नियमो न स्यादिति सूत्रार्थः फलितः । तस्मादितरेतरयोगद्वन्द्वस्य प्रतिप्रसवार्थमिदम् । एतेन दश दन्तोष्ठा इत्यादौ समाहारद्वन्द्वस्येवेतरेतरयोगद्वन्द्वस्यापि दौर्लभ्याद्वाक्यमेव प्रयोज्यम् । अधिकरणैतावत्त्वेचेत्यनेन प्राण्यङ्गानां समाहार एवेत्यनेन चोभयोर्निषेधादिति प्रत्युक्तम् । दश ब्राह्मणक्षत्रिया इत्यादौ प्रागुक्तन्यायबलेनैव समाहार-

द्वन्द्वो वारणीयः ॥

विभाषा समीपे ॥ अधिकरणैतावत्त्वस्य सामीप्येन परिच्छित्तौ समाहार एवेत्येवंरूपो नियमो वा स्यात् । उपदशं दन्तोष्ठम् । उपदशा दन्तोष्ठाः । अव्ययंविभक्तीत्यादिना सुबन्तसामान्येन विधीयमानोव्ययीभावः सङ्ख्ययापि भवति । बहुव्रीहिस्तु सङ्ख्ययाव्ययासन्नेत्यादिना विशिष्य विहितः । तत्रैकवद्भावपक्षे अव्ययीभावो ऽनुप्रयुज्यते । एकार्थस्य त्वेकार्थ एवान्तरङ्गः । ऐकार्थ्यञ्च सामीप्यप्रधानत्वात् । यद्यप्यव्ययीभावो निःसंख्यस्तथापि भेदाभावरूपमैकार्थ्यं बोध्यम् । सामानाधिकरण्यन्तु सामीप्यतद्वतोरभेदाविवक्षया । अधिकरणैतावत्त्वन्तु समाहारसमाहारिणोरभेदविवक्षया । पक्षान्तरे तु बव्हर्थस्य बव्हर्थो बहुव्रीहिरेवानुप्रयुज्यते बव्हर्थत्वञ्च तस्य समीपिप्राधान्यात् । यदि तूभयत्राव्ययीभाव एवानुप्रयुज्येत । तदा तस्याव्ययत्वाद्बहुत्वाभावाद्बहुवचनं न स्यात् । सत्यपि वा तस्मिन्नभावे कृते उपदशा इति न स्यात् बहुव्रीहेरेवानुप्रयोगे तु उपदशस्य पाणिपादस्येति षष्ठी स्यात् । उपदशं पाणिपादस्येति चेष्यते । तस्माद्यथोक्तमेव मनोरमम् ॥

सनपुंसकम् ॥ समाहारे द्विगुर्द्वन्द्वश्च नपुंसकः स्यात् । परवल्लिङ्गापवादः । पञ्चगवम् । दन्तोष्ठम् । प्रकरणादेवानुवाद्यालाभे सग्रहणमेतत्प्रकरणानुपात्तस्यापि समाहारद्वन्द्वस्य सङ्ग्रहार्थम् । तथा च युवोरनाकावित्यादावुच्यते युवोरिति समाहारद्वन्द्वे सनपुंसकमिति क्लीबत्वं स्यादिति । अत एव प्रयुज्यते कार्यकालं संज्ञापरिभाषमिति । अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः ॥ अत इत्यधिकारे द्विगोरिति ङीब्विधानमिह लिङ्गम् । पञ्चमूली ।

वाबन्तः ॥ पञ्चखट्वी । पञ्चखट्वम् । स्त्रीत्वपक्षे उपसर्जनह्रस्वत्वम् । अनो नलोपश्च वा च द्विगुः स्त्रियाम् ॥ पञ्चतक्षम् । पञ्चतक्षी । उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणप्रतिषेधात् पदत्वाभावान्नलोपवचनम् । पात्रद्यन्तस्य प्रतिषेधः । पञ्चपात्रम् ॥ त्रिभुवनम् । चतुर्युगम् । द्विसमासम् ॥ पात्रादिराकृतिगणः ॥

अव्ययीभावश्च ॥ अयं नपुंसकं स्यात् । अधिस्त्रि । उन्मत्तगङ्गम् । पूर्वपदार्थप्रधानस्य अलिङ्गत्वे अन्यपदार्थप्रधानस्य तु विशेष्यलिङ्गत्वे प्राप्ते इदमुच्यते । अनुक्तसमुच्चयार्थश्चकारः । तत्फलन्तु, पुण्यसुदिनाभ्यामन्हः । पुण्याहम् । सुदिनाहम् । कर्मधारये राजाहस्सखिभ्यष्टच् । रात्रान्हाहाः पुंसीत्यस्यापवादः । सुदिनशब्दः प्रशस्तवाची । तथा च प्रयुज्यते । सुदिनासु सभासु कार्यमेतत्प्रविचिन्वीत विशेषतः स्वयञ्चेति । तेनेह दिनाहःशब्दयोः सहप्रयोगविरोधो न शङ्कनीयः ॥ पथः सङ्ख्याव्ययादेः ॥ त्रयाणां पन्थाः त्रिपथम् । विरूपः पन्थाः विपथम् । प्रादिसमासः । कथन्तर्हि अतिपन्थाः सुपन्थाश्चेत्यमरः । उच्यते । पथ इति कृतसमासान्तात्पथमा । सङ्ख्याव्ययरूपादेः परः कृतसमासान्तः पथशब्दः क्लीबमित्यर्थः । पथः क्लीबमितेति पाठेपि सङ्ख्यादिपथशब्दस्याव्यभिचरितसमासान्ततया तत्साहचर्याद्व्ययादेरपि तथाभूतस्यैव ग्रहणं बोध्यम् । तथा च क्लीबलिङ्गकारिका । पथः सङ्ख्याव्ययात्पर इति । न चेह समासान्तोस्ति । नपूजनादिति निषेधात् । कथन्तर्हि सत्पथश्चार्चितेध्वनीति । स्वतिभ्यामेवेति परिगणनात् । अथ कथं व्यध्वो दुरध्वो विपथः कदध्वा कापथः समा इत्यमरः । अत्र क्षीरस्वामिदुर्घटादयः । विपथं कापथमित्येव पाठः कर्त-

व्यो लिङ्गकारिकाद्यनुरोधादित्याहुः। एवन्तु व्यध्वो विपथकापथाविति रभसकोशेपि पुंस्त्वं प्रामादिकमिति लभ्यते। वस्तुतस्तु पथे गताविति्यस्मात्पचाद्यचि पथते व्याप्नोतीति पथः। अकारान्तोयम्। तथा च त्रिकाण्डशेषः, वाटः पथश्चमार्गः स्यादिति। तेन समासे पुंस्त्वन्न। न चैवं विपथ इति सिद्धावपि कापथो न स्यात्कादेशस्य दुर्लभत्वादिति वाच्यम्। ईषदर्थेचेति तत्सम्भवात्। कुत्सायामर्थतः पर्यवसानात्। यत्त्वकारान्तस्याभ्युपगमे पथोविभाषेति सूत्रं व्यर्थं स्यादिति माधवेनोक्तम्। तत्रायं समाधिः। अपथंनपुंसकमिति सूत्रे कृतसमासान्तनिर्देशसामर्थ्यान्नञस्तत्पुरुषादित्यस्य नित्यं बाधः प्राप्तः। न च सोप्यकारान्तस्य निर्देशः पथःसङ्ख्याव्ययादेरित्यत्रापि तथात्वापत्तौ सत्यामपथो विपथः कापथ इत्याद्यसिद्ध्यापत्तेः। किञ्च रात्राह्नाहा इति सूत्रात्परमपथंनपुंसकमिति सूत्रे वार्त्तिकं पठ्यते। तथा च प्रक्रमानुरोधात्कृतसमासान्तनिर्देश एव न्याय्यः सम्प्रदायसिद्धश्च। अत एवापथंनपुंसकमिति सूत्रस्य वार्त्तिकेन गतार्थतामाशङ्क्य सूत्रस्य प्राच्यत्वाददोष इति कैयटः। एवं स्थिते अपन्था इत्यतात्सिद्धये पथोविभाषेति सूत्रम्। अमरस्य च न पूर्वापरविरोध इत्यवधेयम्। प्रकृतमनुसरामः। इदं क्लीबत्वविधानं परवल्लिङ्गताया अपवादः। तेन विपथा नगरीति बहुव्रीहौ न। पन्थानमतिक्रान्ता ऽतिपथेत्यत्रापि न। इह हि द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु नेति परवल्लिङ्गता प्रतिषिद्धा। यद्येवमुत्पथमिति प्रतीकमुपादाय कुगतीति तत्पुरुष इति कैयटो विरुध्यते। मैवम्। न हि तत्र पथ उद्गत इत्यादिविग्रहः। किन्तु उत्कृष्टः पन्था इति। तथा च परवल्लिङ्गमेव प्राप्तम्। तस्मादुत्तरपदार्थप्राधान्यएवेदं लिङ्गविधानमिति स्थितम्। स्पष्ट-

ञ्चेदं माधवग्रन्थे । यत्तु वृत्तिग्रन्थे सुपथामित्युदाहृतम् । तत्र सुशब्दस्य वैपुल्यमर्थो न तु पूजेति समासान्तः कृत इति माधवः । क्रियाविशेषणानाञ्च क्रियाया असत्वरूपत्वात्तद्विशेषणानां तद्वदलिङ्गत्वे प्राप्ते वचनामिदं वार्त्तिकानारूढमपि वृत्तिकारेण कृतमित्याहुः । मृदु पचति । प्रथमं पचति । सामान्ये नपुंसकमिति वा सिद्धम् । अत एव नियतलिङ्गेषु नेदं प्रवर्त्तते । आदिं पचति । आदिभूता या विक्लित्तिस्तां करोतीत्यर्थः । धातूपात्तभावनाम्प्रति कर्मत्वात्तत्सामानाधिकरण्याद्वा द्वितीया । अत एव सकृल्ल्वावित्यादौ कारकपूर्वत्वाद्यणित्याकरः । न च सकलकारकाणां क्रियाविशेषणत्वात् क्लीवतापत्तिः शङ्क्या । कारकाणां विभक्त्यर्थत्वरूपत्वाच्च । शक्त्याधारस्तु यद्यपि द्रव्यं नामार्थश्च । तथापि नासौ क्रियां प्रति विशेषणं किन्तु क्रियाविशेषणीभूतकारकविशेषणमिति बोध्यम् । अत एव नामार्थस्य भेदेन धात्वर्थान्वयोनेति सिद्धान्तः । स्तोकं पच्यतइत्यादावापि धात्वर्थव्याप्यस्यैव तण्डुलादेर्नाभिधानं न तु धातुक्रोडीकृतस्यापि भावेचाकर्मकेभ्य इत्यत्र विशेषणसामर्थ्याद्धात्वकर्मग्रहणे लः कर्मणीत्यत्रापि तथैव निर्णयात् । अतो धातुना क्रोडीकृतस्य विशेषणं द्वितीयान्तमेव । न तु अभिहितत्वप्रयुक्तप्रथमान्तम् । न वा स्तोकमोदनस्य पक्तेत्यत्र स्तोकशब्दात्कृद्योगलक्षणा षष्ठी । यत्र तु भावनाम्प्रति करणतया धात्वर्थविशेषस्यान्वयस्तत्र विशेषणानां तृतीयान्ततैव ज्योतिष्टोमेन येजतेति यथा । स्पष्टं चेदं करणेयज इति सूत्रे वृत्तिपदमञ्जर्योः । न चैवं ज्योतिष्टोमेन समीचीनं यजेतेति न स्यादिति वाच्यम् । भावनाविशेषणत्वे तदुपपत्तेः । तत्र च प्रथमान्ततैव । सन्दर्शनप्रार्थनादिभिर्व्याप्यमानत्वात्क्रियाया अ-

पि कृत्रिमकर्मत्वे तु तादृशेषणत्वेपि द्वितीयैव । तदिह क्रियाविशेषणानां क्लीबतेत्युत्सर्गः । नियतलिङ्गे तदभावात् । द्वितीयेत्यप्युत्सर्गः । प्रथमातृतीययोरप्युक्तत्वात् । एकवचनमप्युत्सर्गः । हतशायिकाः शप्यन्तइत्यादौ बहुवचनस्यापि सार्वधातुकेयागिति सूत्रे वक्ष्यमाणत्वादिति दिक् । प्रातः कमनीयमित्याद्यव्ययाविशेषणे तु क्लीबत्वं यद्यपि तुल्यं तथापि प्रथमैकवचनमेव न तु द्वितीयैकवचनम् । कर्मताभावात् । प्रातरादिरिति तु नियतलिङ्गमेवेति दिक् । यद्यप्येतानि वार्त्तिकानि भाष्ये अपथंनपुंसकमित्यत्र पठितानि । तथापि अव्ययीभावश्चेति चकारसूचितार्थकथनपराणीत्याशयेन वृत्त्यनुरोधादिहैव व्याख्यातानि ॥

तत्पुरुषो ऽनञ्कर्मधारयः ॥ अधिकारोयम् । कर्मधारयशब्दो भावप्रधानः । द्वन्द्वगर्भो नञा बहुव्रीहिः । न विद्यते नञ् च कर्मधारयत्वं चेत्युभे यत्र स तत्पुरुष इत्यर्थः । वक्ष्यति विभाषासेनासुरेत्यादि । तत्पुरुषः किम् । दृढसेनो राजा । नञ्रहीतः किम् । असेना । कर्मधारयत्वरहितः किम् । परमसेना । मध्यमसूत्रेष्वयमधिकारो नातोवोपयुज्यतइति तत्रैव वक्ष्यामः ॥

संज्ञायां कन्थोशीनरेषु ॥ कंथान्तस्तत्पुरुषः क्लीबं स्यात्सा चेदुशीनरदेशोत्पन्नायाः कन्थायाः संज्ञा । सुशमस्यापत्यानि सौशमयः तेषां कन्था । सौशमिकन्थम् । संज्ञायां किम् । वीरणकन्था । ऊशीनरदेशेषु किम् । दाक्षिकन्था । इहानादिः संज्ञा गृह्यते । सा चोशीनरेषु तत्पुरुषभिन्ना नञ्समासरूपा कर्मधारयश्च नास्त्येवेतीह मन्दमधिकारस्य फलम् ॥

उपज्ञोपक्रमन्तदाद्याचिख्यासायाम् ॥ उपज्ञायतइत्युपज्ञा । आतश्चोपसर्गइति कर्मण्यङ्प्रत्ययः । उपक्रम्यतइत्यु-

पक्रमः । कर्मणि घञ् । नोदात्तोपदेशस्येति वृद्धिप्रतिषेधः । उपज्ञान्त उपक्रमान्तश्च तत्पुरुषो नपुंसकं स्यात् । तयोरुपज्ञोपक्रमयोरादिः प्राथम्यञ्चेदाख्यातुमिष्यते । पाणिनेरुपज्ञा पाणिन्युपज्ञं ग्रन्थः । त्वदुपक्रमं सौजन्यम् । इच्छासनेह विवक्षैव शब्दव्युत्पत्तौ नियामिका न तु वस्तुस्थितिरिति ज्ञाप्यते । तेन क्रियासम्बन्धमात्रविवक्षायां न । देवदत्तोपज्ञो रथ इत्यादि । इह षष्ठीतत्पुरुषाद्विना तदादित्वासम्भवादलभ्यमधिकारफलम् ॥

छाया बाहुल्ये ॥ छायान्तस्तत्पुरुषो नपुंसकं स्यात् । बाहुल्ये सति चेच्छाया । यानि संभूयोपजीव्यां छायामारभमाणान्यावरकद्रव्याणि तत्समर्पकात्पूर्वपदात्परश्छायाशब्दश्चेदित्यर्थात्फलति । अत एवेह नाधिकारः फलवान् । इक्षूणांच्छाया । इक्षुच्छायम् । विभाषासेनेत्यादेर्विकल्पस्यापवादोयम् । कथन्तर्हि इक्षुच्छायानिषादिन्य इति । उच्यते । आसमन्तान्निषादिन्य इत्याङ्प्रश्लेषो बोध्यः ॥

सभा राजामनुष्यपूर्वा ॥ राजपूर्वा अमनुष्यपूर्वा च या सभा तदन्तस्तत्पुरुषो नपुंसकं स्यात् । ईनसभम् । ईश्वरसभम् । पर्यायस्यैवेष्यते । तथाहि । अराजेतिच्छेदः । नञिवयुक्तन्यायाच्चाराजा राजसदृशस्तत्पर्यायो गृह्यते । नेह । राजसभा । चन्द्रगुप्तसभा । कथं नृपतिसभामगमन्न वेपमाना इति कीचकवधे । गजपतिवद्राजविशेषवाचित्वादिति रक्षितः । यद्वा । ना पतिर्यस्यां सभायामिति बहुव्रीहौ कृते पश्चात्कर्मधारयः । अनञ्कर्मधारय इत्यनुवृत्तेर्न क्लीबत्वम् । अमनुष्यशब्दो रूढ्या रक्षःपिशाचादीनाह । रक्षःसभम् । रूढ्यर्थाभावान्नेह । काष्ठसभा ॥

अशाला च ॥ अशालावाची संघातवाची च सभा-शब्दः । तत्र राजामनुष्यपूर्वत्वे पूर्वसूत्रेण पूर्वस्य क्ली-बत्त्वमुक्तम् । संघातवाचिनस्तु अनेन विधीयते । स्त्री-सभम् । स्त्रीसंघात इत्यर्थः । अशाला किम् । अनाथसभा । अनाथकुटीत्यर्थः ॥

विभाषा सेनासुराच्छायाशालानिशानाम् ॥ एतदन्तस्य तत्पुरुषस्य क्लीबता वा स्यात् । ब्राह्मणसेनम् । ब्राह्मणसे-ना । यवसुरम् । यवसुरा । कुड्यच्छायम् । कुड्यच्छा-या । गोशालम् । गोशाला । श्वनिशम् । श्वनिशा । कृष्णचतुर्दशीत्याहुः । तस्यां हि श्वान उपवसन्तीति प्रसिद्धिः । शुनश्चतुर्दश्यामुपवसतः पश्याम इति तिर्यगधिकरणे शाब-रभाष्यम् ॥

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः ॥ एतयोः परपदस्येव लिङ्गं स्यात् । कुक्कुटमयूर्यौविमे । मयूरीकुक्कुटाविमौ । अर्ध पिप्पल्या अर्धपिप्पली । स्यादेतत् । यदि समासार्थस्य प-रवल्लिङ्गत्वमनेनातिदिश्यते तर्हि पूर्ववदश्ववडवाविति सूत्रेणा-पि न्यायसाम्यात्समासस्यैवातिदेष्टव्यम् । ततश्च टाप् श्रूयेत समासार्थस्य पुंस्त्वेपि उत्तरपदार्थस्य स्त्रीत्वानपगमात् । य-त्तु गोस्त्रियोरिति ह्रस्व इति तन्न । चार्थेद्वन्द्व इत्यत्रानेकमित्यधिका-रात्सर्वेषां प्रथमानिर्दिष्टत्वेपि प्राधान्यादुपसर्जनसंज्ञाविरहात् । अन्वर्थसंज्ञा हि सा । अत एव राज्ञः कुमार्याः राजकुमार्या इत्यत्र न ह्रस्व इत्युक्तम् । अत एव च कुक्कुटमयूर्यौविमित्यत्र न ह्रस्वः । ननु मास्त्वन्वर्थता । तथा चाश्ववडवाविति सिद्ध्य-ति । राजकुमार्याः कुक्कुटमयूर्यौविमित्यत्र तु ह्रस्वे कृते पुनः स्त्री-प्रत्ययात् सिद्धम् । तदुक्तं, परवल्लिङ्गमिति शब्दशब्दार्थावि-

ति । तथाहि । लिङ्गशब्देन लिङ्गाभिधायी प्रत्ययोर्थश्च गृह्यते । तन्त्राद्याश्रयणात् । एवञ्च द्वन्द्वार्थस्य तत्पुरुषार्थस्य च परस्येव लिङ्गं स्यात् । तदभिधायी प्रत्ययश्च परस्येवेति सूत्रार्थः । तथा च यत्र द्रव्यगुणौ गुणकर्मणी इत्यादौ लिङ्गाभिधायी प्रत्ययो न सम्भवति तत्रार्थ एवातिदिश्यते । उभयसम्भवे तूभयम् । यथा कुक्कुटमयूर्यावित्यादौ । ततश्च औपदेशिकस्य ह्रस्वत्वेप्यातिदेशिकस्य श्रवणं भविष्यति । न च पुनर्ह्रस्वः शङ्क्यः । अनुपसर्जनत्वात्तदन्तस्याप्रातिपदिकत्वाच्च । न चैवमपि दत्तागार्ग्यायण्यौ दत्ताकारीषगन्ध्ये इत्यत्र ह्रस्वत्वे कृते समासात्पुनः फक्ष्यञौ स्यातामिति वाच्यम् । भस्याढेतद्धितइति पूर्वोत्पन्नयोर्निवृत्तिसम्भवादिष्टापत्तेरिति । मैवम् । दत्ता च युवतिश्च दत्तायुवती इत्यत्र तिप्रत्ययद्वयश्रवणापत्तेः । तत्राभत्वेन पुंवद्भावायोगात् । तस्मादुपसर्जनत्वं द्वन्द्वे नास्त्येव अन्वर्थत्वादिति स्थितम् । अश्ववडवावित्यत्र स्त्रीप्रत्ययनिवृत्तौ उपायान्तरं वक्तव्यमिति । अत्रोच्यते । विभाषावृक्षमृगेतिसूत्रे ऽश्ववडवेत्यत्र टापो निवृत्तिर्निपात्यते । तदुक्तं, समासादन्यलिङ्गमिति चेदश्ववडवयोष्टाब्लुग्वचनं निपातनात् सिद्धमिति ॥ द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्यः ॥ पञ्चसु कपालेषु संस्कृतः पञ्चकपालः पुरोडाशः । प्राप्तो जीविकां प्राप्तजीविकः । आपन्नजीविकः । अलंकुमारिः । निष्कौशाम्बिः । भाष्ये त्वेतत्प्रत्याख्यातम् । तथाहि । तत्पुरुषग्रहणं न करिष्यते । परवल्लिङ्गं द्वन्द्वस्येत्येव । कथं पूर्वकायोर्द्धिप्पलीति । एकदेशिसमासोपि नारभ्यते । कर्मधारय एवायं पूर्वश्चासौ कायश्च अर्द्धञ्चासौ पिप्पली चेति । ततश्च प्राधान्यादेवोत्तरपदार्थस्य लिङ्गं भवति । न च षष्ठीस-

मासबाधनार्थमेकदेशिसमासो ऽवश्यारब्धव्य इति वाच्यम् । इष्टत्वादनभिधानाच्च । तथाहि । द्वितीयतृतीयेत्यत्रान्यतरस्यांग्रहणात्सूत्रकारस्यापि षष्ठीसमास इष्टोर्धशब्देनापि षष्ठीसमासो भाष्यकाराणामिष्ट इति प्रागेवोक्तम् । पूर्वापरेत्यत्र त्वनभिधानात्षष्ठीसमासो न भविष्यतीति । इदञ्च प्रत्याख्यानं दुर्बलम् । अनभिधानाश्रयणमगतिकगतिरिति सन्प्रत्ययविधौ भाष्यएवोक्तत्वात् ॥

पूर्ववदश्ववडवौ ॥ द्विवचनमतन्त्रम् । अर्थातिदेशश्चायम् । परवल्लिङ्गतापवादः । अश्ववडवौ, अश्ववडवान्, अश्ववडवैर्जवनैरित्यादि । विभाषावृक्षेत्यादिसूत्रेण समाहारद्वन्द्वपक्षे तु सनपुंसकमित्येव भवति । तच्छब्देन विशिष्य परामर्शार्थमेवाश्ववडवग्रहणात् । अन्यथा पशुग्रहणेनैव सिद्धौ तद्वैयर्थ्यापत्तेरित्युक्तम् ॥

हेमन्तशिशिरावहोरात्रे च च्छन्दसि ॥ पूर्ववादित्यनुवर्तते । हेमन्तश्च शिशिरं च हेमन्तशिशिरौ । अत्रेदमवधेयम् । शिशिरशब्दः पुन्नपुंसकयोः । तथा च चक्रवर्ज्यान्धकारेति सूत्रे तिमिरशिशिराणि नपुंसके चेति भगवान्पाणिनिः । अमरोपि, हेमन्तः शिशिरोस्त्रियामित्याह । तथा चात्र सूत्रे हेमन्तशिशिराविति न कर्तव्यम् । अहोरात्रे शिवे स्याताम् । इह रात्रान्हाहा इति पुंस्त्वं प्राप्तम् । द्वित्वमतन्त्रम् । अहोरात्राणि विदधत् । न चेदं समाहारद्वन्द्वे सत्येकशेषातिसङ्गमिति वाच्यम् । तत्रापि पुंस्त्वस्योत्तरसूत्रे वक्ष्यमाणत्वात् । छन्दसि लिङ्गव्यत्ययो वक्ष्यते तस्यैवायं प्रपञ्चः । लोके तु दुःखे हेमन्तशिशिरे । अहोरात्रौ पुण्यौ ॥

रात्रान्हाहाः पुंसि ॥ एतदन्तौ द्वन्द्वतत्पुरुषौ पुंस्येव ।

रात्रेः पूर्वो भागः पूर्वरात्रः । एकदेशिसमासः । अहः सर्वैकदेशेत्यच् समासान्तः । पूर्वाह्णः । राजाहःसखिभ्य इति टच् । अन्होन्हएतेभ्य इत्यन्हादेशः । अन्होदन्तादिति णत्वम् । द्व्यहः । नसंख्यादेःसमाहारइत्यन्हादेशाभावः । अन्हष्टखोरेवेति टिलोपः । परवल्लिंगापवादोयं योगः । वृत्तौ तु एते पुंसीत्युक्तम् । तत्राप्येतदन्ता इत्यर्थो बोध्यः । यत्तु रात्रादीनामेवानेन पुंस्त्वे कृते तदन्तस्य परवल्लिंगमित्येव सिद्धिमिति । तन्न । समाहारे नपुंसकत्वापत्तेः । परवल्लिङ्गत्वापवादो हि सनपुंसकमिति योगः । न च नपुंसकत्वे इष्टापत्तिः । द्विरात्रस्त्रिरात्र इति वृत्तिकारीयोदाहरणविरोधात् । तद्धि समाहारे द्विगुरिति सर्वैर्व्याख्यातम् । अमरोपि प्रायुङ्क्त । ते तु त्रिंशदहोरात्र इति, मासेन स्यादहोरात्र इति च । तस्मात्तदन्तस्यैवायं पुंस्त्वविधिः । यद्यपि संनिधानात्परवल्लिंगताया एवायमपवादस्तथापि परत्वान्नपुंसकतां बाधते । अत्रेदं चिन्त्यम् । उक्तरीत्याहोरात्र इत्यत्र पुंस्त्वमस्तु । द्विरात्रादौ तु वृत्तिकारहरदत्ताद्युक्तं पुंस्त्वमसङ्गतम् । तत्र विशिष्टक्लीबताविधेः । तथा च लिङ्गानुशासनसूत्रम् । अपथपुण्याहौ नपुंसकौ ॥ संख्यापूर्वा रात्रिरिति । अमरोप्याह । रात्रेः प्राक् संख्ययान्वितमिति, गणरात्रं निशाबव्हच इति च ॥ अनुवाकादयः पुंसीति वक्तव्यम् ॥ अनुवाकः । शंयुवाकः । सूक्तवाकः । वाक्यविशेषस्यैताः संज्ञाः । कर्मणि घञन्ता इति नपुंसकत्वे प्राप्ते वचनम् ॥

अपथं नपुंसकम् ॥ इदं नपुंसकं स्यात्तत्पुरुषे । समासान्तरे तु अपथो देशः । अपथा नगरी । कृतसमासान्तनिर्देशान्नेह । अपन्थाः ॥

अर्धर्चाः पुंसि च ॥ अर्धर्चादयः शब्दाः पुंसि क्लीबेच स्युः । ते च गणरत्ने संगृहीताः । तद्यथा । अर्धर्चध्वज-कुञ्ज शीधु मधवो वर्चस्क कूर्चाढकाः पङ्का नीक पि-नाकानिष्ककपटाष्टङ्कः किरीटः कुटः । कूटः कन्कट क-र्वटाण्ड शकटा वल्मीक सानू नटा खण्डोद्योगविडङ्ग शृंग सर-काः पुंखवृजौ मोदकः ॥ मधुर्मकरन्दे मद्ये माक्षिके च द्विलि-ङ्गः । मकरन्दस्य मद्यस्य माक्षिकस्यापि वाचकः । अर्धर्चादि-गणे पाठात्पुन्नपुंसकयोर्मधुरिति शाश्वतः । अमरस्तु माद्वीकं मधु न द्वयोरित्याह । चैत्रदैत्ययोस्तु पुंस्येव । वर्चस्कं शकृत् । कूर्चं दीर्घश्मश्रु । आढकं मानविशेषः । पङ्कः कर्दमपापयोः । अनीकं सैन्यम् । पिनाको रुद्रधनुस्त्रिशूलं च । निष्क आभर-णम् । कपटं व्याजः । टङ्कः पाषाणभेदनः । किरीटो मुकु-टम् । कुटो घटः । कूटं संघातो माया च । कङ्कटं सन्नाहः । कर्वटं नद्यादिवेष्टितः खेटकग्रामः । अण्डं पक्ष्यादि-प्रसवः । नटो नर्त्तकविशेषः । खण्ड इक्षुविकारः शकलं च । उद्योगमुत्साहः । विडङ्ग औषधम् । सरकं मद्यम् । शेषं प्रसिद्धम् ॥ शाको मस्तक कल्क शूकनिकराः शुल्कं नि-दाघो नखो बाण द्रोण सुवर्णभूषणरणाः कार्षापणस्तो-रणः । काण्डस्ताण्डवदण्डमण्डपिटकाः सक्तुस्तटाकवृणौ पेटो मञ्चक वारवाणचरणा वस्त्राम्बरैरावताः ॥ कल्क औ-षधनिर्यासः दम्भः पातकं च । शूकं धान्यादेः सूची । शु-ल्कं घट्टादावायस्थानम् । द्रोणो मानविशेषः पक्षिविशेषश्च । भू-षणो ऽलंकारः । काण्डः शरनालवर्गवारिसमयकुत्सितेषु । मण्डो दध्यादेर्द्रवांशः । पिटको वंशनिर्मितः पात्रविशेषः । पे-टः संहतिः । ऐरावतमिन्द्रगजः ॥ चरकमठविटङ्क क्ष्वेडिता

भूत वृत्तप्रयुत घृत वसन्ता हस्तबुस्तापराह्णाः ॥ पलित फलक कण्टा नाम कर्माभिधाना ऽयुत शत तृण नीडा यौवनोद्यानयानाः ॥ चरकं ग्रन्थविशेषः । मठं व्रतिनां स्थानम् । विटङ्कं कपोतपाली । क्ष्वोडितो मुखध्वनिविशेषः । भूतः पिशाचे द्विलिङ्गः । क्रियाशब्दस्तु विशेष्यलिङ्गः । वृत्तं शीलम् । प्रयुतं दशलक्षाः । घृत आज्यम् । हस्तं पाणिः । बुस्तं मांसशष्कुली । पलितः पाण्डुरकेशः । फलकः खेटकम् । कण्टं पापम् । अयंनामा अयंकर्मा । कार्यमित्यर्थः । कर्मव्याप्ये क्रियायाञ्च पुंनपुंसकयोर्मतमिति रुद्रः । यौवनो द्वितीयं वयः । उद्यान आरामः । यानो वाहनम् ॥ तीर्थप्रोथौ नलिनपुलिनस्तेनयोधौषधानि स्थानः शूर्पो निधनशयनद्वीपपुच्छायुधानि । पूथंगूथं कुणपकुतपक्षेमवर्णासनानिच्छत्राकाशप्रातिसरमुखाष्टापदारण्यवर्षाः ॥ प्रोथोऽश्वनासा । स्तेनश्चौर्यम् । योधो भटः । औषधो भेषजम् । स्थानम् आधारः । शूर्पो वेणुपात्रम् । निधनो मृत्युः । शयनः शय्या । यूथः पशुसमूहः । गूथो विष्ठा । कुणपं शवः । कुतपः कालविशेषः । वर्णमक्षरम् । प्रतिसरः कङ्कणम् । मुखो वदनम् । अष्टसु लोहेषु पदं प्रतिष्ठाऽस्येत्यष्टापदं सुवर्णम् । अष्टनः संज्ञायामिति दीर्घः । अरण्योटवी । वर्षः संवत्सरः ॥ कमण्डलुर्मण्डपकुट्टिमार्बुदावतंसपाराः शतमानचन्दनौ । समानपूषौ दृढमूषिकौदना दिनं विमानं च वितानलोहितौ ॥ अर्बुदो दशकोटिः । पर्वते तु पुल्लिङ्गः । तथा च मेदिनी । अर्बुदो मांसपुरुषे दशकोटिषु न स्त्रियाम् । महीधरावशेषे ना इति । अवतंसं शेखरम् । पारः परतीरम् । शतमानं रूप्यपलम् । समानः सदृशः । पूषो मुद्गादिनिर्यासः । मूषिक आखुः । ओदनं कूरः । दि-

नो दिवसः । लोहितः शोणितम् । गुणवाची तु वाच्यलिङ्गः ॥ अंसक्षीरकषायबिम्बविटपा नेत्राव्ययौ शेखरः केदाराश्रमशल्यशूलवलया बालस्तमालो मलः ॥ गुल्माङ्गारविहारतोमररसाः पात्रं पवित्रं पुरं मध्यो बुध्नमृणालमण्डल नला नालप्रबालोत्पलाः ॥ अंसः स्कन्धः । क्षीरो दुग्धम् । कषायं तुवरो रसः । बिम्बो मण्डलम् । विटपः स्तम्भः ॥ शाखाच ॥ नेत्रो नयनम् । अव्ययमथेत्यादि । शेखरमापीडः । केदारं क्षेत्रम् । आश्रमो मुनिस्थानम् । शूलमायुधं रोगविशेषश्च । वलयो हस्ताभरणम् । बालः शिशुः केशश्च । तमालो वृक्षविशेषः । मल पापं विट्च । गुल्मः प्रकाण्डम् । अङ्गारो दग्धकाष्ठम् । विहारः क्रीडास्थानम् । रसं मधुरादि । पात्रो भाजनम् । त्रिषु पात्री पुटी वाटीत्यमरादिहायोगव्यवच्छेदे तात्पर्यं न त्वन्ययोगव्यवच्छेदेपि । एवं पवित्रः पावनम् । पुरः पुरीत्याद्यापि । बुध्नमधोभागः । नलः सुषिरतृणम् । नालः पुष्करादीनां दंडः । अयं स्त्रियामपि, नालामृणालाग्रभुजोभजाम इति श्रीहर्षः । प्रवालं पल्लवो विद्रुमश्च ॥ जृंभो वज्रकबन्धकर्षककुदाश्चक्रान्धकाराङ्कुशा वक्रः संगमदेहदाडिमहिमाः पत्रं फलं वल्कलम् । कार्पासामिषकाशकोशकुसुमग्रीवमासेक्कसा निर्यासः कलशाम्बरीषकलला मार्षं करीषं कुशम् ॥ जृम्भो जृम्भणम् । वज्रः कुलिशम् । हीरकश्च । कबन्धं रुण्डः । कर्षः पलचतुर्भागः । ककुदं श्रेष्ठे वृषांसे राजचिन्हे च । चक्रो रथांगः । अङ्कुशः सृणिः । वक्रो मुखम् । संगमो नद्यादेर्मेलनम् । देहं शरीरम् । दाडिमं फलविशेषः । हिमस्तुहिनम् । पत्रः पर्ण वाहनं च । बलं सामर्थ्यं सैन्यं च । कुसुमः पुष्पम् । ग्रीवं

वातायनम् । मासं त्रिंशदहोरात्रः । इक्कसाश्चिक्कसं गोधूमादिचूर्णम् । अमरस्तु चिक्कसमर्धचूर्णौ पपाठ । निर्यासं वृक्षादेर्निष्यन्दः । कलशं घटः । अंबरीषं भ्राष्ट्रम् । कललं शुक्रशोणितयोः परिणामविशेषः । माषं परिमाणविशेषो धान्यविशेषश्च । करीषं शुष्कगोमयम् । कुशशब्दस्य विषयविवेकस्तु दंडमंडेत्यादिलिंगानुशासनसूत्रव्याख्यानावसरे वक्ष्यते ॥ मुसलमुकुलमूलाः पार्श्वपात्रीवपूर्वाः कमलहलचषालाः खण्डलं कुण्डलं च । निगलफलपलाला मङ्गलं शालशीलाविषचषकविशालाः पूलतैले कपालम् ॥ मूलः शिफा । पात्रीवं यज्ञोपकरणम् । कमलः पद्मम् । हलः सीरम् । चषालं यज्ञपात्रविशेषः । खंडलं खंडम् । फलः प्रयोजनम् । शालो वृक्षविशेषः । शीलं चरितम् । विषो वत्सनागादिः । चषको मधुपानभाजनम् । पूलं बद्धतृणसंचयः ॥ समरतिमिरवारा राजसूयोपवासौ चमसदिवसकंसा वाजपेयो हिरण्यम् ॥ जठरदरशरीरारावकान्तारराष्ट्राः पटहगृहकवाटाः कुक्कुटार्द्धौ च धाम ॥ वारः परिपाटी । कंसोस्त्री पानभाजनमित्यर्थः । दरस्त्रासे रोगे अल्पे च । शरीरः कायः । आरावः शब्दः । गृहशब्दो नपुंसकेभिधेयवचनः । पुंसि तु बहुवचनान्त एव । कवाटमररं तुल्ये इत्यमरः । अत्रैव कपाटशब्दोपि साधुरिति शक्तौ हस्तिकपाटयोरिति सूत्रे वक्ष्यामः । आर्द्रः शृङ्गवेरम् । धाम गृहं तेजश्च ॥ पद्माषाढकापित्थषाष्टिककुलान्यम्भोजवाजामृताः स्थूलद्यूतखलीनलोहकवचाशोकक्षयानेकपाः ॥ शंखस्तंडकधर्मचर्मरजतस्नेहासिहंसापराः सारः सैन्धवमध्यमाध्वरधनुर्मानस्तनस्छाणवः ॥ पद्मो निधौ पुंसि, जलजे तु द्विलिंगः । आषाढं व्रतिदंडो मासश्च । कपित्थो वृक्षविशेषः ।

वृत्तौ तु कवीयेति पठ्यते । अश्वमुखबन्धनरज्जुस्तस्यार्थः । उक्तं च वोपालितेन। नार्यां करीखलीनं कावीयं वा ना तुरङ्गमुख-भाण्डमिति । षष्टिकं व्रीहिभेदः । कुलो वंशो गृहं च । अम्भोजः कमलम् । वाजं पिच्छम् अमृतं सलिलम् । अशोकं तरुः । क्षयो गृहम् । अनेकपं । हस्ती । शङ्खो निधौ पुमान्, जलजे द्विलिङ्गः । तण्डकः छन्दोगानां ग्रन्थविशेषः । चर्माजिनम् । रजतं रूप्यम् । स्नेहं सौहार्दम् । असिः खड्गः । अपरोन्यः । सारो बलम् । सैन्धवो लवणम् । मानो दर्पः । स्थाणुः शङ्कुः ॥ महिमनेत्रकपञ्चकदण्डकाः ककचशम्बलकुण्डपकन्दराः ॥ कटकमालवमर्मरदैवताः शिखरकेसरदारुभगन्दराः ॥ महिम महत्वम्, नेत्रकं शृङ्खलकंटकम्। पंचकं विस्तारः। दंडकं छंदोविशेषः । ककचं काष्ठादिदारणसाधनम्।शंबलं पाथेयम्। कुण्डपं क्रतुविशेषः। कंदरा स्त्रियामपि। मालवो देशविशेषः। मर्मरं शुष्कपर्णध्वनिः। दैवतो देवः। दारुः काष्ठम् ॥ दीपोद्यमब्रह्मपिधानभावा वास्तुव्रतार्धप्रवराभिधानाः। अर्मोमुहूर्तो धनवप्रसौधा रेणुस्तलं लोमपटं विहायः ॥ दीपं प्रकाशविशेषः। भावः स्वभावः। वास्तुर्वेश्म। अर्मो चक्षूरोगः। धनो वित्तम् । पटं वस्त्रम् ॥ उटजचापनपुंसकपातका भुवनकोटरपल्वगोमयाः । अविखरं हरिचन्दनमूलकौ भवनसंक्रमगाण्डिवपत्तनाः ॥ उटजः पर्णशाला । चापो धनुः । पातकः पापम् । गाण्डिवो ऽर्जुनधनुः । दीर्घमध्योपि । एतच्च गांडयजगात्संज्ञायामिति सूत्रे वृत्त्यादौ स्पष्टम् ॥ कर्पूरकूर्पासकषष्ट्युशीरगाण्डीवनिष्ठेवसवर्णभस्राः । पिण्याकपुस्तौ नखरेषुखण्डवैनीतिकद्वीपिनखारकूटाः ॥ कर्पूरो घनसारः । कूर्पासकः कञ्चुकः । षष्टिः संख्यावाची । उशीरो नलदम् । नि-

ष्टेवो निष्ठीवनम् । भस्त्रश्चर्मकोशः भस्त्रा च । पुस्तः पुस्तकम् । नखरं नखः । इषुर्बाणः । अयं स्त्रीलिङ्गोपि । पत्री रोप इषुर्द्वयोरित्यमरः । तथा च श्रीहर्षः, कुसुमानि यदि स्मरेषव इत्युपक्रम्य हृदयं यदमूमहन्नमूरिति प्राड्युक्त । खण्डः पशादीनां समुदायः । विनीतानामिदं वैनीतिकम् । मनुष्यवाह्यं यानम् । द्वीपी व्याघ्रः । आरकूटः पित्तलम् ॥ अमरस्त्वाह । पुन्नपुंसकयोः शेषोर्धर्चपिण्याककण्टकाः । मोदकस्तण्डकष्टंकः शाटकः कर्पटोर्बुदः ॥ पातकोद्योगचरकतमालामलकानडः । कुष्ठं मुण्डं शीधु बुस्तं ष्वेडितं क्षेमकुट्टिमम् ॥ सङ्गमं शतमानार्मशम्बलाव्ययताण्डवम् । कविर्यं कन्दकार्पासं पारावारं युगन्धरम् ॥ यूपंप्रग्रीवपत्रीवे पूषञ्चमसाचिक्वसौ । अर्धर्चादौ घृतादीनां पुंस्त्वाद्यं वैदिकं ध्रुवम् ॥ तन्नोक्तमिह लोकेपि तच्चेदस्त्यस्तुशेषवदिति । अर्मं चक्षुरोगः । अर्तिस्तु सूदुस्तित्यादिना औणादिको मन्प्रत्यय इति तद्व्याख्यातारः । शम्बलं तालव्यादि दन्त्यादि चेति त एव । इह यद्यपि अर्धर्चादीन् चिक्कसान्तानत्र पठिताञ् कूटोस्त्रीत्यादींश्च तत्रतत्र प्राक्पठितान् विहायान्येषां प्रसिद्धविलक्षणं पुंस्त्वादिकमित्युक्तम् । तेन घृतक्षीरदारुलोमासनमुखशरीरादयो लोके नियतलिङ्गा एवेति प्रतीयते तथापि मुनित्रयवचनाविरहाद्वैदिकत्वं निर्मूलम् । अत एवापरितोषाल्लोके ऽपीत्याद्युक्तामित्याहुः । युक्तं चैतत् । लिङ्गानुशासनसूत्राणां घृतादिविषयकाणां लोकवेदसाधारण्येनैव प्रवृत्तेः । एवमन्येपि ये शब्दाः कोशादिना पुंनपुंसकलिङ्गतया निर्णीतास्ते सर्वे अर्धर्चादिषु बोध्याः ॥

इदानीं परवल्लिङ्गमित्यतिदेशे उपयुक्ततया प्रसङ्गात् पाणिनीयलिङ्गानुशासनसूत्राणि व्याख्यायन्ते ॥

लिङ्गम् ॥ स्त्री ॥ अधिकारसूत्रे एते ॥

ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः॥ ऋकारान्ता एते पञ्चैव स्त्रीलिङ्गाः । स्वस्रादिसप्तकस्यैव ङीन्निषेधेन कर्त्री त्यादेर्ङीपा ईकारान्तत्वात् । तिसृचतसृभ्यां तु स्त्रियामादेशतया विधानेपि प्रकृत्योस्त्रिचतुरोर्ऋदन्तत्वाभावात् ॥

अन्यूप्रत्ययान्तो धातुः ॥ अनिप्रत्ययान्त ऊप्रत्ययान्तश्च धातुः स्त्रियां स्यात् । अवनिः । चमूः । प्रत्ययग्रहणं किम् । देवयतेः क्विप् दयूः विशेष्यलिङ्गः ॥

अशनिभरण्यरणयः पुंसि च ॥ इयमयं वा अशनिः ॥

मिन्यन्तः ॥ मिप्रत्ययान्तो निप्रत्ययान्तश्च धातुः स्त्रियां स्यात् । भूमिः ग्लानिः ॥

वन्हितृष्ण्यग्नयः पुंसि ॥ पूर्वस्यापवादः ॥

श्रोणियोन्यूर्मयः पुंसि च ॥ इयमयं वा श्रोणिः ॥

क्तिन्नन्तः ॥ स्पष्टम् । कृतिरित्यादिं ॥

ईकारान्तश्च ॥ ईप्रत्ययान्तः स्त्री स्यात् । लक्ष्मीः ॥

ऊङाबन्तश्च ॥ कुरूः ॥ विद्या ॥

ख्यन्तमेकाक्षरम् ॥ श्रीः । भूः । एकाक्षरं किम् । पृथुश्रीः ॥

विंशत्यादिरानवतेः ॥ इयं विंशतिः । त्रिंशत् । चत्वारिंशत् । पञ्चाशत् । षष्टिः । सप्ततिः । अशीतिः । नवतिः ॥

दुंदुभिरक्षेषु ॥ इदं दुंदुभिः । अक्षेषु किम् । अयं दुंदुभिः । वाद्यविशेषो ऽसुरो वेत्यर्थः ॥

नाभिरक्षत्रिये ॥ इयं नाभिः ॥

उभावप्यन्यत्र पुंसि ॥ दुन्दुभिर्नाभिश्चोक्तविषयादन्यत्र पुंसि स्तः । नाभिः क्षत्रियः । कथं तर्हि समुल्लसत्पङ्कजपत्रकोमलैरुपाहितश्रोण्युपनीविनाभिभिरिति भारविः । उ-

च्यते । दृढभक्तिरित्यादाविव कोमलैरिति सामान्ये नपुंसकं बोध्यम् । वस्तुतस्तु लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति भाष्यात्पुंस्त्वमपीह साधु । अत एव नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् । द्वयोः प्राणिप्रतीके स्यात्स्त्रियां कस्तूरिकामदइति मेदिनिः । रभसोप्याह । मुख्यराट्क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः । चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदइति । एवमेवंविधेन्यत्रापि बोध्यम् ॥

तलन्तः ॥ अयं स्त्रियां स्यात् । शुक्लस्य भावः शुक्लता । ब्राह्मणस्य कर्म ब्राह्मणता । ग्रामस्य समूहो ग्रामता । देव एव देवता ॥

भूमिविद्युत्सरिल्लता वनिताभिधानानि ॥ भूर्भूमिः । विद्युत्सौदामनी । सरिन्निम्नगा । लता वल्ली वनिता । योषित् ॥

यादो नपुंसकम् ॥ यादःशब्दःसरिद्वाचकोपि क्लीबं स्यात् ॥

भाःस्रुक्स्रगुदिगुष्णिगुपानहः[१] ॥ एते स्त्रियां स्युः । इयं भा इत्यादि ॥

स्थूणौर्णे नपुंसके च ॥ एते स्त्रियां क्लीबे च स्तः । स्थूणम् । स्थूणा । ऊर्ण । ऊर्णा । तत्र स्थूणा काष्ठमयी द्विकर्णिका । ऊर्णा तु मेषादिलोम ॥

गृहशशाभ्यां क्लीबे ॥ नियमार्थमिदम् । गृहशशपूर्वे स्थूणोर्णे यथासंख्यं नपुंसके स्तः । गृहस्थूणम् । शशोर्णम् । शशोर्णं शशलोमानीत्यमरः ॥

प्रावृट्विप्रुट्रुट्तृट्विट्त्विषः ॥ एते स्त्रियां स्युः ॥

दर्विविदिवेदिखनिशान्याश्रेवोशिकृष्णोषाधिकट्यङ्गुलयः ॥ एते स्त्रियां स्युः । पक्षे ङीष् । दर्वी दार्विरित्यादि ॥

तिथिनाडिरुचिवीचिनालिधूलिकिकिकोलिच्छविराज्यादयः ॥ एते प्राग्वत् । इयं तिथिरित्यादि । अमरस्त्वाह । तिथयो द्वयोरिति । तथा च भारविः । तस्य भुवि बहुतिथास्तिथय इति । स्त्रीत्वे हि बहुतिथ्य इति स्यात् । श्रीहर्षश्च निखिलान्निशि पौर्णमातिथीनिति ॥

शष्कुलिराजिकुट्यशनिवर्तिभ्रकुटिभ्रुटिवलिपङ्क्तयः ॥ एतेपि स्त्रियां स्युः । इयं शष्कुलिः ॥

प्रतिपदापद्विपत्संपत्शरत्संसत्परिषदुषः संवित्क्षुत्पुन्मुत्समिधः ॥ इयं प्रतिपदित्यादि । उषा उच्छन्ती । उषा प्रातराधिष्ठात्री देवता ॥

आशीर्धूःपूर्गीर्द्वारः ॥ इयमाशीरित्यादि ॥

अप्सुमनस्समासिकतावर्षाणां बहुत्वं च ॥ अबादीनां पञ्चानां स्त्रीत्वं स्याद्बहुत्वं च । आप इमाः । स्त्रियः सुमनसः पुष्पम् । सुमना मालती जातिः । देववाची तु पुंस्येव । सुपर्वाणः सुमनसः । बहुत्वं प्रायिकं । एका च सिकता तैलदाने असमर्थेति अर्थवत्सूत्रे भाष्यप्रयोगात् । समांसमांविजायत इत्यत्र समायां समायामिति भाष्याच्च । विभाषाघ्राधेडिति सूत्रे अघ्रासातां सुमनसाविति वृत्तिव्याख्यायां हरदत्तोप्येवम् ॥

स्रक्त्वक्ज्योग्वाग्यवागूनौस्फिजः ॥ इयं स्रक् त्वक् ज्योक् वाक् यवागूः नौः स्फिक् ॥

भ्रुटिसीमासंबध्याः ॥ इयन्भ्रुटिः । सीमा । संबध्या ॥

चुल्लिवेणिखार्यश्च ॥ स्पष्टम् ॥

तारातारकाज्योत्स्नादयश्च ॥

शलाका स्त्रियां नित्यम् ॥ नित्यग्रहणमन्येषां क्वचिद्व्यभिचारं ज्ञापयति ॥

इतिस्त्र्यधिकारः ॥

पुमान् ॥ अधिकारोयम् ॥

घञन्ताः । पागस्त्यागः करो गरः । भावार्थएवेदम् । नपुंसकत्वविशिष्टे भावे क्तल्युड्भ्यां स्त्रीत्वविशिष्टे तु क्तिञादिभिर्बाधेन परिशेषात् । कर्मादौ तु घञाद्यन्तमपि विशेष्यलिङ्गम् । तथा च भाष्यम् । संबंधमनुवर्तिष्यतइति ॥

घाजंतश्च ॥ विस्तरः गोचरः चयः जय इत्यादि ॥

भयलिङ्गभगपदानि नपुंसके ॥ एतानि नपुसंके स्युः । भयम् । लिङ्गम् । भगम् । पदम् ॥

नञन्तः ॥ नञ्प्रत्ययान्तः पुंसि स्यात् । यज्ञः । यत्नः ॥

याच्ञा स्त्रियाम् ॥ पूर्वस्यापवादः ॥

क्यन्तो घुः ॥ किप्रत्ययान्तो घुः पुंसि स्यात् । आधिः । निधिः । उदधिः । क्यन्तः किम् । दानम् । घुः किम् । जन्निर्बीजम् ॥

इषुधिः स्त्री च ॥ इषुधिशब्दः स्त्रियां पुंसि च ॥ पूर्वस्यापवादः ॥

देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि ॥ एतानि पुंसि स्युः । देवाः सुराः । असुराः दैत्याः । आत्मा क्षेत्रज्ञः । स्वर्गो नाकः । गिरिः पर्वतः । समुद्रो ऽब्धिः । नखः कररुहः । केशः शिरोरुहः । दन्तो दशनः । स्तनः कुचः । भुजो दोः । कण्ठो गलः । खड्गः करवालः । शरो मार्गणः । पङ्कः कर्दम इत्यादि ॥

त्रिविष्टपत्रिभुवने नपुंसके ॥ स्पष्टम् । तृतीयं त्रिष्टपं त्रि-

विष्टपम् । स्वर्गाभिधानतया पुंस्त्वे प्राप्ते अयमारम्भः ॥

द्यौः स्त्रियाम् ॥ द्योदिवोस्तन्त्रेणोपादानमिदम् ॥

इषुबाहू स्त्रियां च ॥ चात्पुंसि ॥

बाणकाण्डौ नपुंसके च ॥ चात्पुंसि । त्रिविष्टपेत्यादि-चतुःसूत्री देवासुरेत्यस्यापवादः ॥

नान्तः ॥ अयं पुंसि । राजा । तक्षा । न च चर्मवर्मादिष्वतिव्याप्तिः । मनूद्यच्कोकर्तरीति नपुंसकप्रकरणे वक्ष्यमाणत्वात् ॥

ऋतुपुरुषकपोलगुल्फमेघाभिधानानि ॥ ऋतुरध्वरः पुरुषो नरः । कपोलो गण्डः । गुल्फः प्रपदः । मेघो नीरदः ॥

अभ्रं नपुंसकम् ॥ पूर्वस्यापवादः ॥

उकारान्तः ॥ अयं पुंसि स्यात् । प्रभुः । इक्षुः । हनुर्हट्टविलासिन्यां नृत्यारम्भे गदे स्त्रियाम् ॥ द्वयोः कपोलाऽवयव इति मेदनी । करेणुरिभ्यां स्त्री नेभे इत्यमरः । एवंजातीयकविशेषवचनानाक्रान्तस्तु प्रकृतसूत्रस्य विषयः । उक्तं च । लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधित इति ॥ एवमन्यत्रापि ॥

धेनुरज्जुकुहूसरयुतनुरेणुप्रियङ्गवः स्त्रियाम् ॥ समासे रज्जुः पुंसि च । कर्कटरज्ज्वा कर्कटरज्जुना ॥

श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके ॥ वसु चार्थवाचि ॥ अर्थवाचीति किम् । वसुर्मयूखाग्निधनाधिपेषु ॥

मद्गुमधुशीधुसानुकमण्डलूनि नपुंसके च ॥ चात्पुंसि । अयं मद्गुः । इदं मद्गु ॥

रुत्वन्तः ॥ मेरुः । सेतुः ॥

दारुकसेरुजतुवस्तुमस्तूनि नपुंसके ॥ रुत्वन्त इति पुंस्त्व-

स्यापवादः । इदं दारु ॥

सक्तुर्नपुंसके च ॥ चात्पुंसि । सक्तुः । सक्तु ॥

प्राग्रश्मेरकारान्तः ॥ रश्मिदिवसाभिधानमिति वक्ष्यति, प्रागेतस्मादकारान्त इत्यधिक्रियते ॥

कोपधः ॥ कोपधो ऽकारान्तः पुंसि स्यात् । स्तबकः । कल्कः ॥

चिबुकशालूकप्रातिपदिकांशुकोल्मुकानि नपुंसके ॥ पूर्वसूत्रापवादः ॥

कण्टकानीकसरकमोदकचषकमस्तकपुस्तकतडाकनिष्कशुष्कवर्चस्कपिनाकभाण्डकपिण्डककटकशण्डकपिटकतालकफलकपुलाकानि नपुंसके च ॥ चात्पुंसि । अयं कण्टकः । इदं कण्टकमित्यादि ॥

टोपधः ॥ टोपधो ऽकारान्तः पुंसि स्यात् । घटः । पटः ॥

किरीटमुकुटललाटवटविटशृङ्गाटकराटलोष्टानि नपुंसके ॥ किरीटमित्यादि ॥

कुटकूटकपटकवाटकर्पटनटनिकटकीटकटानि नपुंसके च ॥ चात्पुंसि । कुटः कुटमित्यादि ॥

णोपधः ॥ णोपधोऽकारान्तः पुंसि स्यात् । गुणः गणः । पाषाणः ॥

ऋणलवणपर्णतोरणरणोष्णानि नपुंसके ॥ पूर्वसूत्रापवादः ॥

कार्षापणस्वर्णसुवर्णव्रणचरणदूषणविषाणचूर्णतृणानि नपुंसके च ॥ चात्पुंसि ॥

थोपधः ॥ रथः । प्रस्थः ॥

काष्ठपृष्ठरिक्थोक्थानि नपुंसके ॥ इदं काष्ठमित्यादि ॥

काष्ठा दिगर्था स्त्रियाम् ॥ इमाः काष्ठाः ॥

तीर्थप्रोथयूथगाथानि नपुंसके च ॥ चात्पुंसि । अयं तीर्थः । इदं तीर्थम् ॥

नोपधः ॥ अदन्तः पुंसि । इनः । फेनः ॥

जघनाजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्ननिम्नचिन्हानि नपुंसके ॥ पूर्वस्यापवादः ॥

मानयानाभिधाननलिनोद्यानशयनासनस्थानचन्दनालानसम्मानभवनवसनसम्भावनविभावनविमानानि नपुंसके च ॥ चात्पुंसि । अयं मानः । इदं मानम् ॥

पोपधः ॥ अदन्तः पुंसि । यूपः । दीपः । सर्पः ॥

पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपान्तरीपाणि नपुंसके ॥ इदं पापमित्यादि ॥

शूर्पकुतप्रकुणपद्वीपविटपानि नपुंसके च ॥ अयं इदं शूर्पः शूर्पमित्यादि ॥

भोपधः ॥ स्तम्भः । कुम्भः ॥

तलभं नपुंसकम् ॥ पूर्वस्यापवादः ॥

जृम्भं नपुंसके च ॥ जृम्भम् । जृम्भः ॥

मोपधः ॥ सोमः । भीमः ॥

रुक्मसिध्मयुग्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके ॥ इदं रुक्ममित्यादि ॥

संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोदामानि नपुंसके च ॥ चात्पुंसि । अयं संग्रामः । इदं संग्रामम् ॥

योपधः ॥ समयः । हयः ॥

किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके ॥ स्पष्टम् ॥

गोमयकषायमलयान्वयाव्ययानि नपुंसके च ॥ गोमयः ।

गोमयम् ॥

रोपधः ॥ क्षुरः। अङ्कुरः ॥

द्वाराग्रस्फारतक्रवक्रवप्राक्षिप्रक्षुद्रच्छिद्रनारतीरदूरकुच्छ्रान्ध्राश्वभ्रभारगभीरक्रूरविचित्रकेयूरकेदारोदारजस्रशरीरकन्दरमन्दारपञ्जराजरजठराजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्रयन्त्रक्षत्रक्षेत्रमित्रकलत्रचित्रमूत्रसूत्रवक्त्रनेत्रगोत्राङ्गुलित्रभलत्रशस्त्रशास्त्रवस्त्रपत्रपात्रच्छत्राणि नपुंसके ॥ इदं द्वारमित्यादि ॥

शुक्रमदेवतायाम् ॥ इदं शुक्रं रेतः ॥

चक्रवज्रान्धकारसारावारपारक्षीरतोमरशृङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च ॥ चात्पुंसि। चक्रः। चक्रमित्यादि ॥

षोपधः ॥ वृषः वृक्षः ॥

शिरीषशिर्षाम्बरीषपीयूषपुरीषकिल्बिषकल्माषाणि नपुंसके ॥

यूषकरीषमिषविषवर्षाणि नपुंसके च ॥ चात्पुंसि। अयं यूषः। इदं यूषमित्यादि ॥

सोपधः ॥ वत्सः। वायसः। महानसः ॥

पनसबिसबुससाहसानि नपुंसके ॥

चमसांसरसानिर्यासोपवासकार्पासवासभासकासकांसमांसानि नपुंसके च ॥ इदं चमसम्। अयं चमस इत्यादि ॥

कंसं चाप्राणिनि ॥ कंसो ऽस्त्री पानभाजनम्। प्राणिनि तु कंसो नाम कश्चिद्राजा ॥

रश्मिदिवसाभिधानानि ॥ एतानि पुंसि स्युः। रश्मिर्मयूखः। दिवसो घस्रः ॥

दीधितिः स्त्रियाम् ॥ पूर्वस्यापवादः ॥

दिनाहनी नपुंसके ॥ अयमप्यपवादः ॥

मानाभिधानानि ॥ एतानि पुंसि स्युः । कुडवः । प्रस्थः ॥

द्रोणाढकौ नपुंसके च ॥ इदं द्रोणम् । अयं द्रोणः ॥

खारीमानिके स्त्रियाम् ॥ इयं खारी । इयं मानिका ॥

दाराक्षतलाजासूनां बहुत्वं च ॥ इमे दाराः ॥

नाड्यपजनोपपदानि व्रणाङ्गपदानि ॥ यथासंख्यं नाड्याद्युपपदानि व्रणादीनि पुंसि स्युः ॥ अयं नाडीव्रणः । अपाङ्गः । जानपदः । व्रणादीनामुभयलिङ्गत्वे ऽपि क्लीबत्वनिवृत्त्यर्थं सूत्रम् ॥

मरुद्भरुत्तरदृत्विजः ॥ अयं मरुत् ॥

ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकविपिमुनयः ॥ एते पुंसि स्युः । अयमृषिः ॥

ध्वजगजमुञ्जपुञ्जाः ॥ एते पुंसि ॥

हस्तकुन्तान्तवातवातदूतधूर्तसूतचूतमुहूर्ताः ॥ एते पुंसि अमरस्तु मुहूर्तोऽस्त्रियामित्याह ॥

षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः अयं षण्डः ॥

वंशांशपुरोडाशाः ॥ अयं वंशः । पुरो दाश्यते पुरोडाशः । कर्मणि घञ् । भवव्याख्यानयोः प्रकरणे पौरोडाशिकपौरोडाशात्ष्ठन्निति विकारप्रकरणे व्रीहेः पुरोडाश इति च निपातनात्प्रकृतसूत्रएव निपातनाद्वा दस्य डत्वम् । पुरोडाशभुजामिष्टमिति माघः ॥

ह्रदकन्दकुन्दबुद्बुदशब्दाः ॥ अयं ह्रदः ॥

अर्घपथिमथ्यभुक्षिस्तम्बपूगाः ॥ अयमर्घः ॥

पल्लवपल्वलकफेरफकट्टाहनिर्व्यूहमठमाणितरङ्गतुरङ्गगन्धस्क-

न्धमृदङ्गसङ्गसमुद्रपुङ्खाः ॥ अयं पल्लव इत्यादि ॥

सारथ्यतिथिकुक्षिवास्तिपाण्यञ्जलयः ॥ एते पुंसि। अयं सारथिः ॥

॥ इति पुल्लिङ्गाधिकारः ॥

नपुंसकम् ॥ अधिकारोऽयम् ॥

भावे ल्युडन्तः ॥ हसनम्। भावे किम्। पचनोऽग्निः। इध्मवृश्चनः कुठारः ॥

निष्ठा च ॥ भावे या निष्ठा तदन्तं क्लीबं स्यात्। हसितम्। गीतम् ॥

त्वष्यञौ तद्धितौ ॥ शुक्लत्वम्। शौक्ल्यम्। ष्यञः षित्त्वसामर्थ्यात्पक्षे स्त्रीत्वम्। चातुर्यम्। चातुरी। सामग्र्यम्। सामग्री। औचित्यम्। औचिती ॥

कर्मणि च ब्राह्मणादिगुणवचनेभ्यः ॥ ब्राह्मणस्य कर्म ब्राह्मण्यम् ॥

यद्यढग्यगञ्ण्वुञ्छाश्च भावकर्मणि ॥ एतदन्तानि क्लीबानि। स्तेनाद्यन्नलोपश्च। स्तेयम्। सख्युर्यः। सख्यम्। कपिञ्ञात्योर्ढक्। कापेयम्। पत्यन्तपुरोहितादिभ्यो यक्। आधिपत्यम्। प्राणभृज्जातिवयोवचनोद्गात्रादिभ्यो ऽञ्। औष्ट्रम्। ह्यायनान्तयुगादिभ्यो ऽण्। द्वैहायनम्। द्वन्द्वमनोज्ञादिभ्यो वुञ्। पितापुत्रकम्। होत्राभ्यश्छः। आच्छावाकीयम् ॥

अव्ययीभावः ॥ अधिस्त्रि ॥

द्वन्द्वैकत्वम् ॥ पाणिपादम् ॥

अभाषायां हेमन्तशिशिरावहोरात्रे च ॥ स्पष्टम् ॥

अनञ्कर्मधारयस्तत्पुरुषः ॥ अधिकारोऽयम् ॥

अनल्पे छाया ॥ शरच्छायम् ॥

राजामनुष्यपूर्वा सभा ॥ इनसभमित्यादि ॥

सुरासेनाच्छायाशालानिशा स्त्रियां च ॥ परवत् अन्यस्तत्पुरुषः परवल्लिङ्गः स्यात् ॥

रात्रान्हाहाः पुंसि ॥

अपथपुण्याहे नपुंसके संख्यापूर्वा रात्रिः ॥ त्रिरात्रम् । संख्यापूर्वेति किम् । सर्वरात्रः ॥

द्विगुः स्त्रियां च ॥ व्यवस्थया । पञ्चपूली । त्रिभुवनम् ॥

इसुसन्तः ॥ हविः । धनुः ॥

अर्चिः स्त्रियां च ॥ इसन्तत्वेऽपि अर्चिः स्त्रियां नपुंसके च स्यात् । इयमिदं वा अर्चिः ॥

छदिः स्त्रियामेव ॥ इयं छदिः । छद्यतेऽनेनेति छादेश्चुरादिण्यन्तादार्चेश्चुचीत्यादिना इस् । इस्मन्नित्यादिना ह्रस्वः । पटलं छदिरित्यमरः । तत्र पटलसाहचर्याच्छदिषः क्लीबतां वदन्तोऽमरव्याख्यातार उपेक्ष्याः ॥

मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि ॥ एतेषामभिधायकानि क्लीबे स्युः । मुखमाननम् । नयनं लोचनम् । लोहं कालम् । वनं गहनम् । मांसमामिषम् । रुधिरं रक्तम् । कार्मुकं शरासनम् । विवरं बिलम् । जलं वारि । हलं लाङ्गलम् । धनं द्रविणम् । अन्नमशनम् । अस्यापवादानाह त्रिमूर्त्या ॥

सीरार्थौदनाः पुंसि ॥

वक्त्रनेत्रारण्यगाण्डीवानि पुंसि च ॥ वक्त्रो वक्त्रम् । नेत्रो नेत्रम् । अरण्यो रण्यम् । गाण्डीवो गाण्डीवम् ॥

अटवी स्त्रियाम् ॥

लोपधः ॥ कुलम् । कूलम् । स्थलम् ॥

तूलोपलतालकुसूलतरलकम्बलदेवलवृषलाः पुंसि ॥ अयं तूलः ॥

शीलमूलमङ्गलसालकमलतलमुसलकुण्डपललमृणालबालानिगलपलालविडालखिलशूलाः पुंसि च ॥ चात् क्लीबे । इदं शीलमित्यादि ॥

शतादिः संख्या ॥ शतम् । सहस्रम् । शतादिरिति किम् । एको द्वौ बहवः । संख्येति किम् । शतशृङ्गो नाम पर्वतः ॥

शतायुतप्रयुताः पुंसि च ॥ अयं शतः । इदं शतमित्यादि ॥

लक्षा कोटिः स्त्रियाम् ॥ इयं लक्षा । इयं कोटिः । वा लक्षा नियुतं च तदित्यमरात् क्लीबे ऽपि लक्षम् ॥

सहस्रः पुंसि ॥ अयं सहस्रः ॥

मन्द्र्यच्कौ ऽकर्तरि ॥ मन्त्यत्ययान्तौ द्र्यच्कौ क्लीबः स्यान्न तु कर्तरि । वर्म । चर्म । द्र्यच्कौ किम् । अणिमा । महिमा । अकर्तरि किम् । ददादि इति दामा ॥

ब्रह्मन् पुंसि च ॥ अयं ब्रह्मा । इदं ब्रह्म ॥

नामरोमणी नपुंसके ॥ मन्द्र्यच्क इत्यस्यायं प्रपञ्चः ॥

असन्तौ द्र्यच्कौ ॥ यशः । मनः । तपः । द्र्यच्कौ किम् । चन्द्रमाः ॥

अप्सराः स्त्रियाम् ॥ एता अप्सरसः । प्रायेणायं बहुवचनान्तः ॥

त्रान्तौ ॥ पत्रम् । छत्रम् ॥

यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव ॥

भृत्रामित्रच्छत्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्राः पुंसि ॥ अयं भृत्रः । न मित्रममित्रः । तस्य मित्राण्यमित्रास्ते इति माघः ।

स्यातामिमित्रौ मित्रे चेति च । यत्तु द्विषोऽमित्र इति सूत्रे हरदत्तेनोक्तम्, अमेर्द्विषाद्वित्यौणादिक इत्रच् । अमेरमित्रं मित्रस्य व्यथयेदित्यादौ मध्योदात्तस्तु चिन्त्यः । नञ्समासे ऽप्येवम् । परवल्लिङ्गतापि स्यादिति तु तत्र दोषान्तरमिति तत्प्रकृतसूत्रापर्यालोचनमूलकम् । स्वरदोषोद्भावनमपि नञोजरमरमित्रमृता इति षाष्ठसूत्रास्मरणमूलकमिति दिक् ॥

पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च ॥

बलकुसुमशुल्वयुद्धपत्तनरणाभिधानानि ॥ बलं वीर्यम् ॥

पद्मकमलोत्पलानि पुंसि च ॥ पद्मादयः शब्दाः कुसुमाभिधायित्वेऽपि द्विलिङ्गाः स्युः । अमरोऽप्याह ॥ वा पुंसि पद्मं नलिनमिति । एवं चार्धर्चादिसूत्रे तु जलजे पद्मं नपुंसकमेवेति वृत्तिग्रन्थो मतान्तरेण नेयः ॥

आहवसंग्रामौ पुंसि ॥

आजिः स्त्रियामेव ॥

फलजातिः ॥

फलजातिवाची शब्दो नपुंसकं स्यात् । आमलकम् । आम्रम् ॥

वृक्षजातिः ॥ स्त्रियामेव । क्व चिदेवेदम् । हरीतकी ॥

विपज्जगत्सकृत्शकनृपृषत्शकृच्छकृदस्त्रियतः ॥ एते क्लीबाः स्युः ॥

नवनीतावतानानृतामृतनिमित्तवित्तचित्तपित्तव्रतरजतवृत्तपलितानि ॥ श्राद्धकुलिशदैवपीठकुण्डाङ्गदधिसक्थ्यक्ष्यास्यास्पदाकाशकण्वबीजानि ॥ एतानि क्लीबे स्युः ॥

दैवं पुंसि च ॥ दैवम् । दैवः ॥

धान्याज्यसस्यरूप्यापण्यवर्ण्यधृष्यहव्यकव्यकाव्यसत्याप-

त्यमूल्यशिक्यकुड्यहर्म्यतूर्यसैन्यानि ॥ इदं धान्यमित्यादि ॥

द्वन्द्वबर्हदुःखवडिशपिच्छबिम्बकुटुम्बकवचवरशरवृन्दारकाणि ॥ अक्षमिन्द्रिये ॥ इन्द्रिये किम् । रथाङ्गादौ मा भूत् ॥

इति नपुंसकाधिकारः ॥

स्त्रीपुंसयोः ॥ अधिकारोऽयम् ॥

गोमणियष्टिमुष्टिपाटलिवस्तिशाल्मलित्रुटिमसिमरीचयः ॥ इयमयं वा गौः ॥

मृत्युसीधुकर्कन्धुकिष्कुकण्डुरेणवः ॥ इयमयं वा मृत्युः ॥

गुणवचनमुकारान्तं नपुंसकं च ॥ त्रिलिङ्गमित्यर्थः । पटु । पटुः । पट्वी ॥

॥ इति स्त्रीपुंसाधिकारः ॥

पुन्नपुंसकयोः ॥ अधिकारोऽयम् ॥

घृतभूतमुस्तक्ष्वेलितैरावतपुस्तकबुस्तलोहिताः ॥ अयं घृतः । इदं घृतम् ॥

शृङ्गार्घनिदाघोद्यमशल्यदृढाः ॥ अयं शृङ्गः । इदं शृङ्गम् ॥

व्रजकुञ्जकुथकूर्चप्रस्थदर्पार्भार्धचेदर्भपुच्छाः ॥ अयं व्रजः । इदं व्रजम् ॥

कबन्धौषधायुधान्ताः ॥ स्पष्टम् ॥

दण्डमण्डखण्डशवसैन्धवपार्श्वकाशकुशकाशाङ्कुशकुलिशाः ॥ एते पुन्नपुंसकयोः स्युः । कुशो रामसु ते दर्भे योक्त्रेधीपे कुशं जले इति विश्वः । शलाकावाची तु स्त्रियाम् । तथा च जनपदादिसूत्रेणायोविकारे ङीषि कुशी । दारुणि तु टापा कुशा वानस्पत्याः स्थ ता मा यातेति श्रुतिः । अतः कृकमीति सूत्रे कुशाकर्णीष्विति प्रयोगश्च । व्याससूत्रे च । हानौ तूपाय-

नशब्दे शेषत्वात्कुशाच्छन्द इति। तत्र शारीरकभाष्येऽप्येवम्। एवं च श्रुतिसूत्रभाष्याणामेकवाक्यत्वे स्थिते आच्छन्द इत्याङ्प्रश्लेषादिपरो भामतीग्रन्थः प्रौढिवादमात्रपर इति विभावनीयं बहुश्रुतैः॥

गृहमेहदेहपट्टपटहाष्टापदाम्बुदककृदाश्च॥

॥ इति पुन्नपुंसकाधिकारः॥

अवशिष्टलिङ्गम्॥ अव्ययं कतियुष्मदस्मदः। ष्णान्तासंख्या॥ शिष्टा परवत्॥ एकः पुरुषः। एकास्त्री। एकं कुलम्॥

गुणवचनं च॥ शुक्लः पटः। शुक्ला पटी। शुक्लं वस्त्रम्॥

कृत्याश्च॥ करणा॥

करणाधिकरणयोर्ल्युट् च॥ सर्वादीनि सर्वनामानि॥ स्पष्टार्थेयं त्रिसूत्री॥

इति पाणिनीयलिङ्गानुशासनं समाप्तम्॥

प्रासङ्गिकं समाप्य प्रकृतमनुसरामः॥

इदमोन्वादेशेशनुदात्तस्तृतीयादौ॥ अन्वादेशविषयस्येदमोनुदात्तोशादेशः स्यात्तृतीयादौ। एतेबभ्रूविचक्षणं शंसामि, माभ्याङ्गा अनु, इह बभ्रूशब्देनोक्तयोरिदमा परामर्शेप्यन्वादेशो भवत्येव। अन्वादेशश्च कथितानुकथनमात्रं नात्विदमा कथितस्येदमैवानुकथनामिति भाष्योक्तेः। न चैवमीषदर्थइति श्लोके यच्छब्देनोक्तस्य पुनः कथनादेतमातमित्यत्रैनादेशः स्यादिति वाच्यम्। किञ्चिद्विधायान्यद्विधातुमनुकथनस्यैवान्वादेशत्वात्। ईषदर्थादिवृत्तेस्त्वनुवादेप्यविधानात्। अशादेशवचनं साकच्कार्थम्। अन्यथान्वादेशे ऽज्ञातार्थविवक्षायामिमकाभ्यामित्यपि प्रसज्येत। ननु त्यदाद्यत्वेन सिद्धौ विधानसाम-

र्थात्सर्वादेशोस्तु किं शित्वेन । मैवम् । आभ्यामेभिरित्यादौ विकाराभावार्थतापत्तेः, मोराजीतिवत् । नन्वाभ्यामिन्द्रपक्कमित्यादावन्वादेशत्वविवक्षाविरहे यथा ऊडिदमिति विभक्तेरुदात्तता तथा माभ्यां गा इत्यत्रापि कुतो नेति चेन्न । तत्र प्रकृतेरनुदात्तविधानात् । ऊडिदमिति सूत्रे चान्तोदात्तादुत्तरपदादिति सूत्रादन्तोदात्तादित्यस्यानुवर्त्तनात् । तथा चान्वादेशे आभ्यामित्यादेः सर्वानुदात्तता इतरत्र त्वन्तोदात्तेति विवेकः । स्यादेतत् । सावेकाच इत्युदात्तेनेह भाव्यम् । सुः सप्तमीबहुवचनमिति भाष्ये वृत्तौ चोक्तत्वात् । यत्तूडिदमिति सूत्रे हरदत्तेनोक्तम् । इहान्तोदात्तादित्यनुवृत्तिसामर्थ्यात्सावेकाच इत्यपि न प्रवर्त्तते । न च यदीमेनाउशत इति शसो व्यावृत्तौ सामर्थ्योपक्षयः । एकाज्ग्रहणेनैव तव्यावृत्तेः । एकाच इत्यस्य चावश्यानुवर्त्त्यत्वात् । अन्यथा ग्रीवायां बद्धो अपि कक्षआसनि । मत्स्यं नदीन उदनि क्षिपन्तमित्यत्रातिप्रसङ्गात् । आसन्नित्यादयो ह्यन्तोदात्ता एवादेशाः सूत्रे पठिता इति । अत्रेदं वक्तव्यम् । आभ्यामित्यत्र सावेकाच इत्यस्य प्राप्तिरेव नास्ति सप्तमीबहुवचनेष्वेष्विति रूपं न तादृगिहास्ति । तथा चात्रैवान्तोदात्तग्रहणस्य चरितार्थत्वात्सामर्थ्यविरहः । तथा च माभ्याङ्गाः, तदस्य प्रियम्, तदस्मै नव्यमित्यादेः सिद्धावपि भिसादौ दोषस्तदवस्थ एव । एभिरग्रे, सुन्वन्ति सोमान्वचसि त्वमेषाम्, प्रेणातदेषां निहितं, एषु धावीरवदित्यादौ हि ए इत्येव रूपमस्त्येव । तथा च तत्र विभक्तेरुदात्तप्रसङ्गः । न च सावेकाच इत्येतत्सूत्रस्थकैयटपर्यालोचनयेष्टापत्तिरिति वाच्यम् । अन्येत्विति वदता कैयटेन तन्मते ऽस्वरसाविष्करणात् । तद्बीजन्तु बहुतरवैदिक-

प्रयोगविरोध एव । अथोच्येत सावेकाच इति सूत्रे हरदत्तोक्तरीत्या सुः प्रथमैकवचनमेव । न च त्वयेत्यत्रातिप्रसङ्गः । सावचर्णेति निषेधात् । शेषेलोपष्टिलोप इति पक्षे तु सावेकाचत्वाभावात्प्राप्तिरेव नास्ति । रूपविवक्षापि विफला । एवञ्च एभिरित्यादौ प्राप्तिरेव नास्तीति । तदपि न । रूपविवक्षाभावे दोषभ्यामित्यत्रातिप्रसङ्गात् । तैत्तिरीये हि अंसाभ्यां स्वाहा दोषभ्यां स्वाहेति मध्योदात्तं पठ्यते । एवं स्थिते सुः सप्तमीबहुवचनमेव ग्राह्यम् । अन्यथा इन्द्रोयातो वासितस्य राजेत्यत्र या इत्यन्तोदात्तं न स्यात् । नहि प्रथमैकवचनं यद्रूपं यानिति तादिहास्ति । अत एव गोशुनोः प्रतिषेधः सार्थकः । तदेवमन्तोदात्तानुवृत्तिसामर्थ्यं प्रथमैकवचनग्रहणं वा शरणमित्येवंरूपस्य षाष्ठहरदत्तग्रन्थबललब्धस्य समाधानद्वयस्यापि दुष्टत्वादेभिरित्यादि कथन्निर्वाह्यमिति फलितः पूर्वपक्षः । अत्रोच्यते । सावेकाच इत्यत्राप्यन्तोदात्तादित्यस्यापकर्षान्नोक्तदोषः । वृत्त्यादावननुवर्त्तितस्याप्यनुवृत्तिस्तु बहुधा दृष्टैव । अत एव तुरुस्तुसूत्रे स्तुवीतेत्यादिसिद्धये पितीत्यस्य निवृत्त्यै सार्वधातुकग्रहणमिति स्थिते शाम्यतीति श्यनं इटं वारयितुं तिङीत्यस्यानुवृत्तिर्वक्ष्यते ॥

एतदस्रतसोस्रतसौ चानुदात्तौ ॥ अन्वादेशविषये एतदोश् स्यात्स चानुदात्तस्रतसोः परतः तौ चानुदात्तौ स्तः । एतस्मिन् ग्रामे सुखं वसामः अथो ऽत्राधीमहे अतो न गन्तास्मः । अत्रात इति पदे सर्वानुदात्ते । ननु पञ्चमे एतदोनिति भाष्यसम्मतः पाठः । न्यासरीत्या वृत्तिपाठोप्येवमेव । पदमञ्जरीरीत्या तु एतदोशीति वृत्तिपाठः । उभयथापि अकारे सिद्धे किमनेनेति चेत् । पाञ्चमिकस्योदात्ततया ऽनु-

दात्तार्थमिह पुनर्वचनमिति गृहाण । त्रतसोरिति वचनं निमित्तभावार्थम् । अन्यथा त्रतसौचानुदात्तावित्यन्वाचयो विज्ञायेत । स्यादेतत् । त्रतसोः कृतयोः प्रकृतोर्ङित्स्वरः। ततः शेषनिघातेन त्रतसोरनुदात्तत्वं सिद्धम् । अश्मात्रस्य त्वनुदात्तत्वं विधीयताम् । मैवम् । त्रतसोर्हि कृतयोर्येननाप्राप्तिन्यायेनापवादत्वान्नित्यत्वाच्चानुदात्तोशादेशः स्यात् । ततस्तद्विधानसामर्थ्याङ्ङित्स्वरस्याप्रवृत्तावुत्सर्गः प्रत्ययस्वर एव त्रतसोः स्यात् । यथा गोष्पदमित्यत्र णमुलूलोपेन सहविधानाङ्ङित्स्वराप्रवृत्तौ प्रत्ययाद्युदात्तत्वे सति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तं पदं भवति । तस्मात्रतसौ चानुदात्ताविति कर्तव्यमेव ॥

द्वितीयाटौ स्वेनः ॥ द्वितीयायाण्टौसोश्च परत इदमेतदोरेनादेशः स्यात्स चानुदात्तः अन्वादेशे । इदमोत्र मण्डूकप्लुत्या ऽनुवृत्तिः । अथैनमद्रेः । एनेन । एनयोः । कथन्तार्हि अइउणित्यत्रोदाहृते हेरोहिणीति श्लोके एनादेश इति चेत् । अयं श्रोणीतटं स्पृशन्नि एनं निवारयेति व्यत्यासेन योज्यम् । आशीविषेण रदनच्छददंशदानमेतेन ते पुनरनर्थतया न शङ्क्यमित्यादौ त्वन्वादेशत्वस्याविवक्षा बोध्या । अभून्नृप इत्यादावनद्यतनत्वस्य यथा । अथ कथं प्रक्षालयैतत्परिवर्तयैनादिति । नपुंसकैकवचने एनादिति वक्तव्यात् । वस्तुतस्तु सूत्रएवैनद्वक्तव्यः । एनं एनौ इत्यादि तु त्यदाद्यत्वेन सिद्धम् । एनंश्रित इति द्वितीयासमासे त्वेतच्छ्रित इत्येव भवति । नत्वेत एनद्वा । सुपोधात्विति लुका बहिरङ्गेणाप्यन्तरङ्गाणां बाधनात् । न चैवं प्रक्षालयैनदित्यपि न स्यादिति वाच्यम् । अमो लुका लुप्तत्वेपि तकारोच्चारणसाम-

ष्यर्यादेनदादेशप्रवृत्तेः। न चैवमेतच्छित्वेतिपि एनदापत्तिः। एकपदाश्रयत्वेनान्तरङ्गे स्वमोर्लुकि चरितार्थत्वेन बहिरङ्गे समासलुकि अप्रवृत्तेः॥

आर्धधातुके॥ अधिकारोयं ण्यक्षत्रियेति यावत्। विषयसप्तमी चेयम्। तेनार्धधातुकोत्पत्तेः प्रागेवादेशेषु प्रवृत्तेषु यथायथं प्रत्ययाः। तथाहि। अस्तेर्भव्यम्। परसप्तम्यान्तु ण्यति कृते भाव्यमिति स्यात्। अजेः प्रवेयम्। ण्यति तु प्रवैयमिति स्यात्। चक्षिङ आख्येयम्। ण्यति युकि आख्याय्यमिति स्यात्। ब्रुवस्तु अजन्तत्वाद्यति वक्ष्यमिति स्यात्। वाच्यमिति चेष्यते। स्यादेतत्। आङ्गधिकारस्थे आर्धधातुकाधिकारएव जग्ध्यादयो विधीयन्ताम्, मैवम्। जक्षतुरधिजगे अध्यगीष्ट बभूव विव्यतुरित्यत्र घस्लाद्यादेशानामसिद्धतया उपधालोपाल्लोपेत्ववुग्यणामभावापत्तेः। न चातोलोपादयोप्यत्रैव विधीयन्तामिति वाच्यम्। गतो गतवानित्यत्रानुनासिकलोपस्यासिद्धत्वाभावादतोलोपापत्तेः। यदि त्वार्धधातुकोपदेशकाले यदकारान्तमिति व्याख्यायते ऽसिद्धवत्सूत्रञ्च प्रत्याख्यायते तदा ऽन्यतर आर्धधातुकाधिकारः शक्योऽकर्तुम्। नन्वेकश्चेदार्धधातुकाधिकारस्तार्हि विषयसप्तमीत्वपरसप्तमीत्वे कथं व्यवतिष्ठेयातामिति चेन्न। सूत्रद्वयारम्भपक्षेप्याङ्गस्यैकस्यैव ज्ञापकबले नोभयरूपताश्रयणात्। यथा चैतत्तथा नपदान्तसूत्रे उपपादितम्॥

अदोजग्धि र्ल्यप्ति किति॥ ल्यबिति लुप्तसप्तमीकं पृथक् पदम्। अत्तेर्जग्धिरादेशः स्याल्ल्यपि तादौ किति च। इकार उच्चारणार्थो न त्वनुबन्धः। नुम्प्रसङ्गात्। एवं ब्रुवोवचिरित्यादौ। प्रजग्ध्य जग्धम्। जग्धौ सिद्धेन्तरङ्ग-

त्वात्तिकितीति ल्यबुच्यते । ज्ञापयत्यन्तरङ्गाणां ल्यपा भवति बाधनम् ॥ तथाहि । पदद्वयसापेक्षं समासं प्रतीक्षमाणो ल्यब्बहिरङ्गः ततः प्राक्तिकितीति सिद्धौ जग्धिः । ल्यब्ग्रहणन्तु हित्वादत्वात्वेत्वदीर्घत्वशूडिठामन्तरङ्गाणामपि बाधं ज्ञापयति । दधातेर्हिः, जहातेश्च त्कि, हित्वा । नेह । विधाय । दोदद्घोः, दत्वा । नेह । प्रदाय । जनसनखनां सनझलोः, खात्वा । नेह । प्रखन्य । प्रखाय । इह हि ये विभाषेति विकल्पः । घतिस्यति मास्थामित्ति किति । स्थित्वा । नेह । प्रस्थाय । अनुनासिकस्यक्विझलोरिति दीर्घः । क्रान्त्वा । नेह । प्रक्रम्य । ह्वोः शूट् । पृष्ट्वा । हूत्वा । नेह । आपृछ्य । प्रदीव्य । इट् । देवित्वा । नेह । प्रदीव्य । वस्तुतस्तु ल्यब्ग्रहणं नान्तरङ्गबाधं ज्ञापयितुं किन्तु विध्यर्थं व्यर्थमेव वेति निरूपितमत्रैव परस्मिन्निति सूत्रे ॥

लुङ्सनोर्घस्लृ ॥ अदोघस्लृ स्याल्लुङि सनि च । लृदित्वादङ् । अघसत् । जिघत्सति । यद्यपि घसिः प्रकृत्यन्तरमस्ति तथापि अदेरात्सीदित्सतीत्यनिष्टं रूपं वारयितुं सूत्रम् । अच्युपसङ्ख्यानम् ॥ प्रात्तीति प्रघसः । इदमपि अदेः पचाद्यचि अद इति रूपं वारयितुम् । प्रघस इत्यस्य प्रकृत्यन्तरेणैव सिद्धेः ॥

घञपोश्च ॥ अत्रि अपि चादेर्घस्लादेशः स्यात् । घासः । प्रघसः । उपसर्गेद इत्यप् ॥

बहुलच्छन्दसि ॥ अदो बहुलं घस्लादेशः स्याच्छन्दसि । घस्तान्नूनम् । लुङि मन्त्रेघसेत्यादिना च्लेर्लुक् । बहुलच्छन्दस्यमाङ्योगे इत्यडभावः । सग्धिश्च मे । क्तिनि घसिभसोर्हलिचेत्युपधालोपः । समानस्यछन्दसीति सभावः । न

च भवति, अत्ताम् । प्रकृत्यन्तरेण सिद्धे सूत्रस्य प्रयोजनं मृग्यम् ॥

लिट्यन्यतरस्याम् ॥ अदेर्घस्लृ वा स्याल्लिटि। जघास । जक्षतुः। जक्षुः।आदतुः। आदुः। प्रकृत्यन्तरस्यासर्वविषयत्वज्ञापनार्थमिदं सूत्रम्। तेन यत्र लिङ्गं वचनञ्च नास्ति तत्र तस्य प्रयोगो न। तत्र लृदित्करणं लुङि प्रयोगस्य लिङ्गम्। घसिश्च सान्तेष्विति अनुदात्तपाठे वलादावार्द्धधातुके । सृघस्यदःक्मराजीति वचनं क्मरचि । भूवादौ परस्मैपदिषु पाठाच्छपि परस्मैपदेषु प्रयोगः । अत एवाशीर्लिङि कर्त्तरि नास्य प्रयोग इति माधवादयः ॥

वेञो वयिः ॥ वेञो लिटि परे वयिर्वा स्यात्। उवाय। ऊयतुः । ऊयुः । लिटिवयोय इति निषेधाद्यकारस्य न सम्प्रसारणम्। वश्चास्यान्यतरस्यांकितीति वकारादेशपक्षे ऊवतुः ऊवुः। वयेरभावे ववौ ववतुः वविः । वेञ इति सम्प्रसारणनिषेधः ॥

हनो वध लिङि ॥ हन्तेर्वध इत्यादेशः स्यादार्द्धधातुके लिङि । वध्यात् ॥

लुङि च॥ हनो वधः स्याल्लुङि। अवधीत्। वधादेशोदन्तः। अल्लोपस्य स्थानिवद्भावादतो हलादेर्लघोरिति वृद्धिर्न ॥

आत्मनेपदेष्वन्यतरस्याम् ॥ हनो वधः स्याद्वा आत्मनेपदं यो लुङ् तत्परे अर्धधातुके । आवधिष्ट । आवधिषाताम् । आवधिषत । आहत । आहसाताम् । आहसत। आङोयमहन इत्यात्मनेपदम् । हनःसिजिति कित्त्वम् । अनुदात्तोपदेशेति नलोपः ॥

इणो गा लुङि ॥ इणो गा स्याल्लुङि । अगात् ।

अगाताम् । अगुः । अगायि भवता । इण्वदिक इति वक्तव्यम् ॥ अध्यगात् । न केवलङ्गादेशमात्रस्यातिदेशः किन्तु सकलकार्यस्य । तेन इणो यण् स्यात् । अधियन्ति । अधीत्य । एतिस्तुशास्वृति क्यविति हरदत्तः । अन्ये तु गादेशस्यैवातिदेशमास्थाय ससीतयोराघवयोरधीयन्निति भट्टिप्रयोगं समर्थयन्तइति तृतीये स्फुटीकरिष्यामः ॥

णौ गमिरबोधने ॥ अबोधनार्थस्य इणो गमिरादेशः स्याण्णौ ॥ गमयति । बोधने तु प्रत्याययति । इण्वदिकः । अधिगमयति ॥

सनि च ॥ अबोधनार्थस्य इणो गमिः स्यात्सनि । जिगमिषति । बोधने तु प्रतीषिषति । इण्वदिकः ॥ अधिजिगमिषति ॥

इङश्च ॥ इङो गमिः स्यात्सनि । अधिजिगांसते ॥

गाङ् लिटि ॥ इङो गाङ् स्याल्लिटि । अधिजगे । वार्त्तिकमते लिटीति परसप्तमी । द्विर्वचनेचीति स्थानिवद्भावस्तु न भवति । लिलटीति द्विलकारकनिर्देशेन लावस्थायामेव गाङः प्रवृत्तेः । भाष्यमते तु आर्धधातुकीयाः सामान्येन भवन्तीत्यभ्युपगमात्परनिमित्तता नास्तीति प्रागेवोक्तम् । यद्यपि स्थानिवद्भावेन ङित्वात्तङ् सिद्धस्तथापि गाङ्कुटादिसूत्रे ऽस्यैव ग्रहणार्थं ङित्करणम् । न हि स्थानिवद्भावेन गाङिति रूपं लभ्यते । गङ्कुटादिभ्य इति तूच्यमाने कै गै रै शब्दे, इणोगालुङीत्येतयोरपि ग्रहणं स्यात् । ततश्चागासीन्नटः, अगासातां ग्रामौ देवदत्तेनेत्यत्र घुमास्थेतीत्वं स्यात् । गाङ् गतावित्येनेन सह सामान्यग्रहणार्थोयं ङकार इति तु न भ्रमितव्यम् । गाते इत्यादौ तङं प्रवर्त्य तदीयङकारस्य

निवृत्ताकांक्षतया उल्लिखितमज्ञाप्यशरीरन्तु यत्र सानुबन्धकात्षष्ठी उच्चार्यते तत्राकृतायामेवेत्संज्ञायामादेश इति । सत्यामपि वा तस्यां तत्र स्थानिवद्भावेनानुबन्धकार्यं नेति । प्रयोजनन्तु नन्दना कारिकेत्यत्रोगिल्लक्षणङीबभावः । तथा हि युवोरनाकाविति सूत्रे ऽनुनासिकोकारौ युवू निर्दिष्टौ । अन्यथा भुज्यः शंयुरित्यत्रातिव्याप्तेः । तथा च स्थानिवद्भावेनोगित्वान्नन्दना कारिकेत्यत्रोगिल्लक्षणो ङीप् स्यात् । नन्दः कारक इत्यत्र चोगिल्लक्षणो नुम् स्यात् । ननु नुम् स्यादिति सत्यं ङीप् तु कारिकायामापाद्यताम् । नन्दनायान्तु कथम् । ल्युः कर्त्तरीमनिज् भावे कः किर्घोः भादितोन्यत इत्यमरेण पुंस्त्वस्योक्तत्वादिति चेन्न । एतत्सूत्रे युवोरिति सूत्रे च नन्दनेति भाष्योदाहरणबलेन ल्युः कर्त्तरीत्यमरस्य प्रायिकत्वात् । तथा च श्रीहर्षः प्रायुङ्क्त । विशिष्य सा भीमनरेन्द्रनन्दनेति । तस्मान्ङीप्नुमोरभावो ज्ञापनफलमिति । अत्रोच्यते । युवोरित्यत्रानुनासिकयणावेव युवू न त्वनुनासिकोकारौ । अतो ङीब्नुमौ न । तथा यजमान इत्यत्र टेरेत्वाभावोपि न ज्ञापनफलम् । टितआत्मनेपदानामित्यत्र प्रकृतानामेवात्मनेपदानां ग्रहणात् । तङानावित्येव वास्तु । अन्यान्यपि सम्भावितानि ज्ञापकफलानि प्रत्याख्यातानि भाष्ये । प्रत्युत ज्ञापनाभ्युपगमे बाधकान्यपि सन्ति । तथाहि । अचिनवमित्यत्र अमादेशस्य पित्त्वसिद्ध्यर्थं तस्थस्थमीनामिति वक्तव्यम् । अणिञोरनार्षयोः ष्क्रोल्यबित्यादौ स्थानिनि अनुबन्धस्त्यक्तव्यः । वाराह्या प्रकृत्येत्यादौ वृद्धिर्गुणप्रतिषेधश्च यथा स्यात् तदेवं बहुसूत्रभङ्गापत्तेर्नेदं ज्ञापकं सूत्रकृतोभिप्रेतं किन्तु पूर्वोक्तमेवाङित्वस्य फलं बोध्यम् ॥

विभाषा लुङ्लृङोः ॥ इङो गाङ् वा स्यात् लुङि लृङि च। गाङ्कुटेति ङित्वम्। घुमास्थेतीत्वम्। अध्यगीष्ट। अध्यगीषाताम्। अध्यगीषत। अध्यैष्ट। अध्यैषाताम्। अध्यैषत। अध्यगीष्यत। अध्यैष्यत ॥

णौ च संश्चङोः ॥ गाङ् वा स्यात् सन्परे चङ्परे च णौ। अधिजिगापयिषति। अध्यापिपयिषति। क्रीङ्जीनांणाविति आत्वम्। अध्यजीगपत्। अध्यापिपत् ॥

अस्तेर्भूः ॥ अस्तेर्भूरादेशः स्यादार्धधातुके। भविता। भवितुम्। भवतिनैवाभिमते रूपे सिद्धे ऽस्तेरसितेत्यादिनिवृत्तये योगारम्भः। अथन्तर्हीहामासेत्यादि। अत्राहुः। अनुप्रयोगसामर्थ्यादस्तेर्भूभावो नेति। अन्यथा क्रस्चानुप्रयुज्यतइति कृभ्वनुप्रेति वा ब्रूयादिति तदाशयः। अथ कथन्तेनासलोकःपितृमान्विनेत्रा, प्रादुरासं बहुलक्षयाच्छविरित्यादि। उच्यते। तिङन्तप्रतिरूपकमव्ययमिदमासेति। यद्वा। अस गतिदीप्त्यादानेष्विति भ्वादेः स्वरितेतो रूपमिदम्। भूभावस्तु नास्य शङ्क्यः। अस्तेरिति लुका निर्देशात् ॥

ब्रुवो वचिः ॥ ब्रुवो वचिरादेशः स्यादार्धधातुके। वच परिभाषणइत्यनेन सिद्धे ब्रुवोनिष्टप्रयोगवारणार्थं सूत्रम्। क्रियाफलस्य कर्तृगामितायां स्थानिवद्भावेनात्मनेपदार्थञ्च। शास्त्रार्थं वक्ष्यते मुनिः ॥

चक्षिङः ख्याञ् ॥ आर्धधातुके विवक्षिते। तृजादौ चक्षितेत्यादिनिवृत्तये सूत्रम्। कर्त्रभिप्राये फले आत्मनेपदार्थञ्च। मुनिर्वेदं व्याख्यास्यते। आख्यातेत्यादि तु ख्या प्रकथनइत्यनेनापि सिद्धम्। अत्र वार्तिकानि। चक्षिङः ख्याञ्क्शाञौ॥ आक्शाता खशादिर्वा ॥ असिद्धे शस्य यवचनं विभाषा ॥ अस्या-

र्थः। खकारशकारादिरादेशोनेन विधेयः। असिद्धकाण्डे तु णत्वप्रकरणानन्तरं खशाञः शस्य यो वेति वचनं कर्तव्यम्। तथा च चर्त्वे यत्वं सिद्धमिति खपरत्वाभावेन खरिचेत्यस्याप्रवृत्तेर्यत्वपक्षे आख्यातेति सिद्धम्। यत्वाभावपक्षे तु चर्त्वेन क्शातेति रूपम्। प्रयोजनं सौप्रख्ये वुञ्विधिः॥ सुप्रचष्टे सुप्रख्यः। आतश्चोपसर्गइति कः। तस्य भावः सौप्रख्यम्। ष्यञ्। योपधाद्गुरूपोत्तमादिति वुञ् तु न भवति। यत्वस्यासिद्धत्वादित्यर्थः। तथा सुप्रख्येन निवृत्तो देशः सौप्रख्यः। तत्र भावः सौप्रख्यीयः। वृद्धाच्छः न तु धन्वयोपधादिति वुञ्। प्रयोजनान्तरमाह, निष्ठानत्वमाख्याते। आख्यातइत्यत्र संयोगादेरातोधातोर्यण्वत इति न भवति। यत्वस्यासिद्धया यण्वत्ताविरहात्। एवञ्च नभ्याख्येति सूत्रे ख्याग्रहणं ने कर्त्तव्यं भवति। रुविधिः पुंख्यानम्॥ यत्वस्यासिद्धतया ऽमूपरत्वाभावात्पुमः खयीति रुत्वं नेत्यर्थः। णत्वं पर्याख्यानम्॥ यत्वस्यासिद्धतया शकारे वानटा व्यवायात्कृत्यच इति णत्वं नेत्यर्थः। सस्थानत्वं नमःख्यात्रे॥ शर्परेविसर्जनीय इति विसर्गः सिध्यतीत्यर्थः। सस्थान इति जिव्हामूलीयस्य प्राचां संज्ञा। सस्थानत्वं त्विह नेति योज्यम्। णत्वादीनामप्यभावस्यैव प्रक्रान्तत्वात् तस्माद्वुञ्नत्वरुत्वणत्वानि सस्थानश्चेति पञ्चकं प्राप्तं वारयितुं शस्य यत्वं कृतमिति स्थितम्। स्यादेतत्। ख्या प्रकथनइति धातुमादाय वुञादिपञ्चकं दुर्वारम्। सत्यम्। सोपि खशादिः। षत्वविधिरप्युभयसाधारणे बोध्य इति हरदत्तमाधवादयः। कैयटस्तु नैतन्मेने। भाष्ये ख्याधातोः खशादित्वानुक्तेश्चक्षिङः ख्याञादेशमेवोपक्रम्य यत्वविधानात् नभ्याख्येति सूत्रे ख्याग्रहणन्तु कर्तव्यमेव व्याख्यात इत्यत्र नत्वाभावाय। ख्याञा-

देशस्तु लाक्षणिकत्वात्तत्र न गृह्यतइति यत्वस्यासिद्धत्वात्प्राप्तिरेव नास्तीति च बोधयितुं प्राङ्नत्वग्रहणम् । णत्वं तु लुग्योगाप्रख्यानादिति निपातनान्न भवति । वुञ्रुत्वसस्थानत्वानि तु ख्यातौ स्युरेव । ख्याञ्चादेशे तु नेति तत्र रूपद्वयं बोध्यम् । अस्मिन्मते आदेशे प्रख्यानादिति प्रयोगोपपत्तेः कथं निपातनमुपन्यस्तमिति चिन्त्यम् । वुञादाविव णत्वांशेपि रूपद्वये इष्टापत्तिः, अनिष्टत्वे वा ऽनभिधानात्कृत्यल्युटोबहुलग्रहणाच्च तत्र ल्युडेव नेति न्याय्यः पन्थाः । परमार्थस्तु ख्याधातुः सार्वधातुकमात्रविषयः । सस्थानत्वं नमः ख्यात्रइति वार्त्तिकं तद्भाष्यं चेह प्रमाणम् । आर्धधातुकेपि तत्प्रयोगे उक्तप्रयोजनासङ्गतेः । एवं णत्वं पर्याख्यानमित्यपि । तथा च नध्याख्येति सूत्रे ख्याग्रहणं न कर्तव्यमेव । माधवहरदत्ताद्युत्प्रेक्षा तु गौरवग्रस्ता उपक्रमादिविरुद्धा । सार्वधातुकेपि कृशाप्रयोगे प्राप्ते ऽनभिधानमात्रालम्बना चेत्यवधेयम् । वर्जने प्रतिषेधः ॥ दुर्जनाः सञ्चक्ष्याः । वर्जनीया इत्यर्थः । असनयोश्च ॥ नृचक्षा रक्षः । छान्दसो वर्णविकारः । भाषायान्तु नृचक्षो रक्ष इति भवतीति कैयटहरदत्तौ । माधवस्तु हे अग्ने नृचक्षाः मनुष्याणां द्रष्टा त्वं रक्षः परिपश्येति वेदभाष्ये व्याख्यत् । विचक्षणः । अनुदात्तेतश्चहलादेरिति युच् । अत एवान्तोदात्तः पठ्यते, विचक्षणः प्रथयन्निति । पत्राभृतस्य चक्षणमित्यादौ तु ल्युट् । अत एव लित्स्वरेणाद्युदात्तता । कथं तर्हि पुंख्यानं पर्याख्यानमिति प्रागुदात्तदमिति चेत् । वक्ष्यमाणबाहुलकादित्यवेहि । बहुलन्तण्यन्नवधकगात्रविवक्षणाजिराद्यर्थं, सर्वप्रकारणापेक्षमेतत् । तणिति संज्ञाछन्दसोर्ग्रहणं तत्र अन्नशब्दे जग्ध्यभावः । अन्नास्म इति निपातनाद्वा सिद्धम् । वधक इति ण्वुलि वधादेशः । अ-

ल्लोपस्य स्थानिवत्त्वाद्वृध्यभावः। क्वुन्शिल्पिसंज्ञयोरित्यधिकारे हनोवधचेत्युणादिसूत्रेण गतार्थमेतत्। गात्रमिति, इण औणादिके ष्ट्रनि गादेशः। गाङ्धातुना वा सिद्धम्। अजिरमिति वीभावो न। अजिराशिशिरेति निपातनात् सिद्धम्॥

वा लिटि॥ चक्षिङः ख्याञ् वा स्याल्लिटि। चख्यौ। चक्शौ। चचक्षे॥

अजेर्व्यघञपोः॥ अजेर्धातोर्वी इत्यादेशः स्यादार्द्धधातुके घञमपञ्च वर्जयित्वा। प्रवपणीयः। प्रवापकः। अघञपोः किम्। समाजः। उदाजः। समजः। उदजः। समुदोरजः पशुष्वित्यप्। दीर्घव्याख्यानं किमर्थम्। संवीतिः। घञपोः प्रतिषेधे क्यप उपसङ्ख्यानम्॥ समज्या। संज्ञायां समजेति क्यप्। इह पूर्वसूत्राद्वेत्यनुवर्त्तते। सा च व्यवस्थितविभाषा। तेन घञ्अप्क्यप्सु न। समाजः समजः। समज्येति वलादावार्धधातुके ल्युटि च वा॥ प्रजिता प्रवेता। प्राजनं प्रवयणम्। एवञ्च नार्थो घञपोः प्रतिषेधेन नापि क्यप उपसङ्ख्यानेन नापि वायाविति सूत्रेण। तस्मा, दजेर्वी वेति घञपोः क्यपि चायं न सम्मतः। वलादौ यौ च वान्यत्र नित्यमित्येष निर्णयः॥ आर्धधातुकइत्यस्य विषयसप्तमीत्वात् प्रागेव प्रत्ययोत्पत्तेर्वीभावे हलादित्वाच्यङ्। वेवीयते। नात्र यङ्लुगस्ति यतो लुका यङ आर्धधातुकस्य विषयत्वापहारान्नार्द्धधातुकव्यक्तयभिव्यक्तिरिति वीभावस्य नैव प्रसङ्गः। उक्तञ्च, नलुमताङ्गस्येति सूत्रे कैयटेन। लुका यङो विषयत्वापहाराद्विषयसप्तम्याश्रयणेप्यसिद्धिरिति॥

वा यौ॥ अजेर्वी वा स्यात् यौ। प्रवयणम्। प्राजनम्। इदञ्च पूर्वसूत्रे एव प्रत्याख्यातम्। आर्द्धधातुकाधिकारः समाप्तः॥

ण्यक्षत्रियार्षञितो यूनि लुगणिञोः ॥ क्षत्रियशब्दः क्षत्रियगोत्रपरः । ऋषेरपत्यमार्षम् । इतश्चानिञ इति ढकि प्राप्ते शिवादिपाठादण् । ठगपीष्यते । आर्षेयं वृणीत इति दर्शनात्तस्माच्छुभ्रादिष्वपि पठनीयः । ण्यप्रत्ययान्तात् क्षत्रियगोत्रापत्यप्रत्ययान्तादृष्यभिधायिनो गोत्रप्रत्ययान्तात् ञितश्च परयोः युवाभिधायिनोरणिञोर्लुक् स्यात् । कुर्वादिभ्यो ण्यः । तस्माद्यूनि इञ् । तस्य लुक् । कौरव्यः पिता । कौरव्यः पुत्रः । ननु कौरव्यशब्दस्तिकादिषु पठ्यते । ततः कौरव्यायणिरिति हि फिञा भाव्यमिति चेन्न । तत्र हि कुरुनादिभ्यो ण्य इत्यनेन विहितस्य क्षत्रियगोत्रस्य ग्रहणम् । इदन्तु ब्राह्मणगोत्रम् । ऋष्यन्धकवृष्णिकुरुभ्यश्चेत्यण् । तस्माद्यूनि इञ् । तस्य लुक् श्वाफल्कः पिता । श्वाफल्कः पुत्रः । क्षत्रिय, वासिष्ठादृष्यण् तत इञ् । तस्य लुक् । वासिष्ठः पिता । वासिष्ठः पुत्रः । आर्षः, बिदाद्यञ् तस्माद्यूनीञ् । तस्य लुक् । बैदः पिता । बैदः पुत्रः तैकायनिः पिता । तैकायनिः पुत्रः । कुत्सातः सौवीरगोत्राद्वान्यत्रेदम् । अन्यथा फेश्छचेति छप्रसङ्गात् । यमुन्दश्चेत्यादिपरिगणनस्य भाष्यविरुद्धत्वात् । एभ्यः किम् । शिवादिभ्योण् । ततो यूनि इञ् । कौहडः पिता कौहडिः पुत्रः । यूनि किम् । वामरथ्यस्य छात्राः वामरथाः । कुर्वादिभ्यो ण्यः । तस्मात् कण्वादिभ्यो गोत्रे इति शैषिकोण् । वामरथस्य कण्वादिवत्स्वरवर्जमिति कुर्वादिषु पाठात् । अत्र शैषिकस्याणो न लुक् । अणिञोः किम् । दाक्षेरपत्यं युवा दाक्षायणः । अब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसङ्ख्यानम् ॥ मात्रशब्दः कात्स्न्र्ये क्षत्रियादिजातिं विनापि अब्राह्मणत्वमात्रेण ततः परस्य अणिञ्भ्यां भिन्नस्यापि लुगित्यर्थः । भण्डिजङ्घकर्णखरकौ वैश्यौ ताभ्यामतइञ् तदन्तात्फक्फो

लुक्। माण्डिजङ्घिः पिता पुत्रश्च। एवं कार्णखरकिः॥

पैलादिभ्यश्च॥ एभ्यो युवप्रत्ययस्य लुक् स्यात्। पीलायावेत्यण्। तस्मादणोद्व्यच इति फिञ् तस्य लुक्। पैलः पिता पुत्रश्च। आकृतिगणोयम्। तद्राजाच्चाणः॥ इत्यन्तर्गणसूत्रम्। तद्राजसंज्ञकादणः परस्य युवप्रत्ययस्य लुक् स्यात्। द्व्यञ्मगधेत्यण्णन्तादाङ्गशब्दादणोद्व्यच इति फिञो लुक्। आङ्गः पिता पुत्रश्च॥

इञः प्राचाम्॥ गोत्रे य इञ् तदन्ताद्युवप्रत्ययस्य लुक् स्यात्तच्चेद्गोत्रं प्राचां भवति। इह प्राचामवृद्धादित्यादिवत्प्राग्रहणं विकल्पार्थं नेत्यत्र व्याख्यानं शरणम्। पन्नं प्राप्तं अगारं येन स पन्नागारः। तत इञ् यञिञोश्चेति फक्। पान्नागारिः पिता पुत्रश्च। मन्थरा मन्दीभूता एषणा यस्य स मन्थरैषणः मन्थरैषणिः पिता पुत्रश्च। प्राचां किम्। दाक्षिः पिता दाक्षायणः पुत्रः॥

न तौल्वलिभ्यः॥ तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य लुक् न स्यात्। पूर्वेण प्राप्तो निषिध्यते। तुल उपमाने। औणादिको वलच्। तुल्वलः। तत इञि फक् तौल्वलिः पिता तौल्वलायनः पुत्रः। तौल्वलितैल्वलिधारयातिपारयातिभ्यां नंद्यादित्वाल्ल्युः। तत इञ्। धारणिपारणि। दैवलिपि। दैवमित्रि। दैवयज्ञि। देवा मित्रमस्य देवेभ्यो यज्ञोस्येति विग्रहः। प्राणेहति। चापट्टकि। आनराहनि। श्वाफल्कि। आनुमति। आहिंसि। आसुरि। आयुधि। नैमिषि। आसिबन्धकि। वैकिपौष्कि। पुष्करे सीदतीति पुष्करसत्, अनुहरतीत्यनुहरत् बाव्हादी अनुशतिकादी च। पौष्करसादि आनुहराति। पुष पुष्टौ, यत्। पुष्यः पौष्यि। वैरकि। वैहति। विलक्षणौ कर्णाव-

स्य विकर्णः । वैकार्णि । कामलि । करेणुं पालयतीति करेणुपालः । कारेणुपालि ॥

इति श्रीशब्दकौस्तुभे द्वितीयस्याध्यायस्य
चतुर्थे पादे प्रथममान्हिकम् ॥

तद्राजस्य बहुषु तेनैवास्त्रियाम् ॥ बहुष्वर्थेषु विद्यमानस्य तद्राजस्य लुक् स्यात्तेनैव लुग्भाग्जातीयेनैव कृतं चेद्बहुत्वं न तु स्त्रियाम् । अङ्गाः । वङ्गाः । सुह्माः । पुण्ड्राः । मगधाः । तेतद्राजा इत्यादीनामिह संज्ञा । लोहध्वजाः । व्रीहिमताः । इह तु ञ्यादयस्तद्राजा इति । तद्राजस्येति किम् । औपगवाः । राघवाः । यादवाः । कथन्तर्हि रघूणामन्वयं वक्ष्यतीति । निरुध्यमाना यदुभिः कथं चिदिति च । उच्यते । रघ्वपत्ये रघुशब्दो लक्षणया वर्तते । एतच्च बव्हच इञ इति सूत्रे पदमञ्जर्यां स्पष्टम् । नन्वेवं परश्चेति सूत्रे बभ्रुर्मण्डुर्लमक इत्यादीनामपशब्दत्वपरं भाष्यं विरुध्येतेति चेन्न । भाष्यस्य शक्तिभ्रमप्रयुक्तपरत्वात् । इष्यते हि गोणीशब्दस्य गोणीसादृश्यशक्तिभ्रमाभ्यां गवि प्रयुक्तस्य साधुत्वे । एतेन सोयमित्यभिसम्बन्धात्तद्धितेन विना यदि बभ्रादयः प्रयुज्येरन्नपत्यनियमो भवेदिति हरिश्लोकोपि व्याख्यातः । बहुषु किम् । आङ्गः । वाङ्गः । तेनैव किम् । आङ्गदेवदत्तयज्ञदत्ताः । यद्यपीह बहुत्वमाङ्गेष्यन्वेति तथापि नेदं लुग्भाजोर्थ एव विश्रान्तम् । देवदत्तादिगतत्वात् । नन्वेवं भार्गवश्च वात्स्यश्च आग्रायणश्च भृगुवत्साग्रायणा इत्यत्र लुङ् न स्यात् । उत्तरसूत्रेष्वपि तेनैवेत्यधिकारात् आग्रायणे च नडादिफको लुगभावात् । सत्यम् । तेनैवेत्यस्य तज्जातीयेनेति व्याख्यातत्वाददोषः । अपत्यतयेह साजात्यात् । यद्येवं गार्ग्यश्च काश्यपश्च गालवश्चेत्यत्र गालवे ऋष्यणो लुगभावेपि अपत्यतया साजात्या-

द्यत्रञोर्लुक्प्रसङ्गः। अत्राहुः।लोप्यलोपिभिरपत्यप्रत्ययैः कृते बहुत्वे विकल्पः। भृगुवत्साग्रायणेषु, अगार्ग्यकाश्यपगालवानामित्युभयथापि सूत्रनिर्देशात्। अस्त्रियां किम्। आङ्ग्यः स्त्रियः। स्यादेतत्। आङ्गस्यापत्यानि बहूनि, अणोद्व्यच इति फिञ्। तस्य तद्राजाच्चाण इति मणसूत्रेणाब्राह्मणगोत्रमात्रादिति वार्त्तिकेन वा लुक्। अङ्गाः। बैदस्यापत्यानि बहूनि, अतइञ् ण्यक्षत्रियेति लुक् बिदाः। अत्र यूनि बहुत्वान्वयेपि गोत्रस्य तद्राजवाच्यस्यैक्याल्लुङ् न स्यात्। किञ्च बिदानामपत्यं माणवकः बैदः बैदौ। अत्र युवबहुत्वाभावेपि गोत्रबहुत्वादतिव्याप्तिः। सत्यम्। गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुक्। एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनीति वार्त्तिकद्वयेन सिद्धम्। यद्वा। अव्याप्त्युद्धारः सूत्रेणापि सुकरः। तथाहि। तद्राजान्तं यद्बहुष्विति व्याख्यास्यामः। न चैवं प्रतिकृतिबहुत्वेतिप्रसङ्गः। तेनैवेत्यस्य लोपिप्रत्ययार्थजातीयेनेत्यर्थात्। गोत्रयूनोरपत्यतया सजातीयत्वेपि प्रतिकृतेर्विजातीयत्वात्। नापि बैदो बैदाविति अतिव्याप्तिः। गोत्रेलुगचीति सूत्रेण इञि विवक्षितएवालुक्प्रवृत्तेः। न च यून्युपसङ्क्रमानन्तरं पुनर्युवबहुत्वे इव तद्द्वित्वैकत्वस्थले लुकः प्राप्तिरस्ति युवबहुत्वे तु पुनर्लुक्। न च पुनरलुक् शङ्क्यः। समर्थानांप्रथमादित्यधिकारात्। विभक्तिविपरिणामेन हि गोत्रप्रत्ययस्य प्रथमस्य अलुगित्यर्थः। प्राथम्यं च अर्थान्तरेनुपसंक्रान्तत्वम्। अत एवात्रिभरद्वाजिकेति सिद्ध्यति। अत्रेरपत्यानि इतश्चानिञ इति ढक्। भरद्वाजस्यापत्यानि विदाद्यञ्। तत उभयत्र युवबहुत्वे अतइञ् तस्य ण्यक्षत्रियेति लुक्, ढको ऽत्रिभृग्विति, अञो यञञोश्चेति। ततो अत्रिभरद्वाजानां मैथुनिकेति द्वन्द्वाद्युन् तस्याकादेशः।

यदि द्वितीयमर्थमुपसंक्रान्तस्यापि अलुक् स्यात्तदा इहाप्यञः स स्यात् । गोपवनादिगणे गर्गभार्गविकाग्रहणं चेह ज्ञापकम् । गर्गशब्दाद्यञ् तस्य लुक् । भृगुशब्दाद्दण्यण् तदन्ताद्यून्यतइञ् तस्य लुक् गर्गभृगूणां मैथुनिकेति वुन् । अत्रात्रिभृग्विति प्राप्तलुकं निषेद्धुं हि गोपवनादिषु पाठः । स च द्वितीयार्थोपसंक्रमेप्यलुगिति पक्षे व्यर्थः स्यात् । इदं त्वबधेयम् । आङ्गी च वाङ्गश्च सौह्मश्चेति द्वंद्वे आङ्गीशब्देन स्त्रीत्वयुक्तानामर्थानामभिधानात्तदणो लुक् न भवति । अन्यस्य तु स्यादेव । आङ्गीवङ्गसुह्मा इति। इह भाष्ये तेनैवेति प्रत्याख्यातम् । अतो गार्ग्यश्च चैत्रश्च मैत्रश्चेत्यत्रापि लुग्भवतीति प्रतीयते तज्जातीयत्वस्यानुक्तेश्च । तथापि सूत्रशेषे अथ यो लोप्यलोपिनां समास इति भाष्यं व्याचक्षाणेन कैयटेन तेनैवेति वचनादलोपिसंनिधिकृतं बहुत्वमिति माकारि लुगित्युक्त्या तेनैवेत्यंशस्य भाष्याभ्युपगतत्वं लभ्यते । अत एवाञन्तं यद्बहुष्विति पक्षे काश्यपस्य प्रतिकृतयो बव्ह्यः काश्यपा इत्यत्रापत्यबहुत्वाभावान्मा भूत् आंगस्य प्रतिकृतयो बव्ह्य इत्यत्र तु स्यादेव इह गोत्रग्रहणाभावादित्याशंक्य तेनैव ग्रहणबलेन समाहितं हरदत्तेनेति ध्येयम् । ननु आङ्गश्चेत्यादिविग्रहे भाष्यादिसंमतोपि लुक् दुरुपपादः, तद्राजान्तस्य बहुष्ववृत्तेरिति चेन्न । अजहत्स्वार्थायां बहुषु वृत्तेः स्पष्टत्वात् । कथं तर्हि सेयं दुःखा चेत्यादि प्रागुक्तमिति चेत् । द्विवचनबहुवचनान्तैः विग्रहो नेत्याशयेनेति गृहाण । तथाहि । लौकिके विग्रहवाक्ये स्वार्थमात्रवृत्तिता स्पष्टा । प्रक्रियावाक्येपि वृत्तिप्रवेशात्प्राक् प्रवृत्तमेकवचनं दुर्वारमेव । राजपुरुषादौ षष्ठ्यादिवत् । अथ कथं कौरव्याः पशवः क्रियापरिभवक्लेशोपशान्तिः फलमिति वेणिसंचरणम् । उच्यते । कुरुनादिभ्योण्य इति कौरव्यशब्दं व्युत्पाद्य

तत्रसाधुरिति यत् कार्यः। एतेन तस्यामेव रघोः पाण्ड्या इति व्याख्यातम्। वृद्धेत्कोसलेत्यत्र पाण्डचोर्ज्यण् इत्युपसङ्ख्यानात् ज्यणस्तद्राजत्वेपि पाण्ड्ये साधवः पाण्ड्या इति यत्प्रत्ययान्तत्वेन साधुत्वनिर्वाहात् ॥

यस्कादिभ्यो गोत्रे॥ एभ्यः परस्य गोत्रप्रत्ययस्य लुक् स्यात्। बहुषु तेनैवास्त्रियामित्यनुवर्तते। गोत्रेकुञ्जादिभ्यश्च्फञिति गोत्रप्रत्ययप्रकरणं ततोन्यत्र लौकिकस्य गोत्रस्य ग्रहणम्। अपत्याधिकारे तु गोत्रग्रहणसामर्थ्यादेव पारिभाषिकस्य ग्रहणम्। यद्यपि कृत्रिमस्यैवान्यत्र ग्रहणं प्राप्तं तथापि लौकिकस्य ज्ञापकं वक्ष्यते। तेनानन्तरापत्येपि लुक्। यस्काः लह्याः। बहुष्विति किम्। यास्कः। लाह्यः। स्त्रियां तु यास्काः स्त्रियः। गोत्रइति किम्। यास्काः छात्राः। यस्क, लह्य, द्रुह्य, अयःस्थूण, तृणकर्ण, एते पञ्च शिवादिषु पठ्यन्ते। ततः परेभ्यः षड्भ्य इञ्। सदामत्त कम्बलभार, अहिर्योग, कर्णाटक, पिण्डीजङ्घ, बकसक्थ। ततः परेभ्यश्चतुर्भ्यः शुभ्रादिभ्यश्चेति ढक्। बिस्ति,कुद्रि, अजवस्ति, मित्रयु, ततः परेभ्यो द्वादशभ्य इञ्। रक्षोमुख, जंङ्घारथ, मन्थक, उत्कास, कटुक, पुष्करसत्, विषपत्, उपरिमेखल, क्रोष्टुमान, क्रोष्टुपाद, क्रोष्टुमाय, शीर्षमाय। नान्विह षुष्करसदः पाठो व्यर्थः। स हि बाव्हादित्वादिञन्तः। बव्हचइञः प्राच्यभरतेष्वित्येव सिद्धम्। न चायं प्राच्यो नेति भ्रमितव्यम्। तौल्वल्यादिष्वेतत्पाठस्य वैयर्थ्यापत्तेः। तस्य हि इञः प्राचामिति प्राप्तस्य लुकः प्रतिषेधः फलम्। अत्राहुः। नगोपवनादिभ्य इति प्रतिषेधं बाधितुमिहास्य पाठः। गोपवनादिगणे हि तौल्वल्यादय इति कैश्चित्पठ्यतएव। यैर्न पठ्यते तैरप्यत एव ज्ञापनात्तौल्वल्यादिप्रकृतिभागानां तुल्वलादीनां गोपवनाद्यन्त-

र्भावोनुमेय इति । खरपद । अस्य नडादित्वात्फक् । पदक, क्रमक । आभ्यामतइञ् । भलन्दन, अस्माच्छवाद्यण् । भडिल, भडिक, भडिव, भण्डित, एभ्यश्चतुर्भ्योश्वादिभ्यः फञ् ॥

यञञोश्च ॥ गोत्रे यौ यञञौ तदन्तं यद्बहुषु तदवयवयोर्यञञोर्लुक् स्यान्न तु स्त्रियाम् । गर्गाः वत्साः विदाः उर्वाः । स्त्रियां तु गार्ग्यः स्त्रियः । गोत्रे किम् । द्वीपादनुसमुद्रं यञ्, द्वैप्याः । उत्सादिभ्योञ्, औत्साः । अथ कथं पौत्रा दौहित्राः विदाद्यञन्तत्वात् । उच्यते । अपत्याधिकारादन्यत्र लौकिकं गोत्रन्तच्चेह प्रवराध्यायप्रसिद्धम् । न च पौत्रादिस्तथा । इदं च स्त्रीपुंसाभ्यामिति सूत्रे कैयटेन स्फुटीकृतम् । यञादीनामेकद्वयोर्वा तत्पुरुषे षष्ठ्या उपसंख्यानम् । एकद्वयोरिति भावप्रधानो निर्देशः । गार्ग्यस्य गार्ग्ययोर्वा कुलं गर्गकुलं गार्ग्यकुलं वा । यञादीनां किम् । आङ्गकुलम् । एकद्वयोः किम् । गर्गाणां कुलं गर्गकुलम् । तत्पुरुषे किम् । गार्ग्यस्य समीपमुपगार्ग्यम् । षष्ठ्याः किम् । परमगार्ग्यः ॥

अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च ॥ एभ्यो गोत्रप्रत्ययस्य लुक् स्यात् बहुत्वे । अत्रिशब्दादितश्चानिञ इति ढक् । इतरेभ्य ऋष्यण् । अत्रयः भृगव इत्यादि ॥

बह्वच इञः प्राच्यभरतेषु ॥ बह्वचः परो य इञ् प्राच्यगोत्रे भरतगोत्रे च वर्तमानस्तस्य लुक् स्यात् । पन्नागाराः । मन्थरैषणाः । भरतापत्ये तु युधिष्ठिराः । अर्जुनाः । युधिष्ठिरार्जुनशब्दाभ्यां कुर्वादिण्यापवादो बाह्वादिलक्षण इञ् । भरतापत्ये अभेदोपचाराद्भरतशब्दः । ते च भरताः प्राच्या एव । द्वन्द्वस्तु गोबलीवर्दन्यायेन । सामान्यविशेषवाचिनोर्वाचनिकद्वन्द्वनिषेधो यद्यप्युक्तस्तथापि तस्यानित्यता अनेनैव ज्ञाप्यते ।

तत्फलं तूक्तमेव। प्राग्ग्रहणेनैव सिद्धे भरतानां पृथगुपादानमन्यत्र प्राग्ग्रहणे एषां ग्रहणं नेति ज्ञापनार्थम्। तेन इञः प्राचामिति लुक् भरतयुवप्रत्ययस्य न भवति। आर्जुनिः पिता आर्जुनायनः पुत्रः॥

न गोपवनादिभ्यः॥ एभ्यो गोत्रप्रत्ययस्य लुक् न स्यात्। बिदाद्यन्तर्गणोयम्। स च हरितात्प्रागेव। तथा च वार्तिकम्। गोपवनादिप्रतिषेधः प्राग्घरितादिभ्य इति। आगणान्ताद्ग्रहणे प्राप्ते हरितात्प्राक् वृत्करणं कर्त्तव्यमिति भावः। गौपवनाः। शौग्रवाः। नेह। हरिताः॥

तिककितवादिभ्यो द्वन्द्वे॥ एभ्यो गोत्रप्रत्ययस्य बहुषु लुक् स्याद् द्वन्द्वे। यद्यपि द्वन्द्वरूपाण्येव गणे पठ्यन्ते तिकादीनि पूर्वपदानि कितवादीन्युत्तरपदानि तथापि तिकादिभ्य इत्युक्ते पूर्वपदेष्वेव लुगाशङ्क्येत। इष्यते तूत्तरपदेष्वपि। अतस्तिककितवादिभ्य इत्युक्तम्। तैकायनयश्च कैतवायनश्च। तिकादिभ्यः फिञ्। तस्य लुक्। तिककितवाः॥

उपकादिभ्योन्यतरस्यामद्वन्द्वे॥ एभ्यो गोत्रप्रत्ययस्य बहुत्वे लुक् वा स्यात्। द्वन्द्वे चाद्वंद्वे च। सूत्रशेषस्य अद्वंद्वे इत्यस्य तु द्वंद्वग्रहणमिह नानुवर्त्ततइत्यर्थः। एषां मध्ये त्रयो द्वन्द्वास्तिककितवादिषु पठ्यन्ते। औपकायनाश्च लामकायनाश्च नडादिभ्यः फक्। तस्य लुक्। उपकलमकाः। भ्राष्ट्रककपिष्ठलाः। कृष्णाजिनयः। कृष्णसुन्दराः। एषां पूर्वेण नित्यमेव लुक्। अद्वन्द्वे त्वनेन विकल्पः। उपकाः। औपकायनाः। लमकाः। लामकायनाः। भ्राष्ट्रकाः। भ्राष्ट्रकः। कापिष्ठलाः या कापिष्ठलयः। कृष्णाजिनाः। काष्णाजिनयः। कृष्णसुन्दराः। काष्णसुन्दरयः। शेषाणान्तु द्वन्द्वेपि विकल्प इति वृत्तिः। भाष्ये तु भ्राष्ट्रकिकापिष्ठलय इत्यु-

दाहरणात्तिककितवादिष्वस्य पाठो ऽनार्ष इति कैयटः ॥

आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् ॥ एतयोरवयवस्य गोत्रप्रत्यस्य अणो यञश्च बहुषु लुक् स्यात् अवशिष्टस्य प्रकृतिभागस्य यथासंख्यम् अगस्ति कुण्डिनच् एतावादेशौ स्तः । अगस्तयः । कुण्डिनाः । कुण्डिनीशब्दस्य यञि भस्याढइति पुंवद्भावे नस्तद्धित इति टिलोपे कौण्ड्य इति प्राप्तम् । अस्मादेव तु निपातनान्न पुंवत् । ईकारस्य यस्येति लोपः । तस्य स्थानिवत्त्वादाभीयत्वेनासिद्धत्वाद्वा टिलोपो न । चकारः स्वरार्थः । मध्योदात्तो हि कुण्डिनीशब्दः । कुण्डमस्त्यस्या इति मत्वर्थीयस्य इनेरुदात्तत्वात् । तदादेशोपि आन्तरतम्यात्तथा स्यात् । कथं तर्हि, वासिष्ठकुण्डिनौ तद्वदुपमन्युपराशराः । चतुर्णामेकगोत्रत्वान्न विवाहः परस्परमिति ॥ उच्यते । नायं कुण्डिनजादेशः किन्तु कुडि दाहे इत्यस्मादौणादिके इनच्प्रत्यये उज्ज्वलदत्तादिभिर्व्युत्पादितः स्वतन्त्र एवायं शब्दः । अत एव वासिष्ठमैत्रावरुणकौण्डिन्येति, होताकुण्डिनवन्मित्रावरुणवद्वसिष्ठवदित्यध्वर्युरिति बौधायनसूत्रं सङ्गच्छते । आपस्तम्बसूत्रमप्येवम् । एतेन वसिष्ठमित्रावरुणौ कुण्डिनश्च महातपा इति मत्स्यपुराणप्रवराध्यायप्रयोगोपि व्याख्यात इति दिक् । इह यदि लुकं निवर्त्य विशिष्टयोरेवादेशौ क्रियेते तदा कौण्डिना इत्यस्य सिद्धावपि आगस्तीया इति न सिद्ध्यति । तथाहि । अगस्त्यशब्दादृष्यणि आगस्त्यः । ततो बहुवचनान्ताद्वृद्धाच्छे विवक्षिते गोत्रेऽलुगचीति लुक्प्रतिषेधः । प्रत्ययविशिष्टस्यागस्त्यादेशपक्षे तु तन्निषेधाभावाद्वृद्धत्वापगमे शैषिकोणेव स्यात् । उपपादितं चेदं प्रत्ययस्यलुक्श्लुसूत्रे ॥

सुपो धातुप्रातिपदिकयोः ॥ एतयोरवयवस्य सुपो लुक्

स्यात् । पुत्रीयति । राजपुरुषः ॥

अदिप्रभृतिभ्यः शपः ॥ एभ्यः शपो लुक् स्यात् । अत्ति । कथं तर्हि वासुदेवं परित्यज्य योन्यं देवमुपासतइति । उच्यते । अस गतिदीप्त्यादानेष्विति भ्वादेरुभयपदिनो रूपमिदम् । उपादत्ते इत्यर्थात् । अथ कथम् आश्वसेयुर्निशाचरा इति भट्टिः । न विश्वसेत्पूर्वविरोधितस्येति च पञ्चतन्त्रम् । पचाद्यजन्तादाचारक्विपि भविष्यति । गणकार्यमनित्यमिति तु जयमङ्गला । तत्र ज्ञापकं तु घटादयः षित इत्यत एव सिद्धे क्षमूष् सहनइति षित्करणम् ॥

बहुलं छन्दसि ॥ छन्दसि बहुलं शपो लुक् स्यात् । वृत्रं हनति । अहिः शयते । अन्येभ्योपि भवति । त्राध्वं नो देवाः ॥

यङोचि च ॥ यङो ऽच्प्रत्यये परे लुक् स्यात् । चकाराद्बहुलमन्यत्रापि । लोलुवः । पोपुवः । पचाद्यच् । इदमेव अचि लुग्विधानं ज्ञापकं सर्वधातुभ्यः पचाद्यजिति । बाहुलकात् बेभिदीति चेच्छिदीतीत्यादि । इह अजिति प्रत्याहारो न गृह्यते । तथाहि सति अणीत्येवावक्ष्यत् । यङन्तादन्यस्याचो ऽसम्भवादिति हरदत्तः । न च पापच्ये पापच्यै इत्यत्र सम्भवः । शपा व्यवधानात् । एकादेशस्य स्थानिवद्भावात् लिटस्तझयोरित्यशः सम्भवोस्तीति चेन्न । आम्प्रसङ्गात् । यदि तु अमन्त्रे इति निषेधात् मन्त्रे कथंचित्तत्संभवस्तर्हि यङा साहचर्यादिति युक्त्यन्तरमन्वेषणीयम् ॥

जुहोत्यादिभ्यः श्लुः ॥ एभ्यः शपः श्लुः स्यात् । जुहोति । मण्डूकप्लुत्येह शबनुवर्तते । न त्वनन्तरोपि यङ् । श्लाविति सूत्रारम्भात् । अन्यथा यङो लुकीव श्लावपि सन्यङोरित्येव सिद्धे किं तेन ॥

बहुलं छन्दसि ॥ दाति प्रियाणि । अन्येभ्यश्च भवति । पूर्णा विवष्टि । जनिमासंविविक्तः ॥

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ॥ एभ्यः सिचो लुक् स्यात्परस्मैपदेषु । इह मण्डूकप्लुत्या लुगनुवर्तते न त्वनन्तरोपि श्लुः व्याख्यानात् । यद्यपि गामादाग्रहणेष्वविशेषस्तथापि गातीति निर्देशादिहेणोगालुङीत्यस्य ग्रहणं गादेशस्यैव ह्ययं श्नितपि शब्लुका निर्देशः । ननु नायं गादेशः । लुङ्येव तद्विधानात् । सत्यम् । तथापि प्रकृतिवदनुकरणमिति स्थानिवद्भावातिदेशाच्छब्लुक् । भवतेर इत्यादौ तु अस्त्यादेशानुकरणे अतिदेशातिदेशेन प्राप्तोपि शब्लुक् प्रकृतिवदित्यस्यानित्यत्वान्नेत्यवधेयम् । हरदत्तस्तु स्थानिवद्भावात्प्रकृतिवदनुकरणमिति वा गातीत्यत्र शब्लुगित्याह । तत्र शब्दस्यासङ्गतिः स्पष्टैव । वस्तुतस्तु गापोर्ग्रहणे इण्पिबत्योरिति वार्तिकमेवात्र शरणम् । निर्देशादेव व्यक्तम् । लुग्विकरणग्रहणमिति तु भाष्ये प्रौढिवादमात्रम् । निर्देशस्य सन्दिग्धत्वात् । गायतेरपि हि सिचि कृतात्वस्यानुकरणं गातीति सम्भवत्येवेत्यवधेयम् । अगात् अस्थात् अदात् अधात् । पिबतेरेवेह ग्रहणं न तु पातेः । लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैवेति परिभाषया । अपात् । अभूत् । भूधातोः स्वतन्त्रस्यास्त्यादेशस्य चेदं रूपं तुल्यम् । न चादेशस्य लुग्विकरणत्वात्पातिवदग्रहः शङ्क्यः । आर्धधातुकैकविषयतया हेतोः स्वरूपासिद्धेः गापोग्रहणेन इणादेशपिबत्योरेव ग्रहणमित्युक्तम् । नेह । कैगैरै शब्दे । अगासीत् । पा रक्षणे । अपासीत् । यमरमेतीट्सकौ । पै शोषणइत्यस्यापि लाक्षणिकत्वादग्रहणं बोध्यम् । परस्मैपदेषु किम् । अगासातां ग्रामौ देवदत्तेन । अत्र कश्चित् सूत्रे भीधातोर्ङसौ निर्देशः । एरनेकाच इति यण् । तेन

मा भैः शशाङ्क मम शीधुनि नास्ति राहुरिति प्रयोगः सङ्गच्छतइत्याह। एवं तु मा स्म भैषीस्त्वयाद्यैव कृतार्थो द्रक्ष्यते यतिरिति भट्टिर्विरुध्येत। माभैरिति तु प्रामादिकम्। यद्वा। आगमशासनानित्यतयास्तिसिच इतीटो विरहे सिपो हल्ङ्यादिलोपे सिचो विसर्गः॥

विभाषाघ्राधेट्शाच्छासः॥ एभ्यः सिचो वा लुक् स्यात्परस्मैपदेषु। धेटः पूर्वेण प्राप्ते इतरेषामप्राप्ते विभाषेयम्। अघ्रात्, अधात्, अशात्, अच्छात्, असात, पक्षे ऽघ्रासीदित्यादि। परस्मैपदेषु किम्। अघ्रासन्त सुमनसो देवदत्तेन। कर्मणि तङ्॥

तनादिभ्यस्तथासोः॥ एभ्यः सिचो वा लुक् स्यात्तथासोः परतः। अतत। अतथाः। अतनिष्ट। अतनिष्ठाः। असात। असाथाः। जनसनेत्यात्वम्। पक्षे असनिष्ठाः। असनिष्ठः। यूयमतनिष्टेत्यत्र तु न लुक्। आत्मनेपदेनैकवचनेन च थासा सहचर्य्यात्तथाभूतस्यैव तशब्दस्य ग्रहणात्॥

मन्त्रे घसह्वरनशवृदहाद्वृच्कृगमिजनिभ्यो लेः॥ एभ्यो लेर्लुक् स्यान्मन्त्रे। अक्षन्नमीमदन्त हि। लुङ्सनोर्घस्लृ। गमहनेत्युपधालोपः। शासिवसीति षत्वम्। अट्। विभाषाछन्दस्यमाङ्योगेपीत्यडभावे तु मात्वाट्कासोअशिवासउक्षन्। व्ह त्कौटिल्ये, अस्य कृतगुणस्यानुकरणं व्हरेति, अकारस्तूच्चारणार्थः। माव्हार्मित्रस्य धूर्तिः। प्रणङ्मर्त्यस्य। नशेर्वेति कुत्वम्। पक्षे व्रश्चेतिषत्वे ताडिति रूपं बोध्यम्। वृइति वृङ्वृञोः सामान्यग्रहणम्। सुरुचोवेनआवः। दह। मानआधक्। आदित्याकारान्तग्रहणम्। प्रा पूरणे। आङ्पूर्वः। आप्राद्यावापृथिवीअन्तरिक्षम्। वृज्। परावर्भारभृद्यथा। अकन् कर्म कर्मकृतः। त्वेरयिं

जाशृत्वांसो अनुग्मन्। अज्ञत वा अस्य दन्ताः। यद्यप्येतरेयब्राह्मणे हरिश्चन्द्रं प्रति वरुणस्येदं वचनं तथापि मन्त्रग्रहणमिह सूत्रे छन्दस उपलक्षणमिति ब्राह्मणेपि लुक् सिध्यति। इह सूत्रे त्रिभाषेत्यनुवर्तते। तेन, नता अगृभ्रन्नजनिष्ट हिष इत्यादि सिद्धम्। एतेन इह सूत्रे सिच इत्यनुवर्त्य सिच्स्थानिभूतो यो लिरिति व्याख्यानाल्लिङ्लिटोर्नेति हरदत्तग्रन्थः परास्तः। लोपस्य वैकल्पिकतया छन्दसि रूपान्तरस्यानापाद्यतया च सिजनुवृत्तेर्वैफल्यात्। अत एव सिचि प्रकृते लिग्रहणमादिः सिचोन्यतरस्यामित्येतस्याप्रवृत्त्यर्थमिति प्रकृतसूत्रस्थहरदत्तग्रन्थश्चिलुङीत्यत्रत्यकैयटग्रन्थश्च परास्तः॥

आमः॥ आमः परस्य लुक् स्यात्, ईहांचक्रे। लक्षणप्रतिपदोक्तपरिभाषया नेह। अग्गत्यादिषु, आम। आमतुः। तिबाद्यपवादत्वाल्लावस्थायामेवायं लुक्। तेनामन्तस्यातिङन्तत्वादनिघातस्ततः परस्य निघातश्च सिध्यतीति नलुपतेति सूत्रे प्रतिपादितम्। न चैवमामन्तस्य पदत्वं न स्यादिति वाच्यम्। सुबन्ततया तत्सिद्धेः। यथा च सुपो न श्रवणं तथा कृन्मेजन्त इति सूत्रे प्रतिपादितम्॥

अव्ययादाप्सुपः॥ अव्ययाद्विहितस्यापः सुपश्च लुक् स्यात्। तत्र शालायाम्। अथ। अत्र वार्तिकम्। अव्ययादापो लुग्वचनानर्थक्यं लिङ्गाभावादिति। न च स्त्रियामिति सूत्रे स्त्रीसमानाधिकरणादिति पक्षः स्थितः। भूतामियं ब्राह्मणीत्यादावतिव्याप्तेः। विहितविशेषणान्नेह। अत्युच्चैसौ॥

नाव्ययीभावादतोम् त्वपञ्चम्याः॥ अदन्तादव्ययीभावात्सुपो न लुक् पञ्चमीभिन्नस्य तु सुपोमादेशः स्यात्। उपकुम्भं तिष्ठति। अपञ्चम्याः किम्। उन्मत्तगङ्गादागतः।

अतः किम् । अधिहरि ॥

तृतीयासप्तम्योर्बहुलम् ॥ अनयोर्बहुलमम् स्यात् । पूर्वेण नित्ये प्राप्ते आरम्भः । उपकुम्भमुपकुम्भेन वा कृतम् । उपकुम्भमुपकुम्भे स्थितः । अत्र वार्तिकम् । सप्तम्या ऋद्धिनदीसमाससंख्यावयवेभ्यो नित्यम् ॥ ऋद्धिः, सुमद्रम् । नदीसमास, उन्मत्तगङ्गम् । संख्यावयव, एकविंशतिभारद्वाजम् । त्रिपञ्चाशद्गौतमम् । एकविंशतिभरद्वाजा वंश्यास्त्रिपञ्चाशद्गौतमा वंश्या इति विग्रहः । संख्यावंश्येनेति समासः । ननु भरद्वाजाद्विदाद्यञो यञञोश्चेति लुक् प्राप्नोति । एवं गोतमाद्ष्यणः । अत्रिभृग्वित्यारम्भात् । न च वार्तिपदानां स्वार्थोपसर्जनैकत्वविशिष्टार्थान्तरोपसंक्रमाल्लुगभाव इति कैयटोक्तं युक्तम् । वृत्तिप्रवेशात्प्रागेव प्राप्नुवतोन्तरङ्गस्य लुको दुर्वारत्वात् । अन्यथा गर्गाणां कुलं गर्गकुलमित्यपि न स्यात् । अत्राहुः । भाष्यकारप्रयोगादेव लुगभावोत्र बोध्य इति । इदं च वार्त्तिकं बहुलग्रहणासिद्धार्थकथनपरम् ॥

लुटः प्रथमस्य डारौरसः ॥ लुडादेशस्य प्रथमपुरुषस्य डारौरसः क्रमात्स्युः । अत्ता । शयिता । ननु पदद्वये द्वौ त्रिकौ प्रथमपुरुषौ । तथा च षट् स्थानिनः त्रय आदेशाः तत्कथं वैषम्ये संख्यातानुदेशः । अत्राहुः । डारौरसश्च डारौरसश्चेति कृतद्वन्द्वानामेकशेषात् षडेवादेशाः । यद्वा । अर्थत आन्तर्याद्व्यवस्था । एकार्थस्यैकार्थो द्व्यर्थस्य द्व्यर्थ इत्यादि, एकार्थत्वादिनिर्णयस्तु व्यवहारात्। यद्यपि नानुबन्धकृतमनेकाल्त्वं तथापि ङा इत्यस्य सर्वादेशत्वमानुपूर्व्याद्बोध्यम् । प्रातिपादितं चेदमनेकाल्शिदिति सूत्रे । न चात्मनेपदे अध्येताऽध्येतारावित्यादौ डारौरस्सु कृतेषु टेरेत्वं स्यादिति चेन्न । अ-

स्मिन्नेव प्रयोगे सकृत्प्रवृत्ततया चरितार्थत्वात् । तथाहि । एवं डादयश्चेत्युभयमपि शब्दान्तरप्राप्त्या ऽनित्यम् । तत्र परत्वादेत्वे कृते पुनःप्रसङ्गविज्ञानाड्डादयः । यद्वा । तिङ आदेशेषु टेरेत्वं न भवति । एशिरेचोस्थासः सेश्च एकारोच्चारणाज्ज्ञापकात् । स्यादेतत् । तिप्तयोर्द्वयोरपि डादेशेन्तोदात्तम्पदमिष्यते । तत्र तिबादेशस्यान्तरतम्यादनुदात्तत्वे सत्युदात्तनिवृत्तिस्वरेणोदात्तत्वं सिद्ध्यतु तादेशस्य तु न सिध्यति । तथाहि । तप्रत्ययस्य डादेशे कृते लसार्वधातुकस्वरात्परत्वाट्टिलोपः । न चेदानीमुदात्तनिवृत्तिस्वरो लभ्यः । अनुदात्तत्वात्प्रागेव लोपात् । ननु स्वरभिन्नस्य प्राप्नुवन्ननित्यो डादेशः । शब्दान्तरस्य प्राप्नुवन्ननुदात्तोप्यनित्यः । उभयोरनित्ययोः परत्वादनुदात्तत्वे कृते पुनः प्रसङ्गविज्ञानाड्डादेशे कृते उदात्तनिवृत्तिस्वरः सुलभ इति चेन्न । अन्तरङ्गत्वाड्डादेशप्रवृत्तेः । अत्राहुः । अस्तूक्तरीत्या परत्वाट्टिलोपः । तथाप्यसावनुदात्ते अविद्यमानोदात्ते पर इत्यर्थः । अनुदात्तस्यचेति सूत्रे ह्यनुदात्तग्रहणं प्रत्याख्यास्यते, तत्स्वीकारेपि शास्त्रीयोनुदात्तो न गृह्यते, किन्तूदात्तभिन्नः । न च प्रत्ययाद्युदात्तप्रवृत्तेरिदमपि दुर्लभमिति वाच्यम् । परिहृत्य चापवादविषयमिति न्यायेन लसार्वधातुकानुदात्तविषये प्रत्ययस्वराप्रवृत्तेः । न च तासेः प्रत्ययस्वरात्प्रागेव परत्वाट्टिलोपः शंक्यः । प्रत्ययस्वरस्य प्रत्ययसंनियोगशिष्टत्वेनान्तरङ्गत्वात् । तथा च भाष्ये संग्रहश्लोको । प्रत्ययस्वरापवादो लसार्वधातुकानुदात्तत्त्वम् । तेन तत्र न प्रसक्तः प्रत्ययस्वरः कदा चित् ॥ प्रत्ययस्वरश्च तासेर्वृत्तिसंनियोगशिष्टः । तेन चाप्यसावुदात्तो लोप्स्यते तथा न दोषः ॥ वृत्तिः प्रवृत्तिः, यदैव तासिः प्रवर्तेत तदैवापवा-

दाभावादुदात्तत्वयुक्ते इत्यर्थः ॥

मुनित्रयोक्तिसद्वेणीपरिशीलनशालिनाम् ॥ महतामपि मान्योसौ धार्यते येन कौस्तुभः ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणस्य लक्ष्मीधरसूरेः सूनुना भट्टोजिभट्टेन कृते श्रीशब्दकौस्तुभे द्वितीयस्याध्यायस्य चतुर्थे पादे द्वितीयमान्हिकम् ॥ पादश्च समाप्तो ऽध्यायश्च ॥

प्रत्ययः ॥ प्रत्ययशब्दः संज्ञात्वेनाधिक्रियते आपञ्चमसमाप्तेः । स्यादेतत् । प्रकृत्युपपदोपाधिविकारागमानामपि तर्हि संज्ञा स्यात् । हरतेर्दृतिनाथयोः पशौ । हरतेरिति प्रकृतिः । दृतिनाथयोरित्युपपदम् । पशाविति उपाधिः । हनस्तच्चेत्यादिर्विकारः । त्रपुजतुनोःषुगित्यागमः । नन्वेषां प्रत्ययत्वे सति किं स्यादिति चेत् । शृणु । प्रकृतिप्रत्ययोः परस्परापेक्ष्यं परत्वं पर्यायेण स्यात् । शब्दान्तरापेक्षं वा प्रकृतेः । उपपदस्यापि परत्वं स्यात् । उपसर्जनंपूर्वमिति तु राजपुरुषादिषु सावकाशं परत्वात्परश्चेत्यनेन बाध्येत । ननु सुब्विधौ प्रातिपदिकाधिकाराद्राजपुरुषादौ कथं सावकाशतेति चेत् । सत्यम् । एवमपि समाससंज्ञाविरहस्थले उपपदस्य परत्वं स्यादेव । तथा च भोक्तुं व्रजतीत्येव स्यात् न तु व्रजति भोक्तुमिति । उपाधेस्तु अर्थत्वेन परत्वासम्भवेपि तद्वाचकशब्दस्य परत्वं नियतं स्यात् । आद्युदात्तत्वं च स्यात् । अङ्गसंज्ञा तु विधानायत्ता । न च प्रकृत्यादयः कुतश्चिद्विहिता अतो न प्रकृत्यादिषु परेषु पूर्वस्य तत्प्राप्तिरिति प्रागुक्ता एव दोषाः । विकारागमयोरपि यथायथं परत्वमाद्युदात्तत्वं तयोः परतः पूर्वस्याङ्गत्वं च स्यादिति दुष्टोयं प्रत्ययाधिकारः । अत्राहुः ।

प्रकृत्यादीनां सनाद्युत्पत्तौ निमित्तत्वेनोपादानात् पाराथ्र्यात् स्वसंस्कारं प्रति न प्रयोजकत्वम् । यथा योऽश्वे स देवदत्त इत्युक्ते नाश्वस्य देवदत्तसंज्ञा । किं च हरतेर्दृतिनाथयोः कर्मणोरुपपदयोः पशौ कर्त्तरि इन्प्रत्ययो भवतीति वाक्यार्थपर्यवसाने कथं प्रकृत्यादीनां संज्ञाप्राप्तिः । न च आवृत्त्या ते च हरत्यादयः प्रत्ययसंज्ञका इति द्वितीयं वाक्यं कल्प्यम् । मानाभावात्, गौरवपराहतत्वाच्च । यत्तु सनादीनामप्यसतां संज्ञानुपपत्तेः वाक्यभेदेनैव संज्ञा विधेया । ततश्च यथा एकेन सनादीनां विधिरपरेण संज्ञाविधिः । एवं प्रकृत्यादीनामपि स्यादेवेति । तन्न । वृद्धिसूत्रशेषे वर्णितया रीत्या सन्प्रत्ययो भवतीत्यादिक्रमेण संज्ञाविशिष्टस्य संज्ञिन एकवाक्येनैव विधिसम्भवात् । नह्युद्भिदा यजेतेत्यादौ नामधेयसम्बन्धलाभाय विध्यावृत्तिं मन्वते न्यायविदः । अभ्युपेत्य ब्रूमः । संज्ञापरं द्वितीयं वाक्यमपि गुप्तिज्किद्भ्यःसन्प्रत्यय इत्यादिरूपमेव । तथा च विरुद्धविभक्त्यावरुद्धानां प्रकृत्यादीनां प्रथमान्तेन प्रत्यय इत्यनेन सामानाधिकरण्यमसम्भाव्येव । न च द्वितीयवाक्ये प्रकृत्यादीनां विभक्तिविपरिणामेन प्रथमा कल्प्या योग्यविभक्तिनिर्दिष्टेषु सनादिषु संज्ञायाश्चरितार्थत्वात् । आप च । आद्यवाक्ये सनादीनामेव अपूर्वविधानविषयतया प्राधान्यम् । एवं च द्वितीयेपि संज्ञिनमपेक्षमाणा संज्ञा पूर्वत्र प्रधानतया कृत्स्नमेव गृह्णीयात् न त्वप्रधानमपि । नन्वेवमपि विकारागमानां विधेयतया प्राधान्यात्संज्ञा दुर्वारेति चेत् । मैवम् । अन्वर्थसंज्ञाविज्ञानात् प्रतियन्त्यनेनार्थमिति हि प्रत्ययः विकारागमौ त्वनर्थकौ । न चैवमवेः क इत्यादीनां समासान्तानां च प्रत्ययसंज्ञा न स्यात् अनर्थकत्वादिति वाच्यम् । स्वार्थिका अपि प्रकृत्य-

र्थेनार्थवन्त एवेति सिद्धान्तात् । यत्तु कल्पनामात्रमेतदिति । तन्न । प्रकृतिप्रत्ययार्थविभागस्य सर्वस्यापि काल्पनिकत्वाविशेषात् । नैषा कल्पना शास्त्रकृत्सम्मतेति चेन्न । द्वितीयेति सूत्रे पूरणार्थात्स्वार्थे अन्प्रत्ययस्यापि पूरणार्थतायाः भगवतैवोक्तेः । इहापि प्रत्याय्यन्तइति व्युत्पत्त्यन्तरमप्याश्रित्य प्रकृत्या अभिव्यज्यमानार्थत्वं स्वार्थिकानामस्तीति भाष्यकैयटयोः स्वीकाराच्च । न चैवं विकारागमयोः सम्भवति । प्रकृत्यवयवतया तदर्थएवोपक्षयात् । अपि चाप्रयोजनाभावान्नामीषां संज्ञा । न च परत्वमेव प्रयोजनम् । षष्ठ्या विकाराणां स्थानसम्बन्धस्य आगमानामवयवत्वेन सम्बन्धस्य च प्रतिपादनात् । न चाद्युदात्तत्वं प्रयोजनम् । आगमानामनुदात्तत्वविधानात् । यत्र तु प्रयोजनं लभ्यते तत्रेष्यतएवागमस्यापि प्रत्ययत्वम् । यथा श्नमः शकारस्येत्संज्ञार्थमिति । इदं त्ववशिष्यते । हनश्चवधः, नाभिनभं च, विरागविरङ्क्ष्वेत्यादावादेशानां संज्ञा स्यात् अर्थवत्त्वाद्विधेयत्वेन प्राधान्यात् योग्यविभक्तिकत्वाच्चेति । संज्ञाप्रयोजनं तु स्थानिन आदेशेन निर्वार्तितत्वेन शब्दान्तरापेक्षया परत्वमस्तीति तस्मात्कर्त्तव्योत्र यत्न इति हरदत्तः । अत्रेदं वक्तव्यम् । हनश्चेत्यादिचकारो न प्रत्ययसंज्ञामात्रस्यानुकर्षणार्थः । अधिकारादेव तल्लाभात् । किन्तु संज्ञिविशिष्टस्य । एवंच तेनैव निराकांक्षा संज्ञा कथं वधादिभिः सम्बध्येत । क्षेमप्रियमद्रेण्चेत्यादौ तु णित्वादिसामर्थ्यादाट्त्या संज्ञालाभः । किं च नभं विरङ्गमिति द्वितीयान्तं न तु प्रथमान्तम् । असावमुमादेशं लभते इत्याशयेन प्राचां व्यवहारात् । उक्तञ्च प्रातिशाख्ये । असावमुमिति तद्भावमुक्तमिति । समानाक्षरमन्तस्थं समङ्कठ्यं स्वरोदयमिति च । इकोयणचीति

तदर्थः । एवं स्थिते नभविरङ्गयोः संज्ञया सह विरुद्धविभक्त्यवरोधोपि स्पष्ट एवेति दिक् । अथ सनः सशब्दादारभ्य कपः पकारेण सपिति प्रत्याहारमाश्रित्य सप्प्रत्यय इत्येव कुतो नोक्तमिति चेन्न । प्रत्यासत्त्या सिपः पकारेण ग्रहणापत्तेः । व्याप्त्या तु तप्तनप्तनथनाश्चेति तनपः । तस्माद्यथान्यासमेवास्तु । संज्ञाप्रयोजनं तु कर्तव्य इत्यादौ धातोरङ्गसंज्ञाप्रवृत्तावाङ्गो गुणः । यत्तु प्रत्ययाद्युदात्तत्वं फलमिति । तदापाततः । आद्युदात्तश्चेत्यधिकारमाश्रित्य तस्य सुसाधत्वात् ॥

परश्च ॥ अयमधिकारः परिभाषा वा । लिङ्गवती चेयम् । लिङ्गं तु प्रत्ययसंज्ञा । गुप्तिज्किद्भ्यः सन्नित्यादौ अपादानत्वासम्भवाद्भ्योगलक्षणपञ्चमी तत्र परः पूर्वो वेत्यनियमेनाध्याहारे प्रसक्ते पर एवेति नियमार्थमिदम् । गापोष्टगित्यादौ षष्ठीनिर्देशेपि आनन्तर्यरूपषष्ठ्यर्थस्य पूर्वपरयोरविशेषादनियमस्तुल्य एव । स्यादेतत् । विभाषासुपोबहुच्पुरस्तात्तादित्येतन्नियमार्थमस्तु बहुजेव पुरस्ताद्भवति नान्य इति । ततश्च बहुचि पूर्वत्वस्य नियतत्वादन्यः प्रत्ययः पर एव भविष्यति । न चैवमपि षष्ठीनिर्देशेषु मध्यशब्दाध्याहारेण मध्येपि प्रसङ्ग एवेति वाच्यम् । अव्ययसर्वनाम्नामित्यनेन अकजेव प्रकृतिमध्ये नान्य इति नियमात् । न च बहुजेव पुरस्तादकजेव मध्ये इति नियमे बहुजकचोर्नियमो न लभ्येतेति वाच्यम् । देशनियमार्थयोरपि वाक्ययोः बहुजकचोर्देशसम्बन्धमतीत्या निराकाङ्क्षतया तयोर्देशान्तरसम्बन्धे मानाभावात् । विकल्पस्यानेकदोषदुष्टत्वाच्च । न चाकजेव प्राक् टेरिति नियमे प्रत्ययान्तरं टिप्राग्भागरूपमध्यविशेषे मा भूत् । मध्यान्तरे तु स्यादेवेति वाच्यम् । लक्ष्यसिद्धये मध्यसामान्यापेक्षनियमाभ्युपगमे बाधकाभावात् । किञ्च

गुप्तिज्किद्भ्य इत्यादौ भ्यसादीनां परत्वदर्शनेन अङ्गसंज्ञासूत्रे प्रत्यये इति सप्तमीबलेन च ङ्याप्प्रातिपदिकादित्यादौ परशब्दाध्याहारे निश्चिते तदैकरूप्याय प्रत्ययविधिपरायामष्टाध्याय्यां न पूर्वादिपदान्तराध्याहारो न्याय्यः तर्हि परश्चेति सूत्रेण । उच्यते । प्रयोगनियमार्थमिदं, पर एव प्रत्ययो न केवल इति । अन्यथा प्रत्ययार्थमात्रविवक्षायां किमस्य द्वयसमित्याद्यपि प्रयुज्येत । यदि तु प्रकृतिविशेषोद्देशेनैव प्रत्ययस्य विधानात्केवलो न प्रयोक्ष्यतइति ब्रूषे । एवमपि प्रकृत्यर्थमात्रविवक्षायां केवला प्रकृतिः प्रयुज्येतैव । यथा पच् पठ् इति । अतः प्रत्ययः परो भवत्येवेति नियमार्थमिदम् । आपदत्वनिर्वृत्तेश्चायं नियमः । तदेतत्तत्रतत्रोच्यते । न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्यय इति अपदं न प्रयुञ्जीतेति च । अपरिनिष्ठितं न प्रयुञ्जीतेति तस्यार्थ इत्युक्तम् । यत्विह भाष्ये बभ्रुमण्डुर्लमकइत्यादीनामपशब्दत्वमुक्तम्, यच्च पदमञ्जर्यां तारतम्यादिशब्दानाम् । तत्सर्वं लाक्षणिकत्वमनादृत्य प्रयुक्तेषु बोध्यम् । इष्यते हि गोणीशब्दस्य गवि गोणीसादृश्यशक्तिभ्रमाभ्यां प्रयुक्तस्य साध्वसाधुत्वव्यवस्था । अत एव बव्हचइत्र इति सूत्रे रघुशब्दस्य तदपत्ये लक्षणया साधुत्वं हरदत्तेनोक्तम् । प्रकृतसूत्रेपि नो खल्वारभ्यमाणमप्येतल्लक्षणया प्रयोगं निवारयितुमर्हतीत्युक्तन्तेनैव । अत एव तारतम्यमित्यस्य शब्दपरस्यार्थे लक्षणया साधुत्वं कैयटेन साधकतमङ्करणमिति सूत्रे ध्वनितमिति दिक् ॥

आद्युदात्तश्च ॥ अयमप्याधिकारः परिभाषा वा प्राग्वत् । तित्तिरिणा प्रोक्तमधीते तैत्तिरीयं ब्राह्मणकुलं, तित्तिरिवरतन्तुखण्डिकोखाच्छण् । छन्दोब्राह्मणानिच तद्विषया-

णि । तदधीते तद्वेद । प्रोक्ताल्लुक् । आयन्नादिषूपदेशिवद्वचनं स्वरसिध्यर्थम् ॥ इह रीशब्द उदात्तः । स्यादेतत् । अस्वरकस्याच उच्चारणासम्भवात् सर्व एव स्वरविधिर्नियमार्थः । तत्र चित एवान्तोदात्तः रित एव मध्योदात्तः । तिदेव स्वरितः । सुप्तिताववानुदात्तौ । दूरात्सम्बुद्धावेवैकश्रुत्यमिति स्वरान्तराणामन्यत्र नियमात्पारिशेष्यात्प्रत्यय आद्युदात्त एव भविष्यति नास्वरकः, नाप्यन्यस्वरकः तत्किमनेन सूत्रेणेति चेन्नैवम् । उक्तरीत्या आद्युदात्तत्वमपि ञ्नित्यादिरित्यादौ नियम्येत्र । किञ्च त्वदुक्तनियमे चिदादीनामनियमः स्यात् । अतश्चितोन्त एवेत्यादि व्याख्येयम् । ततश्च छणादीनामनियतस्वरत्वं स्यात् । अपि च रित्येवेति नियमेन्यत्रोपोत्तमरूपमध्यविशेष उदात्तो मा भूत् । मध्यान्तरं तु स्यादेव । सामान्यापेक्षनियमे च व्याख्यानमेव शरणीकरणीयं स्यात् । तस्मात्सूत्रारम्भ एवोचितः । स्यादेतत् । ञ्नित्यादिर्नित्यम्, प्रत्ययस्य च लसार्वधातुकमनुदात्तम् । सुप्तिताविति षष्ठ्येव सूत्र्यताम् । एवं स्वरप्रकरणे पाठात्सन्दर्भशुद्धिः । आद्युदात्तानुदात्तशब्दयोस्तत्रत्ययोरेवोपजीवनाल्लाघवं च । नन्वेवं प्रत्ययग्रहणपरिभाषया तदन्तस्य स्वरः स्यात् । इह तु क्रियमाणे आद्युदात्तश्चेत्यस्य प्रतियोगमुपस्थाने सत्युत्पद्यमान एव तव्यादिरुदात्तः एवं तिबादिरनुदात्तः । अतः प्रत्ययसंज्ञासन्नियोगेन स्वरो विधीयतइति चेत् । नैवम् । षाष्ठत्वेपि ज्ञापकेन तदन्तविधिनिरासस्सम्भवात् । तथाहि । प्रत्ययस्य चेत्यत्र न तदन्तविधिर्ञ्नित्यादिरित्यारम्भात् । सुप्तिताविति त्रापि न, धातोरित्याद्यारम्भात् । यदि हि प्रत्ययान्तस्यानुदात्तत्वं स्यात्तर्हि धातुप्रातिपदिकयोरन्तोदात्तविधिर्निर्विषय एव स्यात् । यत्र

हि प्रत्ययोनुदात्तो याति वृक्षानित्यादौ तत्रैव प्रकृतिस्वरः श्रूयते। यातो यान्ति वृक्षत्वं वृक्षतेत्यादौ तु सतिशिष्टेन प्रत्ययस्वरेण बाध्यते। तस्मात् षष्ठे सूत्रकरणमेवोचितमिति चेत्। मैवम्। गोपायति धूपायतीत्यत्र उत्पत्तिसंनियोगेनाद्युदात्तत्वे कृते ततः सनाद्यन्ता इति धातुत्वे धातोरित्यन्तोदात्तो भवति। यदि तु ञ्नित्यादिर्नित्यम्, प्रत्ययस्य चेत्युच्येत। तदा परत्वाद्धातुस्वरं प्रत्ययस्वरो बाधेत। सूत्रस्य सूत्रान्तरेण निमाने फलं वाच्यम्। सुप्तिङन्तं चेत्यस्य षष्ठे न्यासोप्यनुचितः। तथासति तदन्तविधेर्दुर्वारत्वात्। यच्चूक्तं प्रकृतिस्वरविधानं ज्ञापकमिति। तन्न। आस्ते शेतइत्यादौ लसार्वधातुकमात्रस्यानुदात्तत्वे सति धातुस्वरस्य सावकाशत्वात्। प्रातिपदिकान्तोदात्तस्यापि अग्निमान् अग्नीनामित्यादौ ह्रस्वनुड्भ्यां मतुप्, नामन्यतरस्यामिति स्वरसिद्ध्यर्थत्वात्। तत्र ह्यन्तोदात्तादित्यनुवर्तते। तमश्यामधुमन्तमित्यादौ मा भूदिति। भित्वा प्रकरणं सोढ्वा गौरवं चेह सूत्रणे फलं धातुस्वरस्तद्वत्तदन्ताग्रहणं स्थितम्॥ न चास्तु फलान्तरमपि। तथाहि। भवितव्यमित्यादौ प्रत्ययोत्पत्तिकालएवाद्युदात्तत्वे कृते पश्चाद्भवन्निट् अनुदात्तः सिध्यति। अन्यथा तु भू तव्य इति स्थिते आद्युदात्तत्वं शब्दान्तरप्राप्त्या ऽनित्यम् इट् तु स्वरभिन्नस्येत्युभयोरनित्ययोः परत्वादिटि कृते तस्यैव प्रत्ययावयवत्वादुदात्तत्वं स्यात्। मैवम्। यासुडुदात्तवचनेन आगमा अनुदात्ता इत्यस्यार्थस्य ज्ञापितत्वात्। न च चिनुयादित्यादौ पिद्वत्ते यासुटि चरितार्थमुदात्तवचनं कथं ज्ञापकमिति वाच्यम्। एवं हि उदात्तोङिच्चेत्यपहाय अपिच्चेत्येव ब्रूयात्। अपिच्च लिङित्युक्त्या हि सार्वधातुकमपिदिति ङित्त्वमपि सिध्यत्येव। अवश्यञ्चोक्तज्ञापकं त्वयाप्यादर्तव्यम्। अन्यथा प्रत्ययसंज्ञास-

न्नियोगेनाद्युदात्तविधावपि भविषीयेत्यादौ स्वरो न सिध्येत् । तत्र हि लावस्थायामनच्कत्वात्प्रत्ययस्वरे असति परत्वाद्विशेषविहितत्वाच्च सीयुटि कृते पश्चाल्लादेशे प्रत्ययाद्युदात्तत्वं सीयुट एव स्यात् । ज्ञापकाश्रयणे तु सीयुडनुदात्तः । इटोदित्यकार उदात्तः । न च तित्वात्स्वरितत्वं शंक्यम् । तकार उच्चारणार्थो न त्वित्संज्ञकः । इत्संज्ञाभ्युपगमपरो वृत्तिग्रन्थस्तु अत्रत्यभाष्यादिविरोधात्, भक्षीयतवराधस इत्यन्तोदात्तलक्ष्यविरोधाच्च प्रामादिक इति नविभक्तौतुस्मा इत्यत्रावोचाम । नन्वेवमपि सीयुटि कृते आकरस्यादित्वं विच्छिन्नं तत्कथमुदात्तत्वमिति चेत् । यासुट उदात्तवचनेन प्रत्ययाद्युदात्तत्वे कर्तव्यआगमा अविद्यमानवद्भवन्तीति ज्ञापितत्वात् । तर्ह्यविद्यमानवद्भावमात्रज्ञापनेनोपक्षीणं लिङ्गमागमानामनुदात्तत्तां न ज्ञापयतीति चेत्, वाचनिकं तर्हि तदस्तु । तथा च भाष्यम् । यद्येवं वचनादथापि ज्ञापकादागमा अनुदात्ता भवन्तीति । अवश्यं च त्वयापीदं वाच्यम् । भवितव्यमित्यादौ पूर्वमुदात्तत्वे सत्यपि पश्चाद्भवन्निट् ज्ञापकञ्च वचनं वाचनिकमित्यनुदात्तो भवेत् शेषनिघातेनेति चेत् । नायं शेषनिघातस्य विषयः । स्वरविधिशेषत्वात्तस्य । यस्मिन्पदे यस्यामवस्थायां यस्याच उदात्तः स्वरितो वा विधीयते तस्मिन्पदे तस्यामवस्थायां सन्निहितमजन्तरं निहन्यते इत्यर्थः । न चायं प्रकारोत्र सम्भवति । तस्मादिटोनुदात्तत्वं नात्र सूत्रारम्भस्य फलमिति स्थितम् । इदं तर्हि फलं सुघ्ने भवा सौघ्नी, अण उत्पत्तिवेलायामेवोदात्तत्वे सति उदात्तनिवृत्तिस्वरेण ङीरुदात्तः । अन्यथा स्रौघ्न ई इति स्थिते प्रत्ययस्यचेत्याद्युदात्तत्वं बाधित्वा परत्वाद्यस्येति लोपे कृते उदात्तनिवृत्तिस्वरो न लभ्येतेति

चेत् । मैवम् । परस्यापि यस्येति लोपस्य ङीबुत्पत्तिमपेक्षमाणस्य अन्तरङ्गेण स्वरेण बाधात् । तवापि हि आत्रेयीशब्दे इयमेव गतिः । तथाहि । अत्रेरपत्यम् । इतश्चानिञ इति ढक् । आयन्नादिषु उपदेशिवद्वचनं स्वरसिद्ध्यर्थमिति प्रत्ययस्वरात्पूर्वमेयादेशः । टिड्ढेतिङीप् । आत्रेय ई इति स्थिते ताद्धितस्य कित इति स्वरं बाधित्वा परत्वाद्यस्येति लोपे कृते उदात्तनिवृत्तिस्वरो न स्यात् । तस्मान्नेदं फलमिति स्थितम् । अस्तु तर्ह्यनुदात्तस्यात्र प्रदेशे करणे फलान्तरम् । तथाहि । पित्स्वरात्तित्स्वरष्टापि चित्स्वरश्चापि पित्स्वरात् ॥ कार्यशब्दाट्टापि स्वरितत्वात्प्रागेकादेशे कृते तस्य पूर्वं प्रत्यन्तवद्भावात्तित्स्वरः प्राप्नोति परं प्रत्यादिवद्भावात्पित्स्वरश्च परत्वात्स्वरितो भवति । यदि तु लसार्वधातुकमनुदात्तम्, सुप्पितौ च त्युच्येत तर्हि परत्वादनुदात्तत्वं स्यात् । एवम् आम्बष्ठ्येत्यत्र यङश्चाप्येकादेशे कृते पित्स्वरात्परत्वाच्चित्स्वरो जायते । तदपि विपरीतं स्यादिति चेत् । मैवम् । कार्यित्यत्र हि टाबुत्पत्तेः प्रागेव स्वरितो भवत्यन्तरङ्गत्वात्सत्यापि वा टापि स्वरितैकादेशयोरुभयोरानित्ययोः परत्वात्स्वरिते कृते आन्तर्यतः स्वरितानुदात्तयोरेकादेशः स्वरित एव भवति । आम्बष्ठ्यायामपि चापश्चित्करणसामर्थ्यादेव चित्स्वरो भविष्यति । सामान्यग्रहणे चित्त्वमुपक्षीणमिति चेन्न । एवं हि टाप्प्रकरणएव यङः इति सूत्रयेत् ॥

अनुदात्तौ सुप्पितौ ॥ पूर्वस्यापपादः । सुप्प्रत्याहारः पिच्च अनुदात्तः स्यात् । प्रत्याहारश्च सुपः पकारेण न तु कपः । टाबादीनां पित्करणात् । सुपः पकारस्यानन्यार्थत्वाच्च । दृषदः पठति पचति ॥

गुप्तिज्किद्भ्यः सन् ॥ एभ्यः परः सन्प्रत्ययः स्यात् ।

धातोः कर्मण इति सूत्रे वाग्रहणं त्रिभज्य त्रिसूत्रीशेषतया सम्बध्यते । सा च व्यवस्थितविभाषा, तेन प्रथमसूत्रद्वये अर्थविशेषोपहितेभ्य एव धातुभ्यः सन् । स च विशेषो मुनित्रयेण साक्षादनुक्तोपि वृत्तिकारादिभिरुपनिबद्धः । तत्र गुपेर्निन्दायाम् । जुगुप्सते । तिजेः क्षमायाम् । तितिक्षते । कितेर्व्याधिप्रतीकारे अपनयने नाशने निग्रहे च । चिकित्सति वैद्यः । क्षेत्रियच्परक्षेत्रे चिकित्स्य इति सूत्रे वृत्तिग्रन्थः । क्षेत्रियाणि तृणानि सस्यार्थं क्षेत्रे जातानि किंचित्स्यानि अपनेयानि विनाशयितव्यानि वा । तथा क्षेत्रियः पारिदारिकः । परदाराः परक्षेत्रं तत्र चिकित्स्यो निग्रहीतव्यः । विपूर्वः संशयेपि, विचिकित्सति मे मनः । विचिकित्सा तु संशयइत्यमरः । अर्थान्तरे तु गोपयति हेतुमण्णिच् । तेजयति । संकेतयति । हेतुमण्णिच् चुरादिणिज्वा । भूवादौ चुरादौ चानयोः पाठादिति न्यासकारः । वस्तुतस्तु सर्वत्र चुरादिणिजेव न तु हेतुमण्णिच् इत्यनुपदमेव स्फुटीकरिष्यामः । इह गुपितिजिभ्यां सन्नन्ताभ्यां कथं ताङित्याशंक्य अवयवे ह्यचरितार्थं लिङ्गं सामर्थ्यात्समुदायस्य विशेषकमिति भाष्ये समर्थितम् । युक्तं चैतत् । भ्वादौ अनुदात्तेत्सु गुप गोपने तिज निशान इत्यनयोः पाठात् । मैत्रेयस्तु तत्रैव गुप गोपनकुत्सनयोरिति पपाठ । एषां च नित्यं सन् । तथा च भाष्यम् । नैतेभ्यः प्राक्सन आत्मनेपदं नापि परस्मैपदं पश्याम इति । एवं च गोपते तेजतइति स्वाम्युक्तः केवलात्तङः प्रयोगः प्रत्युक्तः । नन्वेवं गोपयति तेजयतीति णिजन्तेपि तङ्प्रसङ्गः । सन्नन्ते तङं प्रवर्त्य अनुदात्तेत्वं चरितार्थमिति चेत् । णिचि प्रवर्त्यतां न तु सनीति विपरीतं कुतो नेति चेत् । अत्रोच्यते । भिन्नार्था धातवो भिन्ना एव । एवं च

निन्दाक्षमादौ यत्रार्थे सन्निष्यते तदुपहिताः सानुबन्धा भ्वादयो भिन्ना एव यत्र तु णिजिष्यते तत्राननुबन्धका एव चुरादौ बोध्याः। अवयवे कृतं लिङ्गमिति भाष्यस्यायमेवाशयः। स्पष्टं चेदं पूर्ववत्सन इति सूत्रे पदमञ्जर्याम्। एवञ्च भ्वादिभ्यो हेतुमण्णिजिति प्रागुक्तन्यासग्रन्थो ऽसङ्गत एव। अत्राभरणकारः। गुपादिसूत्रे गुप्तिज्किन्मानित्युपक्रम्य गुपादिष्वनुबन्धकरणमात्मनेपदार्थमिति भाष्ये वार्तिके चोक्तत्वात्किंतिः परस्मैपदिषु पठितोप्यात्मनेपदी बोध्यः। न च गुपादिष्विति बहुवचनं वक्ष्यमाणमान्त्यधाद्यपेक्षमिति वाच्यम्। भाष्ये विशिष्य कितेरप्युपक्रमादित्याह। एतदनुसारी वर्धमानोपि स्वाश्रयं कश्चिकित्सतु इति खण्डनस्य व्याख्यावसरे चिकित्सतामिति तु युक्तमित्याह। माधवस्तु नैतन्मेने। अनेकमहाग्रन्थविरुद्धत्वात्। तथाहि। धातुपाठे तावदयमुदात्तेत्पठितः वृत्तिकारोपीह परस्मैपदमुदाजहार। कैयटोप्याह। क्रमदर्शनाय कितिः पठितो न स्वयमनुदात्तेदिति। हरदत्तोप्याह कितिस्तु परस्मैपदीति। स्वामी काश्यप इन्द्रश्चेत्यादयोपीत्थमेव प्रत्यपीपदन्। तस्मात् श्रीहर्षोक्तिरेव युक्ता वर्धमानोक्तिरयुक्तेति दिक्। तथा च प्रयुज्यते। तस्य चिकित्सतो भ्रम एवं विद्वान्विचिकित्सतीत्यादि। सनो नकारः स्वरार्थः। धातुस्वरस्तु न भवति नित्करणसामर्थ्यात्। यस्तोतारं जिघांसति सतिसखायम्। न चार्धधातुके अतोलोपेन भाव्यम्, सार्वधातुके तु शपा सहैकादेशेन। तथा च सनोकारो मास्तिवति चेन्न। दित्सधित्सादिभ्य एकाच्त्वे यङ्प्रसङ्गात्। दित्स्यन्धित्स्यमित्यत्र ण्यत्प्रसङ्गच्च। कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमिति वार्तिकस्य प्रत्ययग्रहणमपनीयानेकाज्ग्रहणं कर्त्तव्यमित्येवंपरत्वेन दित्साञ्चक्रइत्याद्यसिद्धया-

पत्तेश्च । एतेन सन्यङोरिति सप्तमीं व्याख्याय प्रतीषिषति, अटाट्यतेइत्यादौ तु सन्यङोरकारोच्चारणसामर्थ्याद्द्वित्वमिति वदन्तः प्रसादकारादयः परास्ताः । उक्तरीत्या अकारोच्चारणस्य चरितार्थत्वात् । न्यासहरदत्तादिग्रन्थास्तु सन्यङोर्द्वित्वमपि फलमित्येवंपराः । ते च षष्ठीव्याख्यानमेव गृहीत्वा योज्या इति दिक् ॥

मानबधदानशान्भ्यो दीर्घश्चाभ्यासस्य ॥ एभ्यः सन्स्यात् अभ्यासस्य इकारस्य दीर्घश्च । अत्रापि पूर्ववदर्थविशेषोपहितेभ्यः सानुबन्धेभ्यो नित्यः सन् । अर्थान्तरोपहितानि तु धात्वन्तराणि चुरादौ बोद्धव्यानीति निष्कर्षः । तत्र मानेर्विचारे, मीमांसते । ननु ज्ञानार्थान्मानेरुत्तरसूत्रेणैव सनस्तु । मैवम् । दीर्घविधानार्थमिडभावार्थं चास्यावश्यकत्वात् । धातोरित्यविधानाद्धि सनोत्र नार्धधातुकत्वमतो नेट् । यत्तूत्तरतन्त्रे वाचस्पत्यादौ मांमांसाशब्दो माङ् मानइत्यस्माद्व्युत्पन्न इत्युक्तम् । तस्यायमाशयः । इह सन्प्रकृतिस्तावदात्मनेपदार्हाच्चुरादिकाद्भिन्नैवेति स्थितम् । तत्र मानपूजायामित्यादिवृत्तिकारग्रन्थो भंक्त्वा व्याख्येय एव न हि तस्मादयं सन् । एवं स्थिते सन्प्रकृतिरनुदात्तेत्कैवेत्यत्र मानाभावात्, ङिदेव सास्तु । नुङ्कसूत्रे निपात्यतां मुंडमिश्रादिसूत्रे हलिकल्योरदन्तत्ववत् । न च वैयाकरणानामुपायेष्वाग्रहः । उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिता इत्युक्तेः । न चैवं सनिमीमेतीस्प्रसङ्गः । ध्वादिसहचर्येणेच्छासंन्येव तद्विधानात् इति । वधेश्चित्तविकारे । बीभत्सते । दानेरार्जवे । दीदांसते । शानेर्निशाने । निशानन्तीक्ष्णीकरणं, शीशांसति । शीशांसते । चुरादीनां तु मानपूजायाम् । मानयति । बधबन्धने बाधयति । दानअवगुण्ठने दानयति । शा-

न तेजते शानयति । अत्र सन्प्रकृतिभूतौ मान्बधी अनुदात्तेतौ शेषौ स्वरितेतौ । चुरादयस्त्वननुबन्धाः । ननु त्रयाणामर्थभेदाच्छेदोस्तु शानेस्तु णिच्सनोरर्थैक्यात्कथं भेद इति चेत् । धुनाति धुनोत्यादीनामिवेति गृहाण । स्यादेतत् । इह दीर्घश्रुत्या अच इत्युपस्थितं तच्चेदभ्यासेन विशेष्यते तदा अभ्यासस्यादौ विधीयमानो दीर्घो हलादिशेषात्प्राक् स्यात् । अचा अभ्यासविशेषणे तु अजन्तस्याभ्यासस्य विधीयमानो हलादिशेषं प्रतीक्षतां ततोधिकस्य प्रतीक्षायां कारणाभावात् . विशेषविहितत्वाच्च समनन्तरमेव भवन् वधेरित्वस्य शेषाणां ह्रस्वस्य च बाधकः स्यात् । ततश्चाभ्यासे आकारः श्रूयेत नत्वीकार इति चेत्सत्यम् । अत एव आभ्यासस्येतिच्छेदः कृतः । अभ्यासस्य विकार आभ्यासः स चेत्वमेव । तथाहि लोपस्तावन्न विकारः । लोपागमवर्णविकारज्ञ इति पस्पशायां द्वौ चापरौ ;वर्णविकारनाशाविति वार्त्तिके च पृथगुपादानात् । अभावस्यादेशविधानायोगाच्च, अच इत्युपस्थितेश्च । यदि तु ह्रस्वस्य स्यात्तर्हि तद्धितनिर्देशो व्यर्थः स्यात् । तस्मादित्वमेव तद्धितेन प्रत्याय्यते । यद्वा । सन्याहत्य विहितस्य विकारस्य ग्रहणमस्तु । तदेतदभिसन्धाय व्याख्यातं प्राक् आभ्यासस्याविकारस्येति। अथ वा दीर्घोकित इत्यत्राकिद्ग्रहणेन अभ्यासविकारेषु बाध्यबाधकभावो नास्तीति ज्ञाप्यते । तद्धि यंयम्यते रंरंम्यतइत्यादौ नुकि कृते मा भूदिति कृतं, विशेषविहितेन नुका अनजन्तत्वादेव दीर्घो न भविष्यतीति किं तेन । अत एव डोढौक्यते तेत्रौक्यतइत्यादौ ह्रस्वे कृते गुणो भवति । अन्यथा बबाधे इत्यादौ चरितार्थं ह्रस्वत्वं पापच्यतइत्यादौ चरितार्थो दीर्घः परत्वाद्बाधेत ॥

धातोः कर्मणः समानकर्तृकादिच्छायां वा ॥ इषेः कर्म

तेनैव च समानकर्तृको यो धातुः तस्मादिच्छायामर्थे सन्प्रत्ययो वा स्यात् । धातोः कर्मत्वसमानकर्तृकत्वे अर्थद्वारके बोध्ये । अर्थस्यापि ते इषिनिरूपिते एव न तु क्रियान्तरनिरूपिते । इच्छायामित्यस्य सन्निधानात् । कर्तुमिच्छति चिकीर्षति । धातोः किम् । सन आर्द्धधातुकत्वं यथा स्यात् । तेन यथायथमिड्गुणौ स्तः । अन्यथा जुगुप्सतइत्यादाविव न स्याताम् । कर्मणः किम् । गमनेनेच्छतीत्यर्थे जिगमिषतीति मा भूत् । समानकर्तृकात्किम् । देवदत्तकर्तृकं भोजनमिच्छति यज्ञदत्तः । इच्छायां किम् । कर्तुं जानाति । वावचनाद्वाक्यमपि । न च समानकर्तृकेषु तुमुनिति तुमुन्विधानसामर्थ्यादेव वाक्यं सिद्धमिति वाच्यम् । चिकीर्षितुमिच्छतीत्यत्र चरितार्थत्वात् । नह्यत्र सनः प्रसङ्गः । सन्नन्ताच्च सन्निति वक्ष्यमाणत्वात् । आशङ्कायामुपसंख्यानम् ॥ कूलं पिपतिषति । श्वा मुमूर्षति । शङ्के पतिष्यति कूलम् । शङ्के मरिष्यतीत्यर्थः । आशङ्का सम्भावना तद्विशिष्टक्रियावचनात्स्वार्थे सन्निति कैयटादयः । शंकाविशिष्टयोः पतनमरणयोर्लडर्थवर्त्तमानत्वान्वये स्वर्गी ध्वस्त इत्यादाविव विशेषणीभूतशंकायां वर्तमानत्वपर्यवसानं बोध्यम् । प्रत्याख्यानं तु, यो यदिच्छति स तस्य पूर्वरूपाणि करोति यथा देवदत्तः कटं चिकीर्षुः पूलादीन्युपादत्ते । एवं कूलस्यापि लोष्टविशरणादीन्युपलभ्य पतनेच्छाध्यारोप्यते । यद्वा । सन्विधायके सूत्रे इच्छाशब्दो गौणमुख्यसाधारणः । गौणमुख्यन्यायस्तु लक्ष्यानुरोधात्त्वरितत्वाच्च नाश्रीयते । अत्र भाष्यम् । शैषकान्मतुवर्थीयाच्छैषिको मतुवर्थिकः । सरूपः प्रत्ययो नेष्टः सन्नन्ताच्च सनिष्यते ॥ अयं श्लोक इह सूत्रे मतुब्विधौ च भाष्ये पठितः । अस्माभिस्तु चतुर्थे शेषइति सूत्रे ज्ञा-

पितोयमिति तत्रैव व्याख्यास्यते। एतव्याख्यानपराः प्रकृतसूत्रस्थ कैयटहरदत्तादिग्रन्थाः पाञ्चमिकभाष्यविरुद्धा इति तत्रैव वक्ष्यते। इह सन्प्रसङ्गादन्योप्यनिष्टः प्रत्ययो वारितः। प्रकृतोपयुक्तं तु सन्नन्तान्न सनिष्यतइति। सरूपइत्येव। सारूप्यं चात्र सादृश्यं तच्चार्थद्वारकं तेन चिकीर्षितुमिच्छतीतीच्छासन्नन्तान्नेच्छासन् स्वार्थसन्नन्तात्तु स्यादेव। जुगुप्सिषते। मीमांसिषते। एतच्च न्यायसिद्धम्। तथाहि। लक्ष्यवशादिह जातिः पदार्थः तत्र च सकृल्लक्षणं प्रवर्त्ततइति सन्प्रकृतेः प्राक् तदन्तप्रकृत्यसम्भवात्तदन्तात्प्रत्ययस्य प्रसङ्ग एव नास्तीत्याहुः। एवं तु यङ् सन् ण्यन्तात्सनि बोभूयिषायिषतीत्यादि बहूनां लखेनं विरुध्यते। तस्माद्वाचनिकः सन्नन्तात्तदभाव इत्येव सारम्। इह यो ग्रामं गन्तुमिच्छति तस्य यद्यपि ग्रामो न स्वरूपेणेष्टः ग्रामो मे स्यादिति। तथापि गम्यमानतारूपेणेष्ट एव। अत एव ग्रामो जिगंस्यते जिगमिषितव्यः जिगमिषितः सुजिगमिष इति सन्नन्ताद्ग्रामे कर्मणि लादयो भवन्ति। गमनं प्रति कर्मत्वमप्यस्त्येव। अत एव ग्रामं ग्रामाय वा जिगमिषतीत्यत्र गत्यर्थकर्मणीति द्वितीयाचतुर्थ्यौ भवत इति भाष्ये स्थितम्। एवं च ग्रामो गमनं चेत्युभयमिषेः कर्म शक्यं च क्षुदुपहन्तुमिति पस्पशायां भाष्यस्य तत्रत्यकैयटस्य च पर्यालोचनया क्षुत् उपहननं चेत्युभयं शकेः कर्मेति स्थितम्। एवं च गन्तुमिष्यते शक्यते चेति प्रयोगे ग्रामो ग्रामं चेत्युभयमपि विवक्षाभेदेन साधु। प्रथमान्तस्य हि इषिशकिभ्यां कर्मत्वेन शाब्दोन्वयः। गमिना त्वार्थः। द्वितीयान्तस्यतु गमिं प्रति कर्मत्वं शाब्दम्। इषिशकी प्रति तु विशिष्टस्य वैशिष्ट्यं, विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति वा बोध्यम्। एते न इषिशकी च द्विकर्मकौ भाष्ये

स्थिताविति माधवग्रन्थो व्याख्यातः । किन्तु एतदुपबृंहणेन अयाचितारं नहीति श्लोके देवदेवस्य शकिकर्मत्वं यदुपपादितं तच्चिन्त्यम् । उक्तरीत्या हि सुतां ग्राहयितुमिति द्वयं कर्मास्तु गृह्णातिकर्तुस्तु शकिकर्मतायां कः प्रसङ्गः ॥

इति श्रीशब्दकौस्तुभे तृतीयस्याध्यायस्य
प्रथमे पादे प्रथममान्हिकम् ॥

सुप आत्मनः क्यच् ॥ कर्मण इच्छायां वेति वर्तते । इषिकर्मण एषितृसम्बन्धिनः सुबन्तादिच्छायामर्थे क्यच् प्रत्ययो वा स्यात् । आत्मनः पुत्रमिच्छति पुत्रीयति । आत्मशब्दोत्र परव्यावृत्तिपरः स्वशब्दपर्यायो गृह्यते न तु चेतनमात्रवचनः । तथात्वे हि स इच्छां विशेषयेत् सुबन्ते वा । आद्येपि आत्मन इति कर्तरि षष्ठी स्यात् आत्मा चेदिच्छतीति तर्हि पर्यवस्येत् । तथा च व्यर्थविशेषणता । नह्यनात्मा इच्छति । कर्मषष्ठ्यां तु अश्वक्षीरेति सूत्रं न सङ्गच्छेत । क्षीरादिभ्यः क्यचो दुर्लभत्वात् । द्वितीयेपि व्यर्थविशेषणतैव । परस्यापि हि इष्यमाणः चेतनसम्बन्धी भवत्येव । तस्माद्यथोक्तमेव साधु । स्वस्य यत्सुबन्तामित्यत्र तु कस्य स्वस्येत्यपेक्षायां इच्छया एषितुः संनिधापितत्वात् तस्यैवेति लभ्यते । न चैवमपि आत्मनः पुत्रं परस्य स्वामिनमिच्छतीत्यत्र प्रसङ्गः । सुबन्तस्यात्मसम्बन्धित्वादिति वाच्यम् । तच्चत्र यथायथंचिदात्मसम्बन्धित्वं विवक्षितम्, किं तर्हीष्यमाणं रूपं आत्मसम्बन्धित्वेन यदेष्यते तदा प्रत्ययः । इह त्वात्मीयत्वेन नेच्छा किन्तु परस्वामित्वेनेति न दोषः । सुब्ग्रहणं पदविधित्वार्थं, तेन समर्थपरिभाषोपस्थानान्महान्तं पुत्रमिच्छतीत्यादौ सापेक्षान्न भवति । अन्यथा महान्तं पुत्रीयतीति स्यात् । न च सुब्ग्रहणं विनापि कर्मण इ-

त्यनेनैव पदविधित्वं लभ्यतामिति वाच्यम् । यत्र हि पदस्यासाधारणं रूपमाश्रीयते स पदविधिः कर्मत्वं तु अपदेपि दृश्यते । धातोः कर्मण इति यथा । कथं तर्हि कर्मण्यणित्यादौ पदविधित्वमिति चेत् । उपपदसंज्ञायाः अन्वर्थत्वबलादिति गृहाण । महापुत्रीयतीति तु महापुत्रमिच्छतीति विग्रहे बोध्यम् । आत्मनः किम् । राज्ञः पुत्रमिच्छति पुरोहितः । नन्वसामर्थ्यादेवात्र न भविष्यतीति चे, तर्ह्यात्मनः पुत्रमिच्छतीत्यत्रापि न स्यात् । ननु लौकिके विग्रहे आत्मन इति प्रयोगेपि अलौकिके प्रक्रियावाक्ये केवलात्पुत्रशब्दात् क्यजिति चेत्तर्हि तथैव परकीयपुत्रेच्छायामपि स्यादिति गृहाण । किञ्च पुत्रशब्दस्य नित्यसापेक्षत्वान्नासामर्थ्यम् । अपि च । यत्रार्थादेव परकीयत्वं गम्यते तत्र परस्येति प्रयोगाभावात्सपत्नीवातिव्याप्तिः । अघमिच्छतीति यथा । न हि कश्चिदात्मनो ऽघमिच्छति । क्यचः ककारो नः क्ये इति सामान्यग्रहणार्थः । लोपइत्युक्ते हि सामसु साधुः सामन्यः अत्रापि स्यात् । चकारस्तदविघातार्थः । स्वरस्तु प्रत्ययस्वरेण धातुस्वरेण वा सिद्धः । अकारस्तु यद्यपि न श्रवणार्थ, आर्द्धधातुकेषु लोपात्सार्वधातुकेषु शपा गतार्थत्वात् तथापि गुणवृद्धिनिषेधार्थः सः । तथाहि । समिधं दृषदं वेच्छति समिध्यति दृषद्यति । ततो ण्वुल् अतोलोपः यस्यहलः, क्यस्याविभाषा । सामिधकः । दृषदकः । अत्रालोपस्य स्थानिवद्भावात्पुगन्तेति गुणो ऽतउपधाया इति वृद्धिश्च न भवति । किञ्च मृदमिच्छति मृद्यति । मृद्यतेरचोयत् । अतोलोपादि पूर्ववत् । मृद्यम् । यतोनाव इत्याद्युदात्तत्वम् । अपि च, पुत्रीयतीत्यादौ शपोनुदात्तता स्यात् । शपा सहैकादेशे तु स उदात्तो भवति । अपि च मृद्यतेरनेकाच्त्वाद्यक्ते-

नुत्पत्तिराम्प्रत्ययश्च फलमिति दिक् । क्यचि मान्ताव्ययानां प्रतिषेधः ॥ मान्तश्चाव्ययं चेति द्वन्द्वः । तेन तत्प्रकृतिकं लक्ष्यते । मान्तप्रकृतिकादव्ययप्रकृतिकाच्च सुबन्तान्न क्यजित्यर्थः । यथाश्रुते तु पुत्रमिच्छतीत्यादौ क्यङ् न स्यात् काविच्छति कानिच्छतीत्यादौ च स्यात् । इदमिच्छति स्वरिच्छति । गोसमानाक्षरनान्तादित्येके । गामिच्छति गव्यति । वान्तोयिप्रत्यये । दधीयति मधूयति । अकृत्सार्वेति दीर्घः । कर्त्रीयति हर्त्रीयति । रीङ्ऋतः । राजीयति । तक्षीयति । नः क्ये, पदत्वान्नलोपे क्यचिचेतीत्वम् । न लोपः सुप्स्वरेति नियमान्नासिद्धत्वम् । अस्मिन्पक्षे वाच्यति मृद्यतीत्यादि न सिद्ध्येदिति नायं स्थितः पक्ष इत्याहुः । छन्दसि परेच्छायामपि ॥ जहियोनो अघायति । मात्वा वृकाअघायवो विदन् । ज्ञापकात्सिद्धम् ॥ यदयं क्यचि प्रकृतेरीत्वबाधनार्थम् अश्वाघस्यादित्याकारं शास्ति न हि कश्चिदात्मनो अघमिच्छति । न चाचारक्यजर्थं तत् । छन्दसि अघशब्दादाचारे क्यचो ऽदर्शनात् । उदात्तस्थले इच्छार्थस्यैव प्रतीतेरित्याहुः । क्यजन्तेषु प्रकृत्यर्थो यद्यपि कर्म तथापि तस्य धात्वर्थान्तर्भावात् जीवतिनृत्यतीत्यादिवदकर्मक एवेच्छाक्यजन्तः । अतोस्माद्भावे कर्तरि च लादयः । आचारक्यजन्ते तु पुत्रादेरुपमानकर्मणो धात्वर्थान्तर्भावेपि छात्रादेरुपमेयकर्मणोनन्तर्भावात्तस्मिन्कर्मणि लादयो भवन्त्येव । पुत्रीयते छात्रः, पुत्रीयितव्य इत्यादि यथा । श्येनायते काक इत्यत्र उपमानकर्तुरन्तर्भावेपि उपमेयकर्तरि लो भवति, तद्वत् । ननूक्तरीत्या मुण्डं करोति मुण्डयति माणवकमिति न सिध्येत् । णिजन्ते मौण्ड्यगुणविशिष्टत्वेनैव कर्मान्तर्भूतं न तु माणवकत्वादिना विशेषेणेति । यदि तर्हि तथैव मुण्डमिच्छति मुण्डीयति

माणवकमित्यपि स्यात् । सापेक्षत्वेनासामर्थ्यान्न क्यजिति चेत्तर्हि तत एव णिजपि न स्यात् । तस्माणिच्क्यच्योर्विशेषो वक्तव्य इति चेत् । उच्यते । तत्करोतीति णिचि सिद्धे मुण्डमिश्रेति पुनर्विधानं सापेक्षेभ्योपि यथा स्यादित्येवमर्थमेव । क्यच् तु निरपेक्षेषु चरितार्थ इति स्पष्ट एव विशेषः । यद्वा । कण्ड्वादिवत् मुण्डादयो द्विविधाः । धातवः प्रातिपदिकानि च । तत्र सौत्रा एते विशिष्टक्रियावचना धातवः तेभ्यश्चुरादिवत्स्वार्थे णिच् । प्रातिपदिकानां तु विग्रह एव । माणवकं मुण्डं करोतीति । अथवा मुण्डयतीत्यत्र कमिति विशेषाकाङ्क्षा अनुभवसिद्धा । मुण्डस्यैव वा शुद्धेन करोतिनान्वयः । मौण्ड्यविशिष्टेन तु माणवकस्य । यथा गां दोग्धि पय इति शुद्धस्य दुहेः पूर्वं गवा सम्बन्धः । पश्चात्तु गोदुहिना पयसः । क्यच्प्रत्ययस्तु अनभिधानान्न भवति । माणवकं मुण्डीयतीत्युक्ते मुण्डामिवाचरतीत्यर्थान्तरमेव गम्यते । तदुक्तं हरिणा । सदपीच्छाक्यचः कर्म तदाचारक्यचाहृतम् । वाक्यवाच्यमतोव्यक्तेर्यथाभ्यासः क्रमादिष्विति ॥ अस्यार्थः । सदपि न्यायतः सम्भवदपीच्छाक्यचः कर्म वाक्यवाच्यं माणवकं मुण्डमिच्छतीत्येवंरूपेण बोधनीयम्, न तु क्यजन्तेन । यत आचारक्यचा तदेतं निरवकाशीकृतम् । तदर्थस्यैव निरूढेः । आचारक्यचाहरणे वाक्यवाच्यत्वे वा हेतुमाह । अतो व्यक्तेरिति । अतोस्मात् क्यचो व्यक्तेराचारार्थस्यैव प्रतीतेः । अतो वाक्यादिच्छाकर्मणः प्रतीतेरिति वा । यथा क्रमादिषु गत्यर्थेषु अभ्यासः पौनःपुन्यं वाक्येनैव गम्यते न तु यङा । कौटिल्ये निरूढेः । उक्तं च प्रकीर्णकाण्डे । सदपीच्छाक्यचः कर्म्म वाक्यएव प्रयुज्यते । प्रसिद्धेन हृतः शब्दो भावगर्हाभिधायिना ॥

अभ्यासे तुल्यरूपत्वान्न यङन्तः प्रवर्तते, इति ॥ एतेन यथेति क्रमादिषु यथा वेदादिविषयोभ्यासो व्यज्यते तथा वाक्ये इच्छाक्यचः कर्मेत्यर्थः। अथवा ऽभ्यासक्रमादीष्वित्येकं पदम्। अभ्यासेन वर्णक्रमादिविषयाभिव्यक्तिर्भवति तथा वाक्येन कर्मत्वविषयाभिव्यक्तिरित्यर्थ इति विवरणम्प्रत्युक्तम् । अत्र भाष्ये क्यजन्तस्य इष्टः पुत्र इष्यते पुत्र इत्यादयो विग्रहा निराकृताः । तस्यायमाशयः । यद्यपि वृत्तिवाक्ययोरत्यन्तसमानार्थकता नास्तीत्यदूरविप्रकर्षेणैव सर्वत्र विग्रहस्तथापि सुसदृशसम्भवे मन्दसदृशोपादानमन्याय्यम् । इच्छाक्यजन्तस्य चाकर्मकतया कर्मप्रत्ययान्तैर्विग्रहोनुचितः । निरर्थकाधिकावापापत्तेरिति । अत एव बाहुलकात्कर्मणि क्विबन्तस्य श्रीशब्दस्य श्रीयते इत्येव विग्रहो न्याय्यो न तु श्रयन्त्येतामिति कर्त्रर्थतिङन्तेनेति मान्याः । यदि तु कर्तरि क्विप् तर्हि श्रयतीत्येव विग्रह इत्यन्यदेतत् । एवं च श्रयन्त्येतामित्यत्र किं शब्दाशुद्धिरर्थाशुद्धिर्वेत्यादिवल्गनमत्यभाष्यापर्यालोचनमूलकत्वादुपेक्ष्यम् ॥ अथ नामधातुषु प्रतिसूत्रं लेशतः प्रक्रिया व्युत्पाद्यते ॥ पुत्रीयतीत्यादौ अलौकिके प्रक्रियावाक्ये सन्धिकार्यरहितात्पुत्राअ मित्यस्मात्क्याचि सुपो लुक् अन्तरङ्गानपीति न्यायात् । ततः क्यचिचेतीत्वम् । अश्वस्यति । वृषस्यति । क्षीरस्यति । लवणस्यति । अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचीत्यसुगागमः । अत्रात्मप्रीताविति पनीय अश्ववृषयोर्मैथुनेच्छायाम् । क्षीरलवणयोर्लालसायामिति वक्ष्यते । तेनाद्ययोरुदाहरणयोरश्ववृषयोर्मैथुनायेच्छतीत्यर्थः । अन्येतु परित्यक्तप्रकृत्यर्था मैथुनेच्छैवार्थ इत्याहुः । तथा च कालिदासः । इति रामो वृषस्यन्तीं वृषस्कन्धः शशास ताम्मिति। निघण्टुश्च, वृषस्यन्ती तु कामुकीति । इतरयोरपि, तृष्णाति-

रेको ऽभ्यवजिहीर्षातिरेको लालसा । तेन क्षीरलवणेच्छायां लालसारूपायामित्यर्थलाभात् क्षीरलवणे अतिशयेन अभ्यवहर्तुमिच्छतीत्यर्थः । अत्र प्रकृत्यसुगकारयोः सवर्णदीर्घं बाधित्वा अतोगुणइति पररूपम्। अकारोच्चारणं तु पूर्वसूत्रोदाहरणे ब्राह्मणास इत्यादौ कृतार्थम् । तथा सर्वप्रातिपदिकेभ्यो लालसायामसुग् वक्तव्य इत्यनकाराऱ्तादसुकि दध्यस्यतीत्यादौ च । सुगसुकौ च दधिमधुभ्यामेव स्तः । भाष्ये दधिस्यति मधुस्यतीत्येवमर्थमित्युक्तेरित्येके । अन्ये तु सर्वप्रातिपदिकेभ्य इत्येके इति सर्वग्रहणाद्बहुवचननिर्देशाच्च सर्वत्र स्तः । एवमर्थमिति तूदाहरणान्तराणामप्युपलक्षणमिति वदन्ति । अशनोदकधनेभ्यः क्यचि अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु इत्यशनधनयोरीत्वापवाद आत्वम् उदकस्योदन्नादेशश्च । अशनायति सद्यो भोक्तुमशनमिच्छतीत्यर्थः । बुभुक्षायां किम् । अशनीयति । औत्तरकालिकमशनमिच्छतीत्यर्थः । उदन्यति । पातुमुदकमिच्छतीत्यर्थः । उदकीयति । स्नानाद्यर्थमुदकमिच्छतीत्यर्थः । धनीयति । सत्यपि धने भूयोपीच्छतीत्यर्थः । धनीयति । दरिद्रः सन् धनमिच्छतीत्यर्थः । के चित्तु अशनादिप्रकृत्यर्थमनपेक्ष्य केवलं बुभुक्षादीनेव क्यजन्तस्यार्थान् मन्यन्ते । तथा च निघण्टुः । उदन्या तु पिपासा तृडिति । भारविश्च । किमु धनं धनायितुमिति । गार्ग्यमिच्छति गार्गीयति।अत्र क्यच्व्योश्चेति हलउत्तरस्य आपत्ययकारस्य लोपः । उपार्षभीयति। उपर्षभीयति। उपाल्कारीयति । उपल्कारीयति। अत्र वासुप्यापिशलेरिति वृद्धिविकल्पः। पक्षे गुणः। न च पक्षे ऋत्यक इति प्रकृतिभावः शङ्कनीयः । वासुपीत्यत्र हि उपसर्गादृतिधातावितिसम्पूर्णमनुवर्त्तते । तत्र यक्रियायुक्ता इति न्यायेनोपसर्गग्रहणादेव धातावीति लब्धेपुनर्धातुग्रहणं योगवि-

भागेनाधिकविधानार्थं सत्प्रकृतिभावं बाधतइति षष्ठे वक्ष्यमाणत्वात्। उपगताऋभीयका अमुन्देशम् उपर्षभीयको देशः। इह गुणप्रकृतिभावौ न तु वृद्धिः। गमिम्प्रत्युपसर्गत्वेपि सुब्धातुं प्रत्यतथात्वात्। न चोपसर्गादध्वन इत्यादाविव प्राद्युपलक्षकत्वम्। तत्रेवात्र मुख्ये बाधकाभावात्। ऋषभस्य समीपमुपर्षभं तदिच्छति उपर्षभीयति। अत्रापि गुणप्रकृतिभावौ न तु वृद्धिः पूर्ववत्। स्यादेतत्। धातुसंज्ञानिमित्ते प्रत्यये चिकीर्षिते उपसर्गाः पृथक् क्रियन्तइति तावद्वक्ष्यते। उदमनायत उन्मनाय्य गतः उन्मिमनायिषते इति अट्ल्यप्द्विर्वचनानि यथा स्युरिति। एवं चेहापि ऋषभशब्दादेव क्यच्। तेन उपार्षभीयत्। उपर्षभीय्य। उपेन प्रादिसमासः। उपार्षभीयिषतीत्यादि सिध्यतु, वृद्धिस्तु कुतो नेति चेन्न। ऋषभीयतेरिह सुब्धातुत्वाभावात्। प्रत्ययग्रहणपरिभाषया हि उपर्षभशब्दोत्र सुबन्तः न तु केवल ऋषभशब्दः। तदिह यः सुबन्तो नासौ धात्ववयवः यश्च धात्ववयवः नासौ सुबन्तः। किञ्चोपसर्गत्वाभावादपि न वृद्धिः। अत एव ल्यबर्थे प्रादिसमास इत्युक्तं न तु गतिसमास इति। न च सोपि क्त्वान्तेनासामर्थ्यात्कथमिति वाच्यम्। प्रकृत्येकदेशद्वारकस्य विशिष्टेन सामर्थ्यस्य कृत्सु सर्वत्र वाच्यत्वात्। न चोक्तरीत्या सुब्धातुत्वाभावे यथेष्टद्विर्वचनं न सिध्येदिति वाच्यम्। नामधातुत्वस्यैव तत्र प्रयोजकत्वात्। ऋकारमिच्छति ऋकारीयति उपर्कारीयतीत्यत्र वासुपीति वृद्धिः शाकलप्रकृतिभावश्चेत्युभयं न भवति। ऋतीति तपरकरणात्। उस्रामैच्छत् औस्रीयत्। औंकारीयत्। आऊढ ओढः, औढीयत्। अत्र उस्यपदान्तात् ओमाङोश्चेति पररूपं प्राप्तम् आटश्चेति पुनर्वृद्धिविधानार्थेन चशब्देन बाध्यते। तथा च षष्ठे वार्तिकम्। उस्योमाङ्क्ष्वाटः प्रति-

षेध इति। उसि ओमाङोश्च परयोराटः पररूपं नेत्यर्थः। स्यादेतत्। उक्तवार्तिके आङ्ग्रहणम् औढीयदिति तद्भाष्यं चासङ्गतम्। उपसर्गाणां पृथक्करणस्य ज्ञापितत्वात्। न च सन्ध्यभावाविषयकमेव तदिति वाच्यम्। उपर्षभीयतीत्यत्र तदभावापत्तेः। न चेष्टापत्तिः। माधवादिग्रन्थविरोधात्। अत्राहुः। यत्रोपसर्गस्वरूपमविकलं पृथक् प्रतीयते स ज्ञापकस्य विषयः। इह तु आङ् उकारेण सहैकादेशेन तथेति ओकारात्पूर्वमाट्। तस्य अन्तवद्भावलब्धाङ्व्यपदेशेन ओकारेण सह प्राप्तं पररूपं वृद्धिं वा बाधिष्टेति वार्तिके आङ्ग्रहणम्। उक्तवार्तिकभाष्यग्रन्थ एव च ज्ञापकस्य विशेषविषयत्वे प्रमाणमिति। एवं स्थिते आ इतः एतः। ऐतीयत्। एतियित्वा। एतितीयिषतीत्यादि द्रष्टव्यम्। प्र एतीयतीति स्थिते एङिपररूपं बाधित्वा प्राप्तामेत्येधतीति वृद्धिं ओमाङोश्चेति पररूपं परत्वाद्बाधते। प्रेतीयति। आगतऋश्यः आ ईषदृश्यो वा अर्श्यः। प्रादिसमासः। अर् गुणः। अर्श्यमिच्छति अर्श्यीयति आर्श्यीयत्। अत्र गुणस्य अन्तवद्भावेन आङ्त्वादोमाङोश्चेति पररूपं प्राप्तं परत्वात्तद्बाधित्वा सवर्णदीर्घः प्राप्तः सोपि आटश्चेति पुनर्वृद्धिविधानार्थेन चकारेण बाध्यतइति के चित्। तन्न। रूपे विशेषाभावात्। पुनर्विधानस्य पररूपबाधेनोपक्षीणत्वाच्च। अत एवोस्योमाङ्श्चिवार्तिकेन पररूपमेव निषिद्धमिति दिक्। अर्श्यीयतीत्यस्य प्रादिपूर्वत्वे प्रर्श्यीयति। अत्र ओमाङोश्चेत्ति बाधित्वा परत्वात्प्राप्तः सवर्णदीर्घः चकारेण पुनः पररूपविधानान्नेति माधवः। अरिमिच्छति अरीयति। रीङ्ऋतः। अलमिच्छतीत्यत्रापि इदमेव रूपं सावर्ण्यात्। तपरकरणादीर्घस्य न रीङ् नापि ऋत इत्वम्। अधातुत्वात्। ऋयति। हेशब्दमिच्छति हेयति गामिच्छति गव्यति। गव्यिता।

अतो लोपे क्यस्यविभाषेति हल उत्तरस्य क्यप्रत्ययय्यकारस्य प्राप्तो लोपः सन्निपातपरिभाषया न भवति। अगव्यीत्। वद-व्रजेत्यत्र हल्ग्रहणस्य हल्समुदायस्य प्रतिपत्यर्थत्वेपि अल्लोपस्य स्थानिवत्त्वेनाङ्गस्य हलन्तत्वाभावान्न वृद्धिः। रैयाति ग्लाय्यति ग्लाय्यिता। स्वलिह्यति। स्वलिह्यिता। स्वलिहिता। अश्वलिहीत्। अत्र हलन्तलक्षणा वृद्धिर्न। अल्लोपस्य स्थानिवत्वान्नेटीति निषेधाच्च। अत्र होढ इति ढत्वं न। नृः क्ये इति नियमेनापदान्तत्वात्। अत एव गोदुह्यतीत्यत्र दादेरिति घत्वं मित्रद्रुह्यतीत्यादौ वाद्रुहेति तद्विकल्प उपानह्यतीत्यत्र नहोध इति धत्वम् अनुद्रुह्यतीत्यादौ वसुस्रंस्विति दत्वं च न। पुरमिच्छति पूर्यति। हलिचेति दीर्घः। यन्तु अधातुत्वान्न दीर्घ इति माधवेनोक्तम्। तन्न। पिपर्त्तेः क्विपि उदोष्ठ्यपूर्वस्येत्युत्वे रपरत्वे च निष्पन्नस्य पुरुशब्दस्य धातुत्वानपायात्। कथमन्यथा पूः पूभ्यामित्यादौ दीर्घः। कथं च ऋक्पूरब्धूः पूः सर्वयोरित्यादिनिर्देशा इति दिक्। एवं गिरमिच्छति गीर्यति। अत्रापि गिरतेः क्विपि ऋत इत्वे रपरत्वे प्राग्वद्दीर्घः। गीर्यिता। गिरिता। क्यस्यविभाषेति यलोपपक्षे हल्परत्वाभावान्न दीर्घः। वोरिति पदस्य विधीयमानोपि न नः क्यङीति नियमेनापदत्वात्। स्वरिच्छतीति तु वाक्यमेव न तु क्यच्। मान्ताव्यपेभ्यः प्रतिषेधात्। चतुर्यति। दिव्यति। अनयोरधातुत्वाद्धलिचेति दीर्घो न चतुरदिवशब्दौ हि चतेरुरन्निति सूत्रेण दिवेर्डिविरिति न्यासोहितसूत्रेण च व्युत्पन्नौ। अव्युत्पन्नावेव वा। उभयथापि धातुत्वाभावः स्पष्ट एव। यन्तु प्रक्रियायां हलिचेति दीर्घः दिवमिच्छति दीव्यतीत्युक्तम्। तदप्रामाणिकमेव। तथा च हलिचेति सूत्रे काशिका,

धातोरित्येव। दिवमिच्छति दिव्यतीति। यत्तु दिवेरौणादिके किपि दिव्शब्दो धातुरेवेति व्युत्पत्तिपक्षमाश्रित्य प्रक्रियाग्रन्थः। अव्युत्पत्तिपक्षमाश्रित्य तु काशिकेत्यविरोध इति प्रसादकृतोक्तं, तत्तुच्छम्। किबन्तत्वे ऊठः प्रसङ्गात् भाष्यविरोधाच्च। दिवऔदिति सूत्रे हि अक्षद्यूरित्यत्र अतिव्याप्तिमेकदेशविकृतस्यानन्यत्वादाक्षिप्यं निरनुबन्धकपरिभाषया उगिदचामिति सूत्राद्धातुग्रहणानुवृत्त्या वेति द्वेधा समाहितम्। उभयथापि त्वत्पक्षे असङ्गतिः स्पष्टैवेति दिक्। तमिच्छति तद्यति। यद्यति। प्राणितीति प्राण्। प्राण्यति। अहर्यति। रोसुपीति रुत्वापवादो रेफः। स च नलोपे कर्तव्ये असिद्धो नेति वक्ष्यते। उज्झेः किप् उत्। तमिच्छति। उज्झ्यति। ककुभ्यति। मृडं परिवृढं वाचक्षाणमिच्छति। मृड्यति। परिब्रढ्यति। णाविष्ठवदित्यतिदेशात्परिवृढेर्ऋकारस्य रेफः। बुधेः किप्। भुत्। तमिच्छति बुध्यति। त्वां मामिच्छति त्वद्यति मद्यति। अतित्वामतिमामिच्छति। अतित्वद्यति अतिमद्यति। प्रत्ययोत्तरपदयोश्चेति त्वमौ। युवामावां वेत्यादिविग्रहे युष्मद्यति अस्मद्यति। अतियुष्मद्यति। अत्यस्मद्यति। उखां पन्थानं च आचक्षाणमिच्छति उख्यति। पथ्यति। मरुत्यति। अदस्यति। पयस्यतीत्यादि॥

काम्यच्च॥ उक्तविषये काम्यच् स्यात्। पुत्रमात्मन इच्छति पुत्रकाम्यति। सुपआत्मनः क्यच्काम्यचाविति वक्तव्ये उत्तरत्र द्वयोरनुवृत्तिर्मा भूदित्येवमर्थो योगविभागः। न चैवमपि सन्निहितत्वात्काम्यजेवोत्तरत्र सम्बध्येतेति वाच्यम्। इह चकारेणानुकृष्टस्य क्यच उत्तरार्थत्वात्। सुपआत्मनः काम्यच् क्यचेति तु सूत्रयितुं युक्तम्। काम्यचः ककारस्य इत्संज्ञा न।

फलाभावात्। न च कितिचेति निषेधः फलम्। अथातुविहितत्वेन आर्द्धधातुकत्वाभावादेव गुणाप्राप्तेः। वाक्काम्यतीत्यत्र सम्प्रसारणं फलं स्यादिति चेन्न। षष्ठ्यन्ते श्रौणहत्ये तत्त्वनिपातनेन धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानमिति ज्ञापयिष्यमाणत्वात्। तत्प्रत्ययो धातुसंशब्दनेन विहितः प्रत्यय इति प्राञ्चः। स्वरूपग्रहणं च नेह शृङ्गग्राहिकयोपादानम्। तथा सति घृतस्पृग्म्यामित्यादावनुदात्तस्यचर्दुपधस्येत्यमागमप्रसङ्गात्। किन्तु यत्कार्यं धातुं न व्यभिचरति तत्रेयं परिभाषोपतिष्ठते। तथा च स्वरूपग्रहणं नाम धातोरेवाश्रयणं तच्च यथा कथञ्चिदित्यास्तां तावत्। चकारस्तु भाष्यवार्तिकयोः प्रत्याख्यातः। न्यासकारहरदत्तमाधवास्तु पुत्रकाम्यिष्यतीत्यादौ सतिशिष्टमपि स्यस्वरं बाधित्वा धातुस्वरो यथा स्यादित्येतदर्थं चित्करणमित्याहुः। तत्तु प्रौढिवादमात्रं मुनिवचनविरोधेन स्वोत्प्रेक्षितस्वरस्यानादर्त्तव्यत्वादिति सुहृदयैर्विभाव्यताम्। पुत्रकाम्यिता। पुत्रकाम्यिष्यति। इह यस्यहल इति न भवति। अनर्थकत्वात्। यस्येति हि सङ्घातग्रहणादर्थवद्ग्रहणेनानर्थकस्येति वक्ष्यते। अत एव प्रयतौ पुत्रकाम्ययेति सिध्यति। इहान्तर्वार्तिन्या विभक्त्या पदत्वाद्यथायोगं पदकार्याणि। यशस्काम्यति। रुत्वं विसर्गः। सोपदादाविति सत्वम्। स्वः काम्यति। सोपदादावनव्ययस्येति वचनात्सत्वाभावः। अधिकरणशक्तिप्रधानस्याप्यस्य वृत्तिविषये शक्तिमत्प्रधानत्वात्। इषिणा कर्मत्वेन योगः। गीः काम्यतीत्यादौ। रोः काम्य इति रोरेव विसर्जनीयस्य काम्ये सत्वनियमात्सत्वाभावः। सर्पिष्काम्यति। षत्वं बाधित्वा इणः ष इति षः। अयं च सत्वापवादतया त्र तत्प्रसङ्गस्तत्रैव। तेनोच्चैः काम्यति गीः काम्यतीत्यादौ

न भवति । पुंस्कामयति । अत्र पुंसः संयोगान्तलोपे [1]पुमः खय्यमपरइति रुत्वं निर्वर्त्य सम्पुम्कानां सो वक्तव्य इति सत्ववचनान्नास्ति विसर्जनीय इति न षत्वम् । मान्ताव्ययेभ्योप्ययं भवत्येव । किंकाम्यति । अनुस्वारपरसवर्णाविकल्पौ ॥

उपमानादाचारे ॥ उपमानात्कर्मणः सुबन्तादाचारेर्थे क्यच् स्यात् । पुत्रमिवाचरति पुत्रीयतिच्छात्रम् । विष्णूयति द्विजम् । अधिकरणाच्चेति वक्तव्यम् ॥ प्रासादीयति कुटयां कुटीयति प्रासादे । इहोपमेये सप्तमीश्रवणादुपमानमपि सप्तम्यन्तमेवेति कर्मत्वाविवक्षया सूत्रेणासिद्धे वार्तिकारम्भः । सूत्रवार्तिकयोरुभयोरप्युदाहरणे क्यच्प्रत्ययस्य आचारमात्रमर्थः । प्रकृतेस्तु वृत्तिविषये एकत्र स्वार्थकर्मकाचरणसदृशमर्थः । अपरत्र स्वार्थाधिकरणकाचरणसदृशम् । तच्च प्रत्ययार्थे ऽभेदेन संसर्गेण विशेषणम् । प्रत्ययार्थे भूताचरणक्रिया तु उपमेया । सा च बाह्याभ्यां कर्माधिकरणाभ्यां सम्बध्यते ॥

कर्तुः क्यङ् सलोपश्च ॥ उपमानात्कर्तुः सुबन्तादाचारे क्यङ् वा स्यात् । सान्तस्य तु कर्तुरल्लोत्यस्येति लोपो वा स्यात् । प्रत्ययविकल्पनात्पक्षे वाक्यम् । सान्तस्य लोपविकल्पस्तु व्यवस्थितः । ओजोप्सरसोर्नित्यमन्येषां तु विकल्प एवेति । कृष्ण इवाचरति । कृष्णायते । कथं तर्हि क्षीरोदीयन्ति सद्यः सकलजलधयो वासुकीयन्ति नागा इति । क्षीरोदमिव आत्मानमाचरन्तीत्यर्थे उपमानादाचारइति क्यच् । ओजायते । ओजःशब्दोत्र वृत्तिविषये तद्वति वर्तते । अप्सरस इवाचरति अप्सरायते । यशायते । यशस्यते । विद्वायते । विद्वस्यते । इह सूत्रे चकारोन्वाचये । तेन कर्तुः क्यङ् सर्वत्र भवति । यत्र तु सकारः सम्भवति तत्र लोपोपि । सेति च पृथक्पदं लुप्तषष्ठीकम् ।

तेन कर्तुर्विशेषणात्तदन्तविधिः। अतो हंसायतइत्यादौ सलोपो न। सान्तेष्वपि लोपो व्यवस्थितः। तथाच वार्तिकम्। ओजोप्सरसोर्नित्यामिति। एवं स्थिते ओजसोप्सरसो नित्यं पयसस्तु विभाषयेति काशिकायां पयोग्रहणं ओजोप्सरोभिन्नसकारान्तस्योपलक्षणार्थम्। एतेन यशः प्रभृतेनैव भवतीति भाष्यन्तः परस्ताः। यत्तु प्रक्रियायां सुपूर्वस्य मनसो नित्यमितिं तदपाणिनीयम्। यत्तु विद्वस्यमानः शास्त्रे ऽधिकारीति वाचस्पतिग्रन्थव्याख्यावसरे कल्पतरुकारैरुक्तम्। विद्वस्यमान इति लोहितादिडाज्भ्यः क्यषिति। तल्लोहितादेराकृतिगणत्वेन शौंडिवादमात्रम्। वस्तुतस्तु क्यङेवायं न तु क्यष्। लोहितादिसूत्रे नायं हलन्ताद्विधीयते इति वदद्भिर्भाष्यकारैर्हलन्तात्क्यषोनङीकृतत्वात्। कथमन्यथा क्यस्यविभाषेत्यत्र सामान्यग्रहणार्थं ककारं प्रत्याचक्षीरन्नित्यवधेयम्। आर्चैरिवाचरति आर्चिष्यते। नः क्यइति नियमेन पदान्तत्वाभावात्षत्वम्। त्वद्यते। मद्यते। अनेकार्थत्वे तु युष्मद्यते। अस्मद्यते। कुमारीवाचरति कुमारायते। हरिणीव गौरीव गुर्वीवाचरति हरिणायते। गौरायते। गुरूयते। क्यङ्मानिनोश्चेति पुंवत्। सपत्नीवाचरति सपत्नीयते। अत्र पुंवद्भावो नेति न्यासकारः। यदाह नित्यंसपत्न्यादिष्वित्यत्र समुदायोच्चारणं पुंवद्भावबाधनार्थमिति। तदेतद्युक्तिविरुद्धं भाष्यविरुद्धं च। तथाहि। समुदायनिपातनं रूढ्यर्थं समानस्य सभावार्थं चेति न त्वदुक्तार्थज्ञापकम्। तथा तसिलादिष्विति सूत्रे भाष्यकारः। सपत्नीशब्दाच्छिवाद्यणि भस्याढइति पुंवद्भावे सापत इति प्रापय्य अढग्रहणमपनीय अनपत्यइति विवक्षया परित्यज्य गार्ग्यायण्या अपत्ये तु कुत्सिते गोत्रस्त्रियाः कुत्सनेणचेति णप्रत्यये गार्ग्यायण इति स्यात्।

गार्ग्य इति चेष्यतइति दोषमुद्भाव्य भस्याढइति यथान्यासं स्थापयित्वा नित्यंसपत्न्यादिष्विति समुदायनिपातनं परिहारत्वेनानभिधाय शत्रुपर्यायात्सपत्नशब्दात् शार्ङ्गरवादिङीनन्तात् शिवाद्यणिति सापत्नशब्दं साधितवान्। शिवादिषु समानः पतिर्यस्या इति व्युत्पादितस्य समानस्वामिकाभिधायिनो भाषितपुंस्कस्य केवलयौगिकत्वाद्ग्रहणं नेष्टमिति तदाशयः। एवं स्थिते तस्माल्लिङ्गविशिष्टपरिभाषया पत्युत्तरपदलक्षणे ण्ये सापत्य इति भवति। भावकर्मणोः पत्यन्तलक्षणे यकि सापत्यमिति सुब्धातुवृत्तौ माधवः। तस्मात्क्यङ्यपि प्रकृतिभेदेन सपत्नायते सपतीयतइति द्वयमपि साधु। यत्तु पा रक्षणइति धातौ माधवेनोक्तम्। भावकर्मणोः पत्यन्तलक्षणे यकि सापत्न्यम्। अभाषितपुंस्कत्वात्पुंवद्भावो नेत्यादि। तन्तु विवाहजन्यसंस्कारविशेषनिमित्तकं पतिशब्दमाश्रित्य। इतरन्तु स्वामित्वमात्रपरमित्यविरोधः। एवं च शिवादौ नित्यस्त्रीलिङ्गस्यापि योगरूढस्य ग्रहणात्सापत्नशब्दोद्व्यर्थः। सपत्नीयतइति च तृतीयमपि रूपं साध्वित्यवधेयम्। युवतिरिवाचरति युवायते। यन्तु ङ्याप्प्रातिपदिकेत्युदाहरणात् यौवनं जातिः। अन्यथा जातेश्चेति निषेधाभावात्तसिलादिष्विति पुंवद्भावः क्रियेतेति। तन्न। वयसो अनित्यत्वेन अजातित्वात्। कथमन्यथा अचः परस्मिन्निति सूत्रे युवजानिरिति भाष्यं सङ्गच्छेत। युवतितरेति तु भाष्यनिर्देशादेव न पुंवदिति कैयटे स्पष्टम्। पट्वी च मृद्वी च पट्वीमृद्व्यौ। ते इवाचरति पट्वीमृद्वयते। पूर्वपदस्य क्यङ्परत्वाभावान्न पुंवत्। पाचिकायते। नकोपधायाः। चतुर्थीयते। संज्ञापूरण्योश्च। स्त्रौघ्नीयते। वृद्धिनिमित्तस्यचतद्धितस्यारक्तविकारे। कापायायते कन्था। रक्तार्थत्वान्नेह पुंव-

ञ्यावन्निपेधः । खदिरस्य विकारः खादिरी । पलाशादिभ्योवेति विकारे अणञोरन्यतरस्मिन् ङीप् । खादिरायते इत्यादि । आचारेऽवगल्भक्लीवहोडेभ्यः किब्वा ॥ क्यङ्पवादोयम् । पक्षे वाग्रहणात्क्यङपि । गल्भ धाष्टर्ये । क्लीबृ अधाष्टर्ये । होडृ अनादरे । एते पचाद्यजन्ताः । अचो ऽकारस्य इहैव वार्तिके अनुदात्तत्वानुनासिकत्वे प्रतिज्ञायेते । तेन क्विबन्तादात्मनेपदं भविष्यति । क्विप्सन्नियोगेनानुनासिकत्वप्रतिज्ञानात्क्यङ्पक्षे इत्संज्ञा न भवति । स्यादेतत् । उक्तधातूनामनुदात्तेत्त्वादवगल्भते क्लीबते होडते इति सिद्धम् । तेभ्य एव पचाद्यजन्तेभ्यः क्यङि अवगल्भायतइत्यादि । न च अवगल्भतइत्यादीनां धाष्टर्यादिकर्मवार्थः स्यान्न त्वाचार इति वाच्यम् । धातूनामनेकार्थत्वेनाचारार्थतायाअपि लाभात् । तत्किमनेन वार्तिकेनेति चेन्न सत्यम् । अवगल्भाञ्चक्रे क्लीबाञ्चक्रे होडाञ्चक्रइत्यत्र प्रत्ययान्तत्वादाम् यथा स्यादित्येवमर्थमिदं वार्तिकम् । अवगल्भेति किम् । अनुपसर्गादुपसर्गान्तरविशिष्टाच्च क्यङ्लुव यथा स्यात् । गल्भायाञ्चक्रे इति माधवादयः । प्रक्रियायां तु अवेत्यपहाय केवलस्य पाठः । तदनुगामिप्रसादादिग्रन्थश्च प्रामादिक एव । धातुभ्य एव लिटि तु जगल्भे चिक्लीबे । जुहोडे । सर्वेभ्यःप्रातिपदिकेभ्यः ॥ न केवलमवगल्भादिभ्य एव किन्तु सर्वेभ्य एव आचारे किब्वक्तव्य इत्यर्थः । पूर्ववार्तिकन्तु अनुबन्धासंगार्थं स्थितमेव । प्रातिपदिकग्रहणादिह सुप इति न सम्बध्यते । तेन पदत्वाभावादुदाहरणेषु पदकार्याणि न । कृष्ण इवाचरति कृष्णति । अतोगुणइति शपा सह पररूपम् । एतेन चर्मेवाचरति चर्मतीति प्रक्रियाग्रन्थः परास्तः । अपदान्तत्वेन नलोपायोगात् । कथमन्यथा इहैव शपा सह पररूपं स्यादिति य-

त्किञ्चिदेतत्। इह द्वितीयवार्तिके वाग्रहणं नानुवर्त्यम्।प्रातिपदिकविषयकेणानेन क्विपा सुबन्तविषयस्य क्यङो भिन्नविषयत्वादेव बाधस्याप्रसङ्गाद्वचनद्वयप्रामाण्याद्विकल्पोपपत्तेश्च। पूर्ववार्तिकेपि एतत्सिद्धक्विबनुवादेनानुबन्धासङ्गमात्रे तात्पर्यस्य भाष्ये स्थितत्वेन प्रादिपदिकविषयता वाशब्दवैयर्थ्यं चेति तत्त्वम्। तस्य सुबन्तविषयत्वे हि अन्तर्वर्त्तिविभक्त्या पदत्वात् गल्भतेः संयोगान्तलोपो दुर्वारः। अथ क्विबन्तेषु रूपाणि लेशत उदाह्रियन्ते। अ इवाचरति। अति। अतः। अन्ति। णलि अचोञ्णितीति वृद्धौ आतऔणलः। औ। तथा च कशब्दस्य चकाविति हरदत्तः। माधवस्तु ण्यल्लोपाविति वचनाण्णलि वृद्धिं बाधित्वा अतोलोपाच्चकेत्युदाजहार। तन्मतेपि अशब्दस्य औ। अतुः। उः। सर्वत्रात्र द्विर्वचने अतोलोपादंतरङ्गत्वादतोगुणे पररूपत्वे तस्याङ्गग्रहणेन प्राप्तादतोलोपात्परत्वादभ्यासग्रहणेन ग्रहणादतआदेरिति दीर्घः। आतोलोपइटिचेत्यालोपः किति। णलस्तु औ वृद्धिः। स्यादेतत्। इह प्रत्ययान्तत्वादामा भाव्यम्। न च कास्यनेकाज्ग्रहणमिति वार्तिकेन प्रत्ययग्रहणस्थानेनेकाज्ग्रहणस्य कृतत्वात्प्रत्ययान्तेभ्योप्येकाज्भ्य आम्नेति वाच्यम्। चुलुम्पादीनामप्रत्ययान्तानां संग्रहार्थमनेकाज्ग्रहणमधिकं कर्तव्यमित्येतावन्मात्रपरतयापि वार्तिकस्य कृतार्थत्वे सौत्रस्य प्रत्ययग्रहणस्यापनयने कारणाभावात्। अत एव वार्तिककृता चुलुंपाद्यर्थमित्युक्तं न त्वेकाज्निवृत्त्यर्थमिति। अत एवावगल्भाञ्चक्रइत्यादि भाष्याद्युदाहृतं सङ्गच्छते। न हि तत्रानेकाच्त्वमस्ति। आत्मनेपदार्थमनुबन्धासङ्गस्य निर्विवादत्वात्। अत एव स्वामास स्वाञ्चकारेति प्रक्रियाकारोदाहृतं निर्बाधमिति चेत्। मैवम्। हरदत्तादिग्रन्थेषु कशब्दादशब्दाद्वागादिभ्यश्चाचारक्विबन्तेभ्य

एकाज्भ्योपि प्रत्ययान्तत्वादाम् स्यात् । चुलुंपादिभ्यश्च न स्यात् । अतोव्याप्त्यतिव्याप्तिपरिहाराय प्रत्ययग्रहणमपनीय तत्स्थाने अनेकाज्ग्रहणं कर्त्तव्यमित्यर्थकतया वार्तिकस्य व्याख्यातत्वात् । माधवादिभिरपि तदनुसारेणैव रूपाणामुदाहृतत्वाच्च । युक्तं चैतत् । कास्यनेकाज्ग्रहणमिति वार्तिकाक्षरस्वरसात् । अन्यथा हि अनेकाच उपसंख्यानमित्येव ब्रूयात् । न तु प्रत्ययशब्दावरुद्धकास्युत्तरभागमनेकाचं निवेशयेत् । आगन्तूनामन्ते निवेशस्य न्याय्यत्वात् । चुलुंपाद्यर्थमिति वार्तिकशेषस्वरसो माप्यनुकूलोस्तीति चेन्न । तदपेक्षया उपक्रमस्य प्राबल्यात् । न चैवं गल्भादावाम् न स्यादिति वाच्यम् । तेषां क्विप्सन्नियोगेन एकाच्त्वेपि पूर्वमनेकाच्त्वात् । कास्यनेकाच इत्यत्र भूतपूर्वगतेराश्रयणात् । आचारेवगल्भेत्यादिवार्तिकस्यैव च भूतपूर्वगत्याश्रयणे प्रमाणत्वात् । तद्धि आम्प्रत्ययो यथा स्यादित्येवमर्थमिति भाष्यादौ स्पष्टम् । इह ज्ञापकस्य सामान्यविषयत्वे घटपटप्रभृतिभ्यस्तत्करोतिण्यन्तेभ्यः क्विप्चेति क्वौ तत आचारक्वौ लिटि आमा भाव्यम् । गल्भादिविशेषमात्रविषयत्वे तु नेत्यन्यदेतत् । इदं त्ववशिष्यते । सर्वप्रातिपदिकेभ्य इति क्विपि परस्मैपदे प्राप्ते आत्मनेपदप्रवृत्त्या चरितार्थं वचनं कथमाम्प्रवृत्तिं साधयेदिति । अत्रोत्तरम् । वाक्याभ्यनुज्ञानार्थं कृतस्यापि इच्छासनि वाग्रहणस्य पूर्वसूत्रद्वये व्यवस्थापकत्वमाश्रित्य गुपादेर्निन्दाक्षमादिष्वेव सन्नान्यत्रेति यथा सिद्धान्ततं तथेहापि तद्बलेनैव सर्वप्रातिपदिकेभ्य इति क्विप् गल्भादेर्न करिष्यते इति परस्मैपदनिवृत्तिस्तावत्सिद्धा । आत्मनेपदमपि स्वतन्त्रधातुभ्यो ऽस्त्येव । आचारार्थताप्यनेकार्थत्वात्सुलभा । तथा च वचनस्य नान्यत्र चरितार्थतेति ज्ञापकत्वं सुस्थमेव ।

एवं च सकलमहाग्रन्थविरुद्धं स्वामासेति प्रक्रियोदाहरणं न श्रद्धेयमिति स्थितम् । इणो अयतेर्वा णिजन्तात्क्विवप्चेति क्विवप् आययतीत्याः । आयमाचक्षाण आः स इवाचरति आति । यमरमेतादसकौ । आसीत् । आसिष्टाम् । एकादेशस्य पूर्वान्तत्वाल्लिङ्गविशिष्टपरिभाषया च मालेषाचरति मालाति । अमालासीत् । अमालासिष्टाम् । अस्माल्लङि अमालात् अमालाः । अत्र हल्ङ्यादिलोपस्तु न भवति । ङीसाहचर्यादापोपि सोरेव लोपविधानात् । कविरिव कवयति । कवयाञ्चकार । आशीर्लिङि कवीयात् । सिचिवृद्धिरित्यत्र ऋतइद्धातोरित्यतो धातोरित्यनुवृत्तेर्धातुरेव यो धातुरिति विज्ञानान्नामधातोर्न वृद्धिरिति कैयटहरदत्तौ । तन्मते गुणे अकवयीत् । वर्धमानोप्येवम् । माधवस्तु इक्परिभाषारम्भपक्षे धात्वनुवृत्तेः कैयटेन प्रदर्शितत्वादिगन्ते नामधातावपि वृद्धिमिच्छति । तन्मते अकवायीत् । विरिव वयति । विवाय । विव्यतुः । अवयीत् । अवायीत् । इरिव अयति । इयाय । इयतुः । इयुः । इयेथ । इयथुः । इय । इयाय । इयिव । इयिम । अत्र कित्सु सर्वणदीर्घे कृते इयङ् । यद्वा । दीर्घात्परत्वेनोत्तरखण्डे एरनेकाच इति यण् । गुणवृद्धिविषये तु अयायोर्द्वैवचनेचीति स्थानिवत्त्वात् । एदैतोर्द्वित्वमभ्यासह्रस्वः । अभ्यासस्यासवर्णइतीयङ् । एदैतोरपि स्थानिवत्त्वादिकारस्य द्वित्वमिति पक्षे तु सवर्णदीर्घात्परत्वादुत्तरखण्डस्य पुनर्गुणवृद्धी । ततोभ्यासस्येयङ् । लक्ष्मीरिव लक्ष्मयति । लक्ष्मयाञ्चकार । श्रीरिव श्रयति । शिश्राय । शिश्रियतुः । शिश्रियुः । उरिव । अवति । अवाञ्चकार । इजादेश्चेत्याम् । कुरिव कवति । चुकाव । भ्रुरिव भ्रवति । बुभ्राव । बुभ्रुवतुः । अचिश्नुधात्वित्युवङ् । गुणवृद्धिविषये तु ताभ्यां

ध्यते । पितेव पितरति । पितराञ्चकार । आशीर्लिङि रिङ्शयग्लिङ्क्षिवति रिङादेशः । पित्रियात् । नेव नरति । ननार । एवाचरति अरति । पाघ्रेत्यादौ नायं गृह्यते । अभिव्यक्तपदार्था ये इति न्यायेन धातुपाठस्थस्यैव ग्रहात् । एवञ्चास्मादृशब्दाल्लिटि ऋच्छत्यृतामिति न प्रवर्तते । तत्र धात्वभ्यासयोः सवर्णदीर्घे धातुग्रहणेन ग्रहणादृकारान्तलक्षणे गुणे अरतुरित्यादीत्येके । अन्येतु अभ्यासग्रहणेन ग्रहणादुरदत्वं हलादिः शेषः । अतआदेरिति दीर्घः । आतोलोपइटीत्यालोपः । अतुः । उरिति प्रत्ययमात्रमवशिष्यतइत्याहुः । द्रुरिवाचरति द्रवति । अनभिव्यक्तपदार्थत्वेन णिश्रिद्रुस्रुभ्य इति चङ्गोभावात्सिचि अद्रावीत् । भूरिवाचरति भवति । अत्र गातिस्थेति न प्रवर्तते । अभावीत् । अभाविष्टाम् । अभाविषुः । बुभावेत्यादि । एवं पिबतेर्विचि पाः । ततः क्विपि पाघ्राध्मेति गातिस्थेति च न प्रवर्त्तते । पाति । अपासीत् । एवं प्रतिपदोक्तानामन्येषामपि इहाप्रवृत्तिरुन्नेया । कथं तर्हि बुभ्रुवतुरिति प्रागुक्तुदाहृत इति चेत् । धातुत्वप्रयुक्तोसौ न तु भ्रुत्वप्रयुक्त इत्यवधेहि । पूरिवाचरति । परति । पपार । पपरतुरित्यादि । अयं पृशब्दानुकरणं धात्वन्तरं न पुनः ऋयादौ जुहोत्यादौ वा पठ्यमान इति श्ना श्लुश्च न भवति । किति लिटि ऋच्छत्यृतामिति ऋकारान्तलक्षणो गुणः । शृदृप्रामिति ह्रस्वविकल्पस्तु न भवति । अनभिव्यक्तपदार्थत्वात् । ऋरिवाचरति । अरति । अराञ्चकार । इजादेश्चेत्याम् । लृवाचरति । अलति । लिटि द्वित्वचनम् । लृवर्णस्य दीर्घाभावात्सवर्णदीर्घाभावः । उत्तरखण्डस्य यणि अभ्यासस्योरदत्वादेव । आल । आलतुरित्यादीति माधवः । तत्र यणीति किद्विषयं पित्सु तु गुणवृद्धी बोध्ये ।

सवर्णदीर्घाभाव इति तु गुणवृद्धिस्थले भवतु नाम । अवर्णस्य ऌकारं प्रत्यसवर्णत्वात् । गुणवृद्ध्योः स्थानिवद्भावेन ऌकारद्वित्वेनापि सवर्णदीर्घात्परत्वेन पुनरुत्तरखण्डे गुणादिप्रवृत्तेः। न चान्तरङ्गत्वात्सवर्णदीर्घः। अभ्यासस्यासवर्णइत्यस्य निर्विषयतापत्तेः। न च इयर्ति इयृत इत्यादिरवकाशः। एवं ह्यभ्यासस्य र्त्तावित्येव ब्रूयात् । न च एषेरियेष । ओणेरुवोणेत्यवकाशः । भाषायामिजादेरित्याम्प्रत्ययस्योचितत्वात् । छन्दसि तु तन्त्रादीनामुपसंख्यानात् त्रियम्बकं सुवर्ग इत्यादिवदियङुवङोरुपपत्तेस्तथापि ऌवर्णस्य दीर्घाभावादिति माधवोपन्यस्तो हेतुरसङ्गत एव।होतृकार इत्यादाविव ऋकारस्य दुर्वारत्वात्। तथा च ऋशब्दात्क्विपीव एकादेशस्य धातुग्रहणेनाभ्यासग्रहणेन वा ग्रहणमिति मतभेदेन । अरतुः । अरुः । अतुः । उरिति रूपद्वयमेवोचितम् । ऌतिलृवेति षाष्ठवार्तिकविधेयस्य वर्णान्तरस्य प्रवृत्तौ तु ऌअतुः ऌउरित्युचितम् । सर्वथापि अलतुः अलुरिति माधवोदाहृतं दुरुपपादमेवेति विभाव्यतां भाष्यज्ञैः । हेरिवाचरति हयति । जिहाय । अहयीत । यान्तत्वान्न वृद्धिः । एरिवाचरति अयति । इजादेरित्याम् । अयाञ्चकार । नेटीति वृद्धिनिषेधान्मा भवानयीत् । गौरिवाचरति गवति । अपदान्तत्वादवङ्पूर्वरूपे न स्तः । जुगाव । अगवीत् । अगावीत् । अतोहलादेरिति वा वृद्धिः । ओकारात् । अवति । अवाञ्चकार । मा भवानवीत् । रै । रायति । रिराय । नौ । नावति । नुनाव । औ । आवति । आवाञ्चकार । गोधुगिवाचरति गोदोहति । पयइवाचरति पयति । पयाय । लुङि यान्तत्वाद्वृद्ध्यभावात् अययीदिति माधवः। अत्रेदं वक्तव्यम् । अयपयहयधातुषु क्विप्चेति क्विपि अत् पत् हत् इति तावत्त्वयैवोदाहृतम् ।

आचारक्विपि तु अकृत्वान्तुगागमो मा भूत्। यकारस्तु कथं न लुप्येत। तस्मात्कशब्दवदेवात्र रूपमुचितम्। द्यौरिवाचरति देवतीति माधवः। अत्र ऊठि द्यवतीत्युचितम्। फलेर्णौ क्विप्चेति क्विप्। तत आचारक्विप्। फलति। यङ्लुकि पम्फल्यते। अपम्फालीत्। एकदेशविकृतस्यानन्यत्वादभ्यासस्य नुगिति चरफलोश्चेति सूत्रे न्यासविस्तरौ। यद्यपि प्रतिपदोपात्तेष्वभिव्यक्तपदार्थानामेव ग्रहणं तथापि उत्परस्यात इति सूत्रे अत इति तपरनिर्देशेन दीर्घनिवृत्त्यर्थं क्रियमाणेन इहास्यापि ग्रहणं ज्ञाप्यतइति तदाशयः। इदमिवाचरति इदामति। यङ्वि याङति। अणिव आणति। राजेव राजानति। अनुनासिकस्य क्वीति दीर्घः। यन्तु कश्चिज्ज्ञलादिः कृङ्धिद्धातोरेव सम्भवतीति तत्साहचर्याद्धातुविहत एव क्विप् गृह्यतइति आचारक्वौ नानेन दीर्घ इत्याह। तन्न। अस्य क्विपः ककारस्यात्रैव सामान्यग्रहणार्थत्वात्। पकारस्य च तदविघातार्थत्वात्साहचर्यस्य च सर्वत्रानियामकतायाः द्विस्त्रिश्चतुरितिकृत्वोर्थग्रहणेन ज्ञापितत्वात्। एतेन इह क्विपि अनुबन्धयोः फलं चिन्त्यमिति वदन्न्यासकारः प्रत्युक्त इति दिक्। एवं च पथिमथ्यृभुक्षां परमप्युपधागुणं बाधित्वान्तरङ्गत्वादीर्घे सति पथीनाति मथीनाति ऋभुक्षीणतीत्यादि बोध्यम्। इदं च माधवादिमतमनुसृत्यानुनासिकान्तानां दीर्घः प्रपञ्चितः। अपरं मतं कृत्येव दीर्घो न त्वाचारक्विपि साहचर्यस्य नियामकत्वेनापि क्वचिदाश्रयणात्। न चैवमनुबन्धवैयर्थ्यम्। वेरपृक्तस्येत्यत्रास्यैव ग्रहणं मा भूदिति ककारासङ्गात्। पित्त्वसामर्थ्यात्तु प्रकृतिः सर्वानुदात्तेति केषाञ्चिन्मतस्य न्यासग्रन्थे स्पष्टत्वात्। युक्तं चैतत्। कौमारव्याकरणसंवादात्। तत्र हि क्यङ एव वैकल्पिको लोपो विहितो न तु क्विपः। तत्र

च क्विबाश्रयस्य दीर्घस्याप्रसङ्गात्। गुणे सति पथेनति मथेनतीत्याद्युदाहृतम्। न्यायसाम्येन च्छोःशूडित्यत्रापि अस्य क्विपोऽग्रहणात्। द्यौरिवाचरति देवतीत्यपि माधवोदाहृतमस्मिन्पक्षे निर्वहति। वलोपस्य भाष्ये प्रत्याख्यानात्। अत एव पदमञ्जर्यां बहुषु पुस्तकेषु राजनतीति ह्रस्वपाठः सङ्गच्छते। अत एव च नपदान्तसूत्रे प्रतिदीन्व इत्यत्रोपधायां चेति दीर्घ इति काशिकापि सङ्गच्छते। आचारक्विबन्ताद्विच् प्रत्यय इति तदाशयात्। चर्मेवाचरति चर्मतीति प्रक्रिया तु अत्रापि पक्षे अशुद्धैव। नलोपपररूपयोः पदान्तापदान्तत्वप्रयुक्तयोः समावेशस्य दुर्घटत्वादिति दिक्। अप्रसिद्धा ये हलन्तास्तेषां कारितणौ कृते टिलोपे च णिलोपे च तद्धलन्तत्वमुह्यताम्॥ मठं मखं कफं रथं चाचक्षाणः कुर्वन् वा मठ्। मख्। कफ्। रथ्। स इवाचरति। मठति। मखति। कफति। रथतीत्यादिक्रमेण यथालक्षणमप्रयुक्तेप्यूह्यमित्यर्थः। प्रकृतमनुसरामः॥

भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः॥ अत्राच्वेरित्येकवचनं भृशाद्यवयवापेक्षं सौत्रो वा वचनव्यत्ययः। पर्युदासात्सदृशग्रहः। अभूततद्भावविषयेभ्यो भृशादिभ्यो भवत्यर्थे क्यङ् स्यात्। हलन्तानां त्वेषां लोपोपि स्यात्। अभृशो भृशो भवति भृशायते। चशब्दोन्वाचये न तु सन्नियोगे। अजन्तानां गणे पाठस्य वैयर्थ्यापत्तेः। अच्वेरिति यदि प्रसज्यप्रतिषेधः स्यात्तर्हि असमर्थसमासो वाक्यभेदश्च स्पष्ट एव। किंच भवतियोगे च्वेर्विधानादनुप्रयुज्यमाने न भवति नैव उक्तार्थत्वात्क्यङ्गे ऽप्रसक्तौ निषेधवैयर्थ्यम्। अतः पर्युदास एवोचितः। तथा च नञिवयुक्तन्यायेन सादृश्यलाभादभूततद्भावविषयेभ्य इत्युक्तं, तेनेह न। क्व दिवा भृशा भवन्ति। ये रात्रौ भृशा नक्षत्रादयः ते दिवा

क्षप्रदेशे भवन्तीत्यर्थः । इह सुमनस् उन्मनस् दुर्मनस् अभिमनस् इति पठ्यते । तत्र शंक्यते । समासात्क्यङि विशिष्टस्य धातुत्वाद्दल्यबद्विर्वचनेषु दोषः । तथाहि । स्वमनायत । उदमनायतेत्यादीष्यते । असुमनायत । औन्मनायतेत्यादि प्राप्नोति । तथा सुमनाय्येत्यादौ ल्यबिष्टः । सु उद् इत्यादीनां क्त्वान्तशरीरप्रवेशे तु तद्व्यतिरिक्तपदाभावादसति समासे ल्यपो ऽभावात्सुमनायित्वेत्यादि प्राप्नोति । तथा क्यङन्तात्सानि सनन्तस्य प्रथमस्यैकाचो द्वित्वे सुसुमनायिषते इत्यादि प्राप्नोति । सुमिमनायिषतइत्यादीष्यते । अत्राहुः । चुरादिषु संग्राम युद्धइति पठ्यते स न पाठ्यः । संग्रामशब्दाद्युद्धवाचिनः तत्करोतीत्येव णिचः सिद्धेरिति तत्पाठो नियमार्थः । धातुसंज्ञानिमित्तः प्रत्ययः सोपसर्गाच्चेद्भवति संग्राम्यतेरेव नान्यस्मादिति । ज्ञापनार्थो वा सोपसर्गात्संघाताद्धातुसंज्ञानिमित्ते प्रत्यये विधित्सिते उपसर्गाः पृथक् क्रियन्ते । परिशिष्टादेव तु प्रत्यय इति । संग्रामशब्दो हि चुरादौ पठ्यमानः सोपसर्गः संघातएव न तूपसर्गसदृशावयवम् आप्लृव्याप्ताविवच्छब्दान्तरम् । तथा च वापदान्तस्येति परसवर्णविकल्पो भवति । संघातपाठफलं तु असंग्रामयत शूरः । संग्रामयित्वा । सिसंग्रामयिषतइत्यादि । ततश्चोक्तरीत्या नियमो ज्ञापनं वा निष्कृष्टं फलमिति । अत्र हरदत्तः । अनुदात्तेदयं संग्रामयतिरिष्यते । ततश्च आत्मनेपदार्थं गल्भत्यादीनामिवानुबन्धासङ्गार्थः पाठः स्यादिति कथं नियमो ज्ञापकं वा भवेदिति । न चानुबन्धासञ्जनार्थे पाठे ग्राम युद्धइत्येव पठ्येत । संशब्दस्तु द्योतकः प्रयोगदर्शनवशादेव लभ्यते । यथा इङ्कोरधिः । तस्माद्विशिष्टपाठः प्रागुक्तफलक एवेति वाच्यम् । एवं हि यथा इङ्कोरधेः पूर्वमाङ् न भवति तथास्यापि न स्यादिति । अत्र माधवः ।

अस्यानुदात्तेत्त्वमपाणिनीयमिति पाठस्यैतदर्थतया न ज्ञापकभङ्ग इति। एतच्च संग्रामयतिरनुदात्तेद्धोद्धव्य इति कैयटेन विरुध्यते। यदपि हरदत्तेन सिद्धान्तितं मनःशब्दस्य स्वादिभिर्न समासः किन्त्वसमस्ता एवैते प्रत्ययार्थविशेषणम्। मनःशब्दश्च वृत्तिविषये तद्वति वर्त्तते। मनस्वी सुष्ठु भवतीत्यादिरर्थ इति, तदपि प्रभौपरिवृढ इत्यत्र परिवृढमाचष्टे इति णिचि क्त्वाप्रत्यये कृते परिवृढय्येति ल्यब् भवतीति भाष्यकारादिभिर्वक्ष्यमाणेन विरोधात्परास्तमेव। नह्यत्रैव तत्रापि प्रत्ययार्थविशेषणत्वं सम्भवति। कथं तर्हीह इष्टार्थसिद्धिरिति चेत्। अत्रोच्यते। चुरादौ पठ्यमानं संग्रामेत्येतत्प्रातिपदिकम्। अर्तिस्तुसुहुसृधृक्षिक्षरिभ्य इति मन्नधिकारे ग्रसेरा चेति व्युत्पादनात्। न तु धातुः। तस्य च तत्करोतीति पूर्वप्रक्रान्तेन गणसूत्रेण णिचि सिद्धे तत्सन्नियोगे अनुबन्धासङ्ग एव फलं गल्भादिवत्। एवं स्थिते युद्धे योयं ग्रामशब्द इत्युक्तेपि केवलस्य ग्रामशब्दस्य युद्धे वृत्त्यभावात्सामर्थ्यात्संग्रामशब्दो लभ्यतएव। तत्र च संग्रामीति विशिष्टस्य धातुत्वमपि सुलभम्। सनाद्यन्ता इति सूत्रेण विधीयमानायाः संज्ञायाः प्रकृतिप्रत्ययसंघाते विश्रान्तेः। एतेन इङ्कोः प्रतिबन्दिः परास्तः। तत्र हि पाठापेक्षा धातुसंज्ञा विशिष्टं न स्पृशतीति वैषम्यात्। एवं च संग्रामेति विशिष्टपाठो ज्ञापयति उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजकीभूते प्रत्यये चिकीर्षिते पृथक् क्रियतइति। तच्चाजहत्स्वार्थायां वृत्तौ स्वोत्तरभागेन धातुसंज्ञानिमित्तप्रत्ययप्रकृतिभूतेन समानार्थकमिति तद्घटितविशिष्टार्थेनापि क्त्वान्तेनसह समर्थत्वात्कुगतीति सूत्रेण प्रादिग्रहणात्समस्यतइति परिवृढय्येत्यादिसिद्धिः। अवजिगल्भिषते। अवागल्भत। अवगल्भ्येत्यादावपीयमेव गतिः। न चैवमुस्योपाङ्क्त्वाट इति पाठ्यवार्तिकेन औढी-

यदिति तद्भाष्येण च सह विरोधः। ज्ञापकस्य सजातीयविषयतया श्रूयमाणे पूर्वपदे प्रवृत्तिः न त्वादेशेनापहृते इति स्वीकारात्। अत्र च भाष्यवार्तिकधातुवृत्त्यादिग्रन्था अनुकूला इति गुणगृह्यैर्विभाव्यताम्। एवं च प्रमाणयित्वा विचारयित्वेत्यादयः केषां चित्प्रयोगाः प्रामादिका एव। अत एव प्रशस्यमाचष्टे श्रापयति। ज्यापयतीति श्रज्यावुदाहरन्तः सुधाकरादयः श्रपयति जपयतीत्युदाहरन्तः शाकटायनादयश्च प्रक्रियारत्ने निराकृताः। प्रशब्दस्य पृथक्करणेन शस्यशब्दादेव णिजुत्पत्त्या श्रज्ययोरप्राप्तेः। अत एव माधवादिभिः प्रशस्ययतीत्येव स्वीकृतम्। एतेन प्रावृषमारूयत् अपप्रावत्। वीरुधमारूयत् अविवीरादित्याद्युदाहरन्तो धातुचन्द्रोदयकारादयः परास्ताः। संग्रामयतेः पाठेन ज्ञापितस्यार्थस्य उस्योमाङ्क्ष्वाट इति षाष्ठभाष्यवार्तिकबलेन अनित्यताज्ञापनमाश्रित्य कथं चिद्वा समर्थनीया इति दिक्। भृशादयस्तु श्लोकगणपाठानुरोधेन माधवीये उदाहृताः। तद्यथा। भृशायते। चपलायते। मन्दायते। पण्डितायते। रेहायते। रेहशब्दो रहसि निर्घृणत्वे भिक्षाभिलाषस्य च निवृत्तौ वर्त्तत इति गणवृत्तिः। तृपायते। तृपश्चन्द्रः समुद्रश्च। वेहायते। वेहद्भोपघातिनी। अधरायते। अधरो मूर्खः पुष्करश्चेति गणवृत्तिः। ओजायते। वर्चायते। ओजोवर्चःशब्दौ वृत्तिविषये तद्वति वर्त्तेते। रेफायत्ते। रेफःसरोष इतिगणवृत्तौ। दुर्मनायते। सुमनायते। उन्मनायते। उत्सुकायते। शश्वायते। बृहायते। तान्तावेतौ। सुबामंत्रितइत्यत्र मनस्युपसर्गस्य पराङ्गवद्भाव उपसंख्येयः। तेन सुमनायतइत्यादौ तिङ्ङतिङ इति निघातो न भवति, देवदत्तः सुमनायतइत्यादौ सोपसर्गस्य निघातश्च भवतीति प्रकृतसूत्रस्थभाष्यपर्यालोचनया लभ्यते। अमी श्लोका गणपाठस्था भृशादयः। गणवृत्तौ तु बृ-

हच्छब्दो न पठ्यते। भद्रशब्दस्तु पठ्यते। कंधरशब्दश्च त्वचोभ्यन्तरे स्थूलतंत्वाभा असंयुक्ता स्नायुः कंधरा। तद्वान्कंधरः। मत्वर्थे अर्शआदिभ्योच्॥

लोहितादिडाज्भ्यःक्यष्॥ लोहितादिभ्यो डाजंताच्च भवत्यर्थे क्यष् स्यात्। वा क्यषः। लोहितायति। लोहितायते। अत्र अच्वेरित्यनुवृत्या अभूततद्भावविषयत्वं लभ्यते। तच्च डाचो न विशेषणम्। असम्भवात्। अलोहितो लोहितो भवतीति विग्रहः। पटपटायति। पटपटायते। कृभ्वस्तियोगं विनापि क्यषो डाजन्ताद्विधानसामर्थ्यादेवेह डाच्। भवत्यर्थे विधीयमानेन क्यषा उक्तार्थस्य भवतेरिह प्रयोगायोगात्। अत्र वार्तिकम्। लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणीति॥ आदिशब्दप्रत्याख्यानपरमेतत्। लोहितशब्दात्परत्र पठ्यमानानि नीलहरितमंद्रफेनदासमन्द इत्येतानि षट् भृशादिषु द्रष्टव्यानीत्यर्थः। क्यषः ककारषकारावपि प्रत्याख्यातौ। तथाहि। ककारो गुणवृद्धिनिषेधार्थो नेति स्पष्टमेव। अप्रसक्तस्य प्रतिषेधायोगात्। नापि नःक्यङ्इति सामान्यग्रहणार्थः। नान्तादविधानात्। नापि आपत्यस्यच तद्धितेनाति क्यच्व्योश्चेति। आपत्यादविधानात्। नापि क्याच्छन्दसीति। याछन्दसीत्येव सुवचत्वात्। युक्तं चैतत्। शकुनम्भुरण्युमिति। कंड्वादियगन्तादपि दर्शनात्। नापि लोहितायतइत्यत्र अकृत्सार्वेति दीर्घप्रवृत्यर्थः। तत्र कृङितीत्यस्याननुवृत्तेः। न चानुवृतिरावश्यकी उरुयाधृष्णुयेत्येवमर्थमिति चेन्न। इह हि तृतीयास्थाने सुपां सुलुगिति यादेशः। स च छान्दसः। तत्र च ह्रस्वोपि छान्दस एव भविष्यति। उपगायन्तु सापत्नयो गार्भिणय इतिवत्। नापि क्यस्यविभाषेत्यत्र सामान्यग्रहणार्थः। हल इत्यनुवृत्तेः। नह्ययं हलन्तादस्ति। न च पाक्यष

इति विशेषणार्थः । वायादित्येव सूत्रणात् । न चैवं पाशादिभ्यो यः पाश्या अत्र प्रसङ्गः । सामान्यविहितानां तिङां नियमार्थं हि तत्प्रकरणम् । न च पाशादियान्तात्तिङः सन्ति । न ह्याचारक्विबन्तात्सन्तीति चेन्न । टापा व्यवधानात् । पूर्वस्मादपि विधौ एकादेशस्य स्थानिवद्भावात् । न च दण्ड्यवध्यादिशब्देभ्य आचारक्विबन्तेभ्यो ऽतिप्रसङ्गः शंक्यः । तत्र दण्डादिभ्य इति सूत्रेण यदेव विधीयते । शीर्षच्छेदाद्यच्चेति पूर्वसूत्राद्यदनुवृत्तेः । न तु यप्रत्यय इति पञ्चमे वक्ष्यमाणत्वात् । अत एव षकारोपि व्यर्थः । स हि वाक्यष इत्यत्र विशेषणार्थः । क्याच्छन्दसि क्यस्यविभाषेत्यादौ सामान्यग्रहणाविघातार्थो वेति फलं सम्भाव्यते । तच्च सर्वं दूषितमेव । तस्मादादिशब्दं कषौ च हित्वा लोहितडाज्भ्यो य इति भाष्ये स्थापितम् । यदि तु सभायायः सभ्यः । स इवाचरतीत्यादेराचारक्विबन्तस्याभिधानमस्ति । तर्हि वायष इति सूत्र्यतां, षकारमात्रं वास्तु । अवशिष्टं तु व्यर्थमेव । वृत्तिकारस्तु वार्तिकस्यार्थमन्यथा मन्यते । तद्यथा । न किलानेनादिग्रहणं प्रत्याख्यायते । किन्तु यानि पठितानि नीलादीनि षट् तेषामेव इतोपकृष्य भृशादिषु निवेश उच्यते । अपठितानां तु क्यषेव, तानि चाकृतिगणत्वाल्लभ्यन्ते । आकृतिगणत्वे ज्ञापकं तु नः क्यइति सामान्यग्रहणार्थः क्यषः ककारः तदविघातार्थः षकारश्च, न हि पठ्यमानेषु लोहितादिषु नान्तः कश्चिदस्ति तानि चाकृतिगणसिद्धानि गणवृत्तिकारः सञ्जग्राह । लोहितश्यामदुःखानि हर्षगर्वसुखानि च । मूर्छानिद्राकृपाधूमाः करुणा नित्यचर्मणीति । निद्राकरुणादयः वृत्तिविषये तद्वति वर्तन्ते । निद्रायति निद्रायतइत्यादि । तदेतत्सर्वं भाष्यविरुद्धत्वादुपेक्ष्यम् । किञ्च लोहितडाज्भ्य इति वदतो वार्तिककारस्यापि आदिश-

न्दप्रत्याख्यानमभिप्रेतमिति स्पष्टं लभ्यते। अन्यथा हि लोहितादित्येव ब्रूयात्। अत एव विद्वस्यमान इत्यत्र लोहितादिडाभ्यः क्यषिति कल्पतरुग्रन्थो वृत्तिकाररीत्या सम्भवन्नपि भाष्यविरुद्धत्वात्प्रौढिवादमात्रमिति क्यङ्विधाववोचाम। स्यादेतत्। क्यष् चेति सूत्रमस्तु चात्क्यङ्। तत्र क्यष्पक्षे परस्मैपदम्। क्यङ्पक्षे त्वात्मनेपदमिति वाक्यष इति सूत्रं मास्त्विति चेत्। मैवम्। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति लोहिनीशब्दात् क्यषि लोहिनीयति लोहिनीयत इति रूपद्वयमिष्यते। क्यङि तु क्यङ्मानिनोश्चेति पुंवद्भावे सति लोहितायतइति स्यादिति फले भेदात्॥

कष्टाय क्रमणे॥ कष्टं कृच्छ्रम्। कृच्छ्रगहनयोःकष इति कृच्छ्र इडभावः। तेन च तत्करणं पापं कर्म लक्ष्यते। क्रमणमुत्साहः, वृतिसर्गतायनेष्विति सूत्रे हि सर्ग उत्साह इत्युक्तम्। तदयमर्थः। चतुर्थ्यन्तात्कष्टशब्दादुत्साहेर्थे क्यङ् स्यात्। कष्टाय क्रमते। कष्टायते। पापं कर्म कर्तुमुत्सहतइत्यर्थः। सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यम्॥ कण्वं पापम्। सत्रादयो वृत्तिविषये पापपर्यायाः। तेभ्यो द्वितीयान्तेभ्यः चिकीर्षायां क्यङ्। पापं चिकीर्षतीत्यस्वपदेन विग्रहः। सत्रायते। कक्षायते। कष्टायते। कृच्छ्रायते। गहनायते॥

कर्मणो रोमन्थतपोभ्यां वर्तिचरोः॥ कर्मण इति पञ्चमी रोमन्थतपोभ्यामित्यनेन सामानाधिकरण्यात्। प्रत्येकं सम्बन्धात्त्वेकवचनम्। वर्तीति ण्यन्ताद्वृतेः ण्यासश्रन्थोयुजिति युचि प्राप्ते अत एव निपातनात् क्तिन्। चरतेः सम्पदादित्वाद्भावे किप्। रोमन्थतपोभ्यां कर्मभ्यां यथासंख्यं वर्तिचरोरर्थयोः क्य-

क् स्यात् । रोमन्थं वर्तयति रोमन्थायते । हनुचलनइति वक्तव्यम् ॥ हनुचलनेनात्र चर्वितस्य मुखप्रदेशे आकृष्य चर्वणं लक्ष्यते । नेह । कीटो रोमन्थं वर्तयति । अपानप्रदेशाग्निःसृतं द्रव्यम् । कीटो वर्तुलं करोतीत्यर्थ इति न्यासकारहरदत्तौ । अपानप्रदेशाग्निःसृतमश्नातीत्यर्थ इति तु कैयटो व्याख्यत् । तपस्यति, इह तक् प्राप्तः । तस्मात्तपसः परस्मैपदं चेति वक्तव्यम् । एवं च नमोवरिवइत्यादि सूत्रएव तपःशब्दः पठितुमुचितः । तथा तु न कृतमित्येव ॥

बाष्पोष्मभ्यामुद्वमने ॥ कर्मणः क्याङिति वर्तते । बाष्पमुद्वमति बाष्पायते । उष्माणमुद्वमति । उष्मायते । फेनाच्चेति वक्तव्यम् ॥ फेनायते ॥

शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ॥ एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् स्यात् । शब्दं करोति शब्दायते । एवं वैरायते । कलहायते । अभ्रायते । कण्वायते । मेघायते । तत्करोतीति णीचि प्राप्ते ऽयमारम्भः । पक्षे णिजपीष्यते । शब्दयतीति । तदर्थं मण्डूकप्लुत्या भृशादिभ्योभुवीति सूत्राच्चकारोत्रानुवर्ततइति न्यासकारः । अत्र वार्तिकम् । सुदिनदुर्दिनाभ्याञ्च ॥ सुदिनायते । दुर्दिनायते । नीहाराच्च ॥ नीहारायते । अटाट्टाशीकाकोटापोटासोटाप्रुष्टाप्लुष्टाग्रहणं कर्तव्यम् ॥ पोटा स्त्रीपुंसलक्षणा । अतोन्ये क्रियावचना इति सुध्यातुवृत्तौ माधवः । अट गतौ । अटतीत्यटा । अचि टाप् तां करोति अटायते । अट्टअतिक्रमहिंसयोः । गुरोश्चहल इत्यकारः । अट्टा तां करोति अट्टायते । शीकृ सेचने तालव्यादिः । दन्त्यादिरिति तु धनपालकाश्यपौ । गुरोश्चेत्यकारः शीका तां करोति शीकायते इति तद्धातुव्याख्यायां माधवः । कुट कौटिल्ये तुदादिः हेतुमण्णिच् । कुट प्रतापने

आकुस्मीयः । कोटयति कोटयते वा कोटां तां करोति कोटायते । पोटोक्ता पोटायते । सोटेति पाठे धात्वर्थोन्वेषणीयः । मोटेति पाठे तु मुट सञ्चूर्णने चुरादिः प्रदर्शने भ्वादिः । प्रदर्शनाक्षेपयोस्तुदादौ मोटयतीति मोटा मोटायते । प्रुष प्लुष दाहे । कर्मणि क्तः प्रुष्टा प्लुष्टा तां करोति प्रुष्टायते प्लुष्टायते । उज्ज्वलदत्तस्तु अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्निति सूत्रे प्रुष्वः स्यादृतुसूर्ययोः । प्रुष्वा जलकणिकेति रत्नमतिः प्रुष स्नेहनादाविति धातुः प्रुष्वायते इत्युदाहरन् इह वार्तिके प्रुष्वेति पाठमुपन्यस्तवान् ॥

सुखादिभ्यः कर्तृवेदनायाम् ॥ कर्तृ इति पृथक्पदं लुप्तषष्ठीकम् । वेदना ज्ञानम् । विद चेतनाख्यानिवासेष्वित्यस्माच्चुरादिण्यन्तात् भावे ण्यासश्रन्थो युच् । घँदिवन्दिविदिभ्यश्चेति औपसङ्ख्यानिको वा । कर्तृत्वं च श्रुतवेदनक्रियापेक्षम् । तदयमर्थः । वेदनक्रियायाः कर्तुराधेयभावेन सम्बन्धिभ्यः सुखादिभ्यः कर्मभ्यो वेदनायामर्थे क्यङ् स्यात् । सुखं वेदयते सुखायते । कर्तृग्रहणं किम् । सुखं वेदयते प्रसाधको राज्ञः । अयं वेदिः आकुस्मीयः । एवं च वेदयतीति केषां चित्परस्मैपदपाठः प्रामादिकः । अत्र श्लोकगणकारः । सुखदुःखगहनकृच्छ्राः तृप्तालीकप्रतीपकरुणाश्च । कृपणः सोढ इतीमे सुखादयो दश गणे पठिताः ॥ सोढं सहनमभिभवो वा । गणरत्नमहोदधौ तु आस्रशब्दोपीह पठ्यते ॥

नमोवरिवश्चित्रङः क्यच् ॥ करणग्रहणमनुवृत्तं अभिधानशक्तिस्वाभाव्यात् । इह क्रियाविशेषपरम् । तेन नमसः पूजायां वरिवसः परिचर्यायां चित्रङ आश्चर्ये क्यच् स्यात् । नमस्यति देवान् । नमस्कारेण पूजयतीत्यर्थः । वरिवस्यति गुरून् । शुश्रू-

षतंइत्यर्थः । चित्रीयते । विस्मयतइत्यर्थः विस्मापयतइत्यन्ये । तथा च मायामृगं प्रकृत्य भट्टिराह । ततश्चित्रीयमाणोसाविति । अत्र चित्रङो ङित्करणादचयवे कृतं लिङ्गं समुदायस्य विशेषकं भवतीति वाच्यम् । तथा सति क्यङन्तादात्मनेपदम् । न चैवं शब्दवैरादिसूत्रे चित्रशब्दोपि पठ्यतां क्यङैव तङ् भविष्यतीति वाच्यम् । तथा सति हि क्यचिचेति इत्वं न स्यात् । तस्मात्क्यजेव कार्यो ङित्त्वं च ॥

पुच्छभाण्डचीवराण्णिङ् ॥ करणइत्यनुवृत्तेः क्रियाविशेषे पुच्छादुदसने व्यसने पर्यसने च । उदसनमुत्क्षेपणं व्यसनं विविधं विरुद्धं वोत्क्षेपणं पर्यसनं परितः क्षेपणम् । उत्पुच्छयते । विपुच्छयते । परिपुच्छयते । भाण्डात्समाचयने । समाचयनं राशीकरणम् । सम्भाण्डयते । भाण्डानि समाचिनोतीत्यर्थः । चीवराद्र्जने परिधाने वा । संचीवरयते भिक्षुः । चीवराण्यर्जयति परिधत्ते वेत्यर्थः । णिङो णकारः सामान्यग्रहणार्थः । न तु वृद्ध्यर्थः । असम्भवात् । ङकारस्तदविघातार्थः आत्मनेपदार्थश्च । अत एव पुच्छादय उत्तरसूत्रे न निवेशिताः ॥

मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् ॥ एभ्यो दशभ्यः कृञर्थे णिच् स्यात् । मुण्डं करोति मुण्डयति । मिश्रयति । श्लक्ष्णयति । लवणयति । व्रताद्भोजने तन्निवृत्तौ च ॥ पयः शूद्रान्नं वा व्रतयति । वस्त्रात्समाच्छादने ॥ संवस्त्रयति । इह भोजनतन्निवृत्ती व्रतशब्दस्यार्थौ । समाच्छादनं तु वस्त्रशब्दस्य । प्रत्ययस्तु कृञर्थे । श्रूयते च भोजने व्रतशब्दः । यदस्य पयो व्रतं भवति । आत्मानमेव तद्व्रयति त्रिव्रतो वै मनुरासीत् । द्विव्रता असुराः । एकव्रता देवा इति । पस्पशायां च । शक्यञ्चानेन श्वमांसादीन्यपि व्रतयितुमिति । अयमेव व्रतशब्दो दर्शादिवद्वि-

परीतलक्षणया तन्निवृत्तौ वर्तते । संवस्त्रयति प्रावारमित्यत्र प्रावारमाच्छादयतीत्यर्थ इति माधवः । हलादिभ्यस्त्रिभ्यो ग्रहणे प्रत्ययः । हलिं गृह्णाति हलयति । कलिं गृह्णाति कलयति । कृतं गृह्णाति कृतयति । तूस्तानि विहन्ति वितूस्तयति। तूस्तं केश इति श्रीभद्रः । जटीभूताः केशा इति न्यासः । पापामिति वैजयन्ती । स्यादेतत् । प्रातिपदिकाद्धात्वर्थे इत्येव सर्वमिदं सिद्धम् । न च तत्करोतीत्यादिना तत्र धात्वर्थनियमः । राजानमतिक्रान्तवान् अत्यरराजदित्यादेरपीष्टत्वात् तत्किं मुण्डादिसूत्रेणेति चेत् । अत्राहुः । मुण्डयति माणवकं मिश्रयत्यन्नं श्लक्ष्णयति वस्त्रं लवणयति व्यञ्जनमिति सापेक्षेभ्योपि णिजर्थमिदम् । हलिकल्योस्त्वत्वनिपातार्थम्।तथा च वार्तिकम्।हलिकल्योरदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थमिति । तथाहि। हलि इ कलिं इ इति स्थिते अचोञ्णितीति वृद्धिः प्राप्नोति णाविष्ठवदिति टिलोपश्च । तत्र लोपः शब्दान्तरप्राप्त्या अनित्यः । वृद्धिस्तु टिलोपे सत्यप्राप्तेः । उभयोरनित्ययोः परत्वाद्वृद्धौ कृतायां ऐकारस्य आयादेशात्पूर्वमेव परत्वात् वार्णादाङ्गस्य बलीयस्त्वाच्च लोपेनाग्लोप्ययम्भवतीति सन्वल्लघुनीतिसन्वद्भावः स्यात् । दीर्घोरीति दीर्घश्च । न च टिलोपस्य अचः परस्मिन्नितिस्थानिवद्भावात्तेन व्यवधानाच्च दोष इति वाच्यम् । चङ्परे णौ यदङ्गं तस्य योभ्यासो लघुपरः तस्य सन्वत् लघोर्दीर्घश्चेति हरदत्तादिभिः पुरस्कृते कैयटेनैकीयमततयोपन्यस्ते व्याख्याने स्थानिवद्भावस्याकिञ्चित्करत्वात् । चङ्परे णौ यल्लघु तत्र परतो योभ्यासः तस्येति भाष्यकैयटमतेपि अभ्यासस्य टिलोपाद्यनन्तरं जातत्वेन आदिष्टादचः पूर्वत्वेन स्थानिवत्त्वाप्रसङ्गात् । अत्वनिपातने तु यद्यपि परत्वाद्वृद्धिस्तथापि अगेव लुप्यतइति सन्वद्भावदीर्घौ न भवतः ।

एवं च बलिपटुप्रभृतिभ्यो णिचि अबीबलत् अपीपटदिति भवति न त्ववबलदपपटदिति । स्यादेतत् । णौचङीत्यत्रत्यभाष्येण सहैतद्विरुध्यते । तत्र हि वृद्धेर्लोपो बलीयानिति स्थितम् । युक्तं चैतत्, शब्दान्तरप्राप्तौ सत्यामपि कृताकृतप्रसङ्गित्वमात्रेण क्व चिल्लित्यत्वाभ्युपगमात् । यदाह । भुवोवुकोनित्यत्वादित्वादीति । ज्ञापकं चात्र नाग्लोपिशासिति सूत्रे अगिति प्रत्याहारग्रहणम् । तथाहि । अवर्णान्तेष्ववर्णोपधेषु ऋवर्णान्तेषु च वृद्धावप्यवर्ण एव लुप्यते । तत्र अलोपिनां नेत्येव वाच्यम् । इवर्णोवर्णान्तयोस्तु वृद्धौ कृतायामौकारौ लुप्यते न त्वक् । न च स्वामिनमाख्यत् असस्वामत् । गोमिनमाख्यत् अजुगोमत् । मादुराख्यत् अपप्रादत् । यादृशमाख्यत् अययादत् । तादृशमाख्यत् । अततादादित्यादौ यत्र वृद्धेरप्रसंगादिको लोपस्तत्र ह्रस्वनिवृत्तये अग्ग्रहणमिति वाच्यम् । अनभिधानात्तत्र णिच एवानुत्पत्तेः । एतच्च भाष्यकारेण ज्ञापकत्वस्य समर्थनादवसीयते । न चैवमपि स्राग्विणमाख्यदसस्रजदित्यत्र विमन्तोर्लुकि उपधाया वृद्धौ ह्रस्वनिवृत्त्यर्थं अग्लोपग्रहणं स्यात् अस्ति ह्यत्राभिधानम् । टेरित्यत्र भाष्ये स्रजयतीत्युदाहरणादिति वाच्यम् । एवमपि स्रजयतीत्यत्र वृद्ध्यभावस्य सिद्धान्तसम्मतत्वेन टेरित्यत्र भाष्यकारेण स्रजयतीति निर्देशादङ्गवृत्तइति परिभाषया वा वृद्धेरप्रसङ्गेन ह्रस्वभाविन्या उपधाया एव अभावात् । अतः प्रत्याहारग्रहणे ज्ञापकं वृद्धेः पूर्वं टिलोप इति । तत्कथमिहोच्यते वृद्धौ सत्यां टिलोप इतीति चेत् । अत्र माधवः । परत्वाद्वृद्धिरिति मुख्यः पक्षः । वृद्धेर्लोपो बलीयानिति तु प्रौढिवादमात्रमित्येकं मतम् । तद्विपरीतं मतान्तरम् । भाष्यद्वयप्रामाण्याद् वृद्धेः पूर्वं पश्चाद्वा कामचारेण टिलोप इति अपपटत् अपीप-

टदिति रूपद्वयमपि साध्विति चापरं मतमिति मतत्रयमपि सुब्धातुवृत्तावुपनिबद्धवान्। तत्राद्यं मतं हरदत्तस्य द्वितीयं कैयटस्य तृतीयं त्वन्येषामिति विवेकः। एतद्बलाबलचिन्ता तु करिष्यते। अयं च भेदो णिभिन्नाविषयः णेर्णीचि तु ण्यल्लोपाविति विप्रतिषेधान्निष्कर्षरीत्या ऽपवादत्वाद्वा प्रागेव णिलोपः। उपधाह्रस्वत्वे सन्वद्भावदीर्घयोश्च णेर्णीचीत्युपसंख्यानाण्ण्याकृतिनिर्देशाद्वा अवीवददित्येव रूपमिति सप्तमे वक्ष्यामः। प्रकृतमनुसरामः। मुण्डादिसूत्रे केषां चिद्ग्रहणं प्रपञ्चार्थं मुण्डादयः सर्वेऽपि सत्यापपाशेत्यत्रैव पठितुं युक्ताः। एवं हि एकवाक्यता लभ्यते। द्विर्णिद्ग्रहणं च न कर्तव्यमिति लाघवम्। तथा तु न कृतमित्येव॥

धातोरेकाचो हलादेः क्रियासमभिहारे यङ्॥ एकाच् हलादिः समभिह्रियमाणक्रियावृत्तिर्यो धातुः तस्मात्स्वार्थे यङ् स्यात् समभिहारोऽत्र पौनःपुन्यं भृशार्थो वा। यद्यपि विप्रकीर्णानां एकत्र राशीकरणं समभिहारशब्दस्य मुख्योर्थः। तथाप्यसौ धान्यादीनामेव सम्भवति। न तु धातुवाच्यायाः क्रियायाः। अमूर्तत्वात्। अतो गौणोर्थो गृह्यते। स च न प्रत्ययस्य वाच्यः। प्रकृत्यर्थं प्रति विशेष्यतापत्तेः किन्तु द्योत्योर्थः। अत एव टाबादयस्तरबादयश्च स्वार्थिका एवेति निरूढः पन्थाः। यदा तु प्रकृत्यर्थप्राधान्यमौत्सर्गिकं आख्यात इव टाबादिष्वपि त्यज्यते तदा टाबादयो वाचका इत्यपि पक्षः सम्भवत्येव। स्वीकृतश्चायं लिङ्गादिविधौ भाष्येपीति तत्रतत्र स्फुटम्। पुनः पुनरतिशयेन वा पच्यति पापच्यते। दीर्घोकित इति दीर्घः। देदीप्यते। गुणो यङ्लुकोरिति गुणः। ननु क्रियासमभिहारे चेति वार्तिकेन नित्यवीप्सयोरिति वा पदद्विर्वचनमिह कुतो नेति

चेन्न । यङैव क्रियासमभिहारस्य द्योतितत्वात् । न चैवं लुनीहिलुनीहीत्यत्रापि न स्यादिति वाच्यम् । केवलेन लोटा तुल्यरूपो हि क्रियासमभिहारे लोट्समभिहारं द्योतयितुं सहायतया द्वित्वमपेक्षते। अन्यथा संशयापत्तेः । यङ् तु न तथेतिवैषम्यात् । धातोरिति किम् । आर्धधातुकत्वं यथा स्यात् । तेन ब्रुवोवचिरित्यादि सिध्यति । एकाचः किम् । पुनःपुनर्जागर्ति । हलादेः किम् । भृशमीक्षते । यङो ङित्वं वोभूयते मरीमृज्यतइत्यादौ गुणवृद्धिनिषेधार्थम् । न चैवमवयवे चरितार्थस्य समुदाये प्रत्यविशेषकत्वात् यङन्तादात्मनेपदं न स्यादिति वाच्यम् । ङिदन्ताद्धातोस्तदिति अनुदात्तङित इति सूत्रएव प्रपञ्चितत्वात् । भृशं शोभते भृशं रोचते इत्यत्रानभिधानाद्यङ् नेति भाष्यम् । कथं तर्हि रुच दीप्तौ शुभ शोभायामिति धातू व्याचक्षाणैः धातुवृत्तिकारैः रोच्यते शोशुभ्यते इत्युदाहृतमिति चेत् । भाष्ये भृशार्थोपादानात् पौनःपुन्ये भवत्येवेत्याशयेनेत्याहुः । शोभतइति शब्विकरणस्योदाहरणात्तौदादिकस्य चङ् भवत्येवेति धातुचन्द्रोदये सूचिसूत्रिमूत्र्यत्यर्त्यशूर्णु ग्रहणम् । सूच पैशून्ये । सूत्र अवमोचने । मूत्र प्रस्रवणे चुरादिण्यन्ताः । अट गतौ । ऋगतौ । अश भोजने अशू व्याप्तौ । द्वयोरपि ग्रहणम् । अल आद्यानां त्रयाणां अनेकाल्त्वात् ततोन्येषां अहलादित्वात्, ऊर्णोतेस्तु अनेकाल्त्वादहलादित्वाच्चाप्राप्तौ वचनम् । तत्र ऊर्णोतेर्वक्ष्यमाणेन णुवद्भावेनापि सिद्धम् । सोसूच्यते । सोसूत्र्यते । सूचिसूत्री अदन्तौ चुरादिणिच् अतोलोपः । यङ् णिलोपः द्वित्वं हलादिः शेषः । अभ्यासस्य गुणः । अभ्यासात्परस्प षत्वं तु न भवति । अनादेशत्वात् । न चेमौ षोपदेशौ । अदन्तत्वेनानेकाच्त्वात् । षोपदेशलक्षणे हि सेक्सृबादिपर्युदासात् तत्सादृश्यं एकाच्त्वं वि

क्षितमिति निष्कर्षः। सोमूच्यते सोमूच्यतइति भाष्योदाहरणं चात्र प्रमाणम्। षोपदेशलक्षणे एकाच्त्वं विशेषणं देयमिति वदतो माधवस्याप्ययमेवाशयः। सोमूच्यते। अटाट्यते। अजादेर्द्वितीयस्येति ट्यशब्दस्य द्वित्वं सन्यङोरिति षष्ठीति वक्ष्यमाणत्वात्। अर्ण्यते। गुणोर्तिसंयोगाद्योर्यङ्चेति गुणः। र्यशब्दस्य द्वित्वम्। न च नन्द्राःसंयोगादय इति रेफस्य द्वित्वनिषेधः। पकारपरस्य नायं निषेध इति षष्ठे वृत्तिकारोक्तेः। न चैतद्प्रामाणिकम्। प्रकृतसूत्रस्थस्य अर्ण्यतइति भाष्यस्यैव तत्र प्रमाणत्वात्। अशाश्यते। ऊर्णोनूयते। ऊर्णुञ् आच्छादने। नोपधोयम्। तस्याष्टमिकं णत्वम्। तस्यासिद्धत्वान्नुशब्दस्य द्वित्वं पूर्वत्रासिद्धीयमद्विर्वचनइत्यनित्यम्। उभौसाभ्यासस्येति लिङ्गात्। स्यादेतत्। लुनीहिलुनीहीत्येवायं लुनाति। अत्र यङ्ग लोट् बाध्येत। अन्तरङ्गो हि यङ् क्रियासमभिहारमात्रापेक्षत्वात्। लोट् तु बहिरङ्गः क्रियाभेदाश्रये धातुसम्बधे भावकर्मकर्तृषु विधानात्। तथा लोट् सावकाशोपि कथं? अनेकाचि अजादौ च। जागृहिजागृहीत्येवायं जागर्ति ईक्षस्वेक्षस्वेत्येवायमीक्षते। अत्राहुः। वेत्यनुवर्तते। यदा न यङ् तदा लोट् भविष्यति॥

नित्यं कौटिल्ये गतौ॥ गतौ वर्तमानाद्धातोः कौटिल्ये एव द्योत्ये यङ् स्यात् न तु क्रियासमभिहारे। क्रमु पादविक्षेपे इत्य गतौ। चंक्रम्यते। दन्द्रम्यते। अवधारणार्थान्नित्यग्रहणान्नेह भृशं क्रामति। ननु यथा वडवायां वृषे वाच्ये इत्यनेन अपत्ये प्राप्तस्ततोपकृष्य विधीयते। यथा वा क्रीतः क्तो भूते प्राप्तः ततोपकृष्य वर्त्तमाने विधीयते। एवमत्रापि धातुमात्रात् क्रियासमभिहारे यङ् विहितो गतिवचनात्तु कौटिल्यइति तक्रकौण्डिन्यन्यायेनैव बाधः सिद्धः। सत्यम्। अत एव नित्यग्रहणं भाष्यवा-

र्तिकयोः प्रत्याख्यातम् ॥

लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् ॥ एभ्यो यङ् स्यात् धात्वर्थगर्हायां द्योत्यायाम्। लुप्लृच्छेदने । षद विशरणादौ । यस्तु आङः सदिः पद्यर्थे इति चौरादिको ण्यन्तः स इह न गृह्यते एकाच इत्यनुवृत्तेरिति हरदत्तस्तच्चिन्त्यम् । प्रकृतिग्रहणे ण्यधिकस्याप्राप्तेः । अन्यथा लुपादेरपि हेतुण्ण्यन्तस्य वारणीयतया सदेरेवोपन्यासे बीजाभावाच्च । चर गतौ । जप व्यक्तायां वाचि । जभी गात्रविनामे । दह भस्मीकरणे । अत एव दशेति निपातनात् यङ्लुकि नलोपः । दन्दशीति । गॄ निगरणे, तुदादिः । गृ शब्दे क्र्यादिः । तत्र अदन्तविकरणसाहचर्यात्तुदादेरेव ग्रहणमित्येके । द्वयोरपीत्यन्ये । गार्हितं लुम्पति लोलुप्यते । सासद्यते । चञ्चूर्यते । चरफलोश्चेति नुक् । उत्परस्यातः । हलिचेति दीर्घः । जञ्जप्यते । जञ्जभ्यते । दन्दह्यते । दन्दश्यते । जपादीनां चतुर्णामभ्यासस्य जपजभदहदशभञ्जपशाञ्चेति नुक् । निजेगिल्यते । ऋतइद्धातोः रपरत्वं द्विर्वचनम्। अभ्यासस्य गुणः । जेगिर् य इति स्थिते ग्रोयङीति ल्वत्वम् । न च परत्वाद्धलिचेति दीर्घः । तस्यासिद्धत्वात् । ल्वे कृते तु विहतनिमित्तत्वादीर्घः । भावेति किम् । साधनगर्हायां मा भूत् । मन्त्रं जपति वृषलः । अत्र स्वरवर्णादिभ्रंशाभावादगर्हा नास्ति । कर्त्राख्यं साधनं तु गार्हितं शूद्रस्य वेदे अनधिकृतत्वात् । नित्यग्रहणमवधारणार्थमिहानुवर्तते । तस्य व्याख्यानं प्रत्याख्यानं च पूर्ववत् ॥

सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ॥ एभ्यो णिच् स्यात्। सत्यादिभ्यश्चूर्णान्तेभ्यः प्रातिपदिकाद्धात्वर्थे इत्येव सिद्धे सत्यस्यापुगर्थं वचनम् । अन्येषां

आकुस्मीयः। कोटयति कोटयते वा कोटां करोति कोटायते। पोटोक्का पोटायते। सोटेति पाठे धात्वर्थोन्वेषणीयः। मोटेति पाठे तु मुट सञ्चूर्णने चुरादिः प्रदर्शने भ्वादिः। प्रदर्शनाक्षेपयोस्तुदादौ मोटयतीति मोटा मोटायते। प्रुष प्लुष दाहे। कर्मणि क्तः प्रुष्टा प्लुष्टा तां करोति प्रुष्टायते प्लुष्टायते। उज्ज्वलदत्तस्तु अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्निति सूत्रे प्रुष्वः स्यादृतुसूर्ययोः। प्रुष्वा जलकणिकेति रत्नमतिः प्रुष स्नेहनादाविति धातुः प्रुष्वायते इत्युदाहरन् इह वार्तिके प्रुष्वेति पाठमुपन्यस्तवान्॥

सुखादिभ्यः कर्तृवेदनायाम्॥ कर्तृ इति पृथक्पदं लुप्तषष्ठीकम्। वेदना ज्ञानम्। विद चेतनाख्यानिवासेष्वित्यस्माच्चुरादिण्यन्तात् भावे ण्यासश्रन्थो युच्। छदिवन्दिविदिभ्यश्चेति औपसङ्ख्यानिको वा। कर्तृत्वं च श्रुतवेदनक्रियापेक्षम्। तदयमर्थः। वेदनक्रियायाः कर्तुराधेयभावेन सम्बन्धिभ्यः सुखादिभ्यः कर्मभ्यो वेदनायामर्थे क्यङ् स्यात्। सुखं वेदयते सुखायते। कर्तृग्रहणं किम्। सुखं वेदयते प्रसाधको राज्ञः। अयं वेदिः आकुस्मीयः। एवं च वेदयतीति केषां चित्परस्मैपदपाठः प्रामादिकः। अत्र श्लोकगणकारः। सुखदुःखगहनकृच्छ्राः तृप्रालीकप्रतीपकरुणाश्च। कृपणः सोढ इतीमे सुखादयो दश गणे पठिताः॥ सोढं सहनमभिभवो वा। गणरत्नमहोदधौ तु आस्रशब्दोपीह पठ्यते॥

नमोवरिवश्चित्रङः क्यच्॥ करणग्रहणमनुवृत्तं अभिधानशक्तिस्वाभाव्यात्। इह क्रियाविशेषपरम्। तेन नमसः पूजायां वरिवसः परिचर्यायां चित्रङ आश्चर्ये क्यच् स्यात्। नमस्यति देवान्। नमस्कारेण पूजयतीत्यर्थः। वरिवस्यति गुरून्। शुश्रू-

षतइत्यर्थः । चित्रीयते । विस्मयतइत्यर्थः विस्माययतइत्यन्ये । तथा च मायामृगं प्रकृत्य भट्टिराह । ततश्चित्रीयमाणोसाविति । अत्र चित्रङो ङित्करणादक्ययवे कृतं लिङ्गं समुदायस्य विशेषकं भवतीति वाच्यम् । तथा सति क्यङन्तादात्मनेपदम् । न चैवं शब्दवैरादिसूत्रे चित्रशब्दोपि पठ्यतां क्यङैव तङ् भविष्यतीति वाच्यम् । तथा सति हि क्यचिचेति इत्वं न स्यात् । तस्मात्क्यजेव कार्यो ङित्त्वं च ॥

पुच्छभाण्डचीवराण्णिङ् ॥ करणइत्यनुवृत्तेः क्रियाविशेषे पुच्छादुदसने व्यसने पर्यसने च । उदसनमुत्क्षेपणं व्यसनं विविधं विरुद्धं वोत्क्षेपणं पर्यसनं परितः क्षेपणम् । उत्पुच्छयते । विपुच्छयते । परिपुच्छयते । भाण्डात्समाचयने । समाचयनं राशीकरणम् । सम्भाण्डयते । भाण्डानि समाचिनोतीत्यर्थः । चीवरादर्जने परिधाने वा । संचीवरयते भिक्षुः । चीवराण्यर्जयति परिधत्ते वेत्यर्थः । णिङो णकारः सामान्यग्रहणार्थः । न तु वृद्ध्यर्थः । असम्भवात् । ङकारस्तदविघातार्थः आत्मनेपदार्थश्च । अत एव पुच्छादय उत्तरसूत्रे न निवेशिताः ॥

मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् ॥ एभ्यो दशभ्यः कृञर्थे णिच् स्यात् । मुण्डं करोति मुण्डयति । मिश्रयति । श्लक्ष्णयति । लवणयति । व्रताद्भोजने तन्निवृत्तौ च ॥ पयः शूद्रान्नं वा व्रतयति । वस्त्रात्समाच्छादने ॥ संवस्त्रयति । इह भोजनतन्निवृत्ती व्रतशब्दस्यार्थौ । समाच्छादनं तु वस्त्रशब्दस्य । प्रत्ययस्तु कृञर्थे । श्रूयते च भोजने व्रतशब्दः । यदस्य पयो व्रतं भवति । आत्मानमेव तद्भर्धयति त्रिव्रतो वै मनुरासीत् । द्विव्रता असुराः । एकव्रता देवा इति । पस्पशायां च । शक्यञ्चानेन श्वमांसादीन्यपि व्रतयितुमिति । अयमेव व्रतशब्दो दर्शादिवद्वि-

परीतलक्षणया तन्निवृत्तौ वर्तते । संवस्त्रयति प्रावारमित्यत्र प्रावारमाच्छादयतीत्यर्थ इति माधवः । हलादिभ्यस्त्रिभ्यो ग्रहणे प्रत्ययः । हलिं गृह्णाति हलयति । कलिं गृह्णाति कलयति । कृतं गृह्णाति कृतयति । तूस्तानि विहन्ति वितूस्तयति। तूस्तं केश इति श्रीभद्रः । जटीभूताः केशा इति न्यासः । पापामिति वैजयन्ती । स्यादेतत् । प्रातिपदिकाद्धात्वर्थे इत्येव सर्वमिदं सिद्धम् । न च तत्करोतीत्यादिना तत्र धात्वर्थानियमः । राजानमतिक्रान्तवान् अत्यरराजदित्यादेरपीष्टत्वात् तत्किं मुण्डादिसूत्रेणेति चेत् । अत्राहुः । मुण्डयति माणवकं मिश्रयत्यन्नं श्लक्ष्णयति वस्त्रं लवणयति व्यञ्जनमिति सापेक्षेभ्योपि णिजर्थमिदम् । हलिकल्योस्त्वत्वनिपातार्थम्।तथा च वार्तिकम्।हलिकल्योरदन्तत्वनिपातनं सन्वद्भावप्रतिषेधार्थमिति । तथाहि। हलि इ कलिं इ इति स्थिते अचोञ्णितीति वृद्धिः प्राप्नोति णाविष्ठवदिति टिलोपश्च । तत्र लोपः शब्दान्तरप्राप्त्या अनित्यः । वृद्धिस्तु टिलोपे सत्यप्राप्तेः । उभयोरनित्ययोः परत्वाद्वृद्धौ कृतायां ऐकारस्य आयादेशात्पूर्वमेव परत्वात् वार्णादाङ्गस्य बलीयस्त्वाच्च लोपेनाग्लोप्ययम्भवतीति सन्वल्लघुनीतिसन्वद्भावः स्यात् । दीर्घोरिति दीर्घश्च । न च टिलोपस्य अचः परस्मिन्निति स्थानिवद्भावात्तेन व्यवधानान्न दोष इति वाच्यम् । चङ्परे णौ यदङ्गं तस्य योभ्यासो लघुपरः तस्य सन्वत् लघोर्दीर्घश्चेति हरदत्तादिभिः पुरस्कृते कैयटेनैकीयमततयोपन्यस्ते व्याख्याने स्थानिवद्भावस्याकिञ्चित्करत्वात् । चङ्परे णौ यल्लघु तत्र परतो योभ्यासः तस्येति भाष्यकैयटमतेपि अभ्यासस्य टिलोपाद्यनन्तरं जातत्वेन आदिष्टादचः पूर्वत्वेन स्थानिवत्त्वाप्रसङ्गात् । अत्वनिपातने तु यद्यपि परत्वाद्वृद्धिस्तथापि अगेव लुप्यतइति सन्वद्भावदीर्घौ न भवतः ।

एवं च बलिपटुप्रभृतिभ्यो णिचि अबीबलत् अपीपटदिति भवति न त्ववबलदपपटदिति । स्यादेतत् । णौचङीत्यत्रत्यभाष्येण सहैतद्विरुध्यते । तत्र हि वृद्धेर्लोपो बलीयानिति स्थितम् । युक्तं चैतत्, शब्दान्तरप्राप्तौ सत्यामपि कृताकृतप्रसङ्गित्वमात्रेण क्व चिन्नित्यत्वाभ्युपगमात् । यदाह । भुवोवुकोनित्यत्वादित्वादीति । ज्ञापकं चात्र नाग्लोपिशासिति सूत्रे अगिति प्रत्याहारग्रहणम् । तथाहि । अवर्णान्तेष्ववर्णोपधेषु ऋवर्णान्तेषु च वृद्धावप्यवर्ण एव लुप्यते । तत्र अलोपिनां नेत्येव वाच्यम् । इवर्णोवर्णान्तयोस्तु वृद्धौ कृतायामौकारौ लुप्यते न त्वक् । न च स्वामिनमाख्यत् असस्वामत् । गोमिनमाख्यत् अजुगोमत् । प्रादुराख्यत् अपप्रादत् । यादृशमाख्यत् अययादत् । तादृशमाख्यत् । अततादादित्यादौ यत्र वृद्धेरप्रसंगादिको लोपस्तत्र ह्रस्वनिवृत्तये अग्ग्रहणमिति वाच्यम् । अनभिधानात्तत्र णिच एवानुत्पत्तेः । एतच्च भाष्यकारेण ज्ञापकत्वस्य समर्थनादवसीयते । न चैवमपि स्राग्विणमाख्यदसस्रजादित्यत्र विमन्तोर्लुकि उपधाया वृद्धौ ह्रस्वनिवृत्त्यर्थं अग्लोपग्रहणं स्यात् अस्ति ह्यत्राभिधानम् । टेरित्यत्र भाष्ये स्रजयतीत्युदाहरणादिति वाच्यम् । एवमपि स्रजयतीत्यत्र वृद्ध्यभावस्य सिद्धान्तसम्मतत्वेन टेरित्यत्र भाष्यकारेण स्रजयतीति निर्देशादङ्गवृत्तइति परिभाषया वा वृद्धेरप्रसङ्गेन ह्रस्वभाविन्या उपधाया एव अभावात् । अतः प्रत्याहारग्रहणे ज्ञापकं वृद्धेः पूर्वं टिलोप इति । तत्कथमिहोच्यते वृद्धौ सत्यां टिलोप इतीति चेत् । अत्र माधवः । परत्वाद्वृद्धिरिति मुख्यः पक्षः । वृद्धेर्लोपो बलीयानिति तु प्रौढिवादमात्रमित्येकं मतम् । तद्विपरीतं मतान्तरम् । भाष्यद्वयप्रामाण्याद् वृद्धेः पूर्वं पश्चाद्वा कामचारेण टिलोप इति अपपटत् अपीप-

टदिति रूपद्वयमपि साध्विति चापरं मतमिति मतत्रयमपि सुब्धातुवृत्तावुपनिबद्धवान्। तत्राद्यं मतं हरदत्तस्य द्वितीयं कैयटस्य तृतीयं त्वन्येषामिति विवेकः। एतद्बलाबलचिन्ता तु करिष्यते। अयं च भेदो णिभिन्नविषयः णेर्णौचि तु प्यल्लोपाविति विप्रतिषेधान्निष्कर्षरीत्या ऽपवादत्वाद्वा प्रागेव णिलोपः। उपधाह्रस्वत्वे सन्वद्भावदीर्घयोश्च णेर्णौचीत्युपसंख्यानाण्ण्याकृतिर्निर्देशाद्वा अवीवदादित्येव रूपमिति सप्तमे वक्ष्यामः। प्रकृतमनुसरामः। मुण्डादिसूत्रे केषां चिद्ग्रहणं प्रपञ्चार्थं मुण्डादयः सर्वेऽपि सत्यापपाशेत्यत्रैव पठितुं युक्ताः। एवं हि एकवाक्यता लभ्यते। द्विर्णिद्ग्रहणं च न कर्तव्यमिति लाघवम्। तथा तु न कृतमित्येव॥

धातोरेकाचो हलादेः क्रियासमभिहारे यङ्॥ एकाच् हलादिः समभिह्रियमाणक्रियावृत्तिर्यो धातुः तस्मात्स्वार्थे यङ् स्यात् समभिहारोऽत्र पौनःपुन्यं भृशार्थो वा। यद्यपि विप्रकीर्णानां एकत्र राशीकरणं समभिहारशब्दस्य मुख्योऽर्थः। तथाप्यसौ धान्यादीनामेव सम्भवति। न तु धातुवाच्यायाः क्रियायाः। अमूर्तत्वात्। अतो गौणोऽर्थो गृह्यते। स च न प्रत्ययस्य वाच्यः। प्रकृत्यर्थं प्रति विशेष्यतापत्तेः किन्तु द्योत्योऽर्थः। अत एव टाबादयस्तरबादयश्च स्वार्थिका एवेति निरूढः पन्थाः। यदा तु प्रकृत्यर्थप्राधान्यमौत्सर्गिकं आख्यात इव टाबादिष्वपि त्यज्यते तदा टाबादयो वाचका इत्यपि पक्षः सम्भवत्येव। स्वीकृतश्चायं लिङ्गादिविधौ भाष्येऽपीति तत्रतत्र स्फुटम्। पुनः पुनरतिशयेन वा पच्यति पापच्यते। दीर्घोकित इति दीर्घः। देदीप्यते। गुणो यङ्लुकोरिति गुणः। ननु क्रियासमभिहारे चेति वार्तिकेन नित्यवीप्सयोरिति वा पदद्विर्वचनमिह कुतो नेति

चेन्न । यङैव क्रियासमभिहारस्य द्योतितत्वात् । न चैवं लुनीहिलुनीहीत्यत्रापि न स्यादिति वाच्यम् । केवलेन लोटा तुल्यरूपो हि क्रियासमभिहारे लोट्समभिहारं द्योतयितुं सहायतया द्वित्वमपेक्षते । अन्यथा संशयापत्तेः । यङ् तु न तथेतिवैषम्यात् । धातोरिति किम् । आर्धधातुकत्वं यथा स्यात् । तेन ब्रुवोवचिरित्यादि सिध्यति । एकाचः किम् । पुनःपुनर्जागर्ति । हलादेः किम् । भृशमीक्षते । यङो ङित्त्वं बोभूयते मरीमृज्यतइत्यादौ गुणवृद्धिनिषेधार्थम् । न चैवमवयवे चरितार्थस्य समुदाये प्रत्यविशेषकत्वात् यङन्तादात्मनेपदं न स्यादिति वाच्यम् । ङिदन्ताद्धातोस्तदिति अनुदात्तङित इति सूत्रएव प्रपञ्चितत्वात् । भृशं शोभते भृशं रोचते इत्यत्रानाभिधानाद्यङ् नेति भाष्यम् । कथं तर्हि रुच दीप्तौ शुभ शोभायामिति धातू व्याचक्षाणैः धातुवृत्तिकारैः रोरुच्यते शोशुभ्यते इत्युदाहृतमिति चेत् । भाष्ये भृशार्थोपादानात् पौनःपुन्ये भवत्येवेत्याशयेनेत्याहुः । शोभतइति शब्विकरणस्योदाहरणाच्चौदादिकस्य चङ् भवत्येवेति धातुचन्द्रोदये सूचिसूत्रिमूत्र्यर्त्यशूर्णु ग्रहणम् । सूच पैशून्ये । सूत्र अवमोचने । मूत्र प्रस्रवणे चुरादिण्यन्ताः । अट गतौ । ऋगतौ । अश भोजने अशू व्याप्तौ । द्वयोरपि ग्रहणम् । अत आद्यानां त्रयाणां अनेकाल्त्वात् ततोन्येषां अहलादित्वात्, ऊर्णोतेस्तु अनेकाल्त्वादहलादित्वाच्चाप्राप्तौ वचनम् । तत्र ऊर्णोतेर्वक्ष्यमाणेन णुवद्भावेनापि सिद्धम् । सोसूच्यते । सोसूत्र्यते । सूचिसूत्री अदन्तौ चुरादिणिच् अतोलोपः । यङ् णिलोपः द्वित्वं हलादिः शेषः । अभ्यासस्य गुणः । अभ्यासात्परस्य षत्वं तु न भवति । अनादेशत्वात् । न चेमौ षोपदेशौ । अदन्तत्वेनानेकाच्त्वात् । षोपदेशलक्षणे हि सेक्सूबादिपर्युदासात् तत्सादृश्यं एकाच्त्वं वि

वक्षितमिति निष्कर्षः। सोसूच्यते सोसूच्यतइति भाष्योदाहरणं चात्र प्रमाणम्। षोपदेशलक्षणे एकाच्त्वं विशेषणं देयमिति वदतो माधवस्याप्ययमेवाशयः। सोसूच्यते। अटाट्यते। अजादेर्द्वितीयस्येति व्यशब्दस्य द्वित्वं सन्यङोरिति षष्ठीति वक्ष्यमाणत्वात्। अर्ण्यते। गुणोर्तिसंयोगाद्योर्यङ्चेति गुणः। र्यशब्दस्य द्वित्वम्। न च नन्द्राःसंयोगादय इति रेफस्य द्वित्वनिषेधः। पकारपरस्य नायं निषेध इति षष्ठे वृत्तिकारोक्तेः। न चैतदप्रामाणिकम्। प्रकृतसूत्रस्थस्य अर्ण्यतइति भाष्यस्यैव तत्र प्रमाणत्वात्। अशाश्यते। ऊर्णोनूयते। ऊर्णुञ् आच्छादने। नोपधोयम्। तस्याष्टमिकं णत्वम्। तस्यासिद्धत्वान्नुशब्दस्य द्वित्वं पूर्वत्रासिद्धीयमद्विर्वचनइत्यनित्यम्। उभौसाभ्यासस्येति लिङ्गात्। स्यादेतत्। लुनीहिलुनीहीत्येवायं लुनाति। अत्र यङ्वा लोड्वाध्येत। अन्तरङ्गो हि यङ् क्रियासमभिहारमात्रापेक्षत्वात्। लोड् तु बहिरङ्गः क्रियाभेदाश्रये धातुसम्बधे भावकर्मकर्तृषु विधानात्। तथा लोड् सावकाशोपि क्व? अनेकाचि अजादौ च। जागृहिजागृहीत्येवायं जागर्ति ईक्षस्वेक्षस्वेत्येवायमीक्षते। अत्राहुः। वेत्यनुवर्तते। यदा न यङ् तदा लोड् भविष्यति॥

नित्यं कौटिल्ये गतौ॥ गतौ वर्तमानाद्धातोः कौटिल्ये एव द्योत्ये यङ् स्यात् न तु क्रियासमभिहारे। क्रमु पादविक्षेपे इत्य गतौ। चंक्रम्यते। दन्द्रम्यते। अवधारणार्थान्नित्यग्रहणान्नेह भृशं क्रामति। ननु यथा वडवाया वृषे वाच्ये इत्यनेन अपत्ये प्राप्तस्ततोपकृष्य विधीयते। यथा वा अीतः क्तो भूते प्राप्तः ततोपकृष्य वर्त्तमाने विधीयते। एवमत्रापि धातुमात्रात् क्रियासमभिहारे यङ् विहितो गतिवचनात्तु कौटिल्यइति तक्रकौण्डिन्यन्यायेनैव बाधः सिद्धः। सत्यम्। अत एव नित्यग्रहणं भाष्यवा-

र्तिकयोः प्रत्याख्यातम् ॥

लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् ॥ एभ्यो यङ् स्यात् धात्वर्थगर्हायां द्योत्यायाम्। लुप्लृच्छेदने । षद विशरणादौ । यस्तु आङः सदिः पद्यर्थे इति चौरादिको ण्यन्तः स इह न गृह्यते एकाच इत्यनुवृत्तेरिति हरदत्तस्तच्चिन्त्यम् । प्रकृतिग्रहणे ण्यधिकस्याप्राप्तेः । अन्यथा लुपादेरपि हेतुण्ण्यन्तस्य वारणीयतया सदेरेवोपन्यासे बीजाभावाच्च । चर गतौ । जप व्यक्तायां वाचि । जभी गात्रविनामे । दह भस्मीकरणे । अत एव दशेति निपातनात् यङ्लुकि नलोपः । दन्दशीति । गृ निगरणे, तुदादिः । गृ शब्दे क्र्यादिः । तत्र अदन्तविकरणसाहचर्यात्तुदादेरेव ग्रहणमित्येके । द्वयोरपीत्यन्ये । गार्हितं लुम्पति लोलुप्यते । सासद्यते । चञ्चूर्यते । चरफलोश्चेति नुक् । उत्परस्यातः । हलिचेति दीर्घः । जञ्जप्यते । जञ्जभ्यते । दन्दह्यते । दन्दश्यते । जपादीनां चतुर्णामभ्यासस्य जपजभदहदशभञ्जपशाञ्चेति नुक् । निजेगिल्यते । ऋतइद्धातोः रपरत्वं द्विर्वचनम् । अभ्यासस्य गुणः । जेगिर् य इति स्थिते ग्रोयङीति लत्वम् । न च परत्वाद्धलिचेति दीर्घः । तस्यासिद्धत्वात् । लत्वे कृते तु विहतनिमित्तत्वादीर्घः । भावेति किम् । साधनगर्हायां मा भूत् । मन्त्रं जपति वृषलः । अत्र स्वरवर्णादिभ्रंशाभावादगर्हा नास्ति । कर्त्राख्यं साधनं तु गार्हितं शूद्रस्य वेदे अनधिकृतत्वात् । नित्यग्रहणमवधारणार्थमिहानुवर्तते । तस्य व्याख्यानं प्रत्याख्यानं च पूर्ववत् ॥

सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ॥ एभ्यो णिच् स्यात्। सत्यादिभ्यश्चूर्णान्तेभ्यः प्रातिपदिकाद्धात्वर्थे इत्येव सिद्धे सत्यस्यापुगर्थं वचनम् । अन्येषां

प्रपञ्चार्थम्। मालिन्या उपश्लोकयतीत्यादौ सापेक्षादुत्पत्त्यर्थं च। धात्वर्थे इत्यविशेषोक्तावपि स्वभावलभ्योर्थविशेषो वृत्तिकारादिभिर्निर्दिश्यते। तद्यथा। सत्यमाचष्टे सत्यापयति। सत्यं करोतीति तु भाष्यम्। अर्थवेदसत्यानामापुग्वक्तव्यः॥ आपुग्वचनसामर्थ्यादिलोपो न। अर्थापयति वेदापयति। पुकैव सिद्धे आकारोच्चारणमन्यतो विधानार्थं तेन लिखापयतीत्यादि सिद्धमिति कश्चित्। तन्न। पुगेव करिष्यतइति भाष्यविरोधात्। तस्मालिखापयतीत्यपप्रयोग एवेत्याहुः। पादौ प्रक्षालापयतीति गृह्यप्रयोगस्तु छन्दोवदृषयः कुर्वन्तीति समाधेय इति हरदत्तादयः। पाशं विमुञ्चति विपाशयति। रूपं पश्यति रूपयति। वीणयोपगायति। उपवीणयति। तूलेनानुकुष्णाति अनुतूलयति तृणाग्रम्। अनुकुष्णाति अनुघट्टयतीत्यर्थ इति हरदत्तः। श्लोकैरुपस्तौति उपश्लोकयति। सेनया अभियाति अभिषेणयति। उपसर्गात्सुनोतीति षत्वम्। अभ्यषेणयत्। माक्सिसादद्व्यवायेपीति षत्वम्। त्वच संवरणे, पुंसिसंज्ञायामिति घः। त्वचं गृह्णाति त्वचयति। टिलोपस्य स्थानिवत्त्वादुपधावृद्धिर्न। उक्तादेव धातोः क्विपि हलन्तात्तत्करोतीति णौ त्वाचयतीत्युपधावृद्धिर्भवत्येव। प्रकृत्यैकाजिति टिलोपाभावः। तस्मात्सूत्रे त्वचेत्यकारो विवक्षितो न तु सत्यापेतिवदुच्चारणार्थ इत्यवधेयम्। वर्मणा सन्नह्यति संवर्मयति। वर्ण गृह्णाति संवर्णयति। चूर्णैरवध्वंसयति अवचूर्णयति। चुरादिभ्यः स्वार्थे। चोरयति। चिन्तयति॥

हेतुमति च॥ हेतुः कर्तुः प्रयोजकः तद्व्यापारः प्रवर्तनारूपो हेतुमान् तस्मिन्वाच्ये धातोर्णिच् स्यात्। पाचयति देवदत्तो यज्ञदत्तेन। यज्ञदत्तनिष्ठविक्लित्त्यनुकूलव्यापारविषयिणी प्रवर्तना

देवदत्ताश्रयेत्यर्थः । प्रवर्तनानेकधा । प्रेषणमध्येषणं तत्समर्थाचरणं चेति । भृत्यादेर्निकृष्टस्य प्रवर्तना प्रेषणम् । आज्ञेत्यर्थः । गुर्वादेराराध्यस्य प्रवर्तना अध्येषणम् । प्रार्थनेत्यर्थः । तत्समर्थाचरणमपि बहुधा अनुमतिरुपदेशोनुग्रह इति । तत्र यस्यानुमतिं विना क्रिया न निष्पद्यते सोनुमतिमात्रे प्रयोजकः । यथा राजादिः । वैद्यादिस्तु ज्वरितः कषायं पिबेदिति उपदेशमात्रेण प्रवर्तकः । यस्तु केन चिज्जिघांसितं पलायमानं रुणद्धि सोपि हन्तुरनुग्राहकत्वात् प्रयोजक एव । तदिह अर्थप्रकरणादिगम्या अमी विशेषाः । सर्वानुगतं प्रवर्तनासामान्यं तु णिचोर्थः । स च णिचः शक्य इति मुख्यः पक्षः । द्योत्य इति पक्षान्तरमप्याकरे स्थितम् । यद्यपि हेतुशब्दस्य ससम्बन्धिकत्वात् हेतुमानित्युक्ते यं प्रति प्रयोजकत्वं स एव लभ्यते । यथा पितृमानित्युक्ते पुत्रः । तादृशश्चेह कर्ता कारकाश्किारे हेतुसंज्ञोक्तेः क्रिया च । तथा च पक्तुः पाकस्य वा हेतुमत्त्वं युक्तम् । तथापि करणे इत्याधिकारात् नेह कर्ता गृह्यते । प्रकृत्यैवोक्तत्वाच्च न पाकः । किन्तु पाकपक्त्रपेक्षया यो हेतुस्तदीयव्यापार एव स्वभावतो लोके णिजर्थतया प्रसिद्धो हेतुमच्छब्देनोच्यतइति सिद्धान्तः । एवं च हेतोरित्येव सूत्रं युक्तम् । हेतोः करणे व्यापारे णिजित्यर्थः । तथा तु न कृतमित्येव । इह यद्यपि फलव्यापारयोर्धातुवाच्यत्वाद्विक्लित्त्यनुकूलव्यापारत्वस्य च प्रेषणादावपि सुलभत्वात्तस्यापि पच्यर्थतामाश्रित्य णिचो द्योतकतेति वर्णितं भाष्यादौ तथापि प्रौढिवादमात्रमेतत् । तथाहि । अधिश्रयणादिरेव व्यापारविशेषः पचेरर्थः । न तु ततः प्राचीनोपि क्रयणाद्यवस्थायां पचतीत्यप्रायोगात् । अन्यथातिप्रसङ्गात् । क्वाचित्कप्रयोगस्य भाक्तत्वेनाप्युपपत्तेश्च । पचतिपाचयत्योरर्थवैलक्षण्यस्य अनुभवसिद्ध-

त्वाच्च। अणौ कर्तुर्णौ कर्मत्वमित्यादिव्यवस्थाभ्युपगमाच्च। प्रणाययति अभिषावयतीत्यादौ उपसर्गस्य प्रकृत्यर्थगतिविशेषद्योतकत्वे णत्वषत्वे स्तः। णिचा सम्बन्धे तु नेत्यष्टमे स्फुटत्वाच्च। अतोत्र पक्षे नातीवाभिनिवेष्टव्यम्। स्यादेतत्। प्रवर्त्तनामात्रस्य णिजर्थत्वे णिचो लोडादीनाञ्च पर्यायप्रसङ्गः। ततश्च पृच्छतु मां भवानिति वक्तव्ये णिजपि प्रयुज्येतेति चेत्। कर्तुः प्रयोजको हि हेतुः प्रैषविषयस्तु नाद्यापि कर्तृत्वेनावधारितः। तथा च प्रयोज्यप्रवृत्त्युपहिता प्रवृत्तिर्णिजर्थः। केवला तु लोडर्थ इति विवेकः। उक्तं च। द्रव्यमात्रस्य तु प्रैषे पृच्छादेर्लोड् विधीयते। साक्रियस्य प्रयोगस्तु यदा स विषयो णिच इति। किञ्च प्रयोक्तृधर्मः प्रयुक्तिर्लोडर्थः। अनियतकर्तृका तु णिजर्थः। पचेति हि वक्तुरेव प्रेरणा गम्यते। पाचयतीत्यत्र तु वक्तुर्भिन्नस्य। तत्करोतीत्युपसंख्यानम्। सूत्रयत्याद्यर्थे। गणपाठसिद्ध एवायमर्थ उपसंख्यानेनापि प्रदर्शितः। इह करोतीत्यत्र प्रकृत्यर्थमात्रं विवक्षितं न प्रत्ययार्थः। तेन ण्यन्तात् भावकर्मणोः भूतभविष्यतोः द्वित्वबहुत्वयोश्च लः सिध्यति। अयं णिच् प्रातिपदिकादेव न तु सुबन्तादिति माधवः। युक्तञ्चैतत्। सुप इत्यधिकारस्येह विच्छिन्नत्वात्। किञ्च चुरादिषु ह्येवं पठ्यते प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च। तत्करोति तदाचष्टे। तेनातिक्रमति। कर्तृकरणाद्धात्वर्थे इति। अस्यार्थः। प्रातिपदिकाद्धातोरर्थविशेषरूपे वाच्ये णिच् स्यात्। इष्ठनीव चास्मिन् बहुलं कार्यं स्यादिति। कूलमूङ्घल्यति उत्कूलयति। अस्यैव प्रपञ्चः तत्करोतीत्यादिः। एवञ्च प्रातिपदिकादित्युपक्रमान्नेदं सुबन्ताद्विधायकम्। तथा च प्रकृतवार्त्तिकमपि तत्समानार्थकत्वात्तथैव। तेनातिक्रामतीत्येतत्तु

कर्तृकरणादित्यस्यैव प्रपञ्चः । कर्तृग्रहणञ्च करणस्यैव विशेषणं करणत्वेन लोके प्रसिद्धानां चक्षुरादीनामेव ग्रहणमिति शङ्काव्युदसनाय । अन्यथा चक्षुषा पश्यति चक्षयतीत्यादावेव स्यान्न तु करिभिरवबध्नाति अवकरयतीत्यादौ । एवञ्च तत्तेनेतिशब्दौ कर्मकरणयोरुपलक्षकौ करणस्य कर्मणश्च समर्पकात्प्रातिपदिकादित्यर्थः । सुबन्तादुत्पत्तौ तु हस्तिनातिक्रामति अतिहस्तयतीत्यादौ णौ सुपो लोपे टिलोपे च कृते अन्तर्वर्त्तिविभक्त्या पदत्वाज्जश्त्वं स्यात् । न च टिलोपस्य स्थानिवत्त्वम् । अञ्झलादेशत्वात् । हरदत्तस्तु सुबन्ताण्णिचमभिप्रैति । यदाह तदिति द्वितीयान्तोपलक्षणमिति । न चास्मिन्पक्षे पदकार्यप्रसङ्गः । इष्टवदित्यतिदिष्टया भसंज्ञया पदत्वस्य बाधात् । अत एव हि पदिष्ठ इत्यादौ सुबन्तादिष्ठनि जश्त्वादिपदकार्याप्रवृत्तिः । किञ्च स्रग्विणमाचष्टे स्रजयतीत्यादौ माधवमतेप्येषैव गतिः । सुबन्तादुत्पन्नयोर्विन्मतोर्लुकि तत्प्रकृतेः सुबन्तत्वात्प्रत्ययलक्षणेन पदकार्यप्रसङ्गस्य स्पष्टत्वात् । तदिह मतभेदेन प्रातिपदिकात्सुबन्ताद्वा णिजिति स्थितम् । आद्यपक्षेपि यथाकथञ्चित्प्रातिपदिकग्रहणे लिङ्गविशिष्टग्रहणाद् रूपाबन्तादपि भवति । अत एव णाविष्ठवदित्यत्र भाष्ये इष्ठवदित्यतिदेशस्य पुंवद्भावटिलोपयणादिलोपविन्मतोर्लुगर्थमिति पुंवद्भावोपि प्रयोजनतयोक्तः । इदञ्च दिङ्मात्रं न तु परिगणनमिति षष्ठएवाकरे स्पष्टम् । उदाहरणानि तु प्रपञ्चयामः । एनीमाचष्टे एतयति । हरिणीमाचष्टे हरितयति । न चात्र पुंवद्भावस्य इष्ठनि विशिष्याविधानात्कथमतिदेश इति वाच्यम् । विशेषातिदेशे सामान्यस्याप्यतिदेशात् । वसिष्ठवदत्र वर्त्तितव्यमित्युक्ते हि ब्राह्मणत्वं सामान्यनिबन्धनमप्यतिदिश्यतएव । तथेह भसंज्ञा-

निमित्ततद्धितत्वप्रयुक्तः पुंवद्भावोपीत्यदोषः। नन्वेतयतीत्यादौ टिलोपेन ङीपि निवृत्ते तत्सन्नियोगशिष्टत्वान्नकारोपि निवर्त्यताम्। तथा च टिलोपेनैव गतार्थत्वे किमर्थं पुंवद्भावोपि पृथक् प्रयोजनतया भाष्ये गणित इति चेत्। अत्र कैयटः। सन्नियोगशिष्टपरिभाषाया अनित्यत्वज्ञापनायेदं तेन ऐनेयः श्यैनेय इत्यत्र यस्येति लोपे कृतेपि नकारो न निवर्तते इत्याह। हरदत्तस्तु फलान्तरमपि मतान्तरत्वेनाह। इडविडमाचष्टे ऐडविडयति। दरदं दारदयति। इडविडशब्दो जनपदस्य क्षत्रियजातेश्च वाचकः। तस्माज्जनपदशब्दात् क्षत्रियादञ्,दरच्छब्दात् द्वयञ्मगधेत्यण्। अञणोस्तद्राजसंज्ञा तेतद्राजा इति सूत्रेण, अञादीनामापादपरिसमाप्तेस्तद्विधानात् अतश्चेतिलुक्। अकाररूपस्य तद्राजप्रत्ययस्य स्त्रियां लुगिति हि सूत्रार्थः। ततश्च इडविट् दरत् स्त्री। ऐडविडो दारदश्च पुमान्। पुंवद्वचनेन च स्त्रीशब्दस्य पुंशब्दे ऽतिदिष्टे सिद्धमिष्टम्। न चैवं गोत्रत्वेन जातित्वाज्जातेश्चेति पुंवद्भावनिषेधः शङ्क्यः। औपसंख्यानिकस्य नायं निषेध इति वक्ष्यमाणत्वात्। न चैवमप्यजादिगुणवचनादेवेत्युक्तेरिष्ठन एष्याभ्यामसम्भवेन कथं तद्वदित्यतिदेश इति वाच्यम्। नहीष्ठनि दृष्टस्यैवातिदेशः किन्तु सम्भावितस्य। अन्यथा अतिराजयतीत्यादौ टिलोपो न स्यात्। नन्वस्मिन्पक्षे ऐनेयः श्यैनेय इति कथं सिद्ध्येदिति चेत्। अत्र माधवः। अनन्यथासिद्धमपि ऐडविडयतीत्याद्युदाहृत्य एतयति श्येतयतीत्युदाहरन् भाष्यकारः सन्नियोगशिष्टपरिभाषाया अनित्यत्वं ज्ञापयतीत्याह। वस्तुतस्तु पुंवद्भावस्यैकाक्षु टिलोपस्याभाषितपुंस्केषु च चारितार्थ्येपि एतयतीत्यादावन्तरङ्गत्वेन पुंवद्भाव एव ज्ञाप्यः सिद्धश्च प्रत्ययविधावित्युक्तत्वेन प्रत्ययोत्पत्तेः पूर्वमेव प्रवृत्तत्वात्।अत एव नकारर-

हितप्रयोगसिद्धिः । न चात्र टिलोपेपि सन्नियोगशिष्टन्यायेन नकारनिवृत्तिः सुलभेति वाच्यम् । उक्तन्यायेन नकारनिवृत्तौ कर्तव्यायामचःपरस्मिन्निति स्थानिवद्भावस्य दुर्वारत्वात् । अत एव पञ्चेद्राण्यो देवता अस्येति पञ्चेद्र इत्यादौ स्थानिवद्भावेनानुगादिश्रवणे प्राप्ते स्थानिवद्भावानिषेधार्थे क्विलुगुपधेति वार्त्तिके लुग्ग्रहणमिति भाष्यवार्त्तिकादौ स्पष्टम् । अत एवाभ्यासेकारसहितमैतदिति रूपं सिद्धम् । टिलोपे तु प्रक्रियादशायां परिनिष्ठिते रूपे वा ऽवर्णपरत्वाभावेन स्थानिवद्भावानतिपत्तावुक्तरूपासिद्धिः । न चाल्लोपस्यापि स्थानिवद्भावः । तस्य ङीनिमित्तत्वेपि णिजनिमित्तत्वादिति ध्येयम् । पृथुमाचष्टे प्रथयति । चङि वृद्धेः पूर्वं टिलोप इति पक्षे अग्लोपित्वात्सन्वल्लघुनीत्यस्याप्रवृत्तेः । अपप्रथत् । परत्वाद्वृद्धौ आवादेशात्पूर्वं टिलोपे अनग्लोपित्वादपिप्रथत् । पक्षद्वयमपीदं मुण्डमिश्रेति सूत्रे प्रपञ्चितम् । एवं मृदुमाचष्टे म्रदयति । अमम्रदत् । अमिम्रदत् । भ्रशयति क्रशयति द्रढयति एषां चङि सर्वथाप्यग्लोपित्वात् । अबभ्रशत् । अचक्रशत् । अदद्रढत् इत्येकमेव रूपम् । परिवृढयति । अत्रोपसर्गस्य पृथक्करणात्पर्यवृढयत् पर्यववृढत् । पृथुं मृदुं भृशं चैव क्रुशं च दृढमेव च । परिपूर्वं वृढञ्चैव षडेतान् रविधौ स्मरेत् ॥ कविं पटुं वा आचष्टे कवयति पटयति । अचकवत् । अचीकवत् । अपपठत् । अपीपठत् । कुमारीमाख्यत् । अचुकुमारत् । अत्र एकमेव रूपम् । सन्वल्लघुनीति दीर्घो लघोरिति च सूत्रे चङ्परे णौ परे अचा अव्यवहितं यल्लघु तस्मिन्परे योभ्यासः तस्येति कैयटादिसम्मते सूत्रार्थे यदत्राभ्यासात्परं लघु न तच्चङ्परणिपरमिति दीर्घत्वस्याप्रसङ्गात् । चङ्परे णौ यदङ्गन्तस्य योभ्यासो लघुपरः तस्येति हरदत्ता-

दिपक्षेपि कुमारीशब्दस्य पुंवद्भावेन वृद्धावप्यग्लोपित्वात्। नदीमाख्यत् अननदादित्यादि। ननु कैयटमते येननान्यवधानमितिन्यायेन एकव्यञ्जनव्यवहिते अजीहरदित्यादौ सन्वद्भावोस्तु नाम। अचिक्षणदित्यादौ तु कथमिति चेत्। असस्मरदित्यादावित्वाभावार्थमत्स्मृदृत्वरेति अत्वविधानेन संयोगव्यवधानेपि भवतीति ज्ञापनात्। ऊढमाख्यत् औजढत्। ऊढिमाख्यत् औजिढत्। कर्तारमाचष्टे करयति। भर्तारं भरयति। दोग्धारन्दोहयति। तुश्छन्दसीति तृशब्दलोपोपि णावतिदिश्यतइत्येके। अन्येतु छन्दस्युपादिष्टोसौ णावपि छंदस्येवातिदिश्यतां नाम। भाषायान्तु कथं भवेत्। तस्माट्टिलोपे कर्त्तयतीत्याद्येव रूपमित्याहुः। त्वां मां वा आचष्टे त्वापयति। मापयति। इह प्रत्ययोत्तरपदयोश्चेति एकार्थयोर्युष्मदस्मदोर्मपर्यन्तस्य त्वमौ। अतोगुणइति पररूपात्पूर्वं नित्यत्वाट्टिलोपे वृद्धौ पुंगित्येकं मतम्। वस्तुतस्तु परादप्यन्तरङ्गस्य बलीयस्त्वात्पररूपत्वे प्रकृत्यैकाजितिटिलोपाभावादुपधावृद्धौ त्वादयति मादयतीत्येव रूपमिति बहवः। प्रकृत्यैकाजित्येतत्प्रत्याख्यानभाष्यन्तूदाहरणविशेषेऽन्यथासिद्धिरित्येतावन्मात्रपरम्। तद्यथा। वृत्तिकारोदाहृतेषु मध्येप्रेष्ठादय आभात्सूत्रेण सिद्धाः। तत्त्यागेपिज्येष्ठवदकारोच्चारणसामर्थ्यात्। इष्टेमेयःस्वनेकाचोप्यवाशिष्टस्य नेष्यते। टिलोपो भाष्यकारेण प्रवृत्ते विन्मतोर्लुकि॥ लुकोपवादभूतस्य तस्मिन्पक्षे प्रवर्तनात्। कनिष्ठादाविदं तुल्यं तृलोपस्य प्रवर्तनात्॥ कैयटमाधवादिग्रन्थाश्चेहानुकूला इति वक्ष्यामः। अङ्गवृत्तपरिभाषया वृद्धिमकृत्वा त्वदयति मदयतीत्यन्ये प्रतिपन्नाः। युवामावां वा आचष्टे। युष्मयति अस्मयति। युवावौद्विवचने इत्यत्र यद्यपि द्विवचने इत्यर्थग्रहणं तथापीह युवावौ न स्तः। विभक्तिपरत्वा-

भावात्। प्रातिपदिकादेव हि णिजिति माधवादयः। सुबन्तादिति हरदत्तपक्षेपि अन्तरङ्गानपीति न्यायेन विभक्तेर्लुकापहारात्। त्वामतिक्रान्तमतिक्रान्तौ वा अतित्वाम्। अतिक्रान्तान् अतित्वान्। आचष्टे। अतित्वयति अतिमयति। युष्मदस्मदोरेकार्थत्वेन प्रत्ययोत्तरपदयोश्चेति त्वमौ। अन्तरङ्गत्वात्पूर्वरूपं ततष्टिलोप इति माधवः। तच्चिन्त्यम्। उपसर्गस्य पृथक्करणेन प्रकृत्यैकाजिति प्रकृतिभावात्। तस्मादतित्वादयति अतिमादयतीत्येव बोध्यम्। अत्रापि पररूपात्पूर्वं नित्यत्वाट्टिलोप इति मते अतित्वापयति अतिमापयति। युवामावां युष्मानस्मान्वा अतिक्रान्तमतिक्रान्तावतिक्रान्तान्वा आचष्टे अतियुष्मयति अत्यस्मयति। इदानीं ण्यन्तात्क्विपि कश्चिद्विशेष उच्यते॥ तत्र त्वां मां वा आचष्टइति आख्येयैक्ये त्वाप् माप्। त्वाद् माद् त्वद् मद् इति प्रागुक्तमतभेदेन त्रिधा प्रातिपदिकानि। युवामावां युष्मानस्मान् वा आचष्टइति आख्येयस्यानेकत्वे त्वमयोरभावाण्णौ टिलोपे क्वौ णिलोपे क्वेश्चाघृक्तलोपे युष्म् अस्म् इति मान्ते प्रातिपदिके भवतः। ततः स्वादयः। तत्र प्रातिपदिकाष्टकादपि विभक्तीनां यथायथं ङेप्रथमयोरम्, शसोन, भ्यसोभ्यम्, पञ्चम्याअत्, एकवचनस्यच, युष्मदस्मद्भ्यांङसोश्, सामआकमिति सूत्रसप्तकेन विहिता आदेशा भवन्ति। एवं युष्मदस्मदोरनादेशे, द्वितीयायाञ्च, प्रथमायाश्चद्विवचनेभाषायामिति त्रिसूत्र्या विहितमात्वं योचीति यत्वं च भवत्येव। शेषेलोपस्तु आत्वयत्वनिमित्तेतरविभक्तौ परतोन्त्यलोप इति व्याख्याने भवत्येव। शेषशब्दस्य मान्ताच्छेषपरत्वमाश्रित्य टिलोप इति व्याख्याने तु न भवत्येवाख्येयस्यानेकत्वे। तत्र हि शेषेलोपेनापहार्यं मान्तात्परं णाविष्ठवदित्यतिदिष्टेन टिलोपेनैवापहृतम्। आख्येयैक्ये

तु भवत्येव प्राक् टिलोपाभावात् । टिलोपं स्वीकृत्य पुका पान्तत्वमिति मते तु न भवत्येव । अजादौ यत्वविधानादात्वं हलादावेव पर्यवस्यति । त्वाहौसौ, यूयवयौजसि, तुभ्यमह्यौङयि, तमवमौङसीति चतुःसूत्रीविहिताः प्रकृत्यादेशास्तु आख्येयैक्ये न भवन्त्येव मपर्यन्ताभावात्, आख्येयद्वित्वबहुत्वयोस्तु वैकल्पिकाः । तथाहि । मपर्यन्तस्येत्यत्र मान्तस्येत्येव सिद्धे परिग्रहणसामर्थ्याद्युष्मदस्मदोर्मान्तत्वावस्थायां नादेशा इत्येकं मतम् । परिग्रहणाभावे मान्तस्यैव स्यात् । सति तु तस्मिन् मान्ते ततोधिके च भवतीति मतान्तरम् । उभयमिदं तस्मिन्नेव सूत्रे व्युत्पादयिष्यते । मतभेदाच्चेह फलितो विकल्पः । तत्र आख्येयद्वित्वे सुजस्ङेङस्सु परत्वात् त्वाहादिप्रवृत्तावपि औ अम् इत्यादिषु वचनान्तरेषु विभक्तिपरत्वाद्युवावौ एकस्मिन्मते स्त एव मतान्तरे तु न त्वाहादयो नापि युवाविति विवेकः । अथ रूपाणि, आख्येयैक्ये सौ त्वां माम् । वृद्धिर्नेतिवादिनान्तु शेषेलोपे त्वं मं शेषेलोपाष्टिलोपः । स चाचक्षाणे न प्रवर्त्ततइति पक्षेष्याख्येयैक्येस्त्येव दान्तयोरित्युक्तम् । यान्तयोस्तु पक्षे त्वायम् । मायम् । इत्थं सङ्कलनया त्रीणि, औङि त्वां मामित्येकमेव । प्रथमायाश्चद्विवचनइत्यात्वं जसि सावित्र त्रीणि शेषेलोपस्य यान्तयोः पाक्षिकत्वात् । अम्औटोः त्वां माम् । शसि त्वान् मान् द्वितीयायाञ्चेत्यात्वम् । आङि । त्वाया माया । अवृद्धौ तु त्वया मया त्वाभ्यां माभ्यां त्वाभिः माभिः । ङयि अम् शेषेलोपः । वृद्धिपक्षे आतोधातोरित्यालोपः त्वं मम् । पक्षे त्वायं मायम् । त्वाभ्यां माभ्याम् । त्वाभ्यंमाभ्यम् । भ्यमि शेषेलोपः । अभ्यमादेशपक्षे तु शेषेलोप आल्लोपे च त्वभ्यं मभ्यम् । अवृद्धिपक्षेप्येवम् । मान्तपक्षे त्वायभ्यं मायभ्यम् । तत्र भ्यमि अङ्गवृत्तपरिभाषया बहुवचने झल्येदित्येत्वं न । तत्

मत् । शेषेलोपे वृद्धिपक्षे आल्लोपः । त्वायत् मायत् । त्वाभ्यां माभ्याम् । त्वत् मत् । त्वायत् मायत् । त्वाम । त्वाय माय । त्वायोः मायोः । अवृद्धौ तु त्वयोः मयोः । त्वाकं माकम् । त्वायाकं मायाकम् । त्वायि मायि । त्वायोः मायोः । अवृद्धौ तु त्वयि मयि । त्वयोः मयोः । त्वासु मासु । एवञ्च । आख्येयैक्येत्र सुजसोश्चतुर्थ्यां भ्यसि च त्रयम् । टौसङ्ङिटाम्भ्यस्सु रूपे द्वे निश्चिनुष्वैकमत्यतः ॥ इदं त्ववधेयम् । कृतः कर्त्तर्यसंज्ञायामिति विशेष्यनिघ्नतोक्तेराचक्षाणस्य क्लीबत्वे सुजसोरसर्वनामस्थानत्वेन भत्वादातोधातोरित्यालोपे त्वं ममित्येव रूपम् । अवृद्धिवादिनां सम्बोधने एङ्ह्रस्वादिति हल्मात्रलोपे हे त्व हे म । स्त्रीत्वे तु टाप् प्राप्तः । सन्निपातपरिभाषया समाधेयः । यत्तु केवले समाधानद्वयम् अलिङ्गत्वाट्टिलोपाद्वेति तदिह न भवतीति दिक् । अथाख्येयद्वित्वे रूपाणि । सौ त्वं अहम् । प्रकृत्यादेशाभावे युषं असम् । शेषेलोपस्याप्यभावे युष्मम् अस्मम् इत्थं त्रीणि । युवाम् आवाम् । युषाम् असाम् । जसि । यूयं वयम् । युषम् असम् । युष्मम् अस्मम् । अम्औटोः युवाम् आवाम् । युषाम् असाम् । युवान् आवान् । युषान् असान् । युवया आवया । युष्या अस्या । युवाभ्याम् आवाभ्यां, युषाभ्याम् असाभ्याम् । युवाभिः आवाभिः । युषाभिरसाभिः । तुभ्यं मह्यम् । युषम् असम् । युष्मम् अस्मम् । युवाभ्याम् आवाभ्याम् । युषाभ्याम् असाभ्याम् । युवभ्यम् आवभ्यम् । युष्मभ्यम् अस्मभ्यम् । भ्यमादेशपक्षे तु युष्मभ्यम् । अत्र सयोगान्तलोपो न भाष्ये झल इत्यनुवर्त्तनात् । अननुवृत्तिपक्षे तु युङ्भ्यम् । अस्मदस्तु स्कोरिति सलोपे अम्भ्यम् । शेषेलोपे तु ओभ्यम् । युवत् आवत् । युषत् असत् । युष्मत् अस्मत् । युवाभ्याम् आवाभ्याम् । युषाभ्याम् । असाभ्याम् । भ्यसि ङसि च त्रीणि ।

तव मम। युष अस। युष्म अस्म। युवयोः आवयोः। युष्योः। अस्योः। युवाकम्। आवाकम्। युषाकम्। असाकम्। युष्माकम्। अस्माकम्। युवयि आवयि। युष्मि अस्मि। युवयोः। आवयोः। युष्योः। अस्मोः। युवासु आवासु युषासु असासु। एवञ्च चतुर्थ्या भ्यसि चत्वारि व्याख्याने द्वे तथान्यतः। सुजस्ङेङस्ङसिभ्यस्सु आमि च त्रीणि निश्चिनु॥ अथाख्येयबहुत्वे रूपाणि। त्वम् अहम्। युषम् असम्। युष्मम्। अस्मम्। युषाम् असाम्। यूयं वयम्। युषम् असम्। युष्मम् अस्मम्। युषाम् असाम्। युषान् असान्। युष्या अस्या। युषाभ्याम् असाभ्याम्। युषाभिः असाभिः। तुभ्यं मह्यम्। युषम् असम्। युष्मम् अस्मम्। युषाभ्याम्। असाभ्याम्। युषभ्यम् असभ्यं युष्मभ्यम्। युड्भ्यम् अम्भ्यम् ओभ्यम्। युषत्। असत्। युष्मत् अस्मत्। युषाभ्याम् असाभ्यास्। उषत् असत्। युष्मत् अस्मत्। तव मम। युष अस। युष्म। अस्म। युष्योः। अस्योः। युषाकम्। असाकम्। युष्माकम्। अस्माकम्। युष्यि। आस्यि। युष्योः। अस्योः। युषासु असासु। एवञ्च, ङसिभ्यसाम्सु द्वे रूपे चतुर्थ्या भ्यसि तु त्रयम्। सुजस्ङेङस्सु च तथाख्येयभूम्न्येकमन्यतः॥ इह सर्वत्र प्रकृत्यादेशयत्वात्वशेषलोपेषु कर्तव्येषु णिलोपो न स्थानिवत् क्वौ लुप्तत्वादिति दिक्। श्वानमाचष्टे शावयति। श्वन् इ इति स्थिते णाविष्ठवदित्यतिदेशेन द्वौ टिलोपौ प्राप्तौ टेरित्येकः नस्तद्धित इत्यपरः। तत्र प्रकृत्येकाजिति प्रकृतिभावो येननाप्राप्तिन्यायेन टेरित्यस्यैवेति तस्मिन्निवृत्तेपि नस्तद्धित इति भवत्येव। तत इष्ठवदित्यतिदिष्टया भसंज्ञयैव वकारस्य सम्प्रसारणे वृद्धावावादेशः। न च दविष्ठ इत्यादौ इष्ठनि ओर्गुणः पूर्वस्य दृष्ट इति इहाप्यतिदिश्येतेति वाच्यम्। तस्मिन्कर्तव्ये

सम्प्रसारणटिलोपयोरसिद्धवदत्रेत्यसिद्धत्वात् । अन्ये तु ब्रह्मिष्ठ इत्यादौ नान्तलक्षणाट्टिलोपात्परत्वाट्टेरित्येव प्रवर्त्तते । तच्चेह प्रकृतिभावेन निवृत्तम् । नस्तद्धितइति तु इष्ठनि क्वापि न दृष्टमिति तस्येहानतिदेशात् । सम्प्रसारणपूर्वत्वयोः शुनयतीति रूपमाहुः । न च टिलोपयोराभीयत्वेन अन्योन्यस्यासिद्धत्वात्कथं विप्रतिषेध इति वाच्यम् । विप्रतिषेधे आभीयमसिद्धत्वं नास्तीति वक्ष्यमाणत्वात् । विद्वांसमाचष्टइत्यत्र णौ टिलोपे विद्वयतीति दौर्गाः । अत्र संप्रसारणाभावश्चिन्त्य इत्यात्रेयः । अङ्गवृत्तपरिभाषया चिन्त्योद्धारो बोध्यः । संप्रसारणे वृद्धाभावादेश च विदावयतीत्येके । अन्ये तु विदयतीत्याहुः । तथाहि ।नित्यत्वाट्टिलोपात्प्राक् संप्रसारणन्ततोन्तरङ्गत्वात्पूर्वरूपे पश्चाट्टिलोपः । न च टिलोपस्यापि नित्यत्वम् । शब्दान्तरप्राप्त्या अनित्यत्वात् । ननु सम्प्रसारणमात्रेण न शब्दान्तरप्राप्तिः किन्तु पूर्वरूपेण । यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यमिति चेन्न । यस्यचेत्यस्य असार्वत्रिकतायाः हरदत्तादिभिरुक्तत्वात् । उदञ्चमाचष्टे उदीचयति । अत्र उपसर्गस्य पृथक्करणात् क्विबन्तात् लुप्तनकारादच्छब्दाण्णिच् । प्रकृत्यैकाजिति टिलोपाभावे इष्ठवदित्यतिदेशेन भत्वे अच इत्यलोपे प्राप्ते तदपवाद उदईदितीत्वम् । चङि तु उदैचिचत् । अत्र णिलोपस्य द्विर्वचनेचीति स्थानिवत्त्वादजादेर्द्वितीयस्येति चिशब्दस्य द्वित्वम् । अङ्गस्याट् वृद्धिः । ल्यपि लघुपूर्वत्वाभावेन अयादेशाभावाण्णिलोपे उदीच्य । प्रत्यञ्चमाचष्टे प्रतीचयति । अत्राच इत्यलोपः । चाविति पूर्वपदस्य दीर्घः। चङि चिशब्दात्पूर्वमटि यणादेशे प्रत्यचिचत् । इकोसवर्णेइति प्रकृतिभावपक्षे प्रति अचिचत् । ल्यपि प्रतीच्य । सम्यञ्चमाचष्टे

समीचयति। चङि। सम्यचिचत्। समि अचिचत्। समीच्य। तिरोऽञ्चतीति तिर्यङ्। तिरसस्तिर्यलोपेऽइति तिर्यादेशः। तमाचष्टे तिरायति। इष्ठवद्भावेन टिलोपेनाञ्चतेरुपहारे वृद्ध्यायौ। न चात्र अञ्चेतेर्लोपात् तिरसस्तिरिः कथमिति वाच्यम्। अलोपे इति हि अच इति विधीयमाने लोपे तिर्यादेशो वार्यते। तस्यैवानन्तरत्वात्। इह तिरेरिकारस्य वृद्ध्यायोः कृतयोरकृतयोर्वा लोपः प्राप्तो ऽङ्गकृत्तपरिभाषया न भवति। यद्वा चिणो लुङ्न्यायेन प्रथमप्रवृत्तटिलोपस्य असिद्धवदत्रेत्यसिद्धत्वात् पुनष्टिलोपो न। अत एव तिरेः स्थानिवत्त्वेनाव्ययत्वात् अव्ययानां भमत्रो इति प्राप्तोपि टिलोपो न भवति, एवं यस्येति लोपोपि न भवति। परया वृद्ध्या बाधाद्वा। चङि अल्लोपित्वेन उपधाह्रस्वो न। अतितिरायत्। सह अञ्चतीति सध्र्यङ्। सहस्यसाधिः। सध्र्यञ्चमाचष्टे सध्र्याययति। असससध्रायत्। पूर्ववत्पुनष्टिलोपो न। स्यादेतत्। यदि तिरिसध्र्योरिकारे टिलोपस्याप्रवृत्तौ चिणोलुङ्न्यायेनासिद्धत्वं मूलम्। तर्हि कुमारीमाचष्टे कुमारयतीति न सिध्येत्। तत्रापि इष्ठवद्भावेन प्रवृत्तस्य पुंवत्त्वस्य तेनैव कुमाराकारलोपे असिद्धत्वापत्तेरिति चेन्मैवम्। अतिदिश्यमानानाङ्कार्याणामुत्पत्तिदेश एव देश इत्यभ्युपगमात्। पुंवत्त्वस्य च भस्याढेतद्धितइति आभीयेभ्यः प्रागेवोत्पत्तेः। अत एव भाष्यकारेण लोहिनीमाचष्टे लोहितयतीत्युदाहृतम्। विष्वञ्चमाचष्टे विष्वद्राययति। देवद्र्यञ्चमाचष्टे देवद्रायययति। विष्वग्देवयोश्चेति चकारात् सर्वनाम्नोद्र्यादेशे सर्वद्रायययति। अदसोऽद्र्यादेशे अमुमुआयति। अदमुआययति अदद्रायययति। चङि। अजादित्वात् द्वितीयस्य द्वित्वम्। अल्लोपित्वान्नोपधाह्रस्वः। आमुमुमुआयत्। आददमुआयत्। आददद्रायत्। आद्ये

पूर्वत्रासिद्धीयमाद्विर्वचनइति मुत्वस्यासिद्धत्वाभावः । इमाचष्टे आययति, प्रकृत्यैकाजिति प्रकृतिभावाट्टिलोपाभावे वृद्धौ आयादेशः । चङि उपधाह्रस्वे द्वितीयस्य द्वित्वे माभवानाययत् । न च द्वित्वे कर्तव्ये णौ कृतं स्थानिवदिति वृद्ध्यादेः स्थानिवत्त्वं शङ्क्यम् । स्थानिरूपस्य यत्र द्विर्वचनं लभ्यते तत्र हि तत् । इह तु णेरेव द्विर्वचनमिति माधवः । वस्तुतस्तु अचिकीर्त्तदित्यत्र अतिव्याप्तिं वारयितुमोः पुयणजीति ज्ञापकस्य सजातीयविषयतामाश्रित्य अवर्णवदुत्तरखण्डएव स्थानिवद्भावप्रवृत्तिरिति द्विर्वचनेचीतिसूत्रएवावोचाम । स्पष्टञ्चैतदेवमुरादितिसूत्रे रक्षितपदमञ्जर्यादिष्वपि । उत्तरखण्डस्यावर्णवत्तापि न प्रयोगपर्यवसायिन्येवेत्याग्रहः किन्तु प्रक्रियावस्थागतापि । तेन औजिढदपीप्यदित्यत्र द्विर्वचनोत्तरकालं टिलोपेन लोपः पिबतेरित्यनेन च उत्तरखण्डे अवर्णापहारेपि न क्षतिः । भुवमाचष्टे भावयति । चङि अबीभवत् । णौकृतस्य स्थानिवत्वात् भूशब्दस्य द्वित्वम् । पुनरुत्तरखण्डे वृद्ध्यावौ ह्रस्वः । ततः सन्वद्भावे ओः पुयण्जीतीत्वम् । दीर्घोलघोरिति दीर्घः । नन्विह भूइत्यस्य द्वित्वे सत्युत्तरखण्डे वृद्ध्यावह्रस्वत्वानि प्रवृत्तानि । एवञ्च अभ्यासस्यानादिष्टादचः पूर्वत्वात् तस्य सन्वद्भावेन पुयण्लक्षणे इत्वे कर्त्तव्ये णौचङीति ह्रस्वस्य अचःपरस्मिन्निति स्थानिवत्वे अलघुपरत्वात्कथमित्वमिति चेत् । उच्यते । ओः पुयणजीतीत्वस्य सन्वदातिदेशस्य च आरम्भसामर्थ्यात् स्थानिवद्भावस्येहाप्रवृत्तेः । भ्रुवमाख्यत् अबुभ्रवत् । अत्र यः अवर्णपरो यण् नासावभ्यासात्परः । यश्च परः पवर्गः नासाववर्णात्पर इति इत्वाभावः । अशिश्रयत् । णौ कृतस्य स्थानिवत्वेन श्रिशब्दस्य द्वित्वम् । हेशब्दमाख्यत् । अजीहयत् । गाम् अजूगवत् । रायम् । अरीर-

यत् । नावम् । अनूनवत् । स्वश्वम् । स्वाशश्वत् । स्वराचष्टे । स्वयति । अव्ययानां भमात्रे इति टिलोपः । प्रकृत्यैकाजिति प्रकृतिभावस्तु येननाप्राप्तिन्यायेन आनन्तर्याच्च टेरित्यस्यैव टिलोपस्य नान्यस्येत्युक्तम् । णौ कृतत्वेन टिलोपस्य स्थानिवत्त्वात् स्वरशब्दस्य द्वित्वे असस्वदित्येके । अजादेशस्यैव स्थानिवत्त्वं, अयं त्वज्झलादेश इति स्थानिवत्त्वाभावात् स्विशब्दस्य द्विर्वचने असिस्वदित्यन्ये । बहूनाचष्टे भावयति । अत्रेष्टस्य यिट्चेति इष्ठनि विहितत्वात् बहोर्भूभावः । यिडागमस्तु न भवति णावित्युपमेये सप्तमीश्रवणेन इष्ठवदिति उपमानादपि सप्तम्यन्ताद्वातिः । तेन इष्ठनि परे पूर्वस्य यत्कार्यं तस्यैवातिदेशो नत्विष्ठनः कार्यस्यापीति सिद्धान्तात् । प्रातिपदिकस्येति वचनस्य प्रत्ययकार्यानतिदेशार्थत्वाच्च टेरिति सूत्रे कैयटेन भावयतीत्युदात्तत्य यिट्सन्नियोगशिष्टत्वाद्भूभावस्य यिडभावे अस्याप्यभावात् । बहयतीत्येकीयमतत्वेनोपन्यस्तम् । हरदत्तेन तु सोपपत्तिकत्वात्तत्रैव प्राबल्यमिति मन्यमानेन बहयतीति स्वपक्षत्वेनोक्त्वा भावयतीत्येकीयमतेनोक्तम् । अत एव पुरुषकारेपि भावयतीति चिन्त्यमित्युक्तम् । वस्तुतस्तु कैयटपक्ष एव प्रबलः । तथाहि । इष्ठवदिति कार्यातिदेशः । कार्यस्यैव प्राधान्यात् । तथा च इष्ठवद्वचनमेव प्रकृतौ दृष्टानामिह विधायकमिति तदेव भूभावं विधत्ते, तथा च सन्नियोगाभावः स्पष्ट एव । चान्द्रकौमारशाकटायनेषु तु इष्ठनि युग्वेति बहोरेव युकं विधाय भूययतीति स्वीकृतम् । स्थूलमाचष्टे स्थवयति । दूरं दवयति । युवानं यवयति । ह्रस्वयति । क्षेपयति । क्षोदयति । अत्राद्येषु गुणस्य अचोञ्णितीति वृद्धिः प्राप्ता । अङ्गवृत्त इति वा प्रातिपदिकाद्धात्वर्थे बहुलमिति बहुलग्रहणाद्वा न भवति । युवतिशब्दादपि इष्ठनि लिङ्गविशिष्टपरि-

भाषया स्थूलदूरेति यणादिपरलोपादेः सत्वाण्णावपि तदतिदेशात् यवयतीत्येव रूपम् । यद्वा पुंवद्भावे कृते यणादिपरलोपात्तदेव रूपम् । शीकरव्यतिकरमरीचिभिर्दूरयत्यवनते विवस्वतीति कालिदासप्रयोगस्तु चिन्त्य इति सुधाकरादयः । वस्तुतस्तु दूरमयते दूरात् तं करोतीति समाधेयम् । स्रग्विणमाचष्टे स्रजयति। अत्रातिदेशाद्विनो लुक् । प्रकृत्यैकाजिति टिलोपो न । अतउपधाया इति वृद्धिस्तु अङ्गवृत्त इति न भवतीति भाष्ये स्थितम् । गोमन्तमाचष्टे गावयति मतुब्लुकि अचोञ्णितीति वृद्धिः । चङि अग्लोपित्वात्सन्वदित्वदीर्घत्वयोरभावे असस्रजत् । अजुगवत् इत्यादि । युवानमल्पं वाचष्टे कनयति, युवाल्पयोः कनन्यतरस्यां, पक्षे यवयति । युवतिमल्पां वेति विग्रहेप्येवम् । अन्तिकमाचष्टे नेदयति । वाढमाचष्टे साधयति । अन्तिकबाढयोर्नेदसाधौ। प्रशस्यमाचष्टे प्रशस्ययति । इह प्रशस्यस्यश्रः, ज्यचेति श्रज्यौ न भवतः । उपसर्गस्य पृथक्करणादिति माधवः । यत्तु सुधाकरेण श्रापयतीत्युदात्तम् । यच्च शाकटायनेन श्रयतिज्यय्यतीति । तत्सर्वं भाष्यविरोधादुपेक्ष्यम् । वृद्धमाचष्टे ज्याययति । अयञ्च ज्यादेशः वर्षादेशेन सह विकल्पते । प्रियास्थिरेति प्रादयः । प्रियमाचष्टे प्रापयति । स्थिरं स्थापयति स्फिरं स्फापयति। उरुम् वरयतीति सुञ्धातौ माधवः । ऊर्णुधातौ तु वृद्धिं स एवोदाजहार । बहुलं बंहयति । गुरुं गरयति। वृद्धं वर्षयति। तृप्रं दुःखं तदाचष्टे त्रपयति । दीर्घं द्राघयति । वृन्दारकं वृन्दयति इति इष्टवद्भावोदाहरणप्रपञ्चः ॥ प्रकृतमनुसरामः । सूत्रङ्करोति सूत्रयति । इह व्याकरणस्य सूत्रङ्करोतीति वाक्ये द्रव्यरूपं सूत्रं सूत्रशब्देनोच्यते । लक्ष्यलक्षणसमुदायश्च व्याकरणशब्दार्थः । तयोरंशांशिभावात् षष्ठी । वृत्तौ तु सूत्रशब्दो ऽनर्थकः करोत्यर्थपरोवेति

पक्षद्वयेपि सूत्रस्य पदार्थैकदेशत्वात् न तेन व्याकरणं सम्बध्यते। किन्तु करोत्यर्थेनैवेति व्याकरणं सूचयतीति द्वितीयैव भवति। तत्रापि सम्बन्धसामान्यविवक्षायां मातुः स्मरतीतिवत् षष्ठी भवत्येवेति दिक्। आख्यानात्कृतस्तदाचष्टइति णिच् कुल्लुक् प्रकृतिप्रत्ययापत्तिः प्रकृतिवच्च कारकम्॥ आख्यायतइत्याख्यानम्। बाहुलकात्कर्मणि ल्युट्। आख्यानशब्देन च तदभिधायी शब्दो गृह्यते अर्थे कृदन्तत्वासम्भवादिति प्राञ्चः। वस्तुतस्तु करणे ल्युट्। कंसवधमाचष्टे कंसं घातयति। इह कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् कंसवध इति कृदन्त आख्यानशब्दः। ततो द्वितीयान्तात्प्रातिपदिकाद्वा णिच्। कृतो ऽप्प्रत्ययस्य लुक्। तस्यैव या प्रकृतिः हन् इति, तस्याः विकारपरित्यागेन स्वेनैव रूपेणावस्थानम्। यद्यपि कृतो लुकि कृते तत्सन्नियोगशिष्टस्य वधादेशस्य निवृत्तिः सिद्धैव। हनश्चवध इति सूत्रेण हि अप्रत्ययवधादेशौ सन्नियोगशिष्टौ। तथापि सीतायोगमाचष्टे सीतया योजयतीत्यत्र कुत्वस्यासन्नियोगशिष्टत्वेन तन्निवृत्त्यर्थप्रकृतिप्रत्यापत्तिवचनमिति कैयटहरदत्तमाधवादयः। वस्तुतस्तु निमित्तापायन्यायेनैव तत्सिद्धेस्तस्यानित्यत्वज्ञापनार्थमिदम्। नहीदं वचनं नापि न्याय इति वदद्भिरपि अकृतव्यूहपरिभाषायाः तत्स्थानापन्नायाः पुरस्कृतत्वात्तस्या एवानित्यत्वमनेन ज्ञाप्यतइति निष्कर्षः। इदञ्चाचःपरस्मिन्निति सूत्रएव प्रपञ्चितमस्माभिः। एवञ्च कंसहन् इ इति स्थिते अङ्गसंज्ञा धातुसंज्ञा च कंसविशिष्टस्यैव प्राप्ता ततश्चाट्द्विर्वचनयोर्दोषः स्यात्। अत उक्तं प्रकृतिवच्चकारकमिति। अस्यार्थः। प्रकृतिर्हेतुमण्णिचः प्रकृतिः षष्ठ्यन्ताद्वृतिः। वधादेः कृदन्तस्य यत्कारकं कंसादिकं तस्य कृत्प्रकृतेर्हन्यादेः हेतुमण्णौ धातावनन्तर्भूतं द्वितीयान्तं यद्रूपं तदेव

भवतीति । अत एव राजागनमाचष्टे राजानमागमयतीत्यत्र नकारश्रवणमप्युपपन्नम् । अनेन चातिदेशेन कारकस्य धातावनन्तर्भावे लब्धे तद्व्यतिरिक्ताद्धादेरेव णिच् । एतेन कंसमजीघतदित्यड्द्विर्वचने यथाभिमतं सिध्यतः । नन्वेनमपि होहन्तेरिति हनस्तोचिण्णलोरिति च कुत्वतत्वे न प्राप्नुतः । धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानादिति चेत् । अत्र हरदत्तमाधवादयः । प्रकृतिवच्चेति चकारो भिन्नक्रमः । कारकमित्यस्यानन्तरं द्रष्टव्यः । कार्यशब्दश्चाध्याहार्यः । हेतुमण्णिच्प्रकृतौ यादृशङ्कारकं तथेहापि, यादृशञ्च तत्र कार्यं अड्द्विर्वचनतत्वकुत्वादि तदपीह तथैवेत्यर्थः । इह च अड्द्विर्वचने अतिदेशद्वयेनापि सिध्यतः । असङ्कीर्णोदाहरणन्तु द्वितीयादिकं कुत्वतत्वादिकञ्चेति विवेकः । इह कंसवधसुभद्राहरणादिनिरूढोपाख्यानएव णिजिति नाग्रहः । किन्तु प्रतिपादनमात्रे । तेन राजागमनमाचष्टे राजानमागमयति । यद्यपीह कृत्प्रकृतौ राजा कर्तासीत् । तथापि गमेर्हेतुमण्णौ गतिबुद्धीति कर्मीभूतः । तद्वच्चेहापि । राजानमित्यस्य प्रकृतिभागो यद्यपि अन्तर्वर्त्तिन्या षष्ठ्या प्रत्ययलक्षणेन पदम् । तथापि नकारश्रवणं भवत्येव रूपातिदेशबलात् देवदत्तपाकमाचष्टे देवदत्तेन पाचयतीति तृतीयैव भवति । गतिबुद्धीति नियमेन कर्मत्वापहारे कर्तृत्वस्यैव स्थितेरिति दिक् । दृश्यर्थायां च प्रवृत्तौ मृगाणां रमणं मृगरमणम् । कर्तृषष्ठ्या समासः । तदाचष्टे मृगान् रमयति । यदा प्रतिपाद्यकर्तृकदर्शनार्थमाख्यातं तदैव णिजिष्यते नान्यदित्येतदर्थं वचनम् । येयमाख्यातरूपा वृत्तिः सा यदि दृश्यर्थः । तेन स्वयं मृगरमणमनुभवन् अन्यस्मै दर्शयितुमाचष्टे इत्यस्मिन्विषये मृगान् रमयतीति प्रयोगः । यदा तु अरण्ये दृष्टं मृगरमणं ग्राममेत्यान्यस्मा आचष्टे एवं तत्र मृगा रमन्तइति

तस्मिन्नाख्याते बोधनीये मृगरमणमाचष्टे इति वाक्यमेव भवति। अत्र कैयटादयः। दृश्यर्थायामेवेति नियमो मृगरमणादिविषयक एव। न तु सार्वत्रिकः। तेन राजागमनादौ दृश्यर्थप्रवृत्त्यभावेपि णिज् भवत्येवेत्याहुः। लोपश्च कालान्तसंयोगे मर्यादायाम्। इह आख्यानादिति न सम्बध्यते। शेषं पूर्ववत्। सन्निहितया आख्यानक्रियया सह कालस्य साकल्येन सम्बन्धे बोधनीये णिच्। मर्यादावचनस्याङ्गे लोपश्चेत्यर्थः। उदाहरणन्तु विवसनं विवासः, अतिक्रमणं घञ् रात्रेर्विवास इति कर्तृषष्ठ्या समासः। ततः आङ्मर्यादाभिविध्योरित्याङासहाव्ययीभावः। आरात्रिविवासमाचष्टे रात्रिं विवासयति। यावद्रात्रेरतिक्रमणं तावत्कथाः कथयतीत्यर्थः। वसिक्रियायां कर्तृभूताया रात्रेर्हेतुमण्णौ तावत्कर्मत्वं वसेरकर्मकत्वात्तद्वदत्रापि गौ कर्मत्वं रात्रिमित्यस्य लुप्तषष्ठ्यन्तत्वेन प्रकृतिभागस्य पदत्वे इकोसवर्ण इति पाक्षिकः प्रकृतिभावः प्राप्तः पूर्वबद्रूपातिदेशान्निवर्त्तते। इहाख्येयं णिच्प्रकृत्या अनुपात्तमपि अर्थाद्गम्यते। तद्वाचकस्तु भारतकथामित्यादिः शब्दो नेह प्रयोक्तव्यः। तत्समभिव्याहारे हि सति णिजेव नोत्पद्यते अनभिधानात्। अत्र च प्रमाणं वक्ष्यमाणं भाष्यकारीयं प्रत्याख्यानमेव। नहि फलभेदे प्रत्याख्यानं सम्भवति। प्रत्याख्यानपक्षे च कथामित्यादेर्यथा न प्रयोगस्तथा प्रत्याख्यानावसरएव स्फुटीभविष्यति। तथाप्रकृतिवच्चकारकमित्यस्य पूर्वोक्ते विपरीतक्रमाध्याहारव्याख्यानेपि भाष्यकारीयप्रत्याख्यानं प्रमाणमिति दिक्। चित्रीकरणे प्रापि॥ आख्यानादिति विहाय शिष्टं सम्बध्यते। कृदन्तादाश्चर्यकरणे गम्यमाने प्राप्नोत्यर्थे णिच् स्यात्। कृल्लुगादि पूर्ववत्। उज्जयिन्याः प्रस्थितो माहिष्मत्यां सूर्योद्गमनं प्राप्नोति सूर्यमुद्गमयति। इह उज्जयिन्या माहिष्यती दूरदेशस्थेति तावतो देशस्य

मागुदयादतिक्रमणमाश्चर्यकरणम् । प्रकृतिवच्चकारकमिति सूर्यस्य पृथग्भावः । संग्रामयतेरेव सोपसर्गादित्युक्तेरुच्छब्दस्यापि पृथक्करणम् । सूर्यस्य हेतुमण्णौ कर्मत्वात् इहापि कर्मत्वे सूर्यमुदगमयदित्यादि । नक्षत्रयोगे ञि ॥ नक्षत्रयोगवाचिनः कृदन्ताज्ज्ञानार्थे णिच् । शेषं प्राग्वत् । पुष्येण योगः कर्तृकर्मकः योग इत्यर्थः । पुष्यो हि चन्द्रमसं युनक्ति सम्बध्नातीह कर्मणोपि गम्यमानत्वादुभयप्राप्ताविति नियमात्कर्तरि षष्ठ्यभावे तृतीया । अन्तर्द्वोर्यैनादर्शनमिच्छतीतिवत् । पुष्ययोगं जानाति पुष्येण योजयति युनेः कर्तुः पुष्यस्य गत्यादिकर्तृष्वनन्तर्भावेण हेतुमण्णौ न कर्मता किन्तु कर्तृत्वमेवेति । इहापि तथा, तेन तृतीयैव । इदञ्च आरव्यानात्कृत इत्यादि वार्त्तिकजातं भाष्यवार्त्तिकयोरेव प्रत्याख्यातम् । तदीयलक्ष्यजातस्य आरोपेणापि सूपपादत्वात् । तथाहि । कंसं घातयतीति तावदारोपः । ये हि कंसाद्यनुकारिणां नटानां व्याख्यानोपाध्यायाः ते कंसानुकारिणं नटं सामाजिकैः कंसबुद्ध्या गृहीतं तादृशेनैव वासुदेवेन घातयन्तीव । येपि चित्रं व्याचक्षते इयं मथुरा अयं प्रासादः अयं भगवान् वासुदेवः प्रविष्टः इत्यादिक्रमेण, तेपि तथैव । येपि ग्रन्थं वाचयन्तः कंसवधमाचक्षते ग्रन्थिका नाम तेपि तत्तत्पदार्थविषयकनिश्चयोत्पादनात्तास्ताः क्रिया निर्वर्तयन्तीव । तथा च स्पष्ट आरोपः । किञ्च गच्छ हन्यते कंसः गच्छ घानिष्यते किं गतेनेह तेन हतः कंस इत्यादिषु निरूढेषु व्यवहारेषु तवाप्येषैव गतिः । नह्यत्र णिज्विधिः किञ्चिदुपकरोति । उक्तोदाहरणेषु णिच्प्रवेशाभावात् । उक्तञ्च शब्दोपहितरूपांश्च बुद्धेर्विषयताङ्गतान् । प्रत्यक्षमिव कंसादीन् साधनत्वेन मन्यत इति ॥ एवं राजानमागमयतीत्यादावापि बोध्यम् । राजानमानयतीत्यादौ हि णिजभावात्तवाप्येषैव गतिः ।

रात्रिं विवासयतीत्यत्रापि विचित्रकथाख्यानेन रात्रिरनेनैव गमितेति आरोपः। निशान्निनायेत्यादौ च तवाप्येषैव गतिः। सूर्यमुद्गमयतीत्यत्रापि प्रयोज्यप्रयोजकभावाध्यारोपः तदालम्बनन्तु माहेष्मत्यां सूर्योद्गमनं लभेयेत्येवंरूपस्य देवदत्ताभिप्रेतार्थस्य निर्वृत्तिरेव। यो हि यस्य प्रवर्त्यः स तस्याभिप्रेतं निर्वर्त्तयति। तत्र स्वभृत्यर्थं प्रवर्तमाना अपि शिष्यादयो गुर्वभिप्रेतमपि उद्दिशन्त्येव। सूर्यस्तु न देवदत्ताभिप्रेतोद्देशेन प्रवर्तत इति वैषम्यम्। तथापि अभिप्रेतार्थसम्पत्तिमात्रेण आरोपे न काचित् क्षतिः। एवं पुष्येण योजयतीत्यत्रापि ज्योतिःशास्त्रपरिशीलनेन पुष्ययोगस्य सर्वान्प्रत्याविष्करणात् योजयतीवेत्यारोपः॥

इति श्रीशब्दकौस्तुभे तृतीयस्याध्यायस्य
प्रथमपादे द्वितीयमान्हिकम्॥

कण्ड्वादिभ्यो यक्॥ एभ्यो धातुभ्यो यक् स्यात्स्वार्थे। कण्डूञ्। कण्डूयति। कण्डूयते। न च कण्ड्वादीनि प्रातिपदिकान्येवेति वाच्यम्। गुणनिषेधार्थेन यकः कित्त्वेन तेषां धातुत्वसिद्धेः। न चैवं धातोरित्यनुवृत्तेर्वैयर्थ्यमिति वाच्यम्। प्रातिपदिकानां वारणीयत्वात्। न चैते धातव एवेति वाच्यम्। कण्ड्वादिषु केषां चिद्दीर्घपाठेन प्रातिपदिकत्वसिद्धेः। यदि हि धातव एव ते स्युस्तर्हि वाग्रहणं निवर्त्य नित्यो यगिति तावदास्थेयम्। अन्यथा शबादौ कण्डवतीत्याद्यनिष्टरूपप्रसङ्गात्। एवं स्थिते ह्रस्वान्तादपि यकि मन्तूयतीत्यादिवदकृत्सार्वेति दीर्घत्वे कण्डूयतीत्यादिसिद्धेः किं दीर्घपाठेन। तस्मात् कित्त्वदीर्घाभ्यां ज्ञापकाभ्यां धातवः प्रातिपदिकानि चेति द्विविधाः कण्ड्वादय इति स्थितम्। उक्तञ्च भाष्ये। धातुप्रकरणाद्धातुः

कस्य चासञ्जनादपि॥ आहचायमिमं दीर्घं मन्ये धातुर्विभाषित इति। तत्र धात्वधिकारात् धातुभ्य एव प्रत्ययः। स च नित्य इति सिद्धान्तः। स्यादेतत्। एषां प्रातिपदिकत्वमेवास्तु त्यज्यतां दीर्घपाठः प्रत्ययस्य कित्वञ्च। नचैवमकृत्सार्वेति दीर्घः ङिति विधीयमान इह न स्यादिति वाच्यम्। तत्र ङितीत्यस्य निवृत्तेः। न चैवमुरुया धृष्णुयेत्यादावतिप्रसङ्गः। तस्य छान्दसत्वात्। न च यको नित्यत्वे कण्डूरिति न सिद्ध्येदिति वाच्यम्। कण्डूयशब्दात्सम्पदादित्वाद्भावे क्वौ अल्लोपे लोपोव्योरिति यलोपे च तत्सिद्धेः। न च यलोपेल्लोपस्य स्थानिवत्त्वं शङ्क्यम्। नपदान्तेति निषेधात्। न चैवमल्लोपस्य स्थानिवत्वादुवङ् स्यादिति वाच्यम्। सति स्थानिवत्वे अकारान्तस्यैव धातुतेति पूर्वदले उवङोप्राप्तेः। तर्हि यण् स्यादिति चेत्। अस्तु, तस्य ऊठ् करिष्यते। न च ऊठि कर्तव्ये अल्लोपस्य स्थानिवत्वेन क्विप्परत्वं नास्तीति वाच्यम्। वकारस्य आदिष्टादचः पूर्वत्वात्। ननु स्थानिद्वारकमनादिष्टादचः पूर्वत्वमस्त्येव। न च तस्याशास्त्रीयत्वान्नातिदेश इति माधवोक्तं युक्तम्। अनादिष्टादचः पूर्वत्वमाश्रित्य कर्तव्यस्य अचःपरस्मिन्नित्यतिदेशस्य शास्त्रीयतया स्थानिवत्सूत्रेण अतिदेशातिदेशस्य दुर्वारत्वात्। अन्यथा नपदान्तेति सूत्रे सवर्णग्रहणस्य वैयर्थ्यापत्तेरिति चेन्न। स्थानिद्वारकस्य अनादिष्टादचःपूर्वत्वस्य असार्वत्रिकतायाः प्रागेव निर्णीतत्वात्। अत एव ऊठि कृते पुनरुवङ् न। यद्वा क्वौ लुप्तं न स्थानिवदिति निषेधाद्यणेव मास्तु। नन्वेवमपि कण्ड्वावित्यादौ संयोगपूर्वकत्वेन ओःसुपीत्यस्याप्रवृत्तौ उवङ्स्यादिति चेत्। अस्तु, क्विपः प्रत्ययलक्षणेनोठं करिष्यामः। तत्तस्मा प्रातिपदिकान्येवैतानि दीर्घकित्वे च निष्फले इति चेत्।

मैवम् । उवङो बहिरङ्गत्वेनासिद्धतया ऊठो दुर्बलत्वात् । किञ्चोक्तरीत्या हि कण्डूरितिवत् मन्तूरित्यादि स्यात् । मन्तरित्यादि च न सिध्येत् । अथ धातोःकर्मण इत्यतो वाग्रहणमनुवर्तेत तर्हि यद्यपि मन्तुरित्यादि ह्रस्वं सिद्धं तथापि कण्डूरितिवदल्लोपयलोपाभ्यां मन्तूरित्यपि स्यात् । तथा यगनुत्पत्तिपक्षे मन्तुरित्यादिवत् कण्डुरित्यपि स्यात् । किञ्च सुखादिभ्यो यप्रत्यये तस्य अनार्द्धधातुकत्वादतोलोपाभावे अकृत्सार्वेति दीर्घे सुखायतीत्यादि स्यात् । सुख्यतीत्यादि चेष्यते । अथ हलन्तमेव पठ्येत, तर्हि सुखं दुःखमित्यकारान्तं न सिध्येत्। तस्माद्यथान्यासमेव मनोरमम् । नन्वेवमपि प्रातिपदिकैः कण्ड्वौमन्तुरित्यादि यद्यपि सिद्धं तथापि यगन्तेभ्यः क्वौ अनिष्टं स्यादेव । तद्यथा । कण्डूयतेः कण्डुवौ कण्डुवः । मन्तूयतेः मन्तूः। सुखादेः सुगित्यादि हलन्तम् । नैष दोषः । यगन्तेभ्यः क्विप एवानुत्पत्तेः । उक्तं हि भाष्ये ।। नैतेभ्यः क्विप् द्रक्ष्यतइति । कथन्तर्हि कण्डूयतेरप्रत्ययः कण्डूरिति नपदान्तसूत्रे उक्तमिति चेत् । क्यजन्तात्क्विपीत्येवेहि । तत्र च कण्डुवाविति वाङिष्ट एव। एवं प्रातिपदिकादाचारक्विबन्तात्क्यङन्ताद्वा क्विप्यपि बोध्यम् । स्यादेतत् । कण्ड्वादयः प्रातिपदिकान्येव यथान्यासं दीर्घाश्च सन्तु। ककारस्तु त्यज्यतां वाग्रहणञ्चानुवर्त्यताम्। यगन्तात्क्विबपोनाभिधानञ्च आवयो स्तुल्यं तत्किं कण्ड्वादीनां धातुत्वेनेति चेत्, उक्तरीत्या सुख्यतीत्याद्यसिद्धेः, प्रातिपदिकात्प्रत्यये तस्यानार्द्धधातुकत्वेन सुखायतीति स्यादिति हि स्पष्ट एव दोषः । यन्तु कौमुद्याम् । कृञर्थे यक् स्यात् । धातवः प्रातिपदिकानि चेति कण्ड्वादयो द्विविधाः । कण्डूं करोति कण्डूयते । नामधातुत्वाद्यथेष्टं द्वित्वे प्राप्ते कण्ड्वादेस्तृतीयस्य इत्युक्तं तदेत-

त्सर्वधाकरविरुद्धमनेकदोषग्रस्तञ्च । तथाहि । कृञर्थइति व्याख्यानेन करणे इत्यस्यानुवृत्तिर्लभ्यते तच्च व्यर्थं धात्वर्थमात्रस्यानुवृत्तिं विनापि लाभात् । ततोतिरिक्तस्य चानन्वयात् । एवञ्च कण्डूं करोतीति विग्रहप्रदर्शनमप्ययुक्तम् । नामधातुत्वादिति च सुतरामशुद्धम् । धात्वधिकाराद्धातुभ्य एव यगिति सिद्धान्तात् । अथ प्रातिपदिकादेव यकमभ्युपैषि तर्हि लडादौ कण्डयतीत्यादि स्यात् । अथ प्रातिपदिकान्येव कण्ड्वादीनीत्यभिप्रैषि तर्हि सुख्यतीत्यादि न सिध्येत् । द्विविधाः कण्ड्वादय इति स्वोक्तिविरोधश्च । आकरविरोधस्तु स्पष्ट एवेत्यास्तां तावत् । मान्यास्तु अनेकदोषदुष्टमपीमं प्रक्रियाप्रपञ्चं कथञ्चित्समर्थयन्ते । तद्यथा । प्रातिपदिकान्येव कण्ड्वादयः तेभ्यश्च वैकल्पिको यक् इति पक्षेणायं ग्रन्थः । अत एवोक्तं कृञर्थे इति विसृहीतञ्च कण्डूं करोतीति च । नहि धातुभ्यो यकि प्रातिपदिकेभ्यो वा नित्ये यकि अयं विग्रहः सम्भवति । एवञ्च नामधातुत्वादित्याद्यपि सम्यगेव । कथन्तर्हि द्वैविध्यमुक्तमिति चेत् । यगन्ताः सन्तो धातवः । केवलास्तु प्रातिपदिकानीत्याशयात् । यद्वा यगन्तधात्ववयवेषु तेषु धातुशब्दो गौणः । प्रत्ययसदसद्भावाभ्याम् अवस्थाभेदाद् द्वैविध्यम् । न चैवं सुख्यतीत्यादौ अतोलोपो न स्यादिति वाच्यम् । यकः कित्त्वेन आधद्यवयवत्वाल्लाघवाच्चार्द्धधातुकत्वस्यैव ज्ञापनात् । अत एव द्विविधा इत्येवोक्तं न तु धातुभ्यएव यगिति । तदिदं भाष्यादिविरुद्धमपि लक्ष्ये विसंवादाभावादस्तु कथञ्चित् । अथोदाहरणानि । कण्डूञ् गात्रविघर्षणे । अवयवे कृतं लिङ्गं समुदायं विशिनष्टि । एवमग्रेपि । कण्डूयति । कण्डूयते । मन्तु अपराधे । रोषइत्येके । मन्तूयति । चन्द्रस्तु ञितं पठित्वा मन्तूयते इत्य-

प्याह। वल्गु पूजायामाधुर्ययोः। वल्गूयति। तद्वल्गुना धुगपदुम्भिषितेन। असु उपतापे। असूयति। असूयुः। मृगय्वादयश्चेत्युमत्यय इति माधवः। एतेव सन्तः मणयिवाक्यानि गृह्णन्ति खनसूयव इति भट्टिप्रयोगो व्याख्यातः। केचित्तु असू असूङ् इति पठित्वा आद्यस्य सान्तस्य अस्यति, द्वितीयस्य दीर्घान्तस्य असूयति असूयते इत्याहुः। लेट् लोट् धौर्त्ये पूर्वभावे स्वप्ने च। लेट्यति। लोट्यति। लोटिता लोटिता। अल्लोपयलोपौ। केचित् लेट्लोटौ दीप्त्यर्थावाहुरिति माधवः। पूर्वभावः पूर्वत्वम्। अत्र केचित् पूर्वशब्दं प्रकृतिनिर्देशार्थमाश्रित्य पूर्व्यतीत्युदाहरन्ति। तथा चान्तःकरणवृत्तिवर्गे भट्टमल्लेनोक्तम्। शेते द्रायति निद्राति सस्ति स्वपिति पूर्व्यति। निद्रायते संविशति निद्रायां संस्ति मन्दते इति॥ अस्यार्थो धातुचन्द्रोदये उक्तः। शेतेप्रभृतीनि दशाख्यातानि निद्रायाम्। घस स्वप्ने अदादिः। घसिं शयनाख्येके पेठुरिति तत्रैव क्षीरस्वामी। पूर्व्यतीति कण्ड्वादियगन्त इत्यादि। तथा देवेनाप्युक्तम्। पूर्व्यतीति तु यस्वप्ने तत् कण्ड्वादिषु दर्शनादिति। एतच्च अमोघायां शाकटायनधातुवृत्तौ अर्थनिर्देशरहिते गणपाठे पूर्वस्य पाठाभावादयुक्तामिति पुरुषकारैरेव दूषितम्। युक्तञ्चैतत्। जयादित्येनापि लेट्लोट् इत्येव पाठात्। हरदत्तेन च धौर्त्ये पूर्वभावे स्वप्ने चेति तद्विवरणात्। एतेन बुद्धिवर्गे मनसामोचरीकारे मनस्विन्वे मनस्यतीति भट्टमल्लोक्तिरपि प्रत्युक्ता। न्यायसाम्यात्। जयादित्येन हि असु इत्येव निर्दिष्टम्। हरदत्तेन तु अथ कण्ड्वादीनामर्थनिर्देश इत्युपक्रम्य कण्ड्वादीन् विवृण्वता असु इति प्रतीकमुपादाय मानसउपतापे इति विवृतम्। अत एव असु मनस उपतापइति पठतामपि मनस इति षष्ठ्यन्तमुपतापविशेषणम्। न तु प्रकृतिनिर्देशः। वृत्तिपद-

मञ्जर्यादिविरोधात् । धातुचन्द्रोदयकारस्य तु मनस्यतीति कण्ड्वादियगन्तमिति भूयसा ग्रन्थसन्दर्भेण व्याचक्षाणस्यापि तत्रापरितोषोस्त्येव । अत एव मनस्यते इति पाठमाश्रित्य मनःशब्दाद्वृत्तिविषये तद्वतिवर्त्तमानात् क्यङञ्चोक्त्वा इदं शोभेतेतरामित्युपसञ्जहार । लेला दीप्तौ । ध्यायतीव लेलायतीवेति श्रुतिः । इरस् इरज् इरञ् ईर्ष्यायाम् । इरस्यति । इरज्यति । ईर्यति । ईर्यते । हलिचेति दीर्घः । एषां त्रयाणां यथायथमन्येष्यर्थाः सन्ति । तथाहि । इरज्यन्नग्ने प्रथयस्वजन्तुभिरिति मन्त्रे दीप्त्यर्थोयमिति भट्टभास्करादयः । इरज्यन्तावसव्यस्य भूरेरितिमन्त्रऐश्वर्यार्थ इति । ईर्यतिर्मार्गावस्थानेपि । उक्तञ्चामरेण चर्यात्वीर्यापथिस्थितिरिति । इयस् ऐश्वर्यइति गणरत्नमहोदधौ । इयस्यति । उषस् प्रभातीभावे । उषस्यति रात्रिः । वेद धैर्त्ये स्वप्ने च । वेद्यति । मेधा आशुग्रहणे । मेधायति । कुषुभ क्षेपे । कुषुभ्यति । मगध परिवेष्टने । नीच दास्यइत्यन्ये । मगध्यति । तन्तस् पम्पस् दुःखे । तन्तस्यति । पम्पस्यति । सुख दुःख तत्क्रियायाम् । तच्छब्देन सुखदुःखार्थौ । सुखदुःखरूपायां क्रियायामित्यर्थः । सुख्यति । दुःख्यति । सुखं दुःखं चानुभवतीत्यर्थः । सपर पूजायाम् । अकारान्तोयं महोदधौ । सपर्यति । अरर आराकर्मणि । आरा प्रतोदः । अरर्यति । भिषज चिकित्सायाम् । भिषज्यति । भिष्णज उपसेवायाम् । भिष्णज्यति । सारस्वती त्वा मघवन्न भिष्णक् । छान्दसो लुक् । इषुध शरधारणे । इषुध्यति । चरण वरण गतौ । चरण्यति । वरण्यति । चुरण चौर्ये । चुरण्यति । तुरण त्वरायाम् । तुरण्यति । भुरण धारणपोषणयोः । रणधारणयोरित्यन्ये । भुरण्यति । गद्गद वाक्स्खलने । गद्गद्यति । एला केला खेला विलासे । ए-

लायति। केलायति। खेलायति। एला स्थानइलेत्यपरे। इलायति। लेखा स्खलने च। लेखायति। अकारान्तोयमित्यन्ये। तत्रातोलोपः। लेख्यति। लिट अल्पकुत्सनयोः। लिटयति। लाट जीवने। लाटयति। हृणीङ् रोषणे लज्जायाञ्च। कथं न पत्या धरणी हृणीयतइति श्रीहर्षः। महीङ् पूजायाम्। अत्र पूजा पूज्यमानकर्तृका तेनायमकर्मकः। महीयते। पूजामाधिगच्छतीत्यर्थः। मातापितरौ चास्य स्वर्गे लोके महीयेते इति भाष्यम्। रेखा श्लाघासादनयोः। आसादनं प्राप्तिः प्रापणं वा। रेखायति। श्लाघामनुभवत्यनुभावयति वेत्यर्थः। द्रवस् परितापपरिचरणयोः। द्रवस्यति। तिरस् अन्तर्धौ। तिरस्यति। अगद नीरोगत्वे। अगद्यति। उरस् बलार्थः। उरस्यति, बलवान् भवतीत्यर्थः। तरण गतौ। तरण्यति। पयस् प्रसृतौ। पयस्यति। सम्भूयस् प्रभूतभावे। सम्भूयस्यति। अम्बर संवर सम्भरणे। अम्बर्यति संवर्यति। गणरत्नमहोदधौ आकृतिगणत्वात् रैधबलादिभ्यो यकि रायति धवल्यतीत्याद्युक्तम्। कण्ड्वादीनां तृतीयस्य द्वे इति वक्ष्यते। तेन सनि कण्डूयियिषतीत्यादि॥

गुपूधूपविच्छिपणिपनिभ्य आयः॥ एभ्य आयप्रत्ययः स्यात् स्वार्थे। गुपू रक्षणे। गोपायति। धूप सन्तापे। धूपायति। विच्छ गतौ। विच्छायति। विच्छेस्तुदादिपाठसामर्थ्यादायप्रत्ययान्तादपि शो न तु शप्। तेन विच्छायन्ती विच्छायतीति। आच्छीति नुम्विकल्पः। अन्ये तु तुदादिपाठसामर्थ्यात्साधातुकेप्यस्य आयप्रत्ययो वैकल्पिक इत्याहुः। पण व्यवहारे स्तुतौ च। पन च। पणपनेति पठनीये पनचेति पृथक्पाठसामर्थ्यात् स्तुतावेवाय, न्तत्साहचर्यात्पणेरपि स्तुतावेवायप्रत्ययः। अनुदन्धस्य केवले चरितार्थत्वादायप्रत्ययान्तान्नात्मनेपदम्। प

णायति । पनायति । स्तौतीत्यर्थः । व्यवहारे तु शतस्य पणते इति जयादित्यादयः । अन्ये तु व्यवहारार्थादप्यायामिच्छन्ति । तथा च भट्टिः । न चोपलेभे वणिजां पणायामिति । अस्मिन्नपि पक्षे पणिष्यते पणायिष्यतीत्यादौ अनुबन्धः केवले चरितार्थ एव । अत एव पनेरपि आयप्रत्यये परस्मैपदमेव ॥

ऋतेरीयङ् ॥ ऋतिः सौत्रः तस्मादीयङ् स्यात् । ऋतीयते । ईयङो ङित्त्वस्य गुणनिषेधेन चरितार्थत्वेपि धातोर्ङिदन्तत्वाद्यङन्तादिवात्मनेमदम् । यथा चैतत्तथा अनुदात्तङित इति सूत्रेण वावोचाम ॥ ऋतेश्छङीति सिद्धे ईयङ्वचनं धातुप्रत्ययानामायन्नादयो नेति ज्ञापनार्थम् । तेन शमेः खः शङ्ख इत्यादि सिध्यतीति वृत्तिकारादयः । हरदत्तस्तु द्विचवनविभज्योपपदेतरप्छसुनाविति वक्तव्ये ईयसुन्वचनमधातुप्रत्ययेष्वपि आयन्नाद्यभावं ज्ञापयेदिति प्रतिबन्दिनमाह । तत्र ईयसुन्वचनं प्रक्रियालाघवार्थमेव न तु ज्ञापनार्थम् । आयन्नादीनां निर्विषयतापत्तेः । न च विनिगमनाविरहः । ण्यक्षत्रियेत्यादिसौत्रनिर्देशानामेव विनिगमकत्वादिति समाधानं बोध्यम् । ऋतिः सौत्रो घृणायां वर्त्तत इति वृत्तिः । यद्यपि घृणाशब्दो नानार्थः । घृणाजुगुप्साकृपयोरितिवचनात् । तथापीह जुगुप्सार्थ एवाऋतीयाशब्दस्य बीभत्सापर्यायतया निघण्टुषु पाठादिति हरदत्तादयः । भट्टमल्लस्तु आख्यातचन्द्रिकायां तृतीयकाण्डे नानार्थवर्गे ऋतीयते स्याद् घृणयोरिति पठन् नानार्थतामियेष । अर्तनं च ऋतीया च त्दणीया च घृणार्थका इति वदन्नमरोप्यत्रानुकूलः । यदि हि जुगुप्सामात्रार्थत्वमिच्छेत्तर्हि त्दणीया च जुगुप्सने इत्येव स्पष्टं पठेत् । नानार्थे घृणाशब्दं प्रयुंजानस्तु ऋतेरपि तथात्वमाभिमैतीति पदचन्द्रिकाव्याख्याने धातुचन्द्रोदये कृष्णप्रबोधः । आर्धधातुकविवक्षायान्तु

ईयङ्भावपक्षे शेषत्वात्परस्मैपदमेव। आनर्त। आर्तितासि। आर्तिष्यति। आर्तीत्। आर्तिष्यत्। अत्रात्मनेपदं समुदाहरन् प्रसादकारस्तु भ्रान्त एव॥

कमेर्णिङ्॥ स्वार्थे। कामयते। नन्विह अतउपधाया इति वृद्धेः ङितिचेतिनिषेधः प्राप्नोति। न च णित्वसामर्थ्याद्वृद्धिः। णेरनिटीतिविशेषणेन चरितार्थत्वात्। न च ङकारोप्यात्मनेपदेन चरितार्थ इति वाच्यम्। तावता प्रतिषेधस्य बलीयस्त्वानपायात्। न च कमेर्मित्संज्ञाप्रतिषेधार्थेन कम्यमिचमामितिवचनं वृद्ध्यभावे व्यर्थं सत् वृद्धिमिह ज्ञापयतीति वाच्यम्। णिङन्ताच्चिण्णमुलोः कृतयोः चिण्णमुलोर्दीर्घोन्यतरस्यामिति वैकल्पिके दीर्घे प्राप्तेतन्निवृत्त्या मित्त्वप्रतिषेधस्य सार्थक्यात्। न च तत्र दीर्घग्रहणं परित्यज्य प्रकृतो ह्रस्व एव विकल्प्यताम्। तथा च कमेर्मि त्संज्ञाप्रतिषेधोपि मास्त्विति वाच्यम्। णिजन्ताद्यङन्ताद्वा णिचि सति ततश्चिण्णमुलोः अशमि अशामि शमं शमं शामं शामम् अशंशमि अशंशामि, शंशमं शंशमं शंशामं शंशामामिति रूपद्वयस्य दीर्घग्रहणं विना अनिर्वाहात्। दीर्घविधिम्प्रति हि णियङोर्लोपस्य न स्थानिवत्त्वं नपदान्तेति निषेधात्। ह्रस्वविधिम्प्रति तु स्थानिवत्त्वे सति चिण्णमुलपरस्य णिचः णियङ्व्यवधाने ह्रस्वविकल्पो न प्रवर्त्तेत। यथाश्रुतसूत्ररीत्या चेदम्। पूर्वत्रासिद्धीयेनेत्युक्त्वा सवर्णानुस्वारादिग्रहणं न कर्तव्यमिति पक्षे तु णिजन्ताण्णिचि ण्याकृतेरैक्यात् सिद्धम्। शंशामं शंशामामिति तु यङ्लुगन्ताण्णमुलिति नपदान्तसूत्रएवावोचाम। अस्मिन्निष्कृष्टपक्षेपि चिण्णमुलोरितिसूत्रे दीर्घग्रहणं कर्तव्यमेव। तथाहि। हेडृ अनादरे घटादिः। एच इक्। हिडयति। अत्र चिण्णमुलोः कृतयोः ह्रस्वे विकल्प्यमाने आहिडि अहेडीति स्यात्।

दीर्घे तु अहिडि अहीडि इति भवति । एवञ्च कमेरपि चिण्णुलोः दीर्घविकल्पे प्राप्ते तद्व्यावृत्त्या कृतार्थो मित्वनिषेधो वृद्धिं ज्ञापयितुं नालम् । किञ्च आयादयआर्द्धधातुकेवेति णिङ्भावे णिचि कृते वृद्धौ सत्यां मितांह्रस्वइति ह्रस्वं वारयितुं मित्संज्ञाप्रतिषेधः, सर्वथा ऽपि नायं वृद्धेर्ज्ञापकः । तस्मात् ङितिचेति निषेधं वारयितुं कश्चिदुपायो वक्तव्य इति चेत् । सत्यम् । उक्त एवासौ तद्धितकाम्योरिक्प्रकरणादिति ॥

आयादय आर्धधातुके वा ॥ आर्द्धधातुकविवक्षायामायादयो वा स्युः । जुगोप । गोपायाञ्चकार । आनर्त । ऋतीयाञ्चक्रे । कामयाञ्चक्रे । चकमे । इहार्द्धधातुकइति यदि परसप्तमी स्यात् तदा प्रवृत्ता आयादय आर्द्धधातुके परे पक्षे निवर्तन्तइत्यर्थः स्यात् । तत्र बहवो दोषाः । तथाहि । आयप्रत्ययान्तात् स्त्रीभावविवक्षायामप्रत्ययादित्यकारप्रत्यये कृते आयनिवृत्तिपक्षे गोपेत्यनिष्टं स्यात् । गुप्तिरिति चेष्टं न सिध्येत् । तथा ऋतीयशब्दाल्लिटि प्रत्ययान्तत्वेनामि ईयप्रत्ययस्य निवृत्तौ ऋताञ्चकारेति स्यात्, आनर्तेति च न स्यात् । तथा आर्तीतासि । अर्तिष्यति । ऋत्यात् । आर्तीदित्यादौ परस्मैपदं न स्यात् । तथा तास्यादेरार्द्धधातुकस्य ईयङ्निवृत्तिं प्रति निमित्तत्वेन नधातुलोपइति निषेधात् तन्निमित्तो गुणो न स्यात् । अथोच्येत नानेन निवृत्तिर्विकल्प्यते किन्तु प्रवृत्तिरेवेति । तत्रापि आयादिविधिभिः सहास्यैकवाक्यता भिन्नवाक्यता वा । आद्ये गुपादिभ्य आर्द्धधातुके परे आयो वेत्यर्थः स्यात् । एवमुत्तरत्रापि । ततश्च आर्द्धधातुकएव विकल्पेनायादयः सार्वधातुके तु नैव स्युः । अथोच्येत गुपादिसूत्रएव आर्धधातुकेवेति वक्तव्ये आयादयइति न कर्तव्यमिति लाघवे स्पष्टे सति गौरवं सोढा । आयादयआ-

र्धधातुकेवेति पृथक्सूत्रकरणसामर्थ्यात् व्यापारभेदेनैकवाक्यता। ततश्चायमर्थः। गुपादिभ्य आयादयो नित्यं भवन्तीत्युत्सर्गः। आर्द्धधातुके परे तु वा भवन्तीति। एवञ्च विकरणवत् प्रत्यये परे आयादयः प्रवर्तेरन्। ततश्च गुपेः क्तिनि आयपक्षे अल्लोपयलोपयोः गोपातिरित्यनिष्टं स्यात्। गोपायेति चेष्टं न सिध्येत्। तस्माददुष्ट एवात्र परसप्तमीपक्षः॥

सनाद्यन्ता धातवः॥ सनादयो णिङन्ताः प्रत्यया अन्ताश्चरमावयवा येषान्ते संघाता धातुसंज्ञाः स्युः। जुगुप्सते। कामयते। सुप्तिङन्तमित्यत्र अन्तग्रहणेन संज्ञाविधौ प्रत्ययग्रहणे प्रत्ययग्रहणपरिभाषा न प्रवर्त्ततइति तत्प्रतिप्रसवार्थमिहान्तग्रहणं न त्वयमपूर्वविधिः। गौरवात्। देवदत्तश्चिकीर्षतीत्यादौ देवदत्तादेः समुदायस्य संज्ञाप्रसङ्गाच्च। प्रतिप्रसवे तु लाघव उक्तदोषाभावश्चेति स्पष्टमेव। भूवादय इत्यस्यानन्तरमेव सनाद्यन्ता इत्येव न सूत्रितं सनादीनामियत्तानवगमात्। णिङो ङकारेण प्रत्याहारमाश्रित्य सङन्ताश्चेति कुतो न सूत्रितामिति चेत् चङादिष्वपि ङकारसत्वेन सन्देहापत्तेः। इहैव सनाद्यन्ता इत्यस्यानन्तरं भूवादयश्चेति सूत्रयितुमुचितं तथा न कृतामित्येव। एतत्सूत्रं भाष्ये प्रत्याख्यातम्। तथाहि। जहत्स्वार्थायां वृत्तौ चिकीर्षजिहीर्षेत्यादिसङ्घाता एवार्थवन्तः तदवयवा अनर्थकाः। सर्वे सर्वपदादेशा इत्यत्र च अर्थवत्येव स्थान्यादेशभावविश्रान्तेः। एरुरित्यादौ तेस्तुरिति पर्यवस्यतीत्युक्तम्। एवञ्चेहापि करणविशिष्टेऽर्थस्येषः प्रसङ्गे चिकीर्षशब्दः तथा हरणविशिष्टेऽर्थवृत्तेः प्रसङ्गे जिहीर्षशब्दः गुपेः प्रसङ्गे गोपायशब्दः पुत्रविशिष्टेच्छावृत्तेरिषेः प्रसङ्गे पुत्रीयशब्द इत्यादि पर्यवसाने स्थानिवद्भावेन सिद्धं धातुत्वम्। जगृध्यादिवत्। पचात्वित्यत्र तोस्तिङ्-

स्ववच्च । स्यादेतत् । स्थानिवत्सूत्रे आदेशशब्देन चिकीर्षादयो ग्रहीतुं न शक्यन्ते आदेशशब्दस्य षष्ठीनिर्दिष्टस्थानिनिवर्त्तकेष्वेव रूढत्वादिति चेन्न । स्थानिवादित्युक्तयैव आदेशस्य लाभे पुनस्तद्ग्रहणसामर्थ्येन अनुमीयमानस्य तेस्तुरित्यादेरिव आदिश्यतइतियौगिकार्थपुरस्कारेण चिकीर्षादेरपि सुग्रहत्वात् । न च पुत्रीयादिरादेशः सुबन्तस्यैव न त्विषेरिति वाच्यम् । अणुरपि विशेष इति न्यायेन प्रधानसमर्पकस्य इषेरेव तदभ्युपगमात् । वाक्यष इत्यादिलिङ्गैरपि धातुत्वस्यावश्यकत्वे स्थिते तन्निर्वाहाय इच्छायामाचारेभुवीत्यादिक्रियासमर्पकाणामेव स्थानित्वनिर्णयाच्चेति दिक् ॥

स्यतासी लृलुटोः ॥ लृइति लृङ्लुटोः सामान्यग्रहणम् । धातोः लृइत्यस्मिन् लुटि च परे यथासङ्ख्यं स्यतासी प्रत्ययौ स्तः । अकरिष्यत् । करिष्यति । श्वः कर्त्ता । तासेरिकार इत्संज्ञक इति जयादित्यः।तथाहिमन्ता हन्तेत्यत्र मन् तास् आ हन् तास् आ इति स्थिते टिलोपे कृते डाप्रत्ययम्प्राप्ति तान्तमङ्गन्तस्य उपधानकारः। तस्यानिदितामिति लोपः प्राप्तः तं वारयितुं तासेरिदित्वमेषितव्यम्।न चाभीयत्वेन टिलोपस्यासिद्धत्वात् नकार उपधा नेति वाच्यम् । आभात्सूत्रस्य भाष्ये प्रत्याख्यानात् । सूत्रमतेपि आभीयस्य असिद्धत्वस्य अनित्यत्वाच्च । तत्र च श्नसोरल्लोप इति तपरकरणं लिङ्गम् तद्धि आस्तामासन्नित्यादौ मा भूदित्येवमर्थम् । तत्राटोसिद्धत्वादेव लोपाप्रसक्तौ तपरत्वं व्यर्थं सत् असिद्धत्वस्यानित्यतां ज्ञापयति । तेन देभतुर्देभुरित्यत्र श्नन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः क्ङित्वाच्चलोपे तस्यासिद्धत्वाभावात् एत्वाभ्यासलोपौ स्तः । एवञ्चेहापि टिलोपस्यासिद्धतानिरहे प्राप्तो नलोप इदित्त्वेन वार्यते । न चैवं नुम्विधौ धातु-

ग्रहणस्य तासिव्यावृत्त्या कृतार्थत्वेन धातूपदेशावस्थायामेव नुम् भवतीत्ययमर्थो न साधितः स्यादिति वाच्यम्। नुम्विधावुपदेशिवद्वचनं प्रत्ययसिध्यर्थमिति वचनस्यैव शरणीकरणात्धिन्विकृण्व्योरिति सनुम्कानिर्देशाज् ज्ञापकाद्वा। वामनस्तु तासेरिकार उच्चारणार्थ इत्याशयेन इदितोनुम्धातोरिति धातुग्रहणं धातूपदेशावस्थायामेव नुम् यथा स्यादित्येवमर्थं मन्यते। तन्मते मन्ता हन्तेत्यत्र टिलोपस्यासिद्धत्वान्नलोपो नेति बोध्यम्। इदमिदानीं विचार्यते। लकारं निमित्तत्वेनाश्रित्य विधीयमानाः स्यादयो विकरणाः किं लावस्थायामेव स्युः, उत लादेशेषु कृतेष्विति। आद्ये पक्षे लावस्थायान्तासौ कृते तस्य प्रत्ययाद्युदात्तत्वे कृते लादेशाः स्युः ततश्च तेषां स्वरः सतिशिष्टः। ततश्च तासेः परस्य लसार्वधातुकस्यानुदात्तवचनमप्राप्तविधिरेव स्यात्। एवञ्च सतिशिष्टोपि विकरणस्वरो लसार्वधातुकस्वरं न बाधतइत्यस्यार्थस्य ज्ञापकमेतदिति षाष्ठः सिद्धान्तो भज्येत। ततश्च या दम्पती समनसा सुनुतइत्यत्र सतिशिष्टस्य विकरणस्वरस्य बलीयस्त्वापत्तौ मध्योदात्तं तिङन्तं स्यादिष्यते त्वन्तोदात्तम्। एवं प्रीणीताश्वान्, हिन्वन्ति सूरमित्यादिष्वपि स्पष्टो दोषः। द्वितीये तु पक्षे तासिस्वरः सतिशिष्ट इति शेषनिघातेनैव लसार्वधातुकानुदात्तत्वे सिद्धे तासिग्रहणं ज्ञापकमिति सिध्यति। किन्तु गमिष्यति पठिष्यतीत्यादि न सिद्ध्यति। तथाहि। सार्वधातुके यगुत्सर्गः तस्यापवादाः शबादयः स्यादयश्च। तत्र शबादीनामवकाशः गच्छति पठति। स्यादीनान्तु गंस्यते पठिष्यतइति। गमिष्यति पठिष्यतीत्यत्रोभयप्रसङ्गे परत्वाच्छप् प्राप्नोति। अथोच्येत। यकः शबादीनाञ्च नोत्सर्गापवादभावः। विविक्तविषयत्वात्। यग्विधौ हि भावकर्मग्रहणमनुवर्त्तते तच्चावश्यमनुवर्त्यम्। पचति पठती

त्यादौ शपि परे यङ् मा भूदिति । एवमपि गमिष्यति पठिष्यतीत्यादि सिध्यतु नाम । यक्शपोरुत्सर्गयोः स्यादिभिरपवादैर्बाधसम्भवात् । किन्तु देविष्यति सेविष्यतीत्यादि न सिध्येदेव । तथाहि । विकरणानां यक्शपावुत्सर्गौ तदपवादाः श्यनादयः स्यादयश्च । श्यनादीनामवकाशः दीव्यति सीव्यति । स्यादीनान्तु पक्ष्यते । देविष्यति सेविष्यतीत्यत्रोभयप्रसङ्गे परत्वात् श्यनादयः स्युरिति । अत्र बहुधा समाहितं भाष्ये । तथाहि । शबादेशाः श्यनादयः करिष्यन्ते । दिवादिभ्य इति पञ्चम्या अनुवृत्तायाः कर्त्तरिशबिति प्रथमायाः षष्ठीप्रकल्पनात् । एवञ्च दिवादिभ्यः स्यादिविषये शबेव नास्ति स्यादिभिरपवादैर्बाधात् । तदादेशाः श्यन्नादयस्तु दूरापास्ता एव । अथ वा दिवादिभ्यः श्यन्नित्यादिषु स्यादमोनुवर्तिष्यन्ते । दिवादिभ्यः श्यन् भवति लृलुटोस्तु स्यतासी भवतः । दिवादिभ्य इत्येव । एवमग्रेपि । एतेन लावस्थायामेव प्राप्नुवन्तः स्यादयः सार्वधातुकोत्पत्तिं किमर्थं प्रतीक्षन्ताम् । ततश्च कथं तासेर्लेसार्वधातुकानुदात्तत्ववचनस्य उक्तार्थज्ञापकत्वं सङ्गच्छतामिति दूषणं प्रत्युक्तम् । सार्वधातुकेयगित्यादौ अनुवृत्तिबलादेव सार्वधातुकोत्पत्तेः प्रतीक्षणीयत्वात् । अथ वा श्यनादयः शबादेशा मा भूवन् मा चानुवर्तन्तामूत्तरत्र स्यादयः । किन्तु देविष्यतीत्यादौ स्यादीन् बाधित्वा परत्वात्तावल्लादेशाः । न चानित्यास्ते, आतृतीयाध्यायसमाप्तेर्धात्वधिकारात् स्यादिभिर्व्यवधाने धातोः परस्य लस्याभावेन आदेशाप्राप्तेरिति वाच्यम् । धातोर्विहितस्य लस्येति विहितविशेषणाश्रयणेन लादेशानां नित्यत्वात् । एवञ्च कृतेषु लादेशेषु उभये प्रसक्ताः स्यादयः श्यनादयश्च तत्रान्तरङ्गत्वात्स्यादय एव भविष्यन्ति न तु श्यन्नादयः । सार्वधातुकत्वं कर्त्तरीत्यर्थवि-

शेषञ्च अपेक्षमाणानान्तेषां बहिरङ्गत्वात् ॥

सिब्बहुलं लेटि ॥ धातोः सिप्प्रत्ययो बहुलं स्यात् लेटि परे। जोषिषत्। जुषी प्रीतिसेवनयोः। अनुदात्तेत्। व्यत्ययेन परस्मैपदम्। सिप इट् लेटोडाटाविति तिपोट्। इतश्चलोप इतीकारलोपः। बहुलग्रहणान्नेह। पतातिदिद्युत्। सिब्बहुलञ्छन्दसि णिद्वक्तव्यः ॥ प्रणआयूंषितारिषत्। अयामीवांसवितासाविषत्। णित्त्वाद्वृद्धिः। देवस्यहेलोवयासिसीष्ठाः। इह यातेरवपूर्वाल्लिङ्। बहुलवचनात्। सिप् थास् सीयुट् सुट् इट्। एकाचउपदेशेनुदात्तादिति निषेधस्तु न भवति। सिपा व्यवधानात्। सीयुटः सस्य षत्वाभावश्छान्दसः। तिङ्ङतिङ इति निघातः। यच्छब्दयोगे तु यासिसीष्ठा इति पदमाद्युदात्तमेवेष्यते। यद्यपि प्रत्ययस्वरेण थास उदात्तत्वादन्तोदात्तं पदम्प्राप्तं तथापि सूत्रभङ्गेन सिपन्त्यक्त्वा सवयं कर्तव्य इति भाष्योक्तेः। सपि कृते अदुपदेशात् परत्वेन छन्दस्युभयथेति सार्वधातुकत्वेन च लसार्वधातुकानुदात्तत्वादिष्टसिद्धिः। सपः पित्त्वाभावे उदात्तनिवृत्तिस्वरेण इट उदात्तत्वं स्यात्। तस्मादिह सपः पित्त्वादन्तत्वे स्वरार्थे इति स्थितम्। यथाश्रुतसूत्ररीत्या तु पित्त्वं व्यर्थमेव। तथा च वार्तिकं, पित्करणानर्थक्यं चानच्कत्वात्। इटोनुदात्तार्थमिति चेत्। आगमानुदात्तत्वात्सिद्धमिति ॥

कास्प्रत्ययादाममन्त्रे लिटि ॥ कास्धातोः प्रत्ययान्तेभ्यश्च आम् स्याल्लिटि न तु मन्त्रे। कासृ शब्दकुत्सायाम्। कासाञ्चक्रे। लोलूपाञ्चक्रे। अमन्त्रे किम्। कृष्णो नोनाव। अच्छन्दसीति तु नोक्तं ब्राह्मणे इष्टत्वात्। पुत्रमामन्त्रयामास। अथेह शुनःशेप ईक्षाञ्चक्रे इत्यादि। कास्यनेकाच इति वक्तव्यम्, चुलुम्पाद्यर्थम्। चुलुम्पाञ्चकार। चुलुम्पतिर्वार्त्तिककारवचनबलात्साधुः। इहाव्याप्त्य-

तिव्याप्तिपरिहाराय प्रत्ययग्रहणमपनीय तत्स्थाने अनेकाज्-ग्रहणं कर्तव्यमिति प्रागेव व्याख्यातम् । चकासाञ्चकार । द-रिद्राञ्चकार । आतऔणल इत्यत्र ओकारे विधातव्ये औकार-विधानं दरिद्रातेरार्धधातुके लोप इत्याकारस्य लोपेपि औकार-स्य श्रवणार्थम् । तेन ददरिद्रावित्यपि भवतीत्याहुः । उर्णोतेस्तु न भवति । नुवञ्द्रावातिदेशात् । न चैवमपीजादेरित्युत्तरसूत्रेणा-नेकाच्त्वनिरपेक्ष आम् स्यादेवेति वाच्यम् । आमश्च प्रतिषेधा-र्थमिति नुवञ्द्रावफलेषु पाठसामर्थ्यात्तस्या अप्यप्रवृत्तेः । भाष्यकारेण संहितया सूत्रपाठमाश्रित्यानृच्छोदयायास इत्यत्र अनृच्छ उ इत्युकारप्रश्लेषेण उकारान्तस्यामनिषेधाच्च । नन्वे-वमुशब्दादाचारक्विपि इजादेरित्याम् पूर्वोदाहृते माधवादिस-म्मतश्चानेन भाष्येण विरुध्येतेति चेन्न । प्रथमपक्षेण तत्सम्भ-वात् । द्वितीयपक्षे तु मा भूदाम् । यथालक्षणमप्रयुक्तइत्यभ्युपग-मात् । यद्वा । उश्चासौ उश्चेति प्राश्लिष्टनिर्देशेन उदन्तस्यैव गुरुमतः पर्युदासः । स च इजादेरिति सूत्रस्यैव शेषः । तेन वल्गु-फल्गुप्रभृतिभ्यः क्विबन्तेभ्यो ऽनेकाच्त्वप्रयुक्त आम् भवत्येवेति सर्वं सुस्थम् । अत्र काशिका । आमो मित्त्वमदन्तत्वादगुणत्वं विदेस्तथा । आस्कासोरामविधानाच्च पररूपं कतन्तवत् ॥ अस्यार्थः । मित्त्वाभावो ऽमित्त्वम् । आमो मकारस्य हलन्त्यमिती-त्संज्ञा न भवति । कुतः । अत् अन्ते समीपे यस्य तथात्वात् । सूत्रे विधानवेलायां समीपे अकारवत्त्वादिति यावत् । प्रसङ्गादा-ह । विदेरामि गुणाभावोपि तथा । अदन्तत्वादेवेत्यर्थः । उष-विदजागृभ्य इति सूत्रे हि आमप्रत्ययसन्नियोगेन विदेरदन्तत्वं निपात्यते । तत्रालोपस्य स्थानिवत्त्वात् गुणो न भवति । यदि तु विद ज्ञानइति धातुपाठएव अकारो विवक्ष्यते तदा वेत्तीत्यादि न

सिध्येत्। अकारश्रवणप्रसङ्गात्। इदानीमाम्प्रत्ययस्य मान्तत्वमङ्गीकृत्यापि मित्त्वाभावे ज्ञापकमाह। आस्कासोराम्विधानाच्चेति। आमः अमित्त्वमित्यनुषङ्गः। दयायासश्च कास्प्रत्ययादिति सूत्राभ्यामास्कासोराम्विधानादमित्त्वमामोनुमीयते। सति हि मित्त्वे आस्कासोराम् भवन् अचामन्त्यादाकारात्परः स्यात्। तथा च सवर्णदीर्घत्वे सति अकिञ्चित्करः स्यादिति भावः। नन्वदन्तत्वपक्षे आमामन्त्रइति निर्देश्यं स्यादत आह। पररूपमिति। यथा सर्वत्रलोहितादिकतन्तेभ्य इति सूत्रे पररूपं निपातनात् शकन्ध्वादित्वाद्वा एवमिहापीति भावः॥

इजादेश्च गुरुमतोनृच्छः॥ इजादिर्यो धातुर्गुरुमान् ऋच्छतिभिन्नस्तस्मादाम् स्याल्लिटि नतु मन्त्रे। ईहाञ्चके। ऊहाञ्चक्रे। इजादेरिति किम्। ततक्ष। गुरुमतः किम्। इयेषिथ। नन्विह गुणे कृते गुरुमत्ताप्यस्त्येवेति चेत्सत्यम्। गुरुमद्ग्रहणे सति सन्निपातपरिभाषया इहाम्न। लिडानन्तर्यहेतुकत्वाद् गुरुमत्तायाः। यद्वा। लिटीति विहितविशेषणम्। इजादेर्गुरुमतो विहितो यो लिट् तस्मिन्निति। तेन लिण्निमित्ता या गुरुमत्ता तस्मान्न भविष्यति। अनृच्छः किम्। आनर्छ। आनर्छतुः। आनर्छुः। अनृच्छ इति शक्यमकर्तुम्। ऋच्छत्यृतामिति लिटि परे गुणविधानाल्लिङ्गादेव आमो ऽप्रवृत्तेः। न च तत्र ऋच्छतीत्यनेन अर्तेरेव ग्रितपा निर्देश इति वाच्यम्। ऋच्छत्यृतामिति सवर्णदीर्घेण स्वरूपेणैवार्त्तेः प्रश्लेषात्। प्रश्लेषे च बहुवचनं प्रमाणम्। अत्र श्लोकवार्त्तिकं, वाच्यमूर्णोर्णुवद्भावो यङ्प्रसिद्धिः प्रयोजनम्। आमश्च प्रतिषेधार्थमेकाचश्चेडुपग्रहात्॥ अत्र यङि भावातिदेशः। आमिटोस्त्वभावातिदेशः। नौ तौ तयोरभावात्। इडुपग्रह इट्प्रतिषेधः॥ विभाषागुणइति पञ्चमी। फलस्य चात्र

हेतुत्वम्, अध्ययनेन वसतीतिवत्। एकाच इति वर्त्तमाने श्न्युकः किती‌ति य इट्प्रतिषेधः ततोपि हेतोर्णुवद्भावो वाच्य इत्यर्थः। प्रोर्णोनूयते। प्रोर्णुनाव। प्रोर्णुतः। प्रोर्णुतवान्॥

दयायासश्च॥ एभ्य आम् स्याल्लिटि। दय दानगतिरक्षणेषु। अय गतौ। आस उपवेशने। त्रयोप्यनुदात्तेतः। दयाञ्चक्रे। पलायाञ्चक्रे। उपसर्गस्यायतावि‌ति लत्वम्। आसाञ्चक्रे॥

उषविदजागृभ्योन्यतरस्याम्॥ एभ्य आम् वा स्याल्लिटि। उष दाहे। विद ज्ञाने। सत्ताविचारणार्थयोस्तु आत्मनेपदिनोर्लाभार्थस्य चोभयपदिनो नेह ग्रहणम्। परस्मैपदिभ्यामुषविदजागृभ्यां साहचर्यात्। ओषाञ्चकार। उवोष। विदेरिह आम्सन्नियोगेनादन्तत्वनिपातनाद् गुणो न। विदाञ्चकार। विवेद। जागराञ्चकार। जजागार॥

भीह्रीभृहुवां श्लुवच्च॥ एभ्यो लिट्यामित्वा एषां श्लाविव कार्यं च। किं पुनस्तत्। द्वित्वमित्वञ्च। बिभयाञ्चकार। बिभाय। जिह्रयाञ्चकार। जिह्राय। बिभराञ्चकार। बभार। जुहवाञ्चकार। जुहाव। इह द्वित्वं सर्वेषाम्। इत्त्वन्तु बिभर्त्तेः। भृञामिदिति श्लौ विधानात्॥

कृञ चानुप्रयुज्यते लिटि॥ आमः पश्चात् लिट्परः कृञ् प्रयुज्यते। कृञिति प्रत्याहारः कृभ्वस्तीत्यतः कृञोद्वितीयेति ञकारेण। तेन कृभ्वस्तयो ग्राह्याः। अत्र च प्रमाणम् आम्प्रत्ययवत्कृञोनुप्रयोगस्येति सूत्रे कृञ्ग्रहणम्। अनुप्रयोगसामर्थ्यादस्तेर्भूभावो न। अन्यथा हि कृभ्वनुप्रयुज्यतइत्येव ब्रूयात्। याचयांचकार। याचयांबभूव। याचयामास। इहानुप्रयुक्तस्यास्तेर्भावकर्मणोस्तिङ्। तत्र एशि इटि च रूपे विप्रतिपद्यन्ते। तथाहि।

उभयत्रापि हएतीति हादेशे कृते ईक्षामाहे इति के चित्। तासिसाहचर्यादिटयेवहत्वमित्यन्ये। तत्साहचर्यादेव सार्वधातुकएव एति हत्वम्। तेनोभयत्रापि ईक्षामासे इति रूपमित्यपरे। स्यादेतत्। आमन्तमेतदनभिव्यक्तपदार्थकं नह्यस्मात् कारकविशेषः सङ्ख्याविशेषो वावगम्यते। तत्र विशेषसमर्पणाय न्यायत एवानुप्रयोगलाभात्किमनेन सूत्रेणेति चेत्। अत्रोच्यते। क्रियामात्रविवक्षायां कारकतत्सङ्ख्ययोश्चाविवक्षायां पाकप्रेरणा जातेत्यादिप्रयोगास्तावत्सर्वसम्मताः। तत्र तथैव पाचयामीत्येतावन्मात्रप्रयोगे प्रसक्ते तं वारयितुमिदम्। किञ्चास्तिभवत्योरिव विद्यतेरपि प्रयोगे न्यायतः प्रसक्ते तमपि वारयितुमेतत्। किञ्च निवृत्तप्रेषणाद्धातोः प्राकृतेर्थे णिचि सामान्यवाचकानुप्रयोगार्थं सूत्रमेतत्। अपि च। पश्चादेव प्रयोगो यथा स्यात् न तु पूर्वमिति। तेन चक्रे ईक्षामित्यादि न भवति। अपि च, अव्यवहितएव पश्चाद्भावो मुख्यः। तथा च व्यवहितानिवृत्त्यर्थमपीदम्। तेन ईक्षां राजा चक्रइत्यादि न भवति। कथन्तर्हि बव्हृचब्राह्मणे तान् ह राजा मदयामेक चाकरोति छान्दसत्वादित्यवेहि। कथन्तर्हि भट्टिकाव्ये, उक्षाम्प्रचक्रुर्नगरस्य मार्गान्। बिभयाम्प्रचकारासाविति। कथञ्च रघुकाव्ये। तं पातयां प्रथममास पपात पश्चात्। प्रभ्रंशयां योनहुषञ्चकारेति। प्रमाद एवायम्। विपर्यासनिवृत्त्यर्थं व्यवहितानिवृत्त्यर्थञ्चेति वार्तिक विरोधादित्याहुः। इहामप्रकृतेः कृभ्वस्तीनाञ्च सामान्यविशेषवचनतया तदर्थयोरभेदान्वयो बोध्यः। अत एव प्रत्याहारे ऽन्तर्भूतस्यापि सम्पदो नुप्रयोगो न भवति। अनन्वितार्थकत्वात्। यत्तु सनाद्यन्ता इत्यतो धात्वधिकारात् धातूपसर्गसमुदायस्य नानुप्रयोग इति। तन्न। एवमपि योत्र धातुः पादिः तन्मात्रस्य उक्तरीत्यैव वारणीयत्वात्।

एवञ्च सामान्यस्य सन्निहिते विशेषे पर्यवसानात् तद्गतसाधनादिविशेषाभिधानम् आमन्तगतविशेषाभिधानमेवेति सम्पद्यते । अत एव अनुप्रयुज्यमानयोर्भ्वस्त्योरामन्तवशेन सकर्मकत्वात् ताभ्यां कर्मणि लिट्। तथाच माघः । तस्यातपत्रं बिभरांबभूवे इति । श्रीहर्षश्च । तपर्तुपूर्तावपि नेदसाम्भरा विभावरीभिर्बिभराम्बभूविरे इति ॥

विदाङ्कुर्वन्त्वित्यन्यतरस्याम् ॥ वेत्तेर्लोट्याम् गुणाभावः लोटो लुक् लोट्परस्य कृञोनुप्रयोगश्च वा निपात्यते । इतिशब्दः सर्वेषां लोड्वचनानामुपलक्षणार्थः। सूत्रे प्रथमपुरुषबहुवचनप्रयोगस्तु प्रचुरप्रयोगत्वमात्रेण । विदाङ्करोतु विदाङ्कुरुतां विदांकुर्वन्तु ॥

अभ्युत्सादयांप्रजनयांचिकयांरमयामकःपावयाङ्क्रियाद्विदामक्रन्नितिच्छन्दसि॥एते छन्दासि वा ।निपात्यन्ते।सदिजानिरमीणां ण्यान्तानां लुङ्याम्प्रत्ययः।चिनोतेरपि शुद्धस्य लुङ्याम् द्विर्वचनं कुत्वञ्च अकरित्यनुप्रयोगः प्रत्येकं चतुर्भिः सम्बध्यते । पवतेः पुनातेर्वा ण्यन्तस्य आशीर्लिङि आम् क्रियादित्यनुप्रयोगश्च । विदेर्लुङ्याम् गुणाभावः । अक्रन्नित्यस्यानुप्रयोगश्च । अकरिति कृञो लुङि तिप्। मंत्रेघसेतिच्लेर्लुकि तिपो हल्ङ्यादिलोपः । अक्रन्निति तत्रैव बहुवचनं अभ्युत्सादयामकः । अभ्युदसीषददिति पक्षे भाषायांच । प्रजनयामकः प्राजीजनत्। चिकयामकः । अचैषीत्। रमयामकः । अरीरमत् । पावयांक्रियात् । पाव्यात् । विदामक्रन् । अवेदिषुः ॥

इति श्रीशब्दकौस्तुभे तृतीयस्य प्रथमे तृतीयमान्हिकम् ॥

च्लिलुङि ॥ धातोश्च्लिप्रत्ययः स्यात् लुङि परे ॥ इकारो लेरिति सामान्यग्रहणार्थः । चकारः स्वरार्थ इत्युत्तरसूत्रे

स्फुटीभविष्यति । अस्यादेशाः सिजादयो वक्ष्यन्ते । नन्वेवं किं च्लिप्रत्ययेन सिजेवोत्सर्गः प्रत्ययोस्तु तदपवादाश्च क्सादयः सन्तु । न च मन्त्रेघसेतिसूत्रे सर्वधातुषु लेरित्येकेनैव निर्वाहे लाघवार्थं च्लिः कर्त्तव्यः । अन्यथा हि घस्नशृगमर्थमङो ग्रहणम् । आकारान्तेषु धेटोन्तर्भावात्तदर्थं चङो ग्रहणम् । तस्य हि विभाषाधेट्श्व्योरिति चङस्ति । धात्वन्तरार्थं सिचो ग्रहणम् । यदि तु जनेः दीपजनेति विहितस्य चिणो लुक् छन्दसि दृश्यते ततस्तस्यापीति त्रीणि चत्वारि वा ग्रहणानि कर्तव्यानि स्युरिति वाच्यम् । च्लिपक्षेपि च्लिलुङि च्लेःसिच् मन्त्रेघसेति सूत्रेषु मिलित्वा च्लिच्लेर्लेरिति त्रयाणां ग्रहणस्य तुल्यत्वात् । न चोक्तरीत्या साम्येपि च्लिपक्षे लाघवान्तरमस्ति । गातिस्थेति सूत्रे सिच इत्यपनीय तत्स्थाने लेरित्यभिषिच्य मन्त्रेघसादिसूत्रे तस्यैवानुवर्तनादिति वाच्यम् । एवं हि वदन् अकृतेष्वेव सिजाद्यादेशेषु तदपवादो लेरेव लुगित्यभिप्रैषि, किं वा आदेशेषु कृतेषु स्थानिवद्भावो नेति । नाद्यः । अगुः अस्थुरित्यादौ सिचः परत्वाभावेन सिजभ्यस्तेति जुसो ऽप्रवृत्तिप्रसङ्गात् । न च आत इति जुस् । तत्रापि सिच इत्यस्यानुवृत्तेः । अथोच्येत आत इति सूत्रे सिज्ग्रहणं नानुवर्त्तते तथाच अगुरित्यादौ विध्यर्थं तत् न तु नियमार्थम् । व्यावर्त्याभावात् । न चाभूवन्निति व्यावर्त्यम् । तत्र जुसः प्राप्तेरेवाभावात् । न च सिजभ्यस्तेति प्राप्तिः । लावस्थायामेव लुगिति पक्षस्य इदानीं परिगृहीतत्वात् । न चैवमवान् इत्यत्रापि आत इति नित्यो जुस् स्यादिति वाच्यम् । लङःशाकटायनस्यैवेति नियमाद्विकल्पोपपत्तेरिति । एवमपि मा हि गातां मा हि स्यातामित्यादिषु आदिःसिचोन्यतरस्यामित्येष स्वरो न सिद्ध्येत् । तस्मा-

लावस्थायां लोप इति प्रथमः पक्षो दुष्ट एवेति स्थितम्। न द्वितीयः। एवं हि सति विभाषाघ्राधेडिति सूत्रेणापि च्ल्यादेशानामेव लुगिति धेटश्चङोऽपि स स्यात्। तत्र यदा विभाषाधेट्श्व्योरिति चङो विकल्पितत्वेन पक्षे सिचि कृते तस्य लुगलुकौ तदा अधात् अधाताम् अधुः। अधासीत् अधासिष्टाम् अधासिषुरिति सिद्धमिष्टम्। चङोऽपि लुगभावपक्षे अदधत् अदधताम् अदधन् इति सिद्धम्। लुक्पक्षे तु नलुमतेत्यङ्गाधिकारानिर्देश इति मते प्रत्ययलक्षणेन द्विर्वचने अदधादित्यपि चतुर्थं रूपं स्यात्। नलुमतेति नाङ्गाधिकारनिर्देशः किं त्वाङ्गमनाङ्गं वा लुमता लुप्ते प्रत्यये परे पूर्वस्य प्राप्तं सर्वं निषिध्यतइति मुख्यपक्षे तु चङो लुकि द्वित्वाप्रवृत्तौ सिज्लुका तुल्यमेव रूपमिति अधादित्यादौ वक्ष्यमाणे न दोषः, तथापि बहुवचने अधासिरित्यनिष्टमपि चतुर्थं रूपं स्यादेव, इष्यते तु त्रैशब्द्यम् अधुः अधासिषुः अदधन्निति। न च चङो लुकि आत इति जुस् भविष्यतीति वाच्यम्। तत्र सिच इत्यस्यानुवृत्तेः। अन्यथा तस्य नियमार्थतानुपपत्तौ अभूवन्नित्यत्र प्रत्ययलक्षणेन सिजभ्यस्तेति जुसप्रसङ्गात्। ननु च्ल्यभ्यस्तविदिभ्यश्चेति वक्ष्यामि। एवञ्च चङ्लुक्यपि च्लेः परत्वाज्जुस् भविष्यति। आत इति सूत्रेऽपि लिग्रहणानुवृत्त्यैव नियमात् अभूवन्नित्यत्र जुस् न भविष्यति। माहिगातामित्यादौ आदिःसिच इति स्वरोऽपि सिद्धः। एवञ्च कृतेष्वादेशेषु लुगिति पक्षो निरर्थक एवेति चेन्न। यदि च्ल्यभ्यस्तेति ब्रूषे तर्हि वसाङ्चङ्षु दोषापत्तेः। अधुक्षन् अवोचन् अदधत् अत्रापि हि जुस् प्राप्नोति। तस्मात्सिजभ्यस्तेत्येव वक्तव्यम्। आत इत्यत्र च सिज्ग्रहणमनुवर्त्तनीयम्। एवञ्च चङ्लुकि बहुवचने अधासिरिति प्राप्नोतीति दोषः स्थित एव। तस्मात् गातिस्थेत्यत्र सिच इत्येव वक्तव्य-

म्। ततश्च च्लिपक्षेपि च्लिच्लेर्लेरिति त्रयाणां ग्रहणं तुल्यमेवेति स्थितम्। प्रत्युत च्लेरकरणे महल्लाघवम्। मन्त्रेघसेत्यादिसूत्रे हि अङ एव ग्रहणं कर्तव्यम्। सिच तु गातिस्थेतिसूत्रादनुवर्त्यः। धेट्टो जनेश्च चङ्च्विणौ वैकल्पिकौ तत्र यानि लुगुदाहरणानि तानि सिच एव लुका सिद्धानि। न चैवम् आदिः सिच्यन्यतरस्यामिति स्वरः स्यादिति वाच्यम्। चङ्च्विणोर्ग्रहणेपि पाक्षिकस्य तस्य दुर्वारत्वात्। तस्मात् च्लिलुङीतिसूत्रं व्यर्थमेवेति चेत्। अत्राहुः। असति च्लौ मन्त्रेघसेत्यत्र येभ्यः सिचो लुक् तेषामादिः सिच इतिस्वरः स्यात्। सतित्वस्थिन् लेरिति लावस्थायामेव लुकि सिजभ्यस्तविदिभ्य इत्यस्य स्वरः। किञ्च आकारान्तेभ्यः सिचो लुकि जुस् प्राप्नोति लेस्तु लुकि अन्तिभाव एव भवति। अपि च। शलइगुपधादिति सूत्रे अनिट इत्यनेन च्लिं विशेषयितुमपि च्लिरेष्टव्यः। असति हि च्लौ अनिट इति थावोरेव विशेषणं स्यात्। ततश्चाधुक्षदिति न सिद्ध्येत्। तनूदित्वादिङ्विकल्पे पाक्षिकेणेङभावेन अनिडत्वमिति चेत्, तर्हि नित्यं क्सः स्यात्। ततश्चागुहीदिति न सिद्ध्येत्। अनिट इति च्लेर्विशेषणे तु यदा च्लिरनिट् तदा क्सः यदा सेट् तदा सिजिति सिद्धमिष्टम्। तस्मात् यथान्यस्वरोक्तिरित्यागुहीदिति च्लेः फलमिति स्थितम्। भाष्ये तु च्लिः प्रत्याख्यातः। यत्तूक्तम्। आदिः सिच इति इत्यादिति। तन्न। तस्य वैकल्पिकत्वेन इष्टस्वरस्य निर्बाधत्वात्। सर्वविकल्पानां छन्दसि व्यवस्थितत्वेन अनिष्टस्यानापाद्यत्वात्। यद्यपि आकारान्तेभ्यो जुस् स्यादिति। तदपि न। मन्त्रे तादृशस्योदाहरणस्याभावात्। अत्र च भाष्यकारीयप्रत्याख्यानमेव प्रमाणम्। यदपि अगुहीदिति न सिद्ध्येदिति, तदपि न। गुहादयो विकल्पितेट इत्युभाभ्यां सि-

द्यन्ते, तत्र ये सेटः तेभ्यः सिच् अनिड्भ्यस्तु क्स इति भगवद्भाष्यकाराशयस्य कैयटेन वर्णितत्वात् ॥

च्लेः सिच् ॥ च्लेः सिजादेशः स्यात् । इकार उच्चारणार्थ इत्संज्ञको वेति पक्षद्वयमपि हनःसिजित्यत्र प्रतिपादितम् । चकारः स्वरार्थः । मा हि लावीत् । अत्र हि आगमा अनुदात्ता इति इटोनुदात्तत्वं प्राप्तं स्थानिन्यादेशे च द्विश्चित्करणाद्बाध्यते । यत्तु के चित् प्रत्ययस्वरस्य द्वावपवादौ आगमानुदात्तत्वं चित्स्वरश्च तत्र आद्यं यासुड्विधौ ज्ञापितं तदेशम् । चित्स्वरस्तु षाष्ठः । तत्रापवादविप्रतिषेधे परत्वाच्चित्स्वर एव सिद्ध्यति। तर्हि सिचश्चित्त्वेनेति । तन्न। आगमानुदात्तत्वं हि आनुगागादिषु प्रकृत्यागमेष्वपीष्यते, कुण्डिनजादीनाञ्च चित्स्वरः, तत्कथमिमौ प्रत्ययस्वरस्यापवादौ स्याताम् । किञ्च इह चित्स्वरस्य परत्वमपि नास्ति । स्थानिवदित्यस्य कार्यातिदेशत्वात् । तस्मादागमानुदात्तत्वेन अविशेषात्सर्वः स्वरो बाध्यत इति तद्बाधनाय सिचश्चित्त्वम्। न च च्ले श्चित्वसामर्थ्यादेव तद्बाधः । मन्त्रेघसाहिसूत्रे लेरिति सामान्यग्रहणेन तस्य चरितार्थत्वात् । अन्यथा हि निरनुबन्धकत्वादस्यैव ग्रहणं स्यात् न लिटः । ततश्च आम इति सूत्रे निरनुबन्धकस्य लेरसम्भवात् लेरिति नानुवर्त्तेत । ततश्च परत्वादन्तरङ्गत्वाच्च तिबादिषु पञ्चाल्लुकि कारयामित्यस्य प्रत्ययलक्षणेन तिङन्तत्वात् देवदत्तः कारयाञ्चकारेत्यत्र आमन्तस्य निघातः ततः परस्य चानिघातः स्यात् । तस्मादाम इत्यत्र लेरित्यनुवर्त्यमेव । तदर्थञ्च पूर्वत्र सामान्यग्रहणं वाच्यं तदविघाताय च्लेश्चकारश्चरितार्थः । च्लेः प्रत्याख्यानपक्षे तु सिच एव चित्त्वेनानन्यार्थेन आगमानुदात्तत्वं बाध्यते । स्पृशमृशकृषतृपदृपः सिज्वेति वक्तव्यम् ॥ स्पृश स्पर्शने, मृश आमर्श-

ने कृष विलेखने। एभ्यः क्से प्राप्ते तृप प्रीणने, दृप हर्षविमोचनयोः, आभ्यां पुषादित्वादङि प्राप्ते सिजपि पक्षे अभ्यनुज्ञायते। अस्पाक्षीत्। अस्पार्क्षीत्। अस्पृक्षत्। अम्राक्षीत्। अमार्क्षीत्। अमृक्षत्। अक्राक्षीत्। अकार्क्षीत्। अकृक्षत्। अत्राप्सीत्। अतार्प्सीत्। अतृपत्। अद्राप्सीत्। अदार्प्सीत्। अदृपत्। प्रक्रियाकौमुद्यान्तु प्रकृतवार्त्तिके सृपिमपि प्रक्षिप्य असस्राप्सीत् असार्प्सीत् इत्यपि रूपद्वयमुदाहृतम्। तच्तु अप्रामाणिकत्वादुपेक्ष्यम्॥

शल इगुपधादनिटः क्सः॥ शलन्त इगुपधो यो धातुः तस्मात्परस्य अनिटः च्लेः क्सः स्यात्। दुह्, अधुक्षत्। लिह्, अलिक्षत्। शलः किम्। अभैत्सीत्। इगुपधात्किम्। अधाक्षीत्। अनिटः किम्। अकोषीत्। च्लेः प्रत्याख्यानपक्षे तु अनिट इति धातोरेव विशेषणमिति प्रागेवोक्तम्। यद्यपि अकृत एव क्से लावस्थायां गुणः प्राप्नोति। तथापि इगुपधादिति विशेषणसामर्थ्यान्न भवति। न च कृतेपि गुणे भूतपूर्वगत्या विहितविशेषणाश्रयणेन वा क्सोस्त्विति वाच्यम्। कित्करणवैयर्थ्यापत्तेः। न च क्सस्याचीत्यत्र विशेषणार्थं तत्। सस्याचीत्येव सिद्धेः। न चैवं वृतृवदिहनिकमिकषिभ्यः से वत्से वत्सा इत्यत्र प्रसङ्गः स्यादिति वाच्यम्। लुग्वादुहेत्यत्रापि हि सस्याचीत्यतः सस्येत्यनुवर्तते। एवञ्च दुहादिषु यस्य सम्भवः तस्यैव पूर्वसूत्रेपि ग्रहणमिति सुवचत्वात्। तस्मात्कित्करणसामर्थ्याद् गुणो नेति स्थितम्॥

श्लिष आलिङ्गने॥ अत्र योगो विभज्यते। श्लिषः॥ श्लिषः परस्य अनिटः च्लेः क्सः स्यात्। पूर्वेणैव प्राप्तस्य क्सस्य पुषाद्यङा बाधे प्राप्ते इदमारभ्यते। पुषादिपाठसामर्थ्यात्पक्षे अङ्। एवञ्च अङ्क्सयोः सर्वत्र विकल्पे प्राप्ते आलिङ्गनालिङ्गनयोरविशेषेण क्से च प्राप्ते नियमार्थं द्वितीयो योगः। आ-

लिङ्गने ॥ श्लिषः परस्यानिटः च्लेर्योयं क्सादेशः स आलिङ्गनएव न त्वर्थान्तरे, एवं चार्थान्तरे सावकाशोऽङ् आलिङ्गने क्सेन बाध्यते । आश्लिक्षत् कन्यां देवदत्तः । आलिङ्गनएवेति किम् । समाश्लिषज्जतु काष्ठम् । इह अङेव, प्रत्यासत्तौ ह्यत्र श्लिषिर्वर्तते न तूपगूहनपरिष्वङ्गपरपर्याये आलिङ्गने । उपाश्लिक्षातां जतुना काष्ठे । नन्विह श्लइगुपधादिति क्सो दुर्वारः । आलिङ्गने एवेति नियमेन हि अनन्तरस्येति न्यायेन श्लिष एव इति प्राप्तिः अङ्बाधनार्थैव नियम्यते न तु ततः प्राचीनमपीति चेन्न । योगविभागसामर्थ्येन सर्वस्याः क्सप्राप्तेः नियमनात् । आत्मनेपदे च अङो ऽप्राप्तेः सिजेव पर्यवस्यति । नन्वेवमपि आलिङ्गनएवेति आदेशविषयोयमिति कुतः, अर्थनियम एवायं किं न स्यात् आलिङ्गने क्स एवेति । ततश्चालिङ्गने अङ् मा नाम भूत् । आत्मनेपदे तु अनालिङ्गनेपि पूर्वेण क्सो दुर्वार एवेति चेत् । सत्यम् । उभयथेह नियमसम्भवेपि प्रत्ययनियम एवाश्रीयते लक्ष्यानुरोधात् । विधेयविभक्तिनिर्देशेन प्रधानत्वाद्वा भाष्यकारोक्तव्याख्यानाद्वेति न कश्चिद्दोषः । श्लिष इति योगे अनिटः किम् । श्लिष आलिङ्गन इत्यस्यैव ग्रहणं यथा स्यात् । श्लिषु पृषु प्लुषु दाहे इत्यस्य सेटो ग्रहणं मा भूत् । सानुबन्धकत्वादेव तदग्रहणे तु अनिट इति नावश्यकमिति दिक् । श्लिष इति योगविभागसिद्धश्च क्सः पुरस्तादपवादन्यायेन अङमेव बाधते न तु चिण, न्तेन समाश्लेषि कन्या देवदत्तेनेति चिणेव भवति ॥

नदृशः ॥ दृशः च्लेः क्सो न स्यात् । अदर्शत् । अद्राक्षीत् । इरितोवेत्यङ्पक्षे ऋदृशोङीति गुणः । सिच्पक्षे सृजिदृशोर्झलीत्यम् ॥

णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ् ॥ एभ्यश्चलेश्चङ् स्यात् कर्तृवाचिनि लुङि परे । णीति णिङ्णिचोः सामान्यग्रहणम् । अचीकमत । अचीकरत् । अशिश्रियत् । अदुद्रुवत् । असुस्रुवत् । कर्त्तरि किम् । अकारयिषातां घटौ देवदत्तेन । चङ्ग इङ्कारो गुणनिषेधार्थः । चकारश्चङीति विशेषणार्थः । अङीत्युच्यमाने अस्यतिवक्तीत्यङि षिद्भिदादिभ्य इति चाङि अतिप्रसङ्गः । यदि तु णिश्रीत्यादौ ङ एव क्रियेत तदा शक्यं चिन्त्वमकर्तुम् । कमेरुपसंख्यानम् ॥ आयादयआर्द्धधातुकेवेति यदा णिङ् नास्ति तदर्थमिदम् । अचमत । अत्र भाष्यम् । नाकमिष्टसुखं यान्ति सुयुक्तैर्वडवारथैः । अथ पत्काषिणो यान्ति येचीकमत भाषिणः ॥ अस्यार्थः । अचकमताचीकमतेति शब्दयोः साधुत्वे तुल्येपि अचकमेत्यस्य विशेषलक्षणसापेक्षतया तत्प्रयोगे स्वकेशाधिक्यात्फलाधिक्यम् । तेन कमेर्लुङि किं रूपमिति पृष्टे अचकमेति ये ब्रूयुस्ते सुयुक्तैः रथैः स्वर्गं यान्ति यैस्त्वचीकमतेत्युक्तं ते पादौ कषन्तीति पत्काषिणो यान्ति । हिमकाषिहतिषुचेति पादस्य पदादेशः। अन्ये तु व्याचक्षते । अकामिष्टेति यैरुक्तं तैरौपचारादकमिष्टशब्देनोच्यते । ते ऽमी सुयुक्तैर्वडवारथैर्गच्छन्तोऽपि सुखं न प्राप्नुवन्ति अपशब्दोच्चारणात्। अचीकमतभाषिणस्तु पत्काषिणोपि सुखं यान्ति ॥

विभाषा धेट्श्व्योः ॥ आभ्यां चलेश्चङ् वा स्यात् । अदधत् । सिचूपक्षे विभाषाघ्राधेडिति वा लुक् । अधात् । अधासीत् । अशिश्वियत् । पक्षे ज्रुस्तम्भित्यङ् । श्वयतेरः । अश्वत् । सिचि वृद्धेः प्रतिषेधे गुणः । अश्वयीत् । कर्तरीत्येव । अधिषातां गावौ वत्सेन । कर्मणि द्विवचनम् । स्थाघ्वोरिच्चेति कित्त्वेत्त्वे ॥

सुपेश्छन्दसि ॥ गुपेः परस्य चलेश्चङ् वा स्यात् छन्दसि ।

आयप्रत्ययाभावस्थलएवेदम् । सूत्रे केवलस्योच्चारणात् । इमा-न्नोमित्रावरुणौ गृहानजूगुपतं युवम् । गुपू रक्षणे लुङ् थसस्तम् ।तु-जादीनांदीर्घोभ्यासस्येति अभ्यासदीर्घ इति हरदत्तः । कल्प-सूत्रेषु तु प्रायेण ह्रस्व एव पठ्यते । पक्षे अगौप्तम् । अगोपि-ष्टम् । ऊदित्वादिडभावे वदव्रजेति वृद्धिः । झलोझलीति सिचो लोपः । इट्पक्षे नेटीतिवृद्धिनिषेधः । गुणः । आयप्रत्ययपक्षे । अगोपायिष्टम् । इति चत्वारि छन्दसि । भाषायान्तु चङन्तं व-र्जयित्वा त्रीणि रूपाणि ॥

नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः ॥ एभ्यो ण्यन्तेभ्यः च्ले-श्चङ् न स्यात् छन्दसि । मा त्वायतो जरितुः काममूनयीः । त्वा-यतस्त्वामिच्छतो जरितुस्तोतुः मम काममभिलाषं मा उनयीः । ऊनं मा काषीरित्यर्थः । मा ऊनन इति भाषायाम् । ऊन परि-हाणे । चुरादावदन्तः । णिच् सिप् चङ् णौ कृतस्याल्लोपस्य स्थानिवद्भावादजादेर्द्वितीयस्येति नशब्दस्य द्वित्वचनम् । अग्लो-पित्वान्न सन्वद्भावदीर्घोपधाह्रस्वत्वानि । इह वृत्तिपदमञ्जर्योः प्रायेणौनिनदिति पाठः । तत्र अभ्यासे इकारः प्रामादिकः । इदञ्च द्विर्वचनेचीति सूत्रे स्फुटीकृतमस्माभिः । मा त्वाग्निर्ध्वनयी-द्धूमगन्धिः । ध्वन शब्दे चुरादिरदन्तः । घटादिर्नान्तश्च । भा-षायां तु । अग्लोपित्वान्न सन्वत् । अदध्वनत् । घटादेस्तु अन-ग्लोपित्वात् अदिध्वनत् । ऐलयीत् । ऐलिलदिति भाषायाम् । इल प्रेरणे चुरादिः । आर्दयीत् । आर्दिददिति भाषायाम् । अर्द गतौ याचने च अर्द हिंसायां हेतुमण्ण्यन्तौ । इह सूत्रे छन्द-सीत्यस्यानुवृत्तिर्वृत्त्यादिमहाग्रन्थसंमता । तथा च भट्टिः । अ-जिग्रहत्तं जनको धनुस्तद्येनार्दिददैत्यपुरं पिनाकीति । प्रक्रिया-कौमुद्यां तु द्वयमपि लोकइत्युक्तम् । छन्दसीति नानुवर्त्तते । वि-

भाषेतिचानुवर्ततइति तदाशयः। इदञ्चाशुद्धम्। सूत्रे नञो वैयर्थ्यापत्तेः। सकलमहाग्रन्थविरोधाच्चेत्यास्तान्तावत् ॥

अस्यतिवक्तिख्यातिभ्योऽङ् ॥ असु क्षेपणे। वच परिभाषणे, ब्रूञो वचिश्च, ख्या प्रकथने, चक्षिङादेशश्चेति प्राञ्चः। वस्तुतस्तु सार्वधातुकमात्रविषयः ख्यातिः। इह त्वादेशस्यैव ग्रहणम्। एभ्यश्च्लेरङ् स्यात् कर्तृवाचिनि लुङि परे। अस्यतेः पुषादिपाठादेव अङि सिद्धे पुनर्ग्रहणमात्मनेपदार्थम्। पर्यास्थत। पर्यास्थेताम्। पर्यास्थन्त। उपसर्गादस्यत्यूह्योर्वावचनमित्यात्मनेपदम्। अङ्। अस्यतेस्थुक्। कर्मकर्तरि तु प्रत्यये परत्वाच्चिण् अन्यत्र अङ्। पर्यासि। पर्यास्थेताम्। पर्यास्थन्त। अवोचत्। अवोचताम्। अवोचन्। वच उम्। अख्यत्। अख्यताम्। अख्यन्। आतोलोपः। कर्त्तरीति किम्। कर्मणि मा भूत्, चिण्सिचावेव यथा स्याताम्। निरासि। निरासिषाताम् ॥

लिपिसिचिह्वश्च ॥ एभ्यश्च्लेरङ् स्यात्। लिप उपदेहे। अलिपत्। षिच क्षरणे। असिचत्। व्हेञ् स्पर्द्धायां शब्दे च। अव्हत्। अस्यतिवक्तिख्यातिलिपिसिचिव्हइति तु नोक्तम्। एकसूत्रत्वे हि अस्यत्यादीनामपि उत्तरसूत्रे अनुवृत्तौ विकल्पः स्यात् ॥

आत्मनेपदेष्वन्यतरस्याम् ॥ पूर्वेण नित्ये प्राप्ते विभाषेयम्। अलिपत। अलिप्त। असिचत। असिक्त। अङभावे सिच्। झलोझलीति सलोपः। लिङ्सिचाविति किन्त्वाद् गुणाभावः। अव्हत। अव्हास्त ॥

पुषादिद्युताद्यॢदितः परस्मैपदेषु ॥ श्यन्विकरणपुषादेर्द्युतादेर्ऌदितश्च परस्य च्लेरङादेशः स्यात्परस्मैपदेषु। पुष पुष्टौ, शुष शोषणे, इत्येवमादिरादिवादिगणसमाप्तेः पुषा-

दिः। यत्तु मध्ये ष्णिह प्रीतौ वृदिति वृत्करणं तद्रधादिसमाप्त्यर्थम्। अस्यतिवक्तीति सूत्रे अस्यतिग्रहणमात्मनेपदार्थं पुषादित्वादिति वार्तिककारवचनं चात्र प्रमाणम्। अपुषत्। अशुषत्। यस्तु भूवादिः पुष पुष्टौ श्रिषु श्लिषु प्लुषु लुप्षु दाहइत्येवमादिः सोत्र न गृह्यते। द्युतादीनां पृथक्करणाज्ज्ञापकात्। ते हि तत्र पुषेरुत्तरत्र पठ्यन्ते। योपि पुष पुष्टौ, मुष स्तेये इति ऋयादिषु। पठितः सोप्यत्र न गृह्यते। तत्र हि चत्वार एव धातवः। यदि च ते जिघृक्षिताः स्युर्लृदित एव ते क्रियेरन्। यत्तु स्वरितेत्त्वादेरपि तेनैव सिद्धत्वादिति हरदत्तेनोक्तम्। तत्र तेषां निरनुबन्धकत्वात्ग्रहेः स्वरितेत्त्वेप्यादिशब्दार्थालाभात्। अङ आदिशब्दार्थत्वे तु अषिशब्दार्थालाभादिति दिक्। अथ सिद्धान्तेपि पुषादयो द्युतादयश्च लृदित एव कुतो न पठिता इति चेन्न। प्रत्येकं लृकारपाठे विपरीतगौरवापत्तेः। न चानुबन्धान्तरेण लृकारो निमातुं शक्यः। तत्तत्कार्यानिर्वाहप्रसङ्गात्। आदितामीदितामुदितामूदिताञ्च तत्र सत्वात्। तद्यथा। पुषादिषु ञिष्विदा गात्रप्रक्षरणे, मदीहर्षे, शमु उपशमे, षिधू संराद्धौ इति पठ्यन्ते। द्युतादिष्वपि श्विता वर्णे, ञिमिदा स्नेहने, ञिष्विदा स्नेहनमोचनयोः, ष्वंसुध्वंसु अवस्रंसने, स्यन्द् प्रस्रवणे, कूपू सामर्थ्ये इति पठ्यन्ते। अद्युतत्। अश्वितत्। द्युद्भ्योलुङीति पाक्षिकं परस्मैपदम्। गम्लृ, अगमत्। परस्मैपदेष्विति किम्। अद्योतिष्ट। इह नन्दिग्रहिपचादिभ्य इतिवत् पुषद्युतादीत्येक एवादिशब्दः पठितुं युक्तः। तथा तु न कृतमित्येव॥

सर्तिशास्त्यर्तिभ्यश्च॥ एभ्यश्च्लेरङ् स्यात्। शासु अनुशिष्टौ अस्यैव ग्रहणम्। सर्त्यर्तिभ्यां परस्मैपदिभ्यां साहचर्यात्। न त्वाङः शासु इच्छायामित्यात्मनेपदिन इह ग्रहणम्। अर्तिस-

त्योरपि ऋमृ गताविति जौहोत्यादिकयोरेवेह ग्रहणम्। अविद्यमानशपा शासिना साहचर्यात्। तेन भौवादिकयोः सिजेवाचकारेण परस्मैपदेष्वित्यनुकृष्यते। तच्चोत्तरार्थं न त्विहान्वेति। पृथग्योगकरणसामर्थ्यात्। अन्यथा हि पुषादिद्युताद्यृलृदित्सार्तिभ्य इत्येव पठेत्। एवं हि पृथग्विभक्तिनिर्देशश्चकारश्च न कर्त्तव्यो भवति। अथ वा मण्डूकप्लुत्या उत्तरत्रैव परस्मैपदग्रहणं सम्भनत्स्यते। यद्वा। इहानुकृष्टं सत् परस्मैपदे दृष्टो यः शासिरिति व्याख्येयम्। शासइदङ्हलोरिति सूत्रे कैयटग्रन्थोप्येवं नेयः। सार्ति। असरत्। ऋदृशोङीति गुणः। अशिषत्। शासइदङ्हलोः, शासिवसीति षत्वम्। आरत्। समन्यवो यत्समरन्त सेनाः। समोगम्यृच्छिभ्यामित्यत्र आर्त्तिश्रुदृशिभ्यश्चेति वार्त्तिकेनात्मनेपदम्। बहुलं छन्दस्यमाङ्योगेपीत्यडभावः। समारन्त ममाभीष्टाः। सङ्कल्पास्त्वय्युपागन्त इति भट्टिः। यत्तु समोगम्यृच्छीत्यत्र भाष्ये सिजुदाहरणं तद्भौवादिकस्येति तत्रैवावोचाम॥

इरितो वा॥ इरितो धातोश्च्लेरङ् वा स्यात् परस्मैपदेषु। अभिदत्। अभैत्सीत्। परस्मैपदेषु किम्। अभित्त। स्वरितेत्वात्तङ्॥

जॄस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुंचुभ्यश्च॥ एभ्यश्च्लेरङ् वा। अजरत्। अजारीत्। स्तम्भुः सौत्रो धातुः। अस्तभत्। अस्तम्भीत्। म्रुचु म्लुचु गतौ। अम्रुचत्। अम्रोचीत्। अम्लुचत्। अम्लोचीत्। ग्रुचु ग्लुंचु स्तेयकरणे। अग्रुचत्। अग्रोचीत्। ग्लुञ्चु खञ्जगतौ। अग्लुचत्। अग्लुञ्चीत्। अश्वत्। अश्वयीत्। अशिश्वियत्। विभाषाधेट्श्वयोरित्यत्र व्युत्पादितमेतत्। ग्लुचुग्लुञ्चोरेकतरोपादानेनापि रूपत्रयं यद्यपि सिद्ध्यति। तथापि ग्लुञ्चावुपात्तेऽग्लुचत् अग्लुंचीदिति द्वयम्। ग्लुचेस्तु सिचि

अग्लोचीत्। तथा ग्लुचावुपात्ते तस्याग्लुचत् अग्लोचीत् ग्लुञ्चेस्त्वग्लुचीदिति। तथापि अर्थभेदात्सूत्रकृता उभावुपात्तौ। भाष्यकृता तु धातूनामनेकार्थत्वेनेष्टसिद्धिमाश्रित्य अन्यतरो न कर्त्तव्य इत्युक्तम्। एतेन द्वयोरुपादानसामर्थ्यात् ग्लुञ्चेरनुनासिकलोपो न भवतीति जयादित्योपन्यस्तङ्क्षां चिन्मतं परास्तम्। भाष्यविरुद्धत्वात्॥

कृमृदृरुहिभ्यश्छन्दसि॥ एभ्य श्च्लेरङ् वा स्याच्छन्दसि। अकरत्। अमरत्। व्यत्ययेनेह परस्मैपदम्। अदरत्। यत्सनोः सानुमारुहत्। यत्तु ऋग्भाष्ये इमामृचं व्याचक्षाणैरुक्तम्। रुहेर्लङि तिपि शपि संज्ञापूर्वको विधिरनित्य इति लघूपधगुणो न भवतीति, तत्प्रौढिवादमात्रमित्यवधेयम्। लोके तु, अकार्षीत्। अमृत। अदारीत्। अरुक्षत्॥

चिण्ते पदः। पद गतौ। अस्मात् च्लेश्चिण् स्यात् तशब्दे परे। आत्मनेपदैकवचनमेवात्र गृह्यते न तु तस्थस्थमिपामीति विहितः। धातोरात्मनेपदित्वेन तस्येहासम्भवात्। वेति निवृत्तम्। उत्तरत्रअन्यतरस्यांग्रहणात्। उदपादि सस्यम्। समपादि भैक्षम्। तङिति किम्। उदपत्साताम्। उदपत्सत॥

दीपजनबुधपूरितायिप्यायिभ्योन्यतरस्याम्॥ एभ्यश्च्लेश्चिण् वा स्यात्ते परे। अदीपि। अदीपिष्ट। अजनि। अजनिष्ट। अबोधि। अबुद्ध। अपूरि। अपूरिष्ट। अतायि। अतायिष्ट। अप्यायि। अप्यायिष्ट। जनी प्रादुर्भावे, बुध अवगमने इत्यनयोर्दिवाद्योरिह ग्रहणम्। यत्तु जन जनने भ्वादिः, बुध बोधने, बुधिर् बोधने भ्वादी, तेषां नेह ग्रहणं नित्यात्मनेपदिभ्यां दिवादिभ्याञ्च दीपिपूरिभ्यां साहचर्येण तादृशयोरेव जनिबुध्योर्ग्रहणात्। यन्तु अकर्मकसाहचर्यादकर्मकयोरेवेति

माधवेनोक्तम् । तच्चिन्त्यम् । क्रमादमुं नारद इत्यबोधि सः, अबोधि तज्जागरदुःखसाक्षिणीत्यादिप्रयोगविरोधात् । अयञ्च विकल्पः कर्तर्येव । भावकर्मणोस्तु नित्यश्चिण् परत्वात् । इह कर्तरीत्यनुवृत्तेर्वा ॥

अचः कर्मकर्तरि ॥ अजन्ताद्धातोश्च्लेश्चिण् वा स्यात्कर्मकर्त्तरि तशब्दे परे । प्राप्तविभाषेयम् । अकृत मा कटः स्वयमेव । अलावि अलविष्ट वा केदारः स्वयमेव । अच इति किम् । अभेदि काष्ठं स्वयमेव । कर्मकर्तरीति किम् । अकारि कटो देवदत्तेन ॥

दुहश्च ॥ दुहश्च्लेश्चिण् वा स्यात्कर्मकर्त्तरि तशब्दे परे । अदोहि अदुग्ध वा गौः स्वयमेव । चिण् भावे । लुग्वादुहोति क्सस्य वा लुक् । पक्षे अधुक्षत । कर्मकर्तरीति किम् । शुद्धकर्मणि चिणेव यथा स्यात् । अदोहि गौर्गोपालकेन । अप्राप्तविभाषेयम् । नदुहस्नुनमां यक्चिणाविति चिणः प्रतिषेधात् । तत्र दुहिग्रहणं यक्प्रतिषेधार्थम् । चिण्ग्रहणन्तु स्नुनमर्थम् ॥

न रुधः ॥ रुधश्च्लेः कर्मकर्त्तरि चिण् न । अरुद्ध गौः स्वयमेव । शुद्धे कर्मणि तु अरोधि गौर्गोपालकेन । रुधिर् आवरणइत्यस्यैवात्र ग्रहणं न तु अनोरुधकामे इत्यस्य कर्तृस्थभावकत्वेन कर्मकर्तुरभावात् ॥

तपोनुतापे च ॥ अस्मात् च्लेश्चिण् न स्यात् कर्मकर्त्तरि अनुतापे च । अनुतापः पश्चात्तापः । तस्य ग्रहणमकर्मकर्त्रर्थम् । तत्र हि भावकर्मणोरपि प्रतिषेधो भवति । कर्मवत्कर्मेति कर्मवद्भावातिदेशस्थलेपि, अतप्त तपस्तापसः । तप आर्जिजदित्यर्थः । अत्र तपस्तपःकर्मकस्यैवेति कर्मवद्भावातिदेशात्प्राप्तिः । अनुतापे, अन्वतप्त पापेन । पूर्वं यत्पापं कर्म कृतं तेन पश्चा-

दभ्याहत इत्यर्थः। शुद्धे कर्मणि लकारः। पापेनेति कर्त्तरि तृतीया। कर्मविवक्षायां शोकार्थे वा तपौ भावे लकारः। हेतौ तृतीया। यदा तु अभ्याहननार्थस्य तपेः कर्मस्थभावकस्य कर्मकर्त्ता विवक्ष्यते तदा कर्मवत्कर्मणेत्यतिदेशादात्मनेपदम्। तदापि हेतौ तृतीया॥

चिण् भावकर्मणोः॥ धातोश्च्लेश्चिण् स्यात् भावकर्मवाचिनि तशब्दे। अशापि भवता। अकारि कटस्त्वया। चिण्ग्रहणं स्पष्टार्थम्। चिण्तेपद इत्यतस्ते इत्यस्येव चिण्ग्रहणस्याप्यनुवृत्तेः। यत्तु दीपजनेत्यत्र अन्यतरस्यांग्रहणं, तन्नरुध इत्यत्रैव निवृत्तम्। अन्यथा नञो वैयर्थ्यापत्तेः। न च प्रतिषेध एव इहानुवर्त्तेतेति वाच्यम्। तस्य प्राप्तिपूर्वकत्वात्। भावकर्मणोश्च केनापि चिणः प्राप्तेरभावात्। न च श्लिष इति विभक्तेन योगेन विधीयमानः क्सः पुषाद्यङमिव इमं चिणमपि बाधेत। अतोत्र चिणेव यथा स्यात् क्सो मा भूदित्येतदर्थं पुनश्चिण्ग्रहणमिति प्रकृतसूत्रे भाष्यारूढं प्रयोजनमस्त्येवेति वाच्यम्। तस्यापि पाक्षिकत्वात्। समुदायापेक्षायां ह्येतदुक्तम्। अवयवापेक्षायां पुरस्तादपवादन्यायेन श्लिषेः क्सोऽमेव बाधते न तु चिणमिति प्रागेवोक्तम्॥

सार्वधातुके यक्॥ भावकर्मवाचिनि सार्वधातुके परे धातोर्यक् स्यात्। आस्यते शय्यते त्वया। अयङ्यिङ्क्षितीति शीङो यादेशः। क्रियते कटः। इह कर्मणि यक् भवतीत्यस्यावकाशः शुद्धं कर्म, पच्यते ओदनः। कर्तरि शपोवकाशः। शुद्धः कर्ता। कर्मकर्तर्युभयप्रसङ्गे। यग्विधाने कर्मकर्तर्युपसंख्यानं तर्हि कर्तव्यम्। न कर्तव्यम्। कार्यातिदेशात्सिद्धम्। कर्मवत्कर्तरीत्यनेनैव हि यगात्मनेपदादीनि विधीयन्ते इति यगेव परः।

शास्त्रातिदेशपक्षेपि नदुहस्नुनमांयक्चिणाविति ज्ञापकात् कर्मकर्तरि यगेव भविष्यति। अत्रेदमवधेयम्। भावकर्मकर्त्तारो लकारार्थाः। लः कर्मणिचभावेचाकर्मकेभ्य इति सूत्रात्। तत्र हि चकारेण कर्तरीत्यनुकृष्यते। तच्च वाच्यार्थसमर्पकमिति पूर्वसूत्रे स्थितम्। उत्तरत्रापि तयोरेवकृत्यैत्यत्र तथैवेति सन्देशात्प्रायपाठाच्च मध्येपि वाच्यसमर्पकतैवोचिता प्रधानभूतधात्वर्थाश्रयः कर्ता फलाश्रयश्च कर्म। फलव्यापारयोश्च धातुनैवोपात्तत्वात्। आश्रयमात्रं लकारार्थः। अनन्यलभ्यस्यैव शब्दार्थत्वात्। ततश्च तिङामपि स एवार्थः। तेषां लादेशत्वात् स्वान्यर्थाभिधानसमर्थस्यैव चादेशत्वात्। विकरणास्तु द्योतकाः। तत्रापि शबादयो धात्वर्थे व्यापारे आश्रयस्य विशेषणतां द्योतयन्ति। यक्चिणौ तु फले। ननु विपरीतमेवास्तु कर्तरि शबित्यादेरप्यनुशासनस्य स्वरसेन शबादय एव वाचकाः। लकारास्तु द्योतका इतीति चेन्न। आशीर्लिङि लिटि च अदादिजुहोत्यादिषु च शबाद्यभावेपि तत्प्रतीतेः। यद्यपि, क्वचित्तिङामभावेपि प्रतीयन्ते त्रयोप्यमी। अशाम्यकारिगच्छेति चिण्शप्सान्निधिमात्रतः॥ अधोगबिभरित्यादौ धातुमात्रेपि कर्तृधीः। तथाप्यासत इत्यादौ धात्वभावेपि कर्तृधीः॥ तथापि तत्र परमते लुप्तस्मृतं बोधकम्। अस्माकन्तु यः शिष्यते स लुप्यमानार्थाभिधायीत्युक्ताभ्युपगमात् सर्वं सुस्थम्। तत्र कर्तृकर्मणी वदन् तिङ् तन्निष्ठां सङ्ख्यामपि प्रतिपादयतीति कर्तृकर्मणोर्द्वित्वे बहुत्वे च द्विवचनबहुवचने भवतः। भावे लस्तु असत्त्वावस्थापन्नां धात्वर्थभूतां क्रियामेव अभिधत्ते द्योतयति वेति तत्र प्रथमपुरुषैकवचनमेव भवति न मध्यमोत्तमौ। युष्मदस्मत्सामानाधिकरण्याभावात्। नापि द्विवचनबहुवचने। द्वित्वबहुत्वयोरप्रतीतेः। एकव-

चनन्तु उत्सर्गः करिष्यतइति भाष्याद्भवति । अत्र बहुवचनं नेत्य-प्युत्सर्गः । उष्ट्रासिका आस्यन्तोहतशायिकाः शय्यन्ते इत्यत्र भाष्ये तदभ्युपगमात् । उष्ट्राणां हि आसिकाः स्वरूपत एव विलक्षणाः हताश्च नानाप्रकारं शेरते उत्ताना अवताना: विकीर्णकेशाः विस्रस्तवस्त्राः इत्यादि । तत्साम्यादाख्यातवाच्यस्यापि भावस्य स्वरूपगतभेदावभासाद्बहुवचनं भवत्येव । इवशब्दप्रयोग-मन्तरेणापि इवार्थावगतिर्भवति परत्र परशब्दः प्रयुक्त इति न्या-यात् । तदयमर्थः । यादृशानि हतानामनेकप्रकाराणि शयना-नि तादृशानि देवदत्तादिभिः क्रियन्तइति । एवञ्चेह आसिका शायिका इति द्वितीयाबहुवचनान्तं क्रियाविशेषणत्वेन कर्मत्वा-त् । न चैवं क्लीबत्वमेकवचनं च स्यादिति वाच्यम् । स्त्रियां क्तिक्तिन्नित्यधिकारात् स्त्रीत्वावधारणेन सामान्ये नपुंसकमित्यस्या-प्रवृत्तेः । बहुत्वावधारणेन च एकवचनाप्रवृत्तेरिति दिक् । के चित्तु कर्मण्ययं लकार इति मन्वाना आसिकाशायिकाशब्दौ प्रथमान्तावित्याहुः । तथाहि । आसिकाशायिकयोर्भावतया कालभावाध्वगन्तव्या इति कर्मत्वे गोदोहः सुप्यतइतिवत् कर्म-णि लः । उष्ट्रासिकाहतशायिकयोश्च आख्यातप्रकृत्युपस्थिते आसनशयने प्रति परिच्छेदकत्वेनान्वयः । गोदोहस्येव स्वापे, परिच्छेदकत्वं च आसिकाशायिकयोः सादृश्यद्वारकं गोदोहस्य तु कालोपाधिनेत्यन्यदेतत् । एतच्च विवक्षान्तरे भवत्येवेति कैयटा-दयः । भाष्यकारैस्तु भावेपि लविधाने बहुत्वं स्वीकृतमित्युक्तम् । न चैवमाख्यातवाच्यस्य भावस्य असत्वावस्थापन्नतेति सिद्धा-न्तो भज्येतेति वाच्यम् । लिङ्गायोगस्य करणादिकारकायोगस्य चेह असत्वावस्थात्वेन विवक्षितत्वात् । अत एव पचति भवति, पच्यते भवति, पश्य मृगो धावतीत्यादौ वाक्यार्थभूतायाः

क्रियायाः क्रियान्तरं प्रति कर्तृत्वकर्मत्वाभ्यामन्वयेपि न का चित् क्षतिः । न चैतावता घञादिसाम्यं, घञादिवाच्यो हि भावः सलिङ्गः यथायथं सकलकारकान्वितश्चेति वैषम्यस्य स्पष्टत्वात् । अत्र वैषम्ये अनुभवबलकल्प्यः शब्दशक्तिस्वभाव एव नियामकः । तदेतदुक्तम् । कृदभिहितो भावो द्रव्यवत्प्रकाशतइति । कृत्स्वपि तुमुनादौ न सत्वार्थकत्वम् । एतच्च अव्ययकृतो भावइति वार्त्तिके स्फुटीभविष्यति । अनव्ययकृत्स्वपि शयितव्यं भवद्भिरित्यादौ एकत्वसंख्याया एवान्वयः न तु द्वित्वादेरित्यादि यथानुभवं यथाकरञ्च विवेक्तव्यम् ॥

कर्त्तरि शप् ॥ कर्तृवाचिनि सार्वधातुके परे धातोः शप् स्यात् । पकारः स्वरार्थः । ङित्त्वप्रतिषेधार्थश्च । शकारः सार्वधातुकार्थः । शप्श्यनोरित्यादौ विशेषणार्थश्च । पचति पठति । कर्तृग्रहणं कर्मवत्कर्मणेत्यलोपयोक्ष्यते । इह तु सार्वधातुके शप् भवतीति सामान्यविधानेपि न क्षतिः । भावकर्मणोर्यगादेरपवादत्वात् । कर्तर्येव शपः पर्यवसानात् । न च यग्विधौ भावकर्मग्रहणं नानुवर्त्ततइति वाच्यम् । पचतीत्यादौ शबादिनेव निमित्तत्वेनाश्रित्य यकः प्रसङ्गात् ॥

दिवादिभ्यः श्यन् ॥ शपोपवादः । दीव्यति । सीव्यति । मृग अन्वेषणइति चुरादावदन्तेष्वात्मनेपदी पठ्यते । तस्य, पयःपारावारं परमपुरुषोयं मृगयते इत्यादि भवति । दिवादिष्वपि पाठात् मृग्यतीति साधुः । कण्ड्वादिषु वा मृगशब्दो द्रष्टव्य इति हरदत्तादयः ॥

वा भ्राशम्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ॥ एभ्यः श्यन् वा । टुभ्राशृ टुम्लाशृ दीप्तौ । भ्रमु अनवस्थाने, भ्रमु चलने द्वयोरपि ग्रहणम् । क्रमु पादविक्षेपे । क्लमु ग्लानौ । त्रसी उद्वे-

गे। त्रुटी छेदने। लष कान्तौ। इह अनवस्थानार्थो भ्रमिः क्लमित्रसी च दिवादयः। त्रुटिस्तौदादिकः। इतरे भौवादिकाः। अत उभयत्रविभाषेयम्। भ्राश्यते। भ्राशते। भ्लाश्यते। भ्लाशते। भ्राम्यति। भ्रमति। दैवादिकस्य भ्रमेः शमामष्टानां दीर्घः श्यनीति श्यनि दीर्घः। भौवादिकस्य तु न भवति। अशमादित्वात्। क्राम्यति। क्रामति। क्रमः परस्मैपदेष्विति दीर्घः। अयञ्च शितीत्यनुवृत्तेः शपि श्यनि च भवति। कौमुद्यान्तु क्रमो दीर्घः स्याच्छपीति व्याख्याय श्यनि ह्रस्व एवोदाहृतः। तदशुद्धमेव। क्लाम्यति। क्लामति। ष्ठिवुक्लमुचमांशितीति दीर्घः। क्लमेर्दिवादिपाठः पुषादिकार्यार्थः। कौमुद्यान्तु भौवादिकस्य तु क्लमतीत्युक्तं तदपाणिनीयमेव। त्रस्यति। त्रसति। त्रसेर्दिवादिपाठे फलं चिन्त्यामिति हरदत्तः। त्रुट्यति। त्रुटति। लष्यति। लषति॥

यसोनुपसर्गात्॥ अनुपसर्गाद्यसेः श्यन् वा स्यात्। यस्यति। यसति। अनुपसर्गात्किम्। आयस्यति। प्रयस्यति। इह नित्यं श्यन्। यसु प्रयत्नइत्यस्य दैवादिकत्वात्॥

संयसश्च॥ सम्पूर्वाद्यसेः श्यन्वा। संयस्यति। संयसति। इह यसः संयसश्चेत्येव वक्तुं युक्तम्। सोपसर्गाच्चेत् संयस एव न तु प्रयसादेरिति नियमेनेष्टसिद्धेः॥

स्वादिभ्यः श्नुः॥ स्पष्टम्। सुनोति। षिञ् बन्धनइत्यस्य स्वादौ क्र्यादौ च पाठात् सिनोति सिनातीत्युभयं भवति॥

श्रुवः शृ च॥ श्रुवः श्नुः प्रत्ययः स्याच्चत्सन्नियोगेन शृ इत्ययमादेशश्च। शृणोति। शृणुतः। शृण्वन्ति॥

अक्षोन्यतरस्याम्॥ अक्षू व्याप्तौ भौवादिकः। अस्मात् श्नुर्वा स्यात्। अक्ष्णोति। अक्षति॥

तनूकरणे तक्षः ॥ श्नुर्वा स्यात् । काष्ठं तक्ष्णोति । तक्षति वा । तनूकरणे किम् । सन्तक्षति । वाग्भिर्भर्त्सयतीत्यर्थः ॥

तुदादिभ्यः शः ॥ तुदति । नुदति । तुद् ति नुद् ति इति स्थिते परत्वात्प्राप्तं गुणं नित्यत्वाच्छो बाधते ॥

रुधादिभ्यः श्नम् ॥ एभ्यः श्नम् प्रत्ययः स्यात् । मित्त्वादन्त्यादचः परः । तक्रकौण्डिन्यन्यायेनायं शपं बाधते । शकारः श्नान्नलोप इति विशेषणार्थः । नाञ्नलोप इत्युच्यमाने यज्ञानां यत्नानामित्यत्रापि स्यात् । न च नामीति दीर्घत्वे कृते नादितिव्यपदेशाभावान्न भविष्यतीति वाच्यम् । एकदेशविकृतस्यानन्यत्वेन सत्यपि दीर्घे नादिति व्यपदेशसम्भवात् । किञ्च परत्वाल्लोपेनैव भाव्यम् । न च ततोपि परत्वात्सुपिचेति दीर्घोस्त्विति वाच्यम् । सन्निपातपरिभाषया तस्य नाम्यप्रवृत्तेः । न चैवं रामाणामित्यादौ नामीति दीर्घोपि न स्यादेवेति वाच्यम् । आरम्भसामर्थ्यान्नामीति दीर्घे कर्तव्ये सन्निपातपरिभाषाया अप्रवृत्तेः । सुपिचेति दीर्घस्तु रामाभ्यामित्यादौ चरितार्थः सन्निपातपरिभाषां बाधितुं नेष्टे । यत्तु हरदत्तेनोक्तं कष्टायेतिनिर्देशात्सामान्यापेक्षज्ञापकादीर्घो भविष्यति । एवमपि तस्य पूर्वस्माद्विधौ स्थानिवत्वात्तशब्द एवायमिति नलोपेः स्यादेवेति । तच्चिन्त्यम् । सामान्यापेक्षेण हि ज्ञापकेन परिभाषायाः क्वाचित्की अप्रवृत्तिरिति लक्ष्यानुरोधात्सिध्यतु नाम, औत्सर्गिकी तत्प्रवृत्तिः किमर्थमिह त्याज्या । यत्नानामित्यादिलक्ष्यसिद्ध्यर्थमेवेति चेन्न । सत्यपि दीर्घे लक्ष्यं न सिध्यतीति समनन्तरमेवोक्तत्वात् स्वयमपि लक्ष्यासिद्धेर्वक्ष्यमाणत्वाच्च । किञ्च पूर्वस्माद्विधाविति अतिस्थवीयः । तस्य हि पूर्वस्मान्निमित्तत्वेनाश्रितादित्यर्थः स्थितः । यच्चेहानादिर्ऋदुपदेशः पूर्वं नकारव्यञ्जनमात्रं

न तन्निमित्तत्वेनाश्रितम्, यच्च निमित्तं नकाराकारसंघातः नासावनादेष्टादचः पूर्व इति यत्किञ्चिदेतत्। तस्मात्प्रागुक्तविधया एकदेशविकृतस्यानन्यत्वात्प्राप्तिः। दीर्घात्प्रागेव वेति विशेषणार्थः शकारः। न चैवमपि विश्नानां प्रश्नानामित्यत्रातिप्रसङ्गः। अनर्थकत्वात्। न च विकरणेष्येवमेवेति वाच्यम्। एकदेशिमते तस्य वाचकत्वात्। मुख्यमतेपि द्योत्येनार्थेनार्थवत्त्वात्। अत एव प्रत्ययसंज्ञाया अन्वर्थत्वेपि श्नमि तत्प्रवृत्तौ लशक्विति शस्येत्संज्ञा सिध्यति। किञ्च लक्षणप्रतिपदोक्तपरिभाषयापि विश्नानामित्यादौ नातिप्रसङ्गः। तस्मात् श्नान्नलोप इति विशेषणार्थः श्नमः शकार इति स्थितम्। न चार्धधातुकसंज्ञानिवृत्त्यर्थोपि सोस्तु। सत्यां हि तस्यां अनक्ति भनक्ति, अतोलोपः स्यात्। रुणद्धि भिनत्ति, गुणः स्यात्। हिनस्ति तृणेढि, इडागमः स्यात्। नेड्वशीति तु नेह प्रवर्त्तते अकृत्वादिति चेन्न। सत्यप्यार्द्धधातुकत्वे क्षत्यभावात्। न च लोपो गुण इड् वेति त्रितयं स्यादित्युक्तमिति चेन्न। त्रितयस्याप्यागमत्वात् श्नमः पूर्वभागस्य चानङ्गत्वात्। तथाहि। यस्मात्प्रत्ययविधिरित्यस्यायमर्थः। प्रत्यये विधीयमाने यत्पञ्चम्या निर्दिष्टं धातोः प्रातिपदिकादित्यादि तदादि तस्मिन्परतोङ्गमिति। इह तु यत्पञ्चमीनिर्दिष्टं रुधादिभ्यो धातुभ्य इति न तस्मात् प्रत्ययः परः यस्माच्च पूर्वभागात्प्रत्ययः परः नासौ तस्मिन्विधीयमाने पञ्चम्या निर्दिष्ट इति दिक्। रुणद्धि। भिनत्ति॥

तनादिकृञ्भ्य उः॥ तनादिभ्यः कृञश्च उप्रत्ययः स्यात्। तनोति। करोति। कृञ्ग्रहणं भाष्ये प्रत्याख्यातम्। तनादित्वादेव सिद्धेः। ननु तनादिकार्यापेक्षनियमार्थं तदस्तु। तेन

तनादिभ्यस्तथासोरिति वैकल्पिकस्य सिज्लुको ऽप्रवृत्तौ अकृत अकृथा इत्यत्र द्वैरूप्यं न भवतीति चेत्। मैवम्। सत्यपि लुग्विकल्पे तदभावे ह्रस्वादङ्गादिति लोपेनेष्टसिद्धेः। न च विकल्पेन नित्यस्य बाधः। विकल्पं प्रति नित्यस्यासिद्धत्वात्। न च तनादिपाठसामर्थ्यादपवादो वचनप्रामाण्यादिति न्यायेनासिद्धत्वबाधनाद्विकल्पेन नित्यस्य बाधः। तनादिपाठस्य विकरणविधौ चरितार्थत्वात्। विकल्पोप्यतथा इत्यादौ चरितार्थः। प्रत्युत क्रियमाणे कृञ्ग्रहणे तनादिषु कृञः पाठस्य अन्यार्थत्वात्। येननाप्राप्तिन्यायेन विकल्पो नित्यविधिं बाधेत। कृञ्ग्रहणन्तु विकरणविधौ तनादिषु पाठश्चरितार्थो मा भूदित्येवमर्थं स्यात्। तस्मात्कृञ्ग्रहणपरित्याग एवोचितः॥

धिन्विकृण्व्योर च॥ धिवि प्रीणने। कृवि हिंसाकरणयोः, अनयोरकारोन्तादेशः स्यादुप्रत्ययश्च। शपोपवादः। अतोलोपः। तस्य स्थानिवद्भावाल्लघूपधगुणो न। धिनोति। कृणोति। नुमनुषक्तयोर्ग्रहणं नुम्विधिरुपदेशावस्थायामेव प्रवर्त्ततइति ज्ञापनार्थम्। तेन नुम्विधावुपदेशिवद्वचनं प्रत्ययासिद्ध्यर्थमिति वचनं न कर्तव्यं भवति। सिचस्तासेश्चेकार उच्चारणार्थ इति पक्षे नुम्विधौ धातुग्रहणमपि न कर्तव्यं भवति। तज्ज्ञाप्यस्यानेनैव ज्ञापनात्॥

क्र्यादिभ्यः श्ना॥ स्पष्टम्। क्रीणाति। प्रीणाति॥

स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यश्नुश्च॥ आद्याश्चत्वारः सौत्राः। स्कुञ् आप्रवणे। एभ्यः श्ना स्यात् श्नुश्च। स्तभ्नाति स्तभ्नोति। हौ शानच्। स्तभान। स्तभ्नुहि। स्तुभ्नाति। स्तुभ्नोति। स्कभ्नाति। स्कभ्नोति। स्कभ्नोति। स्कुभ्नोति। स्कुनाति। स्कुनीते। उदित्करणसामर्थ्यात्सौत्राणामपि धातूनां

सर्वार्थत्वं न त्वेतद्विकरणमात्रविषयत्वम् ॥

हलः श्नः शानज्झौ ॥ हलः परस्य श्नाप्रत्ययस्य शानच् स्याद्धौ परे। पुषाण। मुषाण। लोट्। सिप् तस्य हिः। क्र्यादिभ्यः श्ना। तस्य शानच्। चित्त्वादन्तोदात्तः। सन्निपातपरिभाषाया अनित्यत्वाद्धेर्लुक्। हलः किम्। क्रीणीहि। हौ किम्। पुष्णाति। श्न इति स्थानिनिर्देश आदेशत्वलाभाय। इतरथा हि प्रत्ययान्तरमेवेदं स्यात्। ननु तथैवास्तु को दोष इति चेन्न। पच पठेत्यादावपि शपं बाधित्वा शानच्प्रसङ्गात्। न च क्र्यादिभ्य इति अनुवर्त्ततइति वाच्यम्। स्तभान स्तुभानेत्यादिचतुर्णामसिद्ध्यापत्तेः। न च स्तम्भ्वादयोप्यनुवर्तयितुं शक्याः। विशेषविहितेन शानचा इव श्न इव श्नोरपि बाधे स्तभ्नुहीत्यादेरसिद्धिप्रसङ्गात्। न च श्नुश्चेत्यप्यनुवर्त्तयम्। क्र्यादेरपि श्नुप्रसङ्गात्। न च स्तम्भ्वादिभ्य एव श्नुः शानच् तु तेभ्यः क्र्यादिभ्यश्चेत्यत्र प्रमाणमस्ति। तस्माद्यथान्यासमेवास्तु। शानचः शित्करणे प्रयोजनं चिन्त्यम्। स्थानिवद्भावेनैव सिद्धेरिति हरदत्तः। अत्रेयं चिन्ता। अनुबन्धकार्येति क्व चिदनल्विधाविति निषधः प्रवर्त्ततइति ज्ञापनार्थमिदम्। तेन वार्त्तिकमते ब्रूताादित्यत्र ईण्न, भष्यमते तु भविषीष्टेत्यत्र ङित्त्वं नित्यं न भवति। एतच्च कृङितिचेति सूत्रे स्फुटीकृतमस्माभिः ॥

छन्दसि शायजपि ॥ अपिशब्दाच्छानच् हौ अहौ च। गृभाय जिह्वया मधु। बधान देवसवितः। तद्ग्रहोर्भश्छन्दसीति गृह्णातेर्हकारस्य भकारः। अनिदितामिति बध्नातेर्नलोपः। योअस्कभायदुत्तरम्। अस्कभ्नादित्यर्थः ॥

व्यत्ययो बहुलम् ॥ विकरणाः प्रक्रान्ताः तेषां छन्दसि बहुलं व्यत्ययः स्यात्। व्यतिगमनं व्यत्ययः। व्यतिपूर्वादिणो

भावे एरच्। क्व चिदन्योन्यविषयावगाहनम्। क्व चित् द्वौ विकरणौ। क्वचित् त्रयः। आण्डाश्ष्णस्य भेदति। श्ष्णास्याण्डानि भेदति। भिनत्तीति प्राप्ते। न ह्यस्या अपरञ्च न जरसामरते पतिः। म्रियतइति प्राप्ते। जीवचामरवासाधो व्याधमाजीवमामर इत्यपि पुराणादौ छान्दसदर्शनात्समावेयम्। इन्द्रो वस्तेन नेषतु। नयतेर्लोटि तिपि शप्सिपौ द्वौ विकरणौ। इन्द्रेण युजा तरुषेम ह्वत्तम्। तरेमेत्यर्थः। तरतेर्विध्यादौ लिङ् मस्। उः सिप् शप् इति त्रयो विकरणाः। धातोर्गुणः। तरुष् मस् इति स्थिते नित्यङ्ङित इति सलोपः। यासुट् अतोयेयः यलोपः। आद्गुणः। बहुलग्रहणं सर्वविधिव्यभिचारार्थम्। तथा च भाष्यम्। सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च। व्यत्ययमिच्छति शास्त्रकृदेषां सोपि च सिद्ध्यति बाहुलकेन॥ सुपां व्यत्ययः, युक्तामातासीद्धरि दाक्षिणायाः। दाक्षिणस्यामिति प्राप्ते। तिङां, चषालं ये अश्वयूपाय तक्षति। तक्षन्तीति प्राप्ते। लादेशव्यंग्यः क्रियासाधनाविशेषरूपः स्वार्थपरार्थत्वादिश्चोपग्रहशब्दस्य वाच्यः। यथोक्तम्। य आत्मनेपदाद्भेदः क्वचिदर्थस्य गम्यते। अन्यतश्चापि लादेशान् मन्यन्ते तमुपग्रहमिति॥ आत्मनेपदादिति लादेशादिति च हेतौ पञ्चमी। इह तु तत्प्रतीतिनिमित्ते परस्मैपदे आत्मनेपदे च उपग्रहशब्दो लक्षणया वर्तते। ब्रह्मचारिणमिच्छते। इच्छतीति प्राप्ते। प्रतीपमन्यऊर्मिर्युध्यति। युध्यतइति प्राप्ते। मधोस्तृप्ता इवासते। मधुन इति प्राप्ते। भाषायान्तु यद्यप्यर्द्धर्चादित्वादुभयलिङ्गो मधुशब्दोस्ति तथापि अर्थविशेषएव तथा। मकरन्दस्य मद्यस्य माक्षिकस्यापि वाचकः। अर्द्धर्चादिगणे पाठात् पुन्नपुंसकयोर्मधुरिति शाश्वतकोशात्॥ अमृते तु नपुंसक एव। अत एव व्यत्ययोदाहरणं दत्तम्।

माघस्तु, सरसमकरन्दनिर्भरासु प्रसवविभूतिषु वीरुधां विरक्तः। ध्रुवममृतपनामवाञ्छयासामधरमधुं मधुपस्तवाजिहीते इत्यत्रामृतवाचकमधुशब्दं पुल्लिङ्गं प्रयुञ्जानश्चिन्त्यः । शाश्वतकोशात् । नरः पुरुषः । आधासवीरैर्दशभिर्वियूयाः । वियूयादिति प्राप्ते । यु मिश्रणे विपूर्वः, आशिषि लिङ् । कालवाची प्रत्ययः कालः। श्वोग्नीनाधास्यमानेन । लुटो विषये लट् । हल् । त्रिष्टुभौजः शुष्मिणमुग्रवीरम् । शुभ शुम्भ शोभार्थे, सकारस्य षकार आश्वलायनसूत्रे । तैत्तिरीये भकार एव पठ्यतइति हरदत्तः । वस्तुतस्तु आश्वलायनसूत्रेपि भकार एव पठ्यते । हल्व्यत्ययोदाहरणन्तु सुहितमिति प्राप्तइति भाष्यानुरोधेन स्पष्टम् । आच् । उपगायन्तु मां पत्नयो गर्भिण्यः । दीर्घस्य ह्रस्वः । स्वरव्यत्ययः परादिश्छन्दसिबहुलमित्यत्र वक्ष्यते । कर्तृशब्दः कारकमात्रस्योपलक्षणं तद्वाचिनीनां विभक्तीनां व्यत्यय इति हरदत्तः । एवन्तु सुप्तिङ् इत्येव गतार्थता स्यात्, तस्मात्कारकवाचिनां कृत्तद्धितादीनामपि व्यत्यय उदाहार्यः । तथा च कर्मण्यण्सूत्रे भाष्यम् । अत्रादाये-ति च कृतां व्यत्ययश्छन्दसीति । तच्च तत्रैव स्फुटीकरिष्यामः । याङीति प्रत्याहारः यको यशब्दादारभ्य लिङ्याशिष्यङिति ङकारेण तेषां व्यत्ययः प्रागेवोदाहृतः । एवं सुप्तिङ्प्रभृतीनां व्यत्ययं शास्त्रकृत्पाणिनिरिच्छति । स च बाहुलकेन सिध्यति । बहूनर्थान् लात्यादत्तइति बहुलं तस्य भावो बाहुलकम् । मनोज्ञादित्वाद्वुञ् ॥

लिङ्याशिष्यङ् ॥ छन्दसि धातोरङ् प्रत्ययः स्यात् आशिषि लिङि परे । स्थागागमिवचिविदिशकिरुहिष्वेवायमङ्प्रायेण दृश्यते । उपस्थेयं वृषभन्तुग्रियाणाम् । उपपूर्वात्तिष्ठतेराशिषि लिङ् सिपोम् । यासुट् । छन्दस्युभयथेति सार्वधातुकसंज्ञाया अपि

सत्वात् लिङःसलोपोनन्त्यस्येति सलोपः। अङि आतो लोपः। अतो येयः। सत्यमुपगेयम्। गमेम जानतो गृहान्। मन्त्रं वोचेमाग्नये। वचउम्। विदेयमेनां मनसि प्रविष्टाम्। व्रतं चरिष्यामि तच्छकेयम्। अस्रवन्तीमारुहेमास्वस्तये। दृशेरग्वक्तव्यः॥ पितरश्च दृशेयं मातरञ्च। अङि तु सति ऋदृशोङीति गुणः स्यात्। अथ कथं उपस्थेयाम शरणं बृहन्तेति। स्थेमेति हि प्राप्नोति। अत्र भाष्यं, सार्वधातुकत्वाल्लिङः सलोप आर्द्धधातुकत्वादेत्वामिति, एर्लिङीतिसूत्रेणेतिभावः। अङ् चात्र न कार्यः। बाहुलकात्॥

इति श्रीशब्दकौस्तुभे तृतीयस्य प्रथमे चतुर्थमान्हिकम्॥

कर्मवत्कर्मणा तुल्यक्रियः॥ कर्मशब्देन स्वनिष्ठा क्रिया लक्ष्यते। कर्मस्थया क्रियया तुल्यक्रियो लकारवाच्यः कर्त्ता कर्मवत् स्यात्। व्यत्ययो बहुलं लिङ्याशिष्यङिति द्विलकारको निर्देशः। लुप्तनिर्दिष्टो वा लकारः। लोपस्तु संयोगान्तस्येति हलोयमामिति वा। तच्च लग्रहणमिहानुवृत्तं षष्ठ्या विपरिणम्यते। लुप्तषष्ठीकं वा, षष्ठ्यर्थश्च वाच्यत्वम्। कर्त्तरि शबितिसूत्रात्कर्तृग्रहणमनुवृत्तं प्रथम्या विपरिणम्यते। तेनाभिमतार्थलाभः। यगात्मनेपदचिण्चिण्वद्भावाः प्रयोजनम्। भिद्यते काष्ठं स्वयमेव। अभेदि काष्ठं स्वयमेव। कारिष्यते कटः स्वयमेव। आत्मनेपदस्य त्रीण्यपि इमान्युदाहरणानि। यक्चिण्चिण्वद्भावानां तु क्रमेणेति विवेकः। निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितम्। निवर्त्तमाने कर्मत्वे स्वे कर्तृत्वेवतिष्ठते॥ अस्याञ्चावस्थायामकर्मकत्वात् कर्त्तरि भावे च लकाराः। तत्र यदा कर्तरि तदा शुद्धे कर्त्तरीव रूपेषु प्राप्तेषु पूर्वावस्थायां भिदेः कर्मीभूते काष्ठे यादृशी क्रिया द्विधा भवनरूपा करोतेः कर्मणि च कटे उत्पत्तिरूपा। तया तुल्यक्रियोयं भिदिकृञोः कर्त्ता

लकारवाच्यश्चेत्यतिदेशाद्यगादिचतुष्टयप्रवृत्तिः। यथा निवृत्तप्रेषणस्याकर्मकत्वं यथा च क्रियायाः क्व चित्कर्मस्थत्वं क्व चिन्न तथा णेरणाविति सूत्रे व्युत्पादितम्। कर्मणेति किम्। करणाधिकरणाभ्यां तुल्यक्रिये मा भूत्। साध्वसिश्छिनत्ति। साधु स्थाली पचति। नन्विह करणाधिकरणत्वावस्थायामसिस्थाल्योर्व्यापारो वस्तुतः सन्नपि धातुना नोपादीयतइति चेत्। किं ततः। नह्यस्मिन् सूत्रे सादृश्यप्रतियोगिभूतायाः क्रियाया धातूपात्तत्वं शब्देनाश्रितं येन कर्मग्रहणं विनाप्यतिप्रसङ्गो न भवेत्। किञ्च कर्तृस्थाक्रिया अप्यस्यैव व्यावर्त्याः।गच्छति ग्रामः स्वयमेव। आरोहति हस्ती स्वयमेवेति। अधिगच्छति शास्त्रार्थः स्मरति श्रद्दधातिचेत्यादि। नन्वेवं करोत्यर्थस्य यत्नस्यापि ज्ञानेच्छादिवत्कर्तृस्थत्वात् कारिष्यते कटः स्वयमेवेति कथमुदाहृतामिति चेन्न। करोतेरुत्पादनार्थत्वस्य प्रागेव वर्णितत्वात्। लकारवाच्यः किम्। भावे लकारोत्पत्तौ मा भूत्। भिद्यते कुसूलेन। इह सत्यतिदेशे कुसूलाद् द्वितीया स्यात्। किञ्च लकारवाच्यत्वविशेषणाभावे कृत्याः खलर्थाश्च अस्मिन् कर्तरि स्युः। भेत्तव्यः कुसूलः स्वयमेवेति। ईषद्भेदः कुसूलः स्वयमेवेति। इष्यते तु भावएव, भेत्तव्यं कुसूलेन कुसूलस्य वा। कृत्यानां कर्त्तरिवेति वा षष्ठी। ईषद्भेदं कुसूलेन। यत्त्विह वार्त्तिके कृत्यक्तखलर्थेषु प्रतिषेध इत्युक्तम्। तत्र क्तग्रहणमविवक्षितम्। अन्यत्र सह पाठात्त्विह पठितम्। भवत्येव हि एभ्यो ऽकर्मकत्वात् गत्यर्थाकर्मकेति सूत्रेण कर्त्तरि क्तः। तथा च सिनोतेर्ग्रासकर्मकर्तृकस्येति निष्ठानत्वे सिनो ग्रासः स्वयमेवेति कर्तरि क्त उदाहरिष्यते। अन्ये त्वाहुः। क्तग्रहणं विवक्षितमेव। गवा दुग्धं पय इत्युदाहरणात्। अत्र हि गोः कर्मकर्तृत्वात् तत्र कर्मवदतिदेशे सति क्तः

स्यात्। नह्यत्र सिद्धान्ते गत्यर्थाकर्मकेत्येतत्प्रवर्त्तते पयोरूपेण कर्मणा सकर्मकत्वात्। न चैवं सकर्मकत्वादेव कर्मवदित्यतिदेशो न भविष्यतीति वाच्यम्। दुहिपच्योर्बहुलं सकर्मकयोरिति प्रतिप्रसवात्। न च बहुलग्रहणादेव प्रवृत्तिः। तस्य भाष्ये प्रत्याख्यातत्वादिति दिक्। वतिग्रहणन्तु शक्यमकर्तुम्। तथाहि। लकारवाच्यस्य कर्तुः कर्मसंज्ञैवास्तु। न च कर्मसंज्ञया कर्तृसंज्ञाया बाधः। एकसंज्ञाधिकारादन्यत्र संज्ञानां समावेशात्। न चैवं सकर्मकत्वाभावे लो न स्यादिति वाच्यम्। आनुपूर्व्या सिद्धत्वात्। कर्मसंज्ञा हि लकारोत्पत्तिं प्रतीक्षते। लकारवाच्यस्यैव कर्तुस्तद्विधानात्। ततः प्राक् चाकर्मकत्वानपायेन भावेचाकर्मकेभ्य इति भावे कर्तरि च लविधेरप्रत्यूहत्वात्। नन्वेवमपि यगात्मनेपदे न स्यातां शुद्धयोः कर्मकर्त्रोः सावकाशयोर्यक्शपोः परत्वात् शप्प्रसङ्गात्। भावकर्मणोरित्यात्मनेपदस्य शेषात्कर्तरीति परस्मैपदस्यं च विप्रतिषेधेन परत्वात्परस्मैपदप्रसङ्गाच्चेति चेन्न। भावकर्मणोर्विहितेन यका अपवादभूतेन आक्रान्तविषयं परिहृत्य सार्वधातुकेशबिति उत्सर्गस्य प्रवृत्तिसम्भवात्। कर्त्तरिशबिति सूत्रे कर्तृग्रहणमतिरिच्यते। तस्यैतत्फलं कर्तैव यः कर्ता तत्र शबादयो यथा स्युः कर्मकर्त्तरि मा भूवन्निति। नन्वस्मिन् हरदत्तपक्षे नदुहेत्यादिना यकि निषिद्धे शप् न स्यात्। तथा च लिङ्लिटोरिव निर्विकरणप्रयोगापत्तिरिति चेत्। एवं तर्हि कर्त्तरीति योगो विभज्यते। भावकर्मणोरित्यत्रापि भावे कर्मणि चेति। ततः कर्मणीत्यनुवर्त्य कर्मणि कर्त्तरि यक् भवति शपोपवादः। नदुहेत्यादौ अपवादाभावात्पुनरुत्सर्गस्य स्थितिः। एतच्च व्याख्यानं यग्विधावेव भाष्ये स्थितम्। एवन्तावद्यक् सिद्धः। नदुहस्नुनमामिति लिङ्गाच्च। तथा कर्त्तरि कर्मेत्यतः

कर्त्तरीत्यनुवर्त्य कर्तैव यः कर्त्ता तत्र परस्मैपदं न तु कर्मकर्त्तरीति व्याख्यानादात्मनेपदम् । तस्माद्वत्करणे त्यक्तेपि सर्वमिष्टं सिद्ध्यतीति स्थितम् । क्रियमाणे तु वत्करणे अतिदेशोयमिति स्पष्टमेव । स च षोढा । रूपनिमित्ततादात्म्यव्यपदेशशास्त्रकार्यातिदेशभेदादिति स्थानिवत्सूत्रे व्युत्पादितम् । इह तु आदित्रयाणामसम्भवः । व्यपदेशातिदेशस्तु संज्ञापक्षान्न भिद्यते । तत्र वत्करणं व्यर्थम् अतो द्वावेव शिष्येते । तत्रापि शास्त्रातिदेशे यगात्मनेपदेसिद्ध्यर्थं पूर्वोक्तयत्न आस्थेय इति क्लिष्टता । प्रधानं च कार्यं, तदर्थत्वादतिदेशान्तराणाम् । अतः कार्यातिदेश एवायम् । न चास्मिन्पक्षे द्वितीयाप्यतिदिश्येत । तथा च भिद्यते कुसूलेनेति भावे लकारे कर्तरि द्वितीया स्यादिति वाच्यम् । लवाच्यस्यैव कर्तुः कर्मवदतिदेश इत्युक्तत्वात् । न चैवमपि भिद्यते कुसूल इत्यत्र दोषापत्तिः । अभिहितत्वेन द्वितीयाया अप्रवृत्तेः । नन्विह अनभिहिताधिकारो नास्तीति चेत् । सत्यम् । तथापि वत्करणमामर्थात् यथानभिहिते कर्मणि प्रत्ययः तथैवानभिहिते कर्तर्यपि लभ्येत । तेनाभिधानमस्तीत्युक्तमेव । ननु विवृत्तप्रेषणा लुनातिभिनत्त्यादयो ऽकर्मकाः द्विधा भवतीतिवत्तत्कथं तत्कर्तुः कर्मणा तुल्यक्रियत्वम् इति चेन्न । नह्यस्मिन्प्रयोगे यत्कर्म तेन तुल्यक्रियतां ब्रूमः किं तर्हि प्रयोगान्तरे यत्कर्म तेन । नन्वेवं पचत्योदनं देवदत्तः राध्यत्योदनः स्वयमेवेत्यादावतिप्रसङ्ग इति चेत् । अत्र वार्तिकम् । कर्मदृष्टश्चेत्समानधातावितिं ॥ न्यायसिद्धं चेदं, धातोरिति ह्यनुवर्तते कर्तृकर्मणी च धातोरन्यत्र न सम्भवत इति सामर्थ्यादेव सिद्धे तदनुवृत्तिरेकत्वविवक्षार्था । यस्मिन्नेव धातौ यत्कर्म तेन तुल्यक्रियस्तस्यैव कर्तेति । तेन धातुभेदे न भवति । स्यादेतत् । एकस्यापि रूपभेदे-

न कर्तृत्वं कर्मत्वं च दृश्यते । आत्मानमात्मना वेत्सीति यथा । एवं च ओदनः पच्यतइत्यादावपि प्राकृते कर्मण्येव लकारोस्तु तत्किं निवृत्तप्रेषणत्वाश्रयणेन, किञ्च कर्मवदित्यतिदेशेन । न चैवं भिद्यते कुसूलेनेति भावे लो न स्यादिति वाच्यम् । इष्टापत्तेः । कर्मण्येव हि सोस्तु । अत्राहुः । एवं सति नदुहस्नुनमामित्यादिना यक्चिणोः प्रतिषेधस्य विषयविभागो न लभ्येत । अपि च नमते दण्डः कारयते अर्चीकरत कट इत्यादौ यक्चिणोः प्रतिषिद्धयोरपि शप्चङौ न स्याताम् । अकर्तृत्वात् । किं च पचत्योदन इत्यपि प्रयोगः प्रसज्येत । तस्मान्निवृत्तप्रेषणतामाश्रित्यातिदेशसूत्रमारब्धव्यमेवेति । करणेन तुल्यक्रियः कर्त्ता बहुलं कर्मवदिति वक्तव्यम् । परिवारयति कण्टकैर्वृक्षम् । परिवार्यन्ते कण्टका वृक्षम् । अत्रात्मनेपदं सिध्यति । न च णिचश्चेत्यनेन तत्सिद्धिः । क्रियाफलस्य कर्तृगामित्वे सत्येव तत्प्रवृत्तेः । इह तु तदभावेप्यात्मनेपदस्येष्यमाणत्वात् । बहुलग्रहणान्नेह । साध्वसिश्छिनत्ति । सकर्मकाणां प्रतिषेधो वक्तव्यः ॥ अन्योन्यमाश्लिष्यतः । अन्योन्यं स्पृशतः । एतच्च न्यायसिद्धम् । तथाहि । कर्मस्थया क्रियया या तुल्या क्रिया यस्य कर्तुरित्युक्ते सन्निधानादिदं गम्यते । यत्क्रियावेशादसौ कर्ता सैव चेत्कर्मत्वोपयोगिनीति । न चैतदिहास्ति । स्वयमनाश्लिष्यतोपि परेणाश्लिष्यमाणस्य कर्मत्वसम्भवात् । परसमवेतसंयोगाख्यफलानुकूलव्यापारयोश्चलनात्मकयोरेकधातूपात्तयोरपि स्वरूपेणात्र भेदात् । एतेन भिद्यमानः कुसूलः पात्राणि भिनत्तीत्यपि व्याख्यातम् । द्विधाभवनस्य दैवगत्या कुसूलनिष्ठत्वेपि पात्रनिष्ठकर्मतायामप्रयोजकत्वात् । स्वयमभिद्यमानोपि हि कुसूलः उपरि पतन् पात्राणि भिनत्त्येव । नन्वेवमपि पचिरुधादीनां

द्विकर्मकाणामेकस्य कर्मणः कर्तृत्वेप्यपरेण सकर्मकत्वावस्थायां कर्मवद्भावः प्राप्तः तन्निषेद्धुं सकर्मकाणां प्रतिषेधवचनं कर्तव्यमेवेति चेत् । योगविभागात्सिद्धम् । तथाहि । तपेः । तपेरेव सकर्मकस्य न त्वन्यस्य । ततः, तपःकर्मकस्यैव । तपेरित्यनुवर्तते । यद्वा वार्तिके योगविभागः करिष्यते दुहिपच्योर्बहुलं सकर्मकयोः । अत्र दुहिपच्योः सकर्मयोरित्येकं वाक्यं नियमार्थं दुहिपच्योरेव न त्वन्येषामिति । दुग्धे गौः पयः । तस्मादुदुम्बरः सलोहितं फलं पच्यते । गौरुदुम्बरश्चात्र कर्मकर्त्ता । अकथितं चेति सूत्रे दुह्यादिपरिगणेन पचिरपि बोध्य इत्युक्तं प्राक् । तत्रेदं वार्तिकमुपष्टम्भकमित्यवधेयम् । ओदनं पचतीत्यादावतिप्रसङ्गनिवारणाय बहुलमिति द्वितीयं वाक्यम् । तच्च प्रत्याख्यातं भाष्ये । दुहिपच्योरिति हि कर्मकर्तृविषयकम् । कर्मस्थया क्रियया तुल्यक्रियएव विधायकं नियामकं वा । उभयथापि ओदनंपचतीत्यादौ प्रसङ्ग एव नास्तीति । न च कर्मकर्तर्येव परस्मैपदार्थं बहुलवचनं, तस्यानिष्टत्वादिति दिक् । सृजिदृशोः श्यंस्तु ॥ अनयोः सकर्मकयोः कर्ता बहुलं कर्मवद्भवतीति वक्तव्यम् । यगपवादश्च, श्यन् । सृजेः श्रद्धोपपन्ने कर्तर्येवेति वक्तव्यम् । सृज्यते स्रजं भक्तः । श्रद्धया निष्पादयतीत्यर्थः । असर्जि, श्रद्धया निष्पादितवान् । युज्यते ब्रह्मचारी योगम् । श्यनि सति प्रकृतेराद्युदात्तत्वं भवति । यकि तु लसार्वधातुकानुदात्तत्वे यक एवोदात्तत्वं स्यात् । कौमुद्यां तु श्रद्धावत्कर्तृकात् स्रजेर्यक्चिणौ कर्तरीति के चिदित्युक्तम् । तत्र यगित्यशुद्धम् । आत्मनेपदानुक्तेश्च न्यूनतेति दिक् । भूषाकर्मकिरादिसनां चान्यत्रात्मनेपदात् ॥ भूषावाचिनां किरादीनां सन्नन्तानां च यक्चिणौ न भवत इति वक्तव्यमित्यर्थः । अलं

कुरुते कन्या स्वयमेव । अलमकृत । भूषाफलस्य शोभाख्यस्य कर्मणि दर्शनात् कर्मस्था भूषा। ण्यन्तानां तु भूषार्थानां वक्ष्यमाणेनापि यक्चिणोः प्रतिषेधेन सिद्धत्वान्नेह मुख्योदाहरणता । भूषयते कन्या स्वयमेव । अबुभूषत कन्या स्वयमेव । किरादि । अवकिरते हस्ती स्वयमेव । अवाकीर्ष्ट हस्तिनं कश्चित् । पांस्वादिनावकिरति । तत्र सौकर्यात् हस्ती कर्तृत्वेन विवक्ष्यते । गिरते । अगीर्ष्ट । किरादिस्तुदाद्यन्तर्गणः । सन् । चिकीर्षते कटः स्वयमेव । अचिकीर्षिष्ट । इहेच्छायाः कर्तृस्थत्वेपि करोतिक्रियापेक्षं कर्मस्थक्रियत्वम् ॥

तपस्तपःकर्मकस्यैव ॥ तप सन्तापे। अस्य कर्त्ता कर्मवत्स्यात्।स च तपःकर्मकस्यैव नान्यकर्मकस्य। क्रियाभेदाद्विध्यर्थमेतदिति वृत्तिः। तथाहि। उपवासादीनि तपांसि तापसं तपन्ति दुःखयन्तीत्यर्थः । तथा च तापसस्य कर्मत्वे तपेर्दुःखनमर्थः । कर्तृत्वे तु अर्जनमर्थः । तापसस्तप्यते, तपोर्जयतीति यावत् । नन्वेवमपि शरीरसन्तापलक्षणक्रिया अवस्थाद्वयेपि तुल्या नहि शरीरसन्तापादन्यत् अर्जनं नाम तापसस्य व्यापारोस्ति । तथा च भाष्यसम्मतं नियमार्थत्वमेव वृत्तिकृता कुतो नादृतमिति चेत्।अत्राहुः। वस्तुतश्शरीरसन्तापस्य सत्वेपि शब्दान्न तत्त्वेन भानं किं त्वर्जनत्वेनैव। अन्यथा तपसः कर्मत्वानुपपत्तेः। तथाच तुल्यक्रियत्वाभावात् विध्यर्थतैवेति।लुङि, अतप्त तपस्तापसः।तपोनुतापेचेति चिणः प्रतिषेधात्सिच् । तस्य झलोझलोति लोपः । तपःकर्मकस्येति किम् । उत्तपति सुवर्णं सुवर्णकारः । एवकारस्तु व्यर्थ एव । श्रुतस्य तस्य अन्वयो वक्तव्य इति चेत् । सत्यम् । वाक्यं भित्वा कथंचिदन्वयः प्रदर्शित एव ॥

न दुहस्नुनमां यक्चिणौ ॥ एषां यक्चिणौ न स्तः । कर्म-

वदतिदेशेन प्राप्तयोरयं निषेधः । अनन्तरस्येति न्यायात् । तेन शुद्धे कर्मणि भावे स्त एव । दुहेरनेन यक् निषिध्यते । चिण् तु दुहश्चेति सूत्रेण प्रागेव विभाषितः, दुग्धे गौः स्वयमेव । अदुग्ध, अदोहिगौः स्वयमेवेयकि प्रतिषिद्धे शप् । अदादित्वात्तस्य लुक् । दादेरिति घः । झषस्तथोरिति धत्वम् । जश्त्वम् । अप्रधाने दुहादीनामिति यस्मिन्कर्मणि लकारस्तस्य कर्तृत्वविवक्षा । प्रधानं कर्म तु कर्मैव । स्वयं प्रदुग्धेस्य गुणैरुपस्तुता वसूपमानस्य वसूनि मेदिनीतिवत् । चिणभावे क्सः । लुग्वादुहेति लुक् । प्रस्नुते । प्रास्नोष्ट । चिणि प्रतिषिद्धे सिच् । नमते दण्डः स्वयमेव । अनंस्त । अन्तर्भावितण्यर्थोत्र नमिः । तत्र यथा नमयति दण्डं देवदत्तः नमयते दण्डः स्वयमेवेति ण्यन्तस्य कर्मस्थक्रियत्वम्, एवमस्यापि द्रष्टव्यम् । यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूत्रामुपसंख्यानम् ॥ कारयते कटः स्वयमेव । अचीकरत । उच्छ्रयते दण्डः स्वयमेव । उदश्रिश्रियत । ब्रूते कथा स्वयमेव । अवोचत । वचनं शब्दप्रकाशनफलत्वात्कर्मस्थम् । भारद्वाजीयाः पठन्ति । णिश्रन्थिग्रन्थिब्रूत्मनेपदाकर्मकाणामुपसंख्यानमिति । णीति णिङ्णिचोः सामान्यग्रहणम् । णिजुदाहृतः । णिङः, पुच्छमुदस्यति उत्पुच्छयते गौः । अस्यान्तर्भावितण्यर्थतायाम् उत्पुच्छयते गाम् । पुनः सौकर्यातिशयेन कर्तृत्वविवक्षायाम् उत्पुच्छयते गौः स्वयमेव । उदपुपुच्छत । इह ण्यन्तात् यक्चिणोः प्रतिषिद्धयोः शप्चङौ भवतः । कौमुद्यां तु कर्मकर्तरि चङ् नेत्याह । अकारयिष्टेत्युदाहृतं तदशुद्धमेव । श्रन्थग्रन्थ सन्दर्भे । चुरादावाधृषीयौ । तयोर्णिजभावपक्षे ग्रहणम् । ग्रन्थति ग्रन्थं देवदत्तः । श्रन्थति मेखलाम् । ग्रन्थते ग्रन्थः स्वयमेव । अग्रन्थिष्ट । श्रन्थते । अश्रन्थिष्ट । क्र्यादावपि इमौ पठ्यते तयोरपीह ग्रहणम् । श्रथ्नीते ग्रथ्नीते

स्वयमेव। आत्मनेपदविधावकर्मका ये धातवो निर्दिष्टास्ते यदान्तर्भावितण्यर्थाः पुनश्च निवृत्तप्रेषणास्तइहोदाहरणम्। तद्यथा। वेःशब्दकर्मणः, अकर्मकाच्च। विकुर्वते सैन्धवाः वल्गन्तीत्यर्थः। तान्विकिरोति, वल्गयतीत्यर्थः।पुनः सौकर्यात्कर्तृत्वे विकुर्वते सैन्धवाः स्वयमेव। व्यकृषत। यत्तु वृत्तौ पठ्यते आहन्ति माणवकम्। आहते माणवकः स्वयमेवेति। तदयुक्तम्। आहन्ति माणवकमित्यस्य सकर्मकत्वादात्मनेपदाभावाच्चेति हरदत्तः। अन्ये त्वाहुः। आत्मनेपदाकर्मकेति धातूपलक्षणं, हन्तिश्चायम् आङोयमहनं इत्यत्र यदा कर्माविवक्षया अकर्मकः तदा आत्मनेपदस्य निमित्तम्। तस्यात्र सकर्मकत्वेपि अविरुद्धमुदाहरणमिति ॥

कुषिरजोः प्राचां श्यन् परस्मैपदं च ॥ कुष निकर्षे। रञ्ज रागे। अनयोर्धात्वोः कर्मकर्तरि यक् न स्यात् किन्तु श्यन् परस्मैपदं च। आत्मनेपदापवादः। कुष्यति पादः स्वयमेव। रज्यति वस्त्रं स्वयमेव। प्राचांग्रहणं विकल्पार्थम्। कुष्यते। रज्यते। नदुहेति सूत्रात् यक् नेत्यनुवर्त्य तस्मिन्नेव स्थले श्यन् विहितः। तत्सन्नियोगशिष्टं च परस्मैपदम्। तेन आशीर्लिङ्लिटोः स्यादीनां च विषये श्यन्परस्मैपदे भवतः। कोषिषीष्ट पादः स्वयमेव। रंक्षीष्ट वस्त्रं स्वयमेव। चुकुषे। ररञ्जे। कोषिष्यते। रंक्ष्यते। अकोषि। अरञ्जि इत्यादि। श्यन्यकोः स्वरे नुमि च विशेषः। कुष्यन्ती जंघा। श्यनि शप्श्यनोर्नित्यमिति नुमागमः नित्त्वादाद्युदात्तश्च। यकि तु आच्छीनद्योरिति नुम्विकल्पः। लसार्वधातुकानुदात्तत्वेन यक एवोदात्तत्वं च स्यात् ॥

धातोः ॥ आतृतीयसमाप्तेरधिकारोयम्। यद्यपि धातोरेकाचोहलादेरिति सूत्राद्धातुग्रहणमनुवर्ततएव तथापि आर्द्धधातुकसंज्ञाया आश्रितशब्दव्यापारत्वलाभाय पुनर्धातुग्रहणम्।

अन्यथा लूभ्यां पूभ्यामित्यादौ भ्यामादेरिट् प्रकृतेर्गुणश्च स्यात्। धातोरित्येवमविधानात्तु न भवति। तथा कृत्संज्ञा उपपदसंज्ञा चास्मिन्नेव धात्वधिकारे यथा स्यादित्येवमर्थमपीदम्। अन्यथा पूर्वत्रापि स्यात् ततश्च करिष्यतीत्यत्र स्यप्रत्ययस्य कृत्संज्ञायां कृदन्तस्य प्रातिपदिकत्वे सोरुत्पत्तिः स्यात्। एकवचनस्यौत्सर्गिकत्वात्। प्रातिपदिकार्थेति सूत्रे वचनग्रहणाच्च। तथा च्लिलुङीत्यस्य लुङन्तउपपदे च्लिरित्यर्थः स्यात्। वासरूपविधेश्च पूर्वत्र प्रवृत्तौ क्सादिभिः सिचः समावेशः स्यादिति। तस्मात् धातोरिति कर्तव्यमिति स्थितम्। एतच्च शक्यं प्रत्याख्यातुम्। तथाहि। शमिधातोरिति यद्धातुग्रहणं तदेव द्वितीयं सार्वधातुकार्द्धधातुकसंज्ञयोरनुवर्तिष्यते। कृदुपपदसंज्ञे वासरूपविधिश्च अधिकारेणैव व्याख्यास्यते। प्रत्ययः परश्चेत्यादिवत्। तेन पूर्वत्र न तत्प्रसङ्गः॥

तत्रोपपदं सप्तमीस्थम्॥ सप्तम्यन्ते पदे कर्मणीत्यादौ प्रतिपाद्यत्वेन स्थितं कुम्भादिकं सप्तमीस्थं तद्वाचकं पदमुपपदसंज्ञं स्यात्। तस्मिंश्च सत्येव वक्ष्यमाणः प्रत्ययः स्यात्। महासंज्ञाकरणसामर्थ्यात्। पदमत्र संज्ञि। तेन समर्थपरिभाषा व्याप्रियते। संज्ञाप्रदेशा उपपदमतिङित्यादयः॥

कृदतिङ्॥ अस्मिन् धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात्। कर्तव्यम्। करणीयम्। अतिङ् किम्। चीयात्। संज्ञाप्रदेशाः कृत्तद्धितसमासाश्चेत्येवमादयः। अतिङिति शक्यमकर्तुम्। कथं चीयादिति। ज्ञापकात्सिद्धम्। अकृत्सार्वधातुकयो-। सूत्रे अकृदित्येव सिद्धे पुनः सार्वधातुकग्रहणं ज्ञापयति न ंं कृत्संज्ञा भवतीति। न च श्यन्निवृत्त्यर्थं सार्वधातुकग्रहण-ति वाच्यम्। दिवादिषु हृस्वान्तस्य दीर्घार्हस्याभावेन व्या-

वर्त्याप्रसिद्धेः । भाष्ये तु तिङां कृत्संज्ञायामिष्टापत्तिः कृता । न चैवं तिङन्तस्य प्रातिपदिकत्वात्स्वाद्युत्पतिः स्यादिति वाच्यम् । तिङा एकत्वादेरुक्तत्वात् । न च वचनग्रहणादुक्तेपि तदापत्तिः । एक इत्यादौ चरितार्थत्वात् । अतिशायनेतमाबिष्ठनौ तिङश्चेत्यनेन तिङन्तानामसुबन्तत्वज्ञापनात् । न चैवमपि पचति पठतीत्यत्र ह्रस्वस्यपितिकृतीति तुक्प्रसङ्गः । तुग्विधौ धात्वादेरिति सूत्रात् धातुग्रहणानुवृत्तेः । एवमपि चिकीर्षति जिहीर्षतीत्यादौ स्यादिति चेन्न । शपा व्यवधानात् । एकादेशे कृते नास्ति व्यवधानमिति चेन्न । एकादेशस्य पूर्वविधौ स्थानिवद्भावात् । न च स्थानिवद्भावं बाधित्वा परत्वादन्तवद्भावः । तस्य प्रत्याख्यास्यमानत्वात् । न चैवमपि अतिङिति प्रत्याख्यायमाने पचेरन्नित्यत्र प्रातिपदिकान्तत्वान्नलोपः स्यादिति वाच्यम् । झस्यरन्निति नकारोच्चारणसामर्थ्यादेव लोपाप्रवृत्तेः । इह तर्हि चीयादिति कृद्यकारत्वादीर्घो न स्यादिति चेत् । नैष दोषः । सार्वधातुकप्रतिषेधो ज्ञापयति अकृतीति प्रतिषेधः तिङ्क्षु न प्रवर्ततइति । न चैवमपि तिङ्समासे कृदुत्तरपदस्वरः स्यादिति वाच्यम् । इष्टापत्तेः । यो जात एव पर्यभूषादित्यादौ तथैव पाठस्य निर्विवादत्वात् । गतिकारकोपपदात्कृदिति सूत्रे कृद्ग्रहणस्य प्रत्याख्यास्यमानत्वाच्चेति दिक् ॥

इति श्रीशब्दकौस्तुभे तृतीयस्य प्रथमे पञ्चममान्हिकम् ॥

वासरूपोस्त्रियाम् ॥ परिभाषेयम् । अस्मिन्धात्वधिकारे स्त्र्यधिकारव्यतिरेकेण यत्रासरूपोपवादप्रत्ययो विधीयते तत्र वेत्युपतिष्ठते । एवञ्च ददातिदधात्योर्विभाषेत्यादिवद्वैकल्पिकत्वेनैव अपवादे शास्त्रात्प्राप्ते तद्वदेव पक्षे उत्सर्गः प्रवर्तते । इगुपधाज्ञाप्रीकिरः कोपवादः तद्विषये ण्वुल्तृचावपि भवतः ।

विक्षेपकः विक्षेप्ता विक्षिपः । नचेवमातोनुपसर्गेक इति कस्य विषये कर्मण्यणपि पक्षे प्रवर्तेत । सरूपो, सावित्ति चेत् । किं ततः । गुणवृद्धिशास्त्रेष्विक्पदस्येव कविधौ वेति पदस्य उपस्थितिर्हि ज्ञातैव । अन्यथा ण्वुलादेरपि दुर्लभत्वात् । सत्याञ्च वेत्यस्योपस्थितौ कथं सरूपस्यापि पक्षे प्रवृत्तिर्न भवेदिति चेत् । सत्यम् । असरूपग्रहणसामर्थ्यात् यम्प्रत्यसरूपता तं प्रत्येवास्य पाक्षिकता । अन्ये तु प्रति बाधकतैवेति न कश्चिद्दोषः । ततश्च असरूपो ऽपवादप्रत्यय उत्सर्गस्य वा बाधकः स्यादिति फलितोर्थः । अस्त्रियां किम् । चिकीर्षा । अत्र क्तिन्न भवति । स्त्रीग्रहणं स्वर्यते । स्वरितेनाधिकारगतिर्भवतीति स्त्रियांक्तिन्नित्यधिकारे विकल्पो नेति सिद्धान्तः । यदि तु स्त्रियामभिधेयायां नेत्युच्येत तदा विक्षेपिका विक्षेत्रीति कब्विषये ण्वुल्तृचौ न स्याताम् । अथापि स्त्रियामित्येवंशब्दमुच्चार्य विहिते निषेध इत्युच्येत तर्हि व्यावक्रोशी व्यावक्रुष्टिरिति कर्मव्यतिहारे । णचो विषये क्तिन्न स्यात् । द्वयोरपि स्त्रियामित्युच्चार्य विधानात् । अत्र के चित् । उत्सर्गापवादयोर्द्वयोरपि स्वयधिकारनिवेशितत्वे सति प्रतिषेधोयमित्याहुः । अन्ये तु अपवादमात्रस्यापीति । तत्राद्ये मते आसना आस्या स्वयधिकारविहितेनापि युचापवादेन सह ऋहलोर्ण्यतः समावेशः सिध्यति घञस्तु क्तिनादिना ऽनभिधानान्न समावेशः । द्वितीयपक्षे तु घञः क्तिन्नादिभिरसमावेशः सिध्यति । आस्येत्यत्र तु कृत्यल्युटोबहुलामिति ण्यदिति विवेकः । नन्विह सारूप्यं प्रयोगे उपदेशे वा । नाद्यः । ग्रामणीर्ग्रामण्य इति क्विबादिविषये ऽणादीनामप्रवृत्तिप्रसङ्गात् । न हि क्विबादयः प्रयोगे रूपवन्तः । लोपविधानात् । नान्त्यः । अनुबन्धभिन्नेषु कणप्रभृतिष्वतिप्रसङ्गादिति चेन्न । अनुबन्धानामनेका-

न्तत्वेन द्वितीयपक्षे दोषाभावात्। एकान्तत्वेपि नानुबन्धकृतमसारूप्यम्। ददातिदधात्योर्विभाषेति लिङ्गात्। अन्यथानुबन्धकृतादसारूप्यादेव ददः दध इति शविषये दायो धाय इति णोपि भविष्यतीति किं विभाषाग्रहणेन। अनित्येयं वासरूपपरिभाषा। अर्हे कृत्यतृचश्चेत्यत्र कृत्यतृज्ग्रहणाल्लिङ्गात् तेन क्त्वल्युटतुमुन्खलर्थेषु वासरूपविधिर्न भवतीति सिद्धान्तः। हसितं हसनं छात्रस्य। अत्र क्तल्युट्विषये घञ् न। तुमुन्। इच्छति भोक्तुम्। अत्र इच्छार्थेषुलिङ्लोटाविति लोण्न भवति। लिङ् तु भवत्येव। लिङ्चेति वचनात्। एवं चास्मादेव नियमादिह लोट् सुपरिहरः। अतोत्र तुमुन्ग्रहणमापाततः। खलर्थ। आतोयुच्। ईषत्पानः। अत्र खल् न भवति। ननु खयधिकारादूर्ध्वं वासरूपन्यायो नास्तीत्येवाश्रीयताम्। मैवम्। आसित्वा भुङ्क्ते आस्यते भोक्तुमित्याद्यसिद्धिप्रसङ्गात्। इह हि भोजनार्थत्वादासनस्य पूर्वकालता गम्यते। क्त्वाप्रत्ययश्च तुमर्थाधिकाराद्भावे तत्रैव च लकार इति समानविषयत्वाद्बाध्यबाधकभावः स्यात्। प्रैषातिसर्गेति सूत्रे स्त्रियांक्तिन्नित्यत ऊर्ध्वं वासरूपविधेरभावादिति कौमुदीग्रन्थस्तु आकरविरुद्ध इति दिक्॥

कृत्याः॥ अधिकारोयम्। अवधिविशेषस्तु ज्ञापकात्सिद्धः। अर्हेकृत्यतृचश्चेति सूत्रे कृत्या इत्येव वक्तव्ये तृज्ग्रहणं योगापेक्षं ज्ञापकम्। ण्वुल्तृचाविल्येतद्योगात्प्राक् कृत्यसंज्ञा ऽधिक्रियतइति। संज्ञाप्रदेशाः, कृत्यानां कर्तरिवेत्यादयः। बहुवचनमनुक्तसमुच्चयार्थम्। तेन केलिमर उपसंख्यानमित्यादिसूत्रेणैव सूचितं भवति। अत्र सूत्रे वृत्तिकारः प्राङ्ण्वुल इति प्रत्याचिक्षेप॥

तव्यत्तव्यानीयरः॥ धातोरेवैते प्रत्ययाः स्युः। तकाररेफौ स्वरार्थौ। कर्त्तव्यम्। करणीयम्। वसेस्तव्यत्कर्तरि णिच्च॥

वस निवासे इत्यस्य ग्रहणम्, न तु वस आच्छादनइत्यस्य लुग्विकरणस्य । तयोरेवेति वचनात् कर्त्तरि न प्राप्नोतीति वचनम् । वसतीति वास्तव्यः । तद्धितार्थो वा । वास्तुनि भवो वास्तव्यः । दिगादित्वाद्यत् । अवास्तव्य इत्यत्र स्वरभेदोपि नास्ति । तव्यत्प्रत्यये हि कृत्योकेष्णुच्चार्वादयश्चेत्यन्तोदात्तत्वम् । यत्प्रत्यये तु ययतोश्चातदर्थइत्यनेनेति । केलिमर उपसंख्यानम् ॥ कृत्या इति बहुवचनेनैतत्सूचितमित्युक्तम् । ककारो गुणवृद्धिनिषेधार्थः । रेफः स्वरार्थः । पक्वेलिमा भाषाः । पक्तव्याः । भिदेलिमाः सरलाः । भेत्तव्याः । शुद्धे कर्मणि प्रत्ययो भाष्ये स्थितः । वृत्तिकारस्तु कर्मकर्तरि चायमिष्यतइत्याह । तद्भाष्यविरुद्धम् ॥

अचो यत् ॥ अजन्ताद्धातोर्यत्स्यात् । चेयम् । जेयम् । ननु पूर्वसूत्रे एव यदपि निर्दिश्यताम् । अज्ग्रहणं च मास्तु । हलन्ताण्यतं वक्ष्यति । परिशेषादजन्तेभ्य एव यद् भविष्यति इति चेत् । अजन्तभूतपूर्वादपि यथा स्यादित्येवमर्थमिदम् । दित्स्यं धित्स्यम् । इह हि दाञो धाञश्च सनन्तस्य दित्स धित्स इति स्थिते आर्द्धधातुके इति विषयसप्तमीमाश्रित्य सनीवन्तर्धभ्रस्जदम्भुसूजनाशगमामित्यादिना इडागमे कृते साम्प्रतिकं हलंतत्वमस्तीति ण्यत्स्यात् । अज्ग्रहणात्तु भूतपूर्वमजन्तत्वमाश्रित्य यद्भवति । तेन यतोनाव इत्यादुदात्तत्वम् । ण्यति तु कृते तित्स्वरितत्वं स्यात् । चिकीर्ष्यमित्यादौ तु ण्यत्यतोर्विशेषो नास्ति । यतोनाव इत्यत्र द्व्यज्ग्रहणानुवृत्तेः । आर्द्धधातुक इत्यस्य परसप्तमीत्वे तु इहाज्ग्रहणं न कर्त्तव्यमेव । तकिशसिचतियतिजनीनामुपसंख्यानम् ॥ तके हसने । शसु हिंसायाम् । चते याचने । यती प्रत्यत्ने । जनी प्रादुर्भावे । तक्यम् । शस्यम् । चत्यम् । यत्यम् । जन्यम् । अत्र जनेर्यद्विधानं यतोनाव इति स्वरार्थं जनिवध्योश्चेति वृद्धिनिषेधेन ण्यत्यपि रूपे

विशेषाभावात् । इह शंसिमपि के चित्पठन्तीति हरदत्तः । तेन तद्वान्नराशंस्यराध्यं च । अत्राद्युदात्तः सिध्यति । अपाठपक्षे तु ण्यन्तादचोयति सिध्यतीति बोध्यमिति वदन्ति । तदेतत्सर्वमीडवन्देत्यादिसूत्रविस्मरणमूलकत्वादुपेक्ष्यम् । हनो वा वध च ॥ हन्तेर्वा यत्, तत्सन्नियोगेन च वधादेशो वक्तव्य इत्यर्थः । वध्यः । घात्यः । यदभावे ण्यत् । हनस्तोचिण्णलोरिति तत्त्वम् । होहन्तेरिति कुत्वम् । यद्यपि वधमर्हतीति वध्य इति रूपं यदित्यनुवर्तमाने दण्डादिभ्य इति तद्धितेन यतापि सिध्यति तथाप्यसिवध्यो मुसलवध्य इत्यत्र समासो न सिध्येत् । कृति पुनः कर्तृकरणेकृतेति सिध्यति । न च असिवधमर्हतीति विग्रहे कृतसमासादेव तद्धितोस्त्विति वाच्यम् । दण्डादिषु केवलस्य वधशब्दस्य पाठात् । तदन्तविधेश्च प्रतिषेधात् । स्वरे भेदाच्च । असिवधशब्दाद्यति हि तित्स्वरितमिति स्वरितः प्रसज्येत । कृदन्तेन समासे तु कृदुत्तरपदप्रकृतिस्वरेण वध्यशब्द आद्युदात्तः । अत एव वध्यशब्देन तद्धितान्तेन सह सुप्सुपेति समास इत्यपि न वाच्यम् । अन्तोदात्तप्रसङ्गात् । वध्यशब्दे कृतद्धितान्ते प्रकारकृतविशेषस्य सत्वाच्च । एतेन गिरौडश्छन्दसीति वार्तिकप्रत्याख्यानपरं भाष्यमप्यपास्तम् । अत एव कृतलब्धक्रीतकुशला इत्यादीनां चारितार्थ्यमिति दिक् । अत्रत्यभाष्यादिपर्यालोचनया असमस्तवध्यशब्दे विशेषाभाव इति लभ्यते । तथा च दण्डादिभ्य इत्येव सूत्रं, यच्चानुवर्तते । दण्डादिभ्यो य इति निरनुबन्धपाठस्तु प्रामादिक इति माधवो हंतिधातौ स्फुटीचकार । हरदत्तग्रन्थपर्यालोचने तु इदं च वचनं यद्विधौ भाष्यादौ पठितमपि क्यब्विधौ मृजेर्विभाषेत्यस्याग्रे एव पाठ्यमित्येव भाष्यतात्पर्यं युक्तम् । विकल्पाकरणेन लघुत्वा-

दिति लभ्यते । तस्मिन्नपि पक्षे वध्यशब्दो धातुस्वरेणाद्युदात्तः क्यप्तुपित्वादनुदात्तः । न च नञ्समासे ययतोश्चातदर्थइत्यस्य प्रवृत्त्यभावेन स्वरे दोष इति वाच्यम् । कृत्योकेष्णुच्चार्वादयश्चेत्यस्य प्रवृत्त्येष्टसिद्धेः । असमस्ते एव विशेषाभावस्य प्रतिपाद्यत्वाच्च ॥

पोरदुपधात् ॥ पवर्गान्तादकारोपधात् धातोर्यत् स्यात् । ण्यतोपवादः । शप्यम् । लभ्यम् । पोः किम् । वाक्यम् । चजोःकुघिण्ण्यतोरिति कुत्वम् । अदुपधात्किम् । कोप्यम् । तपरकरणं किम् । आप्यम् । कुप कोपने, आप्लृ व्याप्तौ, आभ्यां ण्यति तित्स्वरः । यति तु यतोनावं इति स्यात् ॥

शकिसहोश्च ॥ स्पष्टम् । शक्यम् सह्यम् ॥

गदमदचरयमश्चानुपसर्गे ॥ व्यत्ययेन पञ्चम्यर्थे सप्तमी । एभ्योनुपसर्गेभ्यो यत्स्यात् । गद्यम् । मद्यम् । चर्यम् । यम्यम् । अनुपसर्गे किम् । न नैषधे कार्यमिदं निगाद्यम् । प्रमाद्यम् । प्रचार्यम् । यमेः पूर्वेणैव सिद्धे नियमार्थं वचनम् अनुपसर्गादेव यथा स्यात् सोपसर्गान्मा भूदिति । कथं तर्हि, तेन तत्र न भवेद्विनियम्यम् । अनियम्यस्य नायुक्तिः । त्वया नियम्या ननु दिव्यचक्षुषेत्यादि । प्रमादपाठ एवायम् । विनियाम्यमित्यादि दीर्घ एव तु पठनीय इति हरदत्तः । नियमे साधुर्नियम्य इति तत्रसाधुरिति यदित्यन्ये । केवलाद्यतं कृत्वा निशब्देन समास इत्यपरे । चरेराङि चागुरौ ॥ सोपसर्गार्थं वार्तिकम् । आचर्यो देशः । गन्तव्य इत्यर्थः । अगुरौ किम् । आचार्यो गुरुः ॥

अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु ॥ अवद्यादयस्त्रयो यथासंख्यं गर्ह्यादिष्वर्थेषु निपात्यन्ते । तत्र वदेर्नञि उपपदे वदःसुपिक्यप्चेति यत्क्यपोःप्राप्तयोर्यदेव यथा स्यात् सोपि ग-

र्हायामेव यथा स्यादित्युभयार्थं निपातनम्। अवद्यं पापम्। अवचनार्हत्वात्। गर्ह्यं किम्। अनुद्यं गुरुनाम। तद्धि न गर्ह्यं वचनार्हं तु न भवति। आत्मनाम गुरोर्नाम नामातिकृपणस्य च। श्रेयस्कामो न गृह्णीयात् ज्येष्ठापत्यकलत्रयोरिति स्मृतेः॥ अत्र वदःसुपीति क्यबेव भवति। यजादित्वात् सम्प्रसारणम्। नलोपो नञः, तस्मान्नुडचि। पणेर्व्यवहारार्थात् ण्यति प्राप्ते यत् विधीयते। पण्यः कम्बलः। पण्या गौः। पाण्यमन्यत्। स्तुत्यर्हमित्यर्थः। पणितव्यशब्दस्य साधारणत्वेपि निपातनस्य रूढ्यर्थत्वात् पण्यशब्दस्य व्यवहर्तव्ये एव रूढत्वादर्थानियमो लभ्यते। उक्तञ्च, धातुसाधनकालानां प्राप्त्यर्थं नियमस्य च। अनुबन्धविकाराणां रूढ्यर्थं च निपातनामिति॥ वृङ् सम्भक्तौ अस्माद्यत्। अप्रतिबन्धे। शतेन सहस्रेण वर्या कन्या। शतसहस्रशब्दावनियतवचनौ कन्याया वरणे वरयितॄणां नियमो नास्तीत्यर्थः। वृङ एवेदं निपातनम्। तत्रैव अनिरोधसम्भवात्। तेन वृञ् वरणे इत्यस्मात् एतिस्तुशासित्यादिना क्यबेव। वृत्या। इह सूत्रे अवद्यादीनि अविभक्तिकानि पृथक् पदानि न तु द्वंद्वस्य जसन्तस्य निर्देशः। तेन वर्येति स्त्रियामेव निपात्यते। अस्त्रियान्तु ऋहलोरिति ण्यदेव। वार्या ऋत्विजः। इति वृत्तिकारमतम्। न चात्र एतिस्त्विति क्यप् शङ्क्यः। तत्र वृञ एव ग्रहणं न तु वृङ इति वक्ष्यमाणत्वात्। भट्टिस्तु द्वन्द्वाज्जसा निर्देशं मन्वानः पुल्लिङ्गेपि यतं प्रायुङ्क्त। सुग्रीवो मम वर्योसौ भवता चारुविक्रम इति। पुरुषोत्तमादयोप्येवम्॥

वह्यं करणम्॥ वह्यं निपात्यते करणं चेद्भवति। वहन्त्यनेनेति वह्यं शकटम्। करणे किम्। वाह्यमन्यत्। वहनकर्मेत्यर्थः॥

अर्यः स्वामिवैश्ययोः॥ ऋ गतौ अस्मात् ण्यति प्राप्ते यत्

निपात्यते । अर्यः स्वामी वैश्यो वा । स्वामिवैश्ययोः किम् । आर्यो ब्राह्मणः । प्राप्तव्य इत्यर्थः । अत्र भाष्ये स्वामिन्यन्तोदात्तत्वञ्चेत्युक्तम् । वैश्ये तु यतोनाव इति आद्युदात्तमेव । अथ यो वैश्यः स्वामी च तत्र कथमिति चेत् । वैश्यत्वविवक्षायामाद्युदात्तम् । स्वामित्वविवक्षायामन्तोदात्तम् । अत एव अर्यः स्वाम्याख्या चेदिति फिट्सूत्रे आख्याग्रहणं कृतम् । तथा चेदृशे विषये युगपदर्थद्वयविवक्षा न कर्तव्यैवेति फलितोर्थः ॥

उपसर्या काल्या प्रजने ॥ उपपूर्वात्सृधातोर्भौवादिकात् जौहोत्यादिकाच्च यत् निपात्यते प्रथमगर्भग्रहणे प्राप्तकाला चेत् । उपसर्या गौः । गर्भाधानार्थं वृषभेणोपगन्तुं योग्येत्यर्थः । काल्याप्रजनइति किम् । उपसार्या शरदि मधुरा प्राप्तव्येत्यर्थः । कर्मणि ण्यत् । काल्येत्यत्र तदस्यप्राप्तमिति वर्त्तमाने कालाद्यदिति यत् । प्रजननं प्रजनः भावे घञ् । जनिवध्योश्चेति वृद्धिनिषेधः ॥

अजर्यं सङ्गतम् ॥ नञ्पूर्वाज्जीर्यतेः कर्त्तरि यन्निपात्यते सङ्गतं चेत् विशेष्यम् । सङ्गतमिति नपुंसके भावे क्तः । न जीर्यतीत्यजर्यं सतां सङ्गतम् । इह अजर्यामिति समुदायस्य सङ्गतं वाच्यमित्यर्थो न ग्राह्यः । उदाहरणे सहप्रयोगानुपपत्तेः । न च घटः कलश इतिवत् व्याख्यानपरतया सहप्रयोगः । तेन सङ्गतमार्येण रामाजर्यं कुरु द्रुतमिति भट्टिप्रयोगात् । मृगैरजर्यं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्धेति कालिदासप्रयोगस्तु सङ्गतमित्यध्याहृत्य व्याख्येयः । सङ्गतं किम् । अजरिता कम्बलः । कर्त्तरि निपातनमित्युक्तत्वात् भावे सङ्गतकर्तृकेपि ण्यदेव भवति । अजार्यं सङ्गतेनेति ॥

वदः सुपि क्यप् च ॥ अनुपसर्गइति वर्ततइति वृत्तिकृत् ।

वदेर्धातोरनुपसर्गे सुप्युपपदे क्यप् स्यात् चाद्यत् । ब्रम्होद्यम् । ब्रम्हवद्यम् । भावे क्यप् । पूर्ववत्सम्प्रसारणम् । ब्रम्ह वेदः तस्य वदनमित्यर्थः । ननु सकर्मकाद्भावे कृत् प्रत्ययो दुर्लभः । भावेचाकर्मकेभ्यः, तयोरेवकृत्यक्तखलर्था इति वक्ष्यमाणत्वादिति चेत् । सत्यम् । उत्तरसूत्रादिह भावग्रहणस्यापकर्षणान्नोक्तदोषः । इह सूत्रे अनुपसर्गग्रहणस्यानुवृत्तिर्यद्यपि वृत्तिभाष्यादिषु स्थिता तथापि सा नावश्यकी । सत्सूद्विषेति सूत्रे उपसर्गग्रहणं ज्ञापकम्, अन्यत्र सुब्ग्रहणे उपसर्गग्रहणं नेति वक्ष्यमाणेन गतार्थत्वात् । सर्वथाप्युपसर्गे नेति फलं निर्विवादम् । तेनेह ण्यदेव । प्रवाद्यम् । अनुवाद्यम् । अपवाद्यम् । यन्तु भट्टवार्त्तिके अनूद्यमिति प्रयुक्तं व्याकरणाधिकरणे । तत्र निश्चयार्थेनुशब्दे उपपदे क्यपं विधाय नञ्समासे सति कथञ्चित्समाधेयमिति न्यायसुधायामेव स्पष्टम् ॥

भुवो भावे ॥ भवतेरनुपसर्गे सुप्युपपदे क्यप् स्यात् भावे । यन्तु नानुवर्त्तते पूर्वसूत्रे चानुकृष्टत्वात् । ब्रम्हणो भावो ब्रम्हभूयम् । सुपीत्येव । भव्यम् । अनुपसर्गइत्येव । प्रभव्यम् । ननु अनुपसर्गे भवतिरकर्मकः तस्माद्भावएव भविष्यति तत्किं भावग्रहणेनेति चेन्मैवम् । प्राप्त्यर्थात्कर्मणि प्रसङ्गात्सत्तार्थकादपि कालादिकर्मणि प्रसङ्गात् उत्तरार्थत्वाच्च ॥

हनस्त च ॥ हन्तेर्धातोरनुपसर्गे सुबन्तउपपदे भावे क्यप् स्यात् तकारश्चान्तादेशः । ब्रह्महत्या । एतत्सूत्रविहितक्यप्प्रत्ययान्तस्य स्वभावात् स्त्रीलिङ्गत्वमेव लोके । छन्दसि तु क्लीवतापीष्यते । सनादेव दस्युहत्याय जज्ञिषे । छन्दसि स्त्रियां क्यप् चिद्वक्तव्यः । तरति ब्रह्महत्यां योऽश्वमेधेन यजते । सुपीति किम् । घातो वर्त्तते । ण्यन्तु न भवति । सकर्मकाद्भावे वि-

धानाभावात् । कर्माविवक्षायामकर्मकत्वेपि न भवत्यनभिधानात् । अनुपसर्गइत्येव । प्रघातो वर्त्तते ॥

एतिस्तुशास्वृदृजुषः क्यप्॥ सुप्यनुपसर्गे भावइति निवृत्तम् । एभ्यः क्यप् स्यात् । एतीति इण एव ग्रहणं नेङ्किोः । तयोरधिपूर्वयोरेव प्रयोगादेतीति निर्देशानुपपत्तेः । तथा च रक्षार्थं वेदानामध्येयं व्याकरणमिति भाष्ये यदेव प्रयुक्तः । के चित्तु इण्वदिक इति वक्तव्यमिति वचनादधीत्यमित्युदाहरन्ति । इत्यः । कथन्तर्हि उपेयमिति । इङ् गताविति दैवादिकाद्यत् । स्तुत्यः । शिष्यः । शासइदङ्हलोरिति इत्वम् । शासिवसीति षत्वम् .। आङः शासु इच्छायामित्यस्यापि ग्रहणमविशेषात् । तेन आशास्यमिति धातुस्वरेण मध्योदात्तं पदं भवति । ण्यति तु गतिकारकोपपदात्कृदिति अन्तस्वरितत्वं स्यात् । के चित्तु शासु अनुशिष्टावित्यस्यैव ग्रहणमिच्छन्ति । वृ इति वृञो ग्रहणं न वृङः पूर्वोत्तरसाहचर्येणोभयपदिनो ग्रहणाज् ज्ञापकात् । यदयं ईडवन्दवृशंसदुहांण्यत इति वार्याशब्दस्याद्युदात्तत्वं शास्ति तत्र हि ईडिवन्दिभ्याम् अकारवद्विकरणप्रकृतिभ्यां साहचर्यात् आत्मनेपदिनो वृङो ग्रहणम् । वृत्यः । दृत्यः । जुष्यः । क्यबिति वर्तमाने पुनः क्यब्ग्रहणं बाधकबाधनार्थम्। तेन ओरावश्यके ण्यतं बाधित्वा क्यबेव भवति । तथाहि । इह सूत्रे स्तौतेर्ग्रहणस्यावकाश आवश्यकाविवक्षायां स्तुत्य इति, ओरावश्यकइत्यस्यावकाशोऽवश्यलाव्यम्।अवश्यस्तुत्य इत्यत्र उभयप्रसङ्गे परत्वात् ण्यत् स्यात् पुनः क्यब्ग्रहणात् क्यबेव भवति । शंसिदुहिगुहिभ्यो वेति वक्तव्यम् ॥ शस्यम् । शंस्यम् । दुह्यम् । दोह्यम् । गुह्यम् । गोह्यम् । एतच्च वृत्तावेव स्थितम् । भाष्ये तु नास्ति । तत्र प्रशस्यस्यश्रः, ईडवन्दवृशंसदुहांण्यत इति सूत्रद्वयप्रामाण्यात् शंसेः

सिद्धम् । इतरयोस्तु मूलं मृग्यम् । आङ्पूर्वादञ्जेः संज्ञायामुपसंख्यानम् ॥ अञ्जू व्यक्तिम्रक्षणादिषु । अस्मात् बाहुलकात्करणे क्यप् । अनिदितांहलइति नलोपः । आज्यम् । ननु ण्यत्येव नलोपः कस्मान्नोक्त इति चेन्न । कुत्वप्रसङ्गात् । तित्स्वरप्रसङ्गाच्च । तस्मात्क्यबन्त एवायम् । नन्वेवमवग्रहः प्राप्नोति । न चेष्टापत्तिः । आज्यं किमासीत्परिधिः क आसीदित्यादौ पदकारैस्तदकरणादिति चेत् । अत्र भाष्यम् । न लक्षणेन पदकारा अनुवर्त्याः पदकारैस्तु लक्षणमनुवर्त्यमिति । अयमाशयः । संहितैव नित्या पदविच्छेदस्तु पौरुषेयः । अत एवार्थविनिश्चयाभावान्नावगृह्णन्ति । यथा हरिद्रव इति । अत्र किं हरिशब्द इकारान्त उत हरिच्छब्दस्तकारान्त इति सन्देहः । किञ्च वनेन वाय इति मन्त्रे वेति वाय इति व चकार शाकल्य इत्युपन्यस्य उदात्तं ह्येवमाख्यातमभविष्यत् इति अधायिशब्दे अदस्वरप्रसङ्गेन दूषयित्वा वेरपत्यं वाय इत्येकपद्येन सिद्धान्तं कुर्वन् यास्कः पदविभागस्य पौरुषेयत्वं स्पष्टमेवाचष्टे । अपि च सति पदत्वे अवग्रहो, ऽसति तु नेति द्वयमपि प्रायोवादमात्रं सम्प्रदायानुरोधादुभयस्यापि बहुधा परित्यागो दृश्यतएव । गोभिर्मदाय गोभ्यो गातुमित्यादौ अवग्रहाभावात् । ईयिवांसमतिस्त्रिधः, देवयन्तो यथामतिमित्यादाववग्रहाच्चेति दिक् । प्रक्रियाकौमुद्यान्तु अज गतौ क्षेपणे चेत्यस्य आज्यमित्युक्तं तन्तु भाष्यविरुद्धम्, अर्थानुगुणञ्चेति प्रामाणिकैरुपेक्ष्यमेव ॥

ऋदुपधाच्चाक्लृपिचृतेः ॥ ऋकारोपधाद्धातोःक्यप् स्यात् क्लृपिचृती वर्जयित्वा । वृत् वृत्यम् । वृध्वृ ध्यम् । अक्लृपिचृतेरिति किम् । कृपू सामर्थ्ये । कल्प्यम् । कृपेर्लत्वस्यासिद्धत्वात् ऋकारलृकारयोः सवर्णसंज्ञाविधानाच्च ऋदुपधत्वम् । चृति हिं-

सग्रान्थनयोः । चर्त्यम् । तपरकरणं किम् । कृत संशब्दने, णिजभावे ण्यदेव भवति । कीर्त्यम् । इदमेव च तपरकरणं लिङ्गम्, अनित्यण्यन्ताश्चुरादय इत्यत्र । णिजन्तान्तु णिलोपे कृते चाकृते च दित्स्यमितिवद्यदेव । तेन यतोनाव इत्याद्युदात्तता भवति ॥

ई च खनः ॥ खनः क्यप् स्यात् ईकारश्चान्तादेशः । दीर्घनिर्देशः प्रश्लेषार्थः । तत्र द्वितीय इकारो येविभाषेत्यात्वबाधनार्थः । अन्यथा येविभाषेत्यस्यावकाशः खायते खन्यते । इत्वस्यावकाशः यस्मिन्पक्षे आत्वं नास्ति । आत्वपक्षे उभयप्रसङ्गे परत्वादन्तरङ्गत्वाच्चात्वं स्यात् । येविभाषेति विषयसप्तमी । तथा च यकारादौ बुद्धिस्थएव भवदात्वमन्तरङ्गम् । अयं त्विकारः क्यपा सह विधानाद्बहिरङ्गः । तदित्थम् । येविभाषेति विषयसप्तमीति पक्षमाश्रित्य सूत्रकृता दीर्घोच्चारणं कृतम् । भाष्यकृता तु परसप्तमीमाश्रित्य प्रत्याख्यातम् । तथाहि । परसप्तमीपक्षे इत्वमन्तरङ्गम् । परनिमित्तमनपेक्ष्य विधानात् । क्यप्सन्नियोगशिष्टं हि तत् । तथाच तदेवात्वस्य बाधकम् । ननु ह्रस्वादेशे तस्य पूर्वेण सह आदगुणेसत्यपि पत्वतुकोरसिद्ध इति एकादेशस्यासिद्धतया ह्रस्वस्यापितिकृतीति तुक् स्यात् अतो दीर्घ एव विधेय इति चेन्न । पदान्तपदाद्योरेकादेशस्तुग्विधावसिद्धः न त्वन्योपीति वक्ष्यमाणत्वात् । अन्यथा वृक्षे छत्रमित्यत्र ङावाद्गुणस्यासिद्धत्वात् छेचेति ह्रस्वाश्रयो नित्यस्तुक् स्यात् । इष्यते तु दीर्घात्पदान्ताद्वेति वैकल्पिक इति दिक् । खेयम् ॥

भृञो ऽसंज्ञायाम् ॥ क्यप् स्यात् । भृत्याः कर्मकराः । भर्तव्या इत्यर्थः । तथाच क्रियाशब्दोयं न तु संज्ञा । समश्च व-

हुलम् ॥ असंज्ञायामेव सूत्रेण नित्यं प्राप्तस्य क्यपो विकल्पार्थमिदं वार्त्तिकम् । सम्भृत्याः । सम्भार्याः । असंज्ञायां किम् । भार्यो नाम क्षत्रियः । संज्ञायां पुंसि दृष्टत्वान्न ते भार्या प्रसिध्यति । स्त्रियां भावाधिकारोस्ति तेन भार्या प्रसिध्यति ॥ अथवा बहुलं कृत्याः संज्ञायामिति च स्मृतम् ॥ यथा पत्यं यथा जन्यं यथा भित्तिस्तथैव सा ॥ अस्यार्थः । ते तव सूत्रकारस्य भार्याशब्दो न सिध्यति ण्यतं बाधित्वा संज्ञायां समजानिषदेत्यादिना क्यपः प्रसङ्गात् । ननु भृञोसंज्ञायामिति प्रकृतसूत्रे संज्ञायां निषेधसामर्थ्यात् संज्ञायां समजेत्यादिसूत्रान्तरप्राप्तोपि क्यप् भृञः संज्ञायां न भविष्यति । न चैवं तत्र संज्ञायामित्यस्य वैयर्थ्यं, धात्वन्तरेषु चरितार्थत्वात् इत्याशङ्क्याह । संज्ञायामित्यादि । प्रतिषेधस्येति शेषः । असंज्ञायामित्यस्य प्रतिषेधस्य पुंसि भार्यो नाम क्षत्रिय इत्यत्र दृष्टत्वात् चरितार्थत्वात् । तथा च सामर्थ्यं नास्तीति भावः । तस्मात् भार्याशब्दो न सिद्ध्यतीति चोद्यं सुस्थम् । उत्तरमाह । स्त्रियां भावाधिकारोस्तीति । ननु संज्ञायांसमजेति सूत्रे वृत्तिकृद्वक्ष्यति भावइति न स्वर्यते पूर्वएवाधिकार इति । युक्तं चैतत् । समजन्ति तस्यामिति समज्या । निषीदन्ति तस्यामिति निषद्येत्यादिदर्शनात् । तत्कथमुच्यते स्त्रियां भावाधिकारोस्तीति । सत्यम् । स्त्रियां स्त्रीप्रकरणे संज्ञायांसमजेत्यादिना क्यपि विधीयमाने भावस्याधिकारः । अभिधेयत्वोपगमलक्षणो व्यापारोऽस्ति । शब्दशक्तिस्वाभाव्याभ्दावएव क्यप् न तु कर्मणीत्याशयः । एतदपरितोषादेवाह । अथवेति । न पतन्त्यनेनेत्यपत्यम् । अजन्तात् भावकर्मणोर्विधीयमानोपि यत् हलन्तात्करणे च भवति । जन्यमित्यत्रापि हलन्ताद्यत् भित्तिरित्यत्र षिद्भिदादिभ्योऽङ् इत्यङो विषये

क्तिन् । सर्वमिदं यथा बाहुलकाद्भवति। एवं भार्याशब्दे क्यबविषये ण्यद्भवतीत्यर्थः । अथवा इत्थं समाधेयम् । क्यङ्विधौ भृञ् भरणे इति भ्वादिरेव गृह्यते न जौहोत्यादिको डुभृञ् । द्व्यनुबन्धकत्वात् । एवञ्च बिभर्तेर्वा भृञ्भरणइति दीर्घान्तात् क्र्यादेर्वा ण्यति भार्याशब्दो निर्बाध एवेति ॥

मृजेर्विभाषा ॥ ऋदुपधत्वान्नित्यं क्यपि प्राप्ते विकल्पार्थं सूत्रम् । परिमृज्यः । परिमार्ग्यः । ण्यत्पक्षे मृजेर्वृद्धिः । चजोरिति कुत्वम् ॥

राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः ॥ एते सप्त क्यबन्ता निपात्यन्ते । अभिषिक्तः क्षत्रियो राजा तेन सोतव्यो ऽभिषवद्वारेण निष्पादयितव्य इत्यर्थे कर्मणि क्यप् । दीर्घत्वञ्च निपात्यते रूढ्यर्थम् । यद्वा लतात्मकः सोमो राजा । राजानं क्रीणन्तीत्यादौ दर्शनात् । स सूयते कंड्यते अत्रेत्यर्थे अधिकरणे क्यप् । निपातनं रुढ्यर्थम् । तेन आद्यपक्षे अश्वमेधादौ द्वितीयपक्षे ज्योतिष्टोमादौ च नातिप्रसङ्गः । राजसूयशब्दश्च पुन्नपुंसकलिङ्गो ऽर्धर्चादित्वात् । सरत्याकाशमार्गे इति सूर्यः । सृ गतौ । कर्तरि क्यप् निपातनादुत्वं रपरत्वं हलिचेति दीर्घः । यद्वा षू प्रेरणे तुदादिः । सुवति कर्मणि लोकं प्रेरयतीत्यर्थे कर्तरि क्यपि कृते क्यपोरुडागमश्च निपात्यते । मृषोपपदाद्वदेः कर्मणि क्यप् । पक्षे यति प्राप्ते नित्यं क्यप् निपात्यते । विशेष्यनिघ्नोयम् । भवन्ति नोदामगिरां कवीनामुच्छ्रायसौन्दर्यगुणा मुषोद्या इति माघः । रोचते असौ रुच्यः । कर्त्तरि क्यप् । गुपेरादेः कुत्वञ्च संज्ञायाम् ॥ कुप्यम् । सुवर्णरजतातिरिक्तस्य धनस्येयं संज्ञा । कृष्टे स्वयमेव पच्यन्ते कृष्टपच्याः। कर्मकर्त्तरि निपातनम्। इहान्तोदात्तत्वमपि निपात्यते । शुद्धे तु कर्मणि कृष्टपाक्य इत्ये-

व भवति। न व्यथते अव्यथ्यः। कर्तरि क्यप्। अत्र वार्तिकानि। सूर्यरुच्यव्यथ्याः कर्तरि॥ सूसार्तिभ्याञ्च सर्तेरुत्वम्॥ सुवतेर्वा रुडागमः॥ कुप्यं संज्ञायामिति॥

भिद्योद्ध्यौ नदे॥ भिदेरुज्झेश्च कर्तरि क्यप् उज्झेर्धत्वञ्च। भिनत्ति कूलं भिद्यः। उज्झत्युदकम् उद्ध्यः। नदे किम्। भेत्ता। उज्झिता॥

पुष्यसिध्यौ नक्षत्रे॥ पुषेः सिधेश्च आधिकरणे क्यप् निपात्यते नक्षत्रे अभिधेये। पुष्यन्त्यस्मिन्नारब्धा अर्था इति पुष्यः। सिध्यन्त्यस्मिन्निति सिध्यः। नक्षत्रे इति किम्। पोषणं सेधनम्। पुष्यसिध्यशब्दौ पर्यायौ, स्वरूपपरत्वातु सूत्रे द्वन्द्वः। पुष्ये तु सिध्यतिष्यावित्यमरः। तत्र तुष तुष्टाविति अस्मात् बाहुलकादधिकरणे ण्यति सूर्यतिष्येति निपातनादुकास्येकार इत्येके। पुष्यः तिष्यः कलियुगइत्यमरव्याख्याने क्षीरस्वामी त्वाह। त्विष दीप्तौ, अघ्न्यादयश्चेत्यौणादिकयक्प्रत्ययान्तः। निपातनाद्वलोपः॥

विपूयविनीयजित्या मुञ्जक्लृक्लकहालिषु॥ पूङ्नीञ्जिभ्यः क्यप् निपात्यते यथासंख्यं मुञ्जादिषु वाच्येषु। पूङ् पवने। विपूर्वः। विपूयो मुञ्जः। रज्ज्वादिकरणाय शोधयितव्य इत्यर्थः। मुञ्जस्तृणविशेषः। विनीयः कल्कः। कल्कशब्दोयमास्ति पिष्टे औषधविशेषे। यथा पथ्याशुण्ठीसैन्धवांशस्य कल्कः पेयो नित्यं सर्वरोगक्षयायेति। अस्ति च पापे। तपो न कल्कोध्ययनं न कल्क इत्युपक्रम्य तान्येव भावोपहतानि कल्क इति महाभारते दर्शनात्। इह तु प्रथमस्य ग्रहणमिति केचित्। अविशेषेणेति हरदत्तः। तथाच माघः प्रायुङ्क्त, अविनीयसंभ्रमविकासिभक्तिभिरिति। जि अभिभवे। जित्यो हलिः। बलेन कृष्टव्य इत्यर्थः। महद्ध-

लं हरिः। कृष्टमभीकरणार्थं स्थूलकाष्ठमुच्यते। विपच्यम्, विनेयम्। जेयञ्चान्यत्। सर्वत्र अचोयत्॥

प्रत्यपिभ्यां ग्रहेः॥ क्यप् स्यात्। मत्तस्य न प्रतिगृह्यम्। तस्मान्नापिगृह्यम्। छन्दसीति वक्तव्यम्॥ लोके तु प्रतिग्राह्यम्। अपिग्राह्यम्॥

पदाम्बैरिवान्द्यापक्ष्येषु च॥ एषु चतुष्वर्थेषु गृहेर्धातोः क्यप् स्यात्। प्रगृह्यमपदम्। यस्य प्रगृह्यसंज्ञाविहितेति वृत्तिः। यद्यपि पदावयवस्य द्विवचनादेः प्रगृह्यसंज्ञा न तु पदस्य तथापि अवयवधर्मस्य समुदाये उपचारो बोध्यः। यद्वा यौगिकोऽयं पदशब्दः पठ्यते गम्यतेनेनार्थ इति। असन्निकर्षश्चात्र गृहेरर्थः। अग्नी अत्रेत्यादौ हि प्रकृतिभावात्। यणाद्यभावे कियतापि कालेन व्यवधानात् परस्परमचो न सन्निकृष्यन्ते। तथा च बह्वृचप्रातिशाख्यम्। स्वरान्तरं तु विवृत्तिः। सा वा स्वरभक्तिकालेति। स्वरभक्तिकालस्तु अर्द्धमात्रा पादमात्रा वा। द्राघीयसि सार्द्धमात्रेति तत्रैवोक्तत्वात्। तथा चाचोरन्तरालस्य विवृत्तिसंज्ञकस्य वर्णशून्यकालस्य क्व चिदर्द्धमात्रत्वं क्व चित्पादमात्रत्वं चेति फलितोऽर्थः। एतद्व्यवस्था तु शिक्षासु बोद्धव्या। अवगृह्यं पदम्। यस्यावग्रहः क्रियतइति वृत्तिः। अवग्रहो विच्छेदः। अत्रापि गृहेरर्थः प्राग्वत्। मात्रा ह्रस्वस्तावदवग्रहान्तरामिति प्रातिशाख्यात्। अत्र पदकाले समासे पूर्वपदमेव गृह्यमिति हरदत्तः। उपलक्षणञ्चैतत्। हरिभिरित्यादेरपि सङ्ग्राह्यत्वात्। तस्मात् महापदसंज्ञाक्रान्ते य एकदेशः पदकाले विच्छिद्य पठ्यते स सर्वोऽप्यवगृह्यमिति स्थितिः। स्वेनैव ईरितुं शीलमस्य स्वैरी स्वतन्त्रः। अस्वैरी परतन्त्रः। गृह्यका इमे, गृहीतका इत्यर्थः। उभयत्रानुकम्पायां कन्। पञ्जरादिबन्धेन परतन्त्रीकृताः शुकादय उ-

च्यन्ते । गृहासक्ताः पक्षिमृगाः लेकास्ते गृह्यकाश्च ते इत्यमरः । बाह्यायाम् । ग्रामगृह्या, नगरगृह्या सेना । ग्रामनगराभ्यां बहिर्भूतेत्यर्थः । स्त्रीलिङ्गनिर्देशात्पुन्नपुंसकयोर्न भवति । पक्षे भवः पक्ष्यः । दिगादित्वाद्यत् । वासुदेवगृह्यः । आर्यगृह्यः । तत्पक्षाश्रित इत्यर्थः ॥

विभाषा कृवृषोः ॥ क्यप् स्यात् । पक्षे ण्यत् । कृत्यम् । कार्यम् । वृषु सेचने । वृष्यम् । वर्ष्यम् ॥

युग्यञ्च पत्रे ॥ पतन्त्यनेन पत्रं वाहनम् । दाम्नीशसेत्यादिना करणे ष्ट्रन् । तस्मिन्नर्थे युजेः कर्मणि क्यप् कुत्वञ्च निपात्यते । युग्यो गौः । पत्रे किम् । योग्यमन्यत् । ण्यति चजोरिति कुत्वम् । अत्र हरदत्तः । प्राग्घितीयेन यतेदं सिद्धम् । तद्वहतिरथयुगप्रासङ्गमिति । स्वरेपि नास्ति भेदः । क्यपि धातुस्वरः, यत्यपि यतोनाव इत्याद्युदात्तत्वम् । अयुग्यमित्यत्रापि न स्वरभेदः । यतोश्चातदर्थे । कृत्योकेष्णुच्चार्वादयश्चेत्युभयत्रापि अन्तोदात्तत्वविधानात् । तस्मादिदं सूत्रं शक्यमकर्तुमिति । अत्रेदं वक्तव्यम् । युग्योगौरित्यादिसिद्धावपि युग्यो हस्तीति वृत्तावुदात्तं तद्धितेन न सिध्यति । नहि हस्ती युगं वहतीति । कृता तु सिध्यति युज्यते सम्बध्यते ह्यसौ कुथादिनेति । किञ्च असत्यस्मिन्सूत्रे ण्यत्प्रत्ययेन योग्यो गौरित्यपि स्यात् । अपि च स्वरभेदोपि पाक्षिकोस्त्येव । ऋतुर्भवत्युक्थ्य इत्यादौ तित्स्वरदर्शनात् । यतोनाव इति सूत्रे यदन्ते द्वयच्के एकाच्प्रकृतिक एव प्रवर्ततइति वेदभाष्यकारप्रतिपादिते पक्षे स्वरभेदस्य दुर्वारत्वादिति दिक् ॥

अमावस्यदन्यतरस्याम् ॥ अमाशब्दः सहार्थे वर्त्तते । अमात्य इत्यादौ दर्शनात् । तस्मिन्नुपपदे वसेर्धातोरधि करणे ण्यत्

तन्निमित्तायां वृद्धौ सत्यां पाक्षिको ह्रस्वश्च निपात्यते । निपातनादेव कालविशेषे रूढिर्लभ्यते । अमा सह सन्निकृष्टौ वसतोऽस्यां चन्द्रार्कौ इत्यमावस्या। अमावास्या । एकदेशविकृतस्यानन्यत्वात् अमावास्यायावेति दीर्घमध्यमनूद्य विहितस्तद्धितो ह्रस्वमध्यादपि सिद्ध्यति । यदि तु यत्प्रत्ययान्तस्येदं पाक्षिकं निपातनमित्याश्रीयेत तदा यता मुक्ते अमावास्येत्यधिकरणेण्यदेव तावद्दुर्लभः । अथापि बाहुलकाल्लभ्येत, एवमपि अमावास्यायावेत्यत्र ण्यदन्तग्रहणे यदन्तं न गृह्येत । किञ्च ण्यत्पक्षे उपपदसमासो न स्यात् । मयूरव्यंसकादित्वाद्भविष्यतीति चेत् । एवमपि गतिकारकोपपदादिति स्वरो न स्यात्। किं त्वन्तोदात्तः स्यात् । इष्यते तु तित्स्वर एव । अमावास्यासुभगासुशेव । यदाग्नेयोष्टाकपालोमावास्यायामित्यादौ स्याशब्दे स्वरितत्वस्य शेषनिघातस्य च पठ्यमानत्वात् । तस्मात् ण्यदन्तस्यैव वृद्धौ सत्यां पक्षे ह्रस्वो निपात्यते इति यथाव्याख्यानमेवादर्त्तव्यम् । तथा च भाष्यम् । अमावसोरहं ण्यतोर्निपातयाम्यवृद्धिताम् । तथैकवृत्तिता तयोः स्वरश्च मे प्रसिध्यति ॥ इह व्यक्तिभेदाश्रयो द्विवचननिर्देशः । एकस्येति शेषः । ण्यतोः, ण्यदन्तयोः । अमापूर्वयोर्वसोर्मध्ये एकस्य अवृद्धितां ह्रस्वम्, अहं निपातयामि । सूत्रकारेणैक्यमापन्नस्येयमुक्तिः । तथा सति, तयोः शब्दयोरेकां तद्धितवृत्तिर्ययोः । तत्ता सिध्यति एकदेशविकृतस्यानन्यत्वात् । एवं निपातयतो मे स्वरोपि सिध्यति । स च व्याख्यात एव । न च सिद्धान्तेपि उत्तरपदप्रकृतिस्वरो दुर्लभः । सूत्रे सप्तम्यभावेन उपपदसंज्ञाया अप्रवृत्तौ उपपदात्परत्वाभावादिति वाच्यम् । अमेति सप्तम्या लुका निर्देशादिति भावः ॥

छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्य भाव्यस्ताव्योपचाय्यपृडानि ॥ एतानि सप्तदश छन्दसि निपात्यन्ते । कृती छेदने अस्मात् निस्पूर्वात्क्यपि प्राप्ते ण्यत् आद्यन्तयोर्विपर्यासः निसः षत्वं च निपात्यते । निष्टर्क्यं चिन्वीत पशुकामः । देवशब्दउपपदे ह्वयतेर्जुहोतेर्वा क्यप् दीर्घत्वं तुगभावश्च । स्पर्द्धन्ते वा उ देवहूये । अत्र प्रपूर्वादुत्पूर्वाच्च नयतेः क्यप् । प्रणीयः । उन्नीयः । उत्पूर्वाच्छिषेः क्यप् । उच्छिष्यम् । मृङ् प्राणत्यागे । स्तृञ् आच्छादने । ध्वृ हूर्छने । एभ्यो यत् । मर्यः । स्तर्या । स्त्रियामेवास्य निपातनम् । ध्वर्यः । खनेर्यत्ण्यतौ । खन्यः । खान्यः । देवशब्दउपपदे यजेर्यप्रत्ययः । शुन्धध्वं दैव्याय कर्मणे देवयज्यायै । प्रत्ययस्वरेणान्तोदात्तत्वे कृदुत्तरपदप्रकृतिस्वरः । स्त्रीलिङ्गएवेदं निपातनम् । आङ्पूर्वात्पृच्छेः क्यप् । आपृच्छ्यं धरुणं वाज्यर्षति । प्रतिपूर्वात्सीव्यतेः क्यप् षत्वञ्च । प्रातिषीव्यः । ब्रह्मण्युपपदे वदेर्ण्यत् । वदः सुपिक्यप्चेति प्राप्तयोः क्यब्यतोरपवादः । ब्रह्मवाद्यम् । अथ कथं ब्रह्मोद्यं वदन्तीति । छन्दसि विशेषविहितेन ण्यता लोके चरितार्थस्य वदःसुपीति क्यपः बाधप्रसङ्गात् । न च वासरूपन्यायः । सरूपत्वात् । नानुबन्धकृतमसारूप्यमित्युक्तत्वात् । सत्यम् । कृद्ग्रहणयोत्र बोध्यः । उक्तं हि । कालहलच् स्वरकर्तृयङां चेति । तत्र हि कर्तृग्रहणं कृत्प्रत्ययपरमित्यवोचाम । भवतेस्तौतेश्च ण्यत् । भाव्यः । स्ताव्यः । उपपूर्वाच्चिनोतेर्ण्यत् आयादेशश्च निपात्यते पृडे उत्तरपदे । मृड सुखने । पृड च । इत्येतस्मादिगुपधलक्षणः कः । उपचाय्यपृडम् । हिरण्यइति वक्तव्यम् ॥ उपचेयपृडमेवान्यत् । अत्र वार्त्तिकम् । निष्टर्क्ये व्यत्ययं वि-

द्यात् निसः षत्वं निपातनात् । ण्यदायादेश इत्येतौ उपचाय्ये निपातितौ ॥ ण्यदेकस्माच्चतुर्भ्यः क्यप् चतुर्भ्यश्च यतो विधिः । ण्यदेकस्माद्यशब्दश्च द्वौ क्यपौ ण्यद्विधिश्चतुः ॥ व्यत्ययमिति । आद्यन्तविपर्यासमित्यर्थः । चतुर्भ्य इति देवह्वयादिषु चतुर्भ्यो धातुभ्यः क्यप्, उपसर्गभेदान्नयतेर्भेदः । द्वौ क्यपाविति । द्वाभ्यां धातुभ्यां द्वाविति भावः । ण्यद्विधिश्चतुरीति । सुजन्तम् । चतुरो वारान् ण्यद्विधीयतइत्यर्थः ॥

ऋहलोर्ण्यत् ॥ ऋवर्णान्तात् धातोर्हलन्ताच्च ण्यत् स्यात् । कार्यम् । हार्यम् । वाच्यम् । पाच्यम् । सूत्रे पञ्चम्यर्थे षष्ठी । ऋ इति च अर्तेर्ग्रहणं न भवति किन्तु वर्णग्रहणम् । हला साहचर्यात् । परङ्कार्यामिति निर्देशात् । ईडवन्दवृशंसदुहांण्यत इति लिङ्गाच्च । अत्र वार्त्तिकानि । पाणौ सृजेर्ण्यार्द्विधिः ॥ ऋदुपधत्वात्प्राप्तस्य क्यपोपवादः । पाणिभ्यां सृज्यते पाणिसर्ग्या रज्जुः। समवपूर्वाच्चेति वक्तव्यम् ॥ समवसर्ग्या । लपिदभिभ्याञ्चेति वक्तव्यम् ॥ अपलाप्यम् । अवदाभ्यम् । आभ्यां पोरदुपधादिति प्राप्तस्य यतोपवादः । अत्र दभिर्धातुष्वपठितोपि वार्त्तिकवचनात् चुराद्यन्ते बहुलमेतन्निदर्शनमिति बहुलग्रहणाच्चुलुम्पादिवत्साधुः । तथा च प्रयुज्यते । न तानशन्ति न दभाति तस्कर इति, विष्णुर्गोपा अदाभ्य इति च । जयादित्यस्तु आद्यं वार्त्तिकद्वयम् एतिस्तुशास्त्रितिसूत्रे पठित्वा तृतीयवार्त्तिकोक्तयोर्धात्वोर्मध्ये लपिम् आसुयुवपीति सूत्रे रपेरुपरि प्रक्षिप्य अनुक्तसमुच्चयार्थेन चकारेण दभेः सङ्ग्रहमाह । तत्र वैरूप्यं निर्बीजमेवेत्यवधेयम् ॥

ओरावश्यके ॥ उवर्णान्ताद्धातोर्ण्यत् स्यात् आवश्यके द्योत्ये । अवश्यं भाव आवश्यकम् । मनोज्ञादित्वाद्वुञ् । अव्ययानां भमात्रे टिलोपः । लाव्यम् । पाव्यम् । द्योतितार्थस्यापि

क्वचित्प्रयोगो दृश्यते। लाघवं प्रत्यनादरात्। अवश्यलाव्यम्। अत्रोपपदसमासासम्भवेपि मयूरव्यंसकादेराकृतिगणत्वात्समासः। उत्तरपदप्रकृतिस्वरत्वमपि तत्रैव निपातनाद्बोध्यम् ॥

आसुयुवपिरपिलपिचमश्च ॥ आङ्पूर्वात्सुनोतेर्युप्रभृतिभ्यश्च ण्यत् स्यात्। अचोयत् पोरदुपधादिति यथायोगं प्राप्तस्य यतोपवादः। अत्र रपेरुपरि लपिर्वृत्तिकृता प्रक्षिप्त इत्युक्तम्। षुञ् अभिषवे। आसाव्यम्। यु मिश्रणे। याव्यम्। युञ् बन्धन इत्यस्य तु सानुबन्धकत्वान्नेह ग्रहणम्। वाप्यम्। राप्यम्। अपत्राप्यम्। आचाम्यम् ॥

आनाय्यो ऽनित्ये ॥ नयतेराङ्पूर्वात् ण्यदायादेशौ निपात्येते। रूढ्यर्थमपि निपातनम्। तेन घटादौ न भवति। किन्तु दक्षिणाग्निविशेषएव भवति। तथाहि। दक्षिणाग्नेर्योनिर्विकल्प्यते। वैश्यकुलाद्वित्तवतः भ्राष्ट्राद्वा। गार्हपत्याद्वेति। तत्र यो गार्हपत्यादानीयते आहवनीयेन सहैकयोनिः तत्रैवेदं निपातनं तस्य चानित्यत्वम्। सततमप्रज्वलनात्। अत्र भाष्यम्। आनाय्यो ऽनित्यइति चेद्दक्षिणाग्नौ कृतं भवेत्। एकयोनौ तु तं विद्यादानेयो ह्यन्यथा भवेत् ॥ चेदित्यस्यानन्तरं घटादिष्वतिप्रसङ्ग इति शेषः। भवेदिति सम्भावने लिङ्, निपातनादेव रूढिः सम्भाव्यतइत्यर्थः। एकयोनाविति। आहवनीयेन सहेति शेषः। आनेय इति घटदावनित्ये भिन्नयोनौ च दक्षिणाग्नौ अचोयदिति यदेव भवतीत्यर्थः ॥

प्रणाय्यासम्मतौ ॥ सम्माननं सम्मतिः। प्रीतिविषयभावोपगमनं कर्मव्यापारोत्र विवक्षितः। तथा भोगविषयआदरोपि सम्मतिः। तन्त्रेणार्थद्वयं विवक्षितम्। तेन पूजानर्हे निष्कामे च प्रपूर्वान्नयतेः ण्यदायादेशौ निपात्येते। प्रणाय्यश्चोरः। ज्येष्ठाय

पुत्राय पिता ब्रह्म प्रब्रूयात् प्रणाय्यायान्तेवासिने नान्यस्मै कस्मै चन ॥

पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु ॥ यथासंख्यं चतुर्षु चत्वारो निपात्यन्ते । पाय्यं मानम् । मीयतेनेन मानम् । माङो ण्यत्प्रत्ययः करणे । आतोयुक् चिण्कृतोरिति युक् धात्वादेः पत्वञ्च निपातनात् । मेयमन्यत् । सान्नाय्यं हविर्विशेषः । सम्यङ् नीयते होमार्थमग्निं प्रतीति । सम्पूर्वान्नयतेर्ण्यदायादेशौ उपसर्गदीर्घत्वञ्च निपात्यते । ऐन्द्रन्दध्यमावास्यायाम्, ऐन्द्रं पयो ऽमावास्यायामिति विहितयोर्दधिपयसोः संज्ञेयम् । माधस्तु यथाश्रुतग्राही हविर्मात्रे प्रायुङ्क्त । प्रतिशरणमशीर्णज्योतिरग्न्याहितानां विधिविहितविरिब्धैः सामिधेनीरधीत्य । कृतगुरुदुरितौघध्वंसमध्वर्युमुख्यैर्हुतमयमवलीढे साधुसान्नाय्यमग्निरिति ॥ नन्विदमपि दधिपयोविषयकमेव किं न स्यादिति वाच्यम् । चन्द्रोदयास्तमयवर्णनपूर्वकं सूर्योदयं प्रक्रम्य पठितस्यास्य कृष्णप्रतिपद्विषयत्वेन तत्र दधिपयोयोगस्यासम्भवात् । हविर्विशेषवाचकस्य सामान्ये विशेषान्तरे वा लक्षणेत्यपि बोध्यम् । निकाय्यो निवासः । निपूर्वाच्चिनोतेरधिकरणे ण्यत् आयादेश आदेः कत्वञ्च निपात्यते । निचीय्यते ऽस्मिन्धान्यादिकमिति विग्रहः । निचेयमन्यत् । अत्रैवार्थे निकायशब्दोप्यस्ति स च निवासचितिशरीरोपसमाधानेष्वादेश्चक इत्यत्र व्युत्पादयिष्यते । धात्वो ण्यत्प्रत्ययः सामिधेन्याम् । समिधामाधानी सामिधेनी । समिधामाधाने षेण्यण् । प्रवोवाजा इत्यादिका ऋचः सामिधेन्यः । अत्र च न सर्वा सामिधेनी धाय्येत्युच्यते किन्तु मिध्यमानवंतीं समिद्धवन्ती चान्तरेण विकृतिषु प्रक्षिप्यमाणा ॥ अमर्त्य इत्यादिकैव । सूत्रे सामिधेनीग्रहणं प्रयोगविष-

योपलक्षणार्थम् । तथा चासामिधेन्यामपि दृश्यते । धाय्याः शंसति । अग्निर्नेता त्वं सोमक्रतुभिरिति ज्योतिष्टोमे मरुत्वतीये शस्त्रविधानमेतत् । तत्र धीयते अनया सामिदिति करणे ण्यदिति हरदत्तग्रन्थः पृथुपाजा इत्यादिविषयः । धीयतइति धाय्येति कर्मणि ण्यदिति माधवग्रन्थस्तु अग्निर्नेतेत्यादिसाधारण इति विवेकः । सर्वश्चायं विशेषो निपातस्य रूढ्यर्थत्वाल्लभ्यते ॥

क्रतौ कुण्डपाय्यसञ्चाय्यौ ॥ एतौ निपात्येते क्रतौ वाच्ये। तत्र कुण्डशब्दे तृतीयान्ते उपपदे पिबतोर्धातोरधिकरणे यत् प्रत्ययो निपात्यते युक्च । कुण्डेन पीयते अस्मिन्सोम इति कुण्डपाय्यः क्रतुः । ननु अत्र ण्यदेव निपात्यतां प्रकृतत्वात् । एवञ्च युक् न निपातनीयः । आतोयुगित्येव सिद्धत्वादिति लाघवमपीति चेत् । मैवम् । तित्स्वरप्रसङ्गात् । इष्यते तु यतोनाव इत्याद्युदात्तत्वम् । कृद्धुत्तरपदप्रकृतिस्वरेण तस्यैव परिनिष्ठितत्वात् । तथा च प्रयुज्यते । यस्ते शृङ्गवृषो नयात् प्रणयात् कुण्डपाय्य इति । सम्पूर्वाच्चिनोतेर्ण्यत् आयादेशश्च निपात्यते। सञ्चीयते असौ सञ्चाय्यः क्रतुः । क्रताविति किम् । कुण्डपानं, सञ्चेयः ॥

अग्नौ परिचाय्योपचाय्यसमूह्याः ॥ एते निपात्यन्ते अग्नावभिधेये । अग्निश्चेह न ज्वलनः किन्तु तद्धारणार्थमिष्टकाचयननिर्मितस्थलविशेषः । तत्रैव निरूढत्वात् । परिपूर्वादुपपूर्वाच्च चिनोतेर्ण्यदायादेशौ निपात्येते । परिचाय्यः । उपचाय्यः । सम्पूर्वाद्वहेः सम्प्रसारणं दीर्घत्वञ्च निपात्यते । समूह्यं चिन्वीत पशुकामः । अग्नाविति किम् । परिचेयम् । उपचेयम् । संवाह्यम् । इह सम्पूर्वादूह वितर्के इत्यस्मादनेकार्थत्वाद्वहेरर्थे वर्तमानाद्धलन्तत्वाण्ण्यति समूह्यामिति सिद्धम् । युक्तं चैतत् । समूह्यं चिन्वीत

पशुकामः । पशवो वै पुरुषः । पशुनेवास्मै तत्समूहतीति वह्यर्थेन ऊहिना ब्राह्मणे समूह्यशब्दस्य निरुक्तत्वात् । उक्तञ्च वार्तिककृता । समूह्य इत्यनर्थकं वचनं सामान्यकृतत्वात् । वह्यर्थमिति चेद्वहतेस्तदर्थत्वात्सिद्धम् । ऊहिविग्रहाच्च ब्राह्मणे सिद्धमिति ॥

चित्याग्निचित्येच ॥ चित्येत्यत्र कर्मणि क्यप् निपात्यते । यतोपवादः । धातुस्वरेणाद्युदात्तं पदम् । चीयते असौ चित्योग्निः । अग्नेश्चयनमग्निचित्या । भावे यकारप्रत्ययस्तुक् च निपात्यते । न तु क्यप् । तेनान्तोदात्तत्वं भवति । इह सूत्रे अग्नावित्यनुवर्त्तते तच्च चित्यशब्दस्यैव विशेषणं नाग्निचित्याशब्दस्य । तस्य भावे निपातितत्वात् । तेनाग्नेरन्यत्र चेयमित्येव भवति ॥

समाप्ताः कृत्याः ॥

ण्वुल्तृचौ ॥ धातोर्ण्वुल्तृचौ स्तः । इत ऊर्ध्वमध्यायपरिसमाप्तेरुत्सर्गतः कर्तरिकृदित्युक्तेः कर्तरि प्रत्ययाः । पाचकः । पक्ता । तृचश्चकारः सामान्यग्रहणाविघातार्थः । तुश्छन्दसि, तुरिष्टेमेयः सु इति । एवञ्चाप्तृन्नितिसूत्रेपि तृन्तृचोः पृथक्ग्रहणं विहाय अप्तृ स्वसृ इत्येव ग्रहणमुचितम् ॥

नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ॥ नंद्यादेर्ल्युः ग्रह्यादेर्णिनिः पचादेरच् स्यात् । नन्दिग्रहिपचादयश्च न धातुपाठे सन्निविष्टाः संगृह्यन्ते । किन्तर्हि नन्दनरमणइत्येवमादिषु प्रातिपदिकगणेषु ये प्रकृतिभागास्तइह बुद्ध्या पृथक्कृत्य गृह्यन्ते । नन्वेवं किमनेन सूत्रेण गणपाठादेव नन्दनादिशब्दानां साधुत्वोपपत्तेरिति चत् । अत्र हरदत्तः । असत्यस्मिन्नष्टाध्याय्यां क्वचिदप्यनुपयोगात् गणपाठो नापेक्षिष्यते इति । तस्यायमाशयः । एतएव साधव इति स्वरूपनियमपरं हि व्याकरणशास्त्रं तच्च सूत्रेष्वेव हि

तत्सर्वमिति न्यायेन सूत्रात्मकम् । तथा च यत्सूत्रैः कथमपि न विषयीकृतं तस्य गाव्यादिवदर्थादसाधुत्वं प्रसज्येतेति । नन्दिग्राशिसदिदूषिसाधिवर्द्धिशोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायाम् । दुनदि समृद्धौ । नन्दयतीति नन्दनः । वाशृ शब्दे वाशनः । मदी हर्षे मदनः । दुष वैकृत्ये दोषोणावित्यूत्वं दूषणः । राध साध संसिद्धौ । विपो यज्ञस्य साधनः । ल्युः कर्त्तरीति पुंस्त्वम् । कथन्तर्हि होतुराहुतिसाधनं धेनुरिति । करणे ल्युटि सामान्ये नपुंसकं भविष्यति । वृधु वृद्धौ वर्द्धनः । शुभ शुम्भ शोभार्थे शोभनः । रुच दीप्तौ रोचनः । सहितपिदमः संज्ञायाम् । षह मर्षणे सहनः । तप सन्तापे तपनः । दमु उपशमे दमनः । जप जल्प व्यक्तायां वाचि । जल्पनः । रमु क्रीडायां रमणः । दृप हर्षविमोचनयोः दर्पणः । क्रदि आव्हादे रोदने च । सङ्क्रन्दनः । कृष विलेखने सङ्कर्षणः । त्दृषु अलीके हर्षणः । अर्द हिंसायां जनमर्दयतीति जनार्दनः । कर्मण्यणि प्राप्ते । एत्रमुत्तरत्रापि कर्मण्युपपदे द्रष्टव्यम् । यु मिश्रणे । यवनः । षूद क्षरणे । मधुनामासुरस्तं सूदयतीति मधुसूदनः । त्रिभी भये त्रिपूर्वात् णिचि भियोहेतुभयेषुगिति षुक् त्रिभीषणः । लूञ् छेदने । निशातनाल्लुत्वम् । लवणः । णश अदर्शने दमु उपशमे ण्यन्तौ । वित्तं नाशयतीति वित्तनाशनः । कुलं दमयतीति कुलदमनः । शत्रुदमनः । इति नन्द्यादिः । ग्रह उपादाने ग्राही । षह मर्षणे उत्साही । दमु उपक्षये । उदासी । भस भर्त्सनदीप्त्योः । उद्भासी । तिष्ठतेरातोयुक् । स्थायी । मत्रि गुप्तपरिभाषणे चुरादिः । मन्त्री । अर्द हिंसायाम् समर्दी । रक्षश्रुवप्शा नौ । रक्ष पालने । निरक्षी । श्रु श्रवणे । निश्रावी । डुवप् बीजसन्ताने । निवापी । श्नो तनूकरणे । निश्नायी । चत्वारो ऽमी निपूर्वाः । याचृ

व्याहृसंव्याहृवृजवदवसां नञ्पूर्वाणाम् । दुयाचृ याच्ञायाम् । हृञ् हरणे । वृज गतौ । वद व्यक्तायां वाचि । वस निवासे । अयाची । अव्याहारी । असंव्याहारी । अव्राजी । अवादी । अवासी । अचामचित्तवत्कर्तृकरणाम् । अजन्तानां धातूनाम् अचेतनकर्तृकाणां णिनिर्भवति । प्रतिषिद्धार्थानामेव । अकारी । अहारी । शीङ् स्वप्ने । विशयी । वृद्ध्यभावो निपातनात् । षिञ् बन्धने विषयी । वृद्ध्यभावः प्राग्वत् । इह षत्वमपि निपातनादिति गणरत्नमहोदधिव्याख्यायां वर्द्धमानः । विश्रयी । विषयी देशे इति वृत्तिः । अभिभावी भूते । अभिभूतवान् अभिभावी । राध संसिद्धौ । अपराधी । रुधिर् आवरणे । अवरोधी । उपरोधी । परिभावी । इह पाक्षिको वृद्ध्यभावो निपात्यते । इति ग्रहादिः । डुपचष् पाके । वच परिभाषणे । इत्यादि । आकृतिगणोयम् । तथा च शिवशमरिष्टस्यकरे इति सूत्रे कृञो ऽच्प्रत्ययः कृतः । कर्मणिघटो ऽठच् इति सूत्रे च घटेः । तथा यङोचिचेति सूत्रेण अस्मिन्नच् प्रत्यये परे यङोलुग्विहितः । भाष्ये च अजपि सर्वधातुभ्यो वक्तव्य इत्युक्तम् । किमर्थं तर्हि पचाद्यनुक्रमणमिति चेत् । नदद् इत्यादौ अनुबन्धासञ्जनार्थम् । कर्मोपपदानामिगुपधानां च बाधनार्थम् । अन्येषान्तु प्रपञ्चार्थम् । तथाहि । नदद् । भषट् । प्लवट् । चरट् । गरट् । तरट् । चोरट् । देवट् । सूदट् । एते टितः । नद अव्यक्ते शब्दे । टो ङीबर्थः । नदः । नदी । भष भर्त्सने भषी । प्लुङ् गतौ प्लवी । चर गतौ चरी । गॄ निगरणे । गरी । तॄ प्लवनतरणयोः । तरी । चुर स्तेये । चोरी । दिवु क्रीडादौ । देवी । सूदिरुक्तार्थः । सूदी । मिष स्पर्द्धायाम् । मेषः । कुप क्रोधे । कोपः । सृप्लृ गतौ । सर्पः । इह दिविप्रभृतिषु इगुपधत्वात्कः प्राप्तः ।

डुभृञ्। जारं बिभर्तीति जारभरा। श्वानं पचतीति श्वपचा। अनयोः कर्मण्यण् प्राप्तः। न्यङ्क्वादिषु श्वपाकशब्दस्य पाठात् पक्षे कर्मण्यणपि भवतीति कैयटादयः। जृष्मृङ्प्रभृतीनान्तु पाठः प्रपञ्चार्थ एवेति विवेकः॥

इगुपधज्ञाप्रीकिरः कः॥ इगुपधेभ्यो जानातेः प्रीणातेः किरतेश्च कः प्रत्ययः स्यात्। विक्षिपः। विलिखः। विधः। कृशः। जानातीति ज्ञः। आतोलोपइटिचेत्यालोपः। प्रीञ् तर्पणे इयङादेशः। प्रीणातीति प्रियः। कॄ विक्षेपे। ऋतइद्धातोः। किरतीति किरः। सूत्रे तु इतरेतरयोगद्वन्द्वे व्यत्ययेन पञ्चम्येकवचने कृशब्दस्य धात्वनुकरणत्वेन प्रकृतिवदनुकरणमित्यतिदेशात् ऋत इत्वं बोध्यम्। समाहारद्वन्द्वे तु नपुंसकत्वेन ह्रस्वे सतीत्वं न स्यात्॥

आतश्चोपसर्गे॥ आकारान्ताद्धातोरुपसर्गे उपपदे कप्रत्ययः स्यात्। श्यादित्वयेति प्राप्तस्य णप्रत्ययस्यापवादः। प्रस्थः। सुग्लः। सुम्लः॥

पाघ्राध्माधेट्दृशः शः॥ एभ्यः पञ्चभ्यः शप्रत्ययः स्यात्। पिबतीति पिबः। जिघ्रः। धमः। धयः। स्त्रियान्तुटाप्। धया। यद्यपि धेटष्टित्वात् स्तनन्धयीत्यत्रेव इहापि ङीप् प्राप्नोति। तथापि खशन्ते एव ङीप् न तु शप्रत्ययान्ते इति नासिकास्तनयोरिति सूत्रे हरदत्तः। इह सूत्रे उपसर्गइति केचिदनुवर्तयन्ति तत्तु बहूनामसम्मतम्। तथा च प्रायुंक्त श्रीहर्षः। फलानि धूमस्य धयानधोमुखानिति। श्रूयते च यदापश्यः पश्यते रुक्मवर्णमिति। अत्र पिबतेरेव ग्रहणं न तु पा रक्षणइत्यस्य। लुग्विकरणत्वात्। घ्रः संज्ञायां प्रतिषेधः॥ अत्र च व्याघ्रादिभिरिति सौत्रनिर्देशो लिङ्गम्। व्याघ्रः। आतश्चोपसर्गे इति कः॥

अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च ॥ अनुपसर्गेभ्यो लिम्पादिभ्यः शप्रत्ययः स्यात् । लिम्पतीति लिम्पः । विन्दतीति विन्दः । सूत्रे लिम्पविन्देति भाविना नुमा सनुम्कौ निर्दिष्टौ । तेन विकरणेतराणामग्रहणम् । लाभार्थस्यैव तु ग्रहणम् । धृञ् धारणे धृङ् अवस्थाने । ण्यन्तयोर्द्वयोरपि ग्रहणम् । धारयः । अथ कथं न मह्यमत्रोत्तरधारयस्य इति श्रीहर्षः । परत्वाद्धि सूत्रधारादिष्विव कर्मण्यणा भाव्यम् । तथा च वार्त्तिकम् । अकारादनुपपदात्कर्मोपपदो विप्रतिषेधेनेति ॥ सत्यम् । कर्मणः शेषत्वाविवक्षायामणोप्राप्त्या शे कृते शेषषष्ठ्यन्तेन समासो भविष्यति । एतेन गङ्गाधरभूधरजलधरादयो व्याख्याताः । पार कर्मसमाप्तौ । पारयतीति पारयः । विद चेतनाख्यानादिषु चुरादिः । ज्ञानाद्यर्थानामन्यतमो वा हेतुमण्ण्यन्तः । वेदयतीति वेदयः । एजृ कंपने ण्यन्तः । उदेजयतीत्युदेजयः । चिति संज्ञाने चुरादिः । चेतयतीति चेतयः । सत सुखे चुरादिण्यन्त इति बोपदेवः । सातिः सौत्रो हेतुमण्ण्यन्त इति हरदत्तः । सातयः । वासरूपन्यायेन क्विपि सात् । सम्पदादित्वाद्भावे क्विब्वा । एवञ्च एष एवानन्दयतीति श्रुतिबलादानन्दयितृविज्ञानमानन्दमित्यादिश्रुतिबलादानन्दरूपं ब्रह्म साच्छब्दार्थः । तदस्त्येषामिति सात्वन्तो भक्ताः । एतेन सात्वतां पतये नम इत्यादि व्याख्यातम् । सदेव सात् इत्युक्त्वा आर्षत्वञ्च वदन्तः प्रत्याख्याताः । षह मर्षणे चुरादेर्हेतुमण्ण्यन्तो वा । साहयः । उदाहरणेषु लिम्पिविन्दिभ्यां तुदादिभ्यः शः । शेमुचादीनामिति नुम् । धारयादिषु शब्गुणायादेशाः । अनुपसर्गादिति किम् । प्रलिपः । नौ लिम्पेरिति वक्तव्यम् ॥ निलिम्पा नाम देवाः । गवादिषु विन्देः संज्ञायामिति वक्तव्यम् । गोविन्दः । अरविन्दः । च-

ऋस्य नाभिनेम्योरन्तराले स्थितानि काष्ठानि अरः, तदाकाराणि दलानि सादृश्यात्तच्छब्दभाञ्जि लभतइत्यर्थे कर्मण्यणो बाधनायेदम् ॥

ददातिदधात्योर्विभाषा ॥ शः स्यात्। पक्षे श्याद्व्यधेति णः। ददः। दधः। दायः। धायः। अनुपसर्गादित्येव। प्रदःप्रधः। दद दाने दध धारणे आभ्यामचि ददो दध इति सिद्धम्। दाधाभ्यां णे दायो धाय इति। सत्यम्। स्वरार्थमिदं सूत्रम्। अददः। अदधः। अत्र नञ्स्वरेण आद्युदात्तत्वं यथा स्यात्। अजन्तत्वे त्वच्कावशक्ताविति अन्तोदात्तत्वमिति महान् भेदः।

ज्वलितिकसन्तेभ्यो णः। इतिशब्द आद्यर्थः। ज्वल दीप्तौ इत्येवमादिभ्यो धातुभ्यः कस गतावित्यन्तेभ्यो णो वा स्यात्। ज्वलः। ज्वालः। चलः। चालः। अनुपसर्गादित्येव। प्रज्वलः। कसिमधीत्य वृदिति ये पठन्ति तेषां मते कसन् तग्रहणं चिन्त्यप्रयोजनम्। ज्वलधातुश्च यद्यपि घटादिषु परस्ताच्चेति द्विः पठ्यते तथापि द्वितीय एवेह गृह्यते। घटादिपाठस्य मित्संज्ञायां चरितार्थत्वात्। इतरस्य चानन्यार्थत्वात्। ज्वलादिषु भ्रमु चलनइति पठ्यते। तस्माण्णे भ्रम इति रूपं नोदात्तोपदेशस्येति वृद्धिनिषेधात्। ज्वलादिपाठस्तु स्वरार्थः। अभ्रम इत्यत्र अच्कावशक्ताविति स्वरो मा भूदिति। तनोर्ण उपसंख्यानम् ॥ अवतनोतीत्यवतानः। विभाषेत्यनुपसर्गादिति च नात्र वार्त्तिके सम्बध्यते ॥

श्याद्व्यधाभ्रुसंस्रुवतीणवसावहलिहश्लिषश्वसश्च ॥ अनुपसर्गादिति निवृत्तम्। उत्तरसूत्रे पुनरनुपसर्गग्रहणात्। एवञ्च तत्सम्बद्धं विभाषाग्रहणमपि निवर्त्तते। श्यैङ्प्रभृतिभ्यो णः स्यात्। श्यैङ् गतौ अस्य आदन्तत्वादेव सिद्धे उपसर्गे कं वाप्तुं

ग्रहणम् । अवश्यायः । प्रातिश्यायः । आतोयुगिति युक् । एतेनावस्यवेर्ग्रहणं व्याख्यातम् । आत्, दायः । धायः । इह सूत्रे श्या आत् इति श्लेषो न तु शीङो यणादेशेन, नापि अततेः, अच्छब्दान्तानां वा यतिप्रभृतीनाम् । नाप्यकारान्तानाम् । अत्र च व्याख्यानमेव शरणम् । व्यध ताडने । व्याधः । स्रु गतौ आङ्पूर्वः सम्पूर्वश्च । आस्रावः । संस्रावः । इण गतौ अतिपूर्वः । अत्यायः । षोन्तकर्मणि । हृञ् हरणे । अवपूर्वः । अवसायः । अवहारः । लिह आस्वादने । लेहः । श्लिष आलिङ्गने श्लेषः । श्वस प्राणने श्वासः ॥

दुन्योरनुपसर्गे ॥ दुनोतेर्नयतेश्च अनुपसर्गाण्णः स्यात् । दुनोतीति दावः । नयतिसाहचर्यात्सानुबन्धकस्य दुनोतेरिह ग्रहणम् । निरनुबन्धकाद्दवतेस्तु पचाद्यच् । दवः । करणसाधनो वा ऋदोरबित्यबन्तः । दवदावौ वनारण्यवह्नी इत्यमरः । नयतीति नायः । अनुपसर्गे किम् । प्रदवः । प्रणयः ॥

विभाषा ग्रहः ॥ णः स्यात् । पक्षे अच् । व्यवस्थितविभाषेयम् । तेन जलचरे ग्राहः । ज्योतिषि ग्रहः । भवतेश्चेति वक्तव्यम् ॥ भवो देवः संसारश्च । भावाः पदार्थाः । एतद्वक्तव्यं भाष्ये नास्ति । भावा इति तु प्राप्त्यर्थाच्चुरादिण्यन्तादचि बोध्यम् ॥

गेहे कः ॥ ग्रहेः कः स्यात् गेहे कर्तरि ॥ गृह्णाति धान्यादिकमिति गृहम् । तात्स्थाद् गृहा दाराः । गृहशब्दोर्धर्चादिः । तत्र पुल्लिङ्गो बहुवचनान्त एव । नपुंसकस्तु अभिधेयवचनः । द्विविधोपि वेश्मनि मुख्यः । दारेषु गौणः । तथा च न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते इति वेश्मनि मुख्यतामाभिप्रेत्यैव व्यवहरन्ति । वृत्तिकारस्तु तन्त्रावृत्त्योरन्यतराश्रयणेन सूत्रे गेहश-

न्देन अर्थद्वयं निर्दिश्य प्रत्ययविधानात् दारेष्वपि गृहशब्दं मुख्यमेवेच्छन्ति । गेह इति च प्रत्ययार्थस्य कर्तुर्विशेषणम् । न तूपपदं गृहपतिनासंयुक्तइति निर्देशादिति न्यासकारहरदत्तौ ।गृह ग्रहणइति चुरादावदन्ताण्णिचि पचाद्यचा भ्वादेरिगुपधलक्षणेन कप्रत्ययेन वा गृहशब्दस्य सिद्धौ निर्देशस्यान्यथोपपत्तेर्दुर्बलमिदं ज्ञापकम् । व्याख्यानादेव तु कर्तृविशेषणतेत्यवधेयम् । वस्तुतस्तूक्तरीत्यैव गृहशब्दसिद्धेर्गेहेक इति सूत्रं शक्यमकर्तुमिति दिक् ॥

शिल्पिनि ष्वुन् ॥ धातोः ष्वुन् स्यात् शिल्पिनि कर्तरि । क्रियाकौशलं शिल्पं तदस्यास्तीति शिल्पी । पूर्वेण साहचर्यात् । शिल्पिनीत्यपि प्रत्ययार्थस्य विशेषणम्। अत्र भाष्ये नृतिखनिरंजिभ्य इति परिगणनं कृतम् । नर्तकः । नर्तकी । खकः । खनकी । जनीजृष्क्नसुरञ्जोमन्ताश्चेति मित्त्वोक्तिर्ज्ञापयति रञ्जेरक्ङित्यपि क्व चिदनुनासिकलोपो भवतीति न्यासकारहरदत्तादयः । एवञ्च रञ्जेर्णौ मृगरमणइति रजकरजनरजस्सूपसङ्ख्यानमिति च वार्त्तिकं ज्ञापनसिद्धार्थानुवादकम् । रजकः । रजकी । षित्वान्ङीष् । भाष्यमते तु ङीष् न भवति । तथाहि । षष्ठे रजकरजनरजःसूपसङ्ख्यानमिति वार्त्तिकं प्रत्याख्यातुं भाष्यकृतोक्तं कित एते औणादिका इति । तत्र कैयटः । रजक इति क्वुन् शिल्पिसंज्ञयोरिति क्वुन् । रजनमिति रञ्जेः क्युनिति क्युन् । रज इति भूरञ्जिभ्यां किदित्यसुन्प्रत्ययः । रजकीत्यत्र तु पुंयोगलक्षणो ङीष् । अपुंयोगे तु ङीषा न भाव्यमिति भाष्यकाराभिप्राय इति । एवञ्च भाष्यमते नृतिखनिभ्यामेव ष्वुन् न तु रञ्जेरिति स्थितम् ॥

गस्थकन् ॥ गायतेस्थकन् स्यात् शिल्पिनि कर्त्तरि। गा-

थकः । गामादाग्रहणेष्वविशेषेपि गै शब्दइति इह गृह्यते न तु गाङ्गतावीति । थकन्प्रत्ययो हि गायत्यर्थविषयमेव शिल्पिनमभिधातुं समर्थः ॥

ण्युट् च ॥ गायतेर्ण्युट् स्यात् शिल्पिनि कर्त्तरि । गायनः । गायनी । योगविभाग उत्तरत्रास्यैवानुवृत्त्यर्थः ॥

हश्च व्रीहिकालयोः ॥ जहातेर्जिहातेश्च ण्युट् स्यात् व्रीहौ काले च कर्त्तरि । जहात्युदकमिति हायनो व्रीहिः । अम्बुनोधिकं वर्धनात् । जिहीते जलमिति वा विग्रहः । जलं प्रायेणापेक्षते इत्यर्थः । जाङ्गलदेशोद्भवा व्रीहिविशेषा हायना इत्याहुः । प्रलयावस्थायां जहाति भावानिति जिहीते गच्छति परिच्छेदकत्वेन व्याप्नोतीति वा हायनो वर्षम् । अत्रापि व्रीहिकालयोरिति नोपपदम् । त्रिचतुर्भ्यो हायनस्येति लिङ्गात् ॥

प्रसृत्वः समभिहारे वुन् ॥ एभ्यो वुन् स्यात् साधुकारिणि कर्त्तरि । समभिहारग्रहणेन साधुकारित्वं लक्ष्यते, भूयः सहचारात् । यो हि यां क्रियां पुनःपुनरनुतिष्ठति स तत्र कौशलं लभतइत्युत्सर्गः । तेन सकृदपि यः सुष्ठु करोति तत्र भवति बहुशोपि दुष्टं कुर्वति न भवति । प्लवकः । स्मरकः । लवकः । सूत्रे प्रसृत्व इति पञ्चम्याः स्थाने जस् ॥

आशिषि च ॥ अप्राप्तप्रार्थनाविषयीभूतेर्थे वर्त्तमानाद्धातोर्वुन् स्यात्कर्तरि । जीवतात् जीवकः । नन्दतात् नन्दकः । आशीश्चेह प्रयोक्तृधर्मः । पित्रादिगतेरुच्छाविषयीभूतयोर्जीवननन्दनयोः कर्तरि पुत्रादौ पित्रादेरियमुक्तिः ॥

इति श्रीशब्दकौस्तुभे तृतीयस्य प्रथमे पादे
षष्ठमान्हिकम् ॥ पादश्च समाप्तः ॥

कर्मण्यण् ॥ कर्मण्युपपदे धातोरण्प्रत्ययः स्यात् । कर्म

च सङ्गच्छेत्युक्तम् । तत्सर्वमविशेषादिह गृह्यते । निर्वर्त्ये, कुम्भं करोतीति कुम्भकारः । विकार्ये, काण्डलावः । प्राप्ये, वेदाध्यायः । यद्येवं, ग्रामं गच्छति आदित्यं पश्यति हिमवन्तं शृणोतीत्यादौ प्राप्नोति । सत्यम् । अनभिधानान्नेति भाष्यम् । तच्चानभिधानं यत्राभिज्ञैरुक्तं तत्रैव । अन्यत्र तु यथालक्षणं भवत्येव । यत्तु वृत्तौ त्रिविधं कर्मेह गृह्यतइत्युक्तं तस्यायमाशयः । आदित्यं पश्यतीत्यादौ मा भूदित्येवमर्थं कर्मणि निर्वर्त्यमानविक्रीयमाण इति वक्तव्यमित्याशङ्क्य वार्त्तिककृतोक्तम् । कर्मणि निर्वर्त्यमाने विक्रयमाणइति चेद्वेदाध्यायादीनामुपसङ्ख्यानमित्यादि । एवं स्थिते त्रिविधमपीह कर्म गृह्यते । न तु प्राप्यं न गृह्यतइति । एवञ्च त्रिविधमिति वार्त्तिं दृष्ट्वा सूत्रान्तरोक्तं नेह गृह्यतइति न भ्रमितव्यम् । तथा च दिवः कर्मचेत्यत्र संज्ञासमावेशस्य प्रयोजनमुक्तम्, मनसा देव इत्यत्र कर्मत्वादण् करणत्वात्तृतीयेति । एवञ्च वृक्षावासः पर्वतावास इत्याद्यपि यथाभिधानं भवत्येव । शीलिकामिभक्ष्याचरिभ्यो णः पूर्वपदकृतिस्वरत्वञ्च ॥ शील समाधौ । कमु कान्तौ । भक्ष अदने । चुरादिण्यन्तः । चरिर्गत्यर्थः आङ्पूर्वः । णस्थ णित्करणं चरेर्वृद्ध्यर्थम् । कृदुत्तरपदप्रकृतिस्वरं बाधितुं पूर्वपदेत्यादि । मांसं शीलयति मांसशीला । मांसकामा । मांसभक्षा । अत्र अणि सति ङीप्स्यात् । णेप्यण्कार्यमिति तु ताच्छीलिकएवेति वक्ष्यते । मनेर्दीर्घत्वश्चेति समुदायान्तत्वादन्तोदात्तो मांसशब्दः । कल्याणचारा । कल्याणशब्दो लघावन्त इति मध्योदात्तः । ईक्षिक्षमिभ्यां चेति वक्तव्यम् ॥ अत्रापि पूर्वपदप्रकृतिस्वरत्वे चेति सम्बध्यतएव । वाक्यभेदस्तु वैचित्र्यार्थः । सुखप्रतीक्षा । बहुक्षमा । स्यादेतत् । यो मांसम्भक्षयति तस्य मांसं भक्षो भवति । तत्र भक्षयतेः क-

र्मण्यरजन्तेर्तस्य बहुव्रीहिणा सिद्धम् । एवमन्यत्रापि । यस्तु अण्यन्तस्तस्य घञन्तस्य बहुव्रीहिः । न च बहुभक्ष इत्यत्र बहोर्नञ्वदिति उत्तरपदान्तोदात्तत्वं स्यादिति वाच्यम् । भावे अजन्तेन बहुषु भक्षोस्येति विग्रहोपपत्तेः । न ह्यत्र बहुस्वरप्राप्तिरस्ति । उत्तरपदार्थस्य बहुत्वाभावात् । एवञ्च वार्त्तिकद्वयमपि नारम्भणीयमिति चेत् । मैवम् । कर्मण्यणं बाधितुं तस्यावश्यारम्भ्यत्वात् । अकारादनुपपदात्कर्मोपपदो विप्रतिषेधेन ॥ पचादिभ्योच् अनुपपद अकारः । तस्यावकाशः । पचतीति पचः । कर्मोपपदस्यावकाशः काण्डलावो वृजाति । ओदनपाच इत्यत्र उभयप्रसङ्गे परत्वादणेव । तेनोपधावृद्धिः । उपपदसमासश्च नित्यो भवति । अचि तु षष्ठीसमासो वैकल्पिकः स्यात् । कथं तर्हि गङ्गाधरः श्रीधरः वज्रधरः भूधरः स्रग्धरेत्यादि । अत्र के चित् । युगपद्विवक्षायां हि भवतु विप्रतिषेधः । केवलमकृत्यर्थविवक्षायान्तु अचि कृते पश्चात्कर्मसम्बन्धे सिद्धं रूपमिति । अत्र हरदत्तः । एवं सति ओदनपच इत्यपि स्यात् । तच्चानिष्टम् । किञ्चोक्तरीतिर्न्यायविरुद्धा एकत्वात्प्रयोगस्य । न हि तस्मिन्नेव प्रयोगे विवक्षितं चाविवक्षितं च कर्म भवति । तस्मादोदनपच इत्यसाधुरेव । गङ्गाधरादयस्तु संज्ञाशब्दा इत्याह । अत्रेदं वक्तव्यम् । परिनिष्ठिते प्रयोगे कर्मान्वयसत्वेपि प्रक्रियादशायां क्रमेण विवक्षायां न क्षतिः । कथमन्यथा शक्यञ्चेत्यादौ अन्तरङ्गः पदसंस्कारो बहिरङ्गस्त्रीत्वेन न विहन्येतेत्यादि तत्तत्रोच्यते । किञ्च कर्मणः शेषत्वविवक्षयापि गङ्गाधरादिशब्दानां सौष्ठवे सम्भवति रथन्तरादिवन्न केवलं संज्ञात्वमाश्रयितुं युक्तम् । ओदनपचशब्दोपि उक्तरीत्या प्राप्नोत्येव । यदि त्वस्यासाधुत्वे प्रमाणमस्ति तर्ह्यनभिधानं शरणीक्रियतामित्यास्तां

तावत्। प्रकृतमनुसरामः। पचादिभ्य एवाजिति यथाश्रुतसूत्रमनुसृत्य विप्रतिषेध उदाहृतः। यदा तु अजपि सर्वधातुभ्य इति पक्षस्तदा अपवादत्वादेव तस्याण् बाधको बोध्यः। किञ्चेगुपधज्ञाप्रीकिरःकोनुपपदः। तस्यावकाशः विक्षिपः विलिखः। कर्मोपपदस्य स एव। काष्ठभेद इत्यत्र परत्वादण्। तथा अनुपसर्गाल्लिंपविन्देति अनुपपदः शः। तस्यावकाशः लिम्पतीति लिम्पः। कर्मोपपदस्य स एव। कुड्मलेय इत्यत्र परत्वादण्। तथा आतश्चोपसर्गे इति कः अनुपपदः सुग्लः सुम्ल इत्यत्र सावकाशः। कर्मोपपदस्तत्रैव गोसन्दाय इत्यत्र परत्वादणेव भवति॥

व्हावामश्च॥ एभ्यः कर्मण्युपपदे अण् स्यात्। कस्यापवादः। व्हेञ् स्पर्द्धायां शब्दे च। स्वर्गव्हायः। वेञ् तन्तुसन्ताने। तन्तुवायः। वा गतिगन्धनयोरित्ययन्तु नेह गृह्यते। अकर्मकत्वात्। भ्रमणार्थो ह्यसौ। यद्यपि सोपसर्गस्य सकर्मकत्वं दृश्यते सर्वा दिश आवान्ति। वात आवा तु भेषजमिति।तथापि तत्र पूर्वेणैवाण् सिद्धः। वाता वान्ति दिशो दश इति तु प्रयोगश्चिन्त्यः। अथापि क्व चित्कथञ्चित् सकर्मकत्वं निर्वाह्यते। तथापि व्हेञा सानुबन्धेन साहचर्यात् व्हेञ एव ग्रहणं न तु वातेः। माङ् माने, मेङ् प्रणिदाने उभयोरपि ग्रहणम्। धान्यमापः। मा मानइत्यस्य तु सम्भावनार्थस्याकर्मकत्वादग्रहणम्॥

आतोनुपसर्गे कः॥ आदन्ताद्धातोरनुपसर्गात् कर्मण्युपपदे कप्रत्ययः स्यात्। अणोपवादः। गोदः पार्ष्णित्रम्। अनुपसर्गे किम्। गोसन्दायः। अत्र वार्त्तिकम्। कविधौ सर्वत्र प्रसारणिभ्यो डः॥ सम्प्रसारणभाजः प्रसारणिनः। ज्या वयोहा-

नौ। ब्रह्म जिनातीति ब्रह्मज्यः। सर्वत्रग्रहणान्नेहैव। आतश्चोपसर्गे, आव्हः प्रव्हः। अत्र के सति सम्प्रसारणं स्यात्। आव्हा अ इति स्थिते सम्प्रसारणे पूर्वत्वे च कृते उवङादेशे आहुवः प्रहुव इति प्राप्नोति। एवं ब्राह्मजिय इति प्राप्नोति। न चैरनेकाच इत्यनेन यण्। अङ्गस्य एकाच्त्वात्। ननूभयत्रापि सम्प्रसारणे कृते आतोलोपः। तस्य स्थानिवद्भावादियङुवङौ न भविष्यत इति चेत्। स्यादेवम्। यद्यातोलोपो लभ्येत। स तु दुर्लभः। अन्तरङ्गेण पूर्वत्वेन बाधात्। न च वार्णादांगं बलीयः। व्याश्रयत्वात्। नन्वेवमपि व्यर्थमेव वार्त्तिकम्। प्रागेव सम्प्रसारणादातोलोपे कृते तस्य स्थानिवद्भावादसिद्धत्वाद्धा उवङोप्रवृत्तौ यणादेशेन आव्हः प्रव्ह इत्यादेः सिद्धत्वात्। तथाहि। नित्यं सम्प्रसारणम्, आतोलोपे कृते अकृते प्रसङ्गित्वात्। अल्लोपस्तु कृते च सम्प्रसारणे यद्यपि पूर्वत्वेन बाध्यते तथापि यस्य च निमित्तं लक्षणान्तरेण विहन्यते न तदपि नित्यमिति नित्य एव। द्वयोर्नित्ययोः परत्वादालोपः। ततः सम्प्रसारणं तत इयङुवङौ प्रसक्तौ आतोलोपस्य स्थानिवत्त्वान्न भविष्यतः। न च अनादिष्टादचः पूर्वत्वं नास्तीति वाच्यम्। स्थानिद्वारकस्य सत्त्वात्। यत्त्विह कैयटेनोक्तं शास्त्रीयकार्यसिद्धये स्थानिवद्भावो विधीयते न त्वनादिष्टादचः पूर्वत्वे लौकिके इति, तदापाततः। अचः परस्मिन्नित्यतिदेशस्याशास्त्रीयतया तस्यैव स्थानिवत्सूत्रेणातिदेशः सम्भवतीति नपदान्तसूत्रीयसवर्णग्रहणाद्युपष्टम्भेन प्रागेव वर्णितत्वात्। किञ्चाकारलोपस्य आभीयत्वे नासिद्धत्वान्न दोषः। न चैवं जुहुवतुः जुहुवुः अत्राप्युवङ् न स्यादिति वाच्यम्। स्थानिद्वारकस्य अनादिष्टादचः पूर्वत्वस्य आभीयासिद्धत्वस्य

च अनित्यत्वेनेह प्रवृत्तेः। अथ वा सम्प्रसारणाच्च एङः पदान्तादित्यत्र एङ इति योगो विभज्यते। सम्प्रसारणादेङि परे पूर्वपरयोः पूर्व एकादेशो भवतीति सम्प्रसारणाच्चेत्येव सिद्धे ज्ञापनार्थमिदम्। यत्र सम्प्रसारणात्पर एङ् सम्भवति तत्र अनैमित्तिकत्वेनान्तरङ्गमप्यात्वं अकृत्वा सम्प्रसारणं कर्तव्यमिति। तेन जुहुवतुरित्यत्र एङन्तादे लिटि विहिते सम्प्रसारणं पूर्वत्वम्। ततश्च न स्थानिवत्वं नाप्यसिद्धत्वमिति सिद्धमिष्टम्। आव्हः प्रव्ह इत्यत्र तु आकान्तलक्षणः प्रत्ययो असत्यात्वे कर्तुमशक्यः। अतः पूर्वमात्वम्। ततः प्रत्ययः अद्लोपः सम्प्रसारणं स्थानिवद्भावादसिद्धत्वाद्वा इयङुवङोरभावः। तस्मान्मास्तु वार्त्तिकमिति चेत्। सत्यम्। इत्थं प्रत्याख्यातमेव भाष्ये किन्तु अस्ति वार्त्तिकस्योक्तिसम्भवः। आभात्सूत्रप्रत्याख्यानपक्षे हि स्थानिवत्वमेव शरणम्। तत्र च स्थानिद्वारकमनादिष्टादचः पूर्वत्वमाश्रयणीयन्तच्चानित्यमिति ज्ञापयितुमिदं वार्त्तिकमिति। एतत्प्रत्याख्यातुं प्रवृत्तो भाष्यकारोपि स्थानिवद्भावमुपन्यस्य दूषयित्वा असिद्धतां शरणीकुर्वन् स्थानिद्वारिकायाः अनादिष्टादचः पूर्वतायाः क्वाचित्कतां ध्वनयति। तत्फलन्तु अचः परस्मिन्निति सूत्रएवावोचामेत्यलं बहुना॥

सुपि स्थः॥ सुबन्ते उपपदे तिष्ठतेर्धातोः कः प्रत्ययः स्यात्। समस्थः। विषमस्थः। अत्र सुपीति योगो विभज्यते। सुपि आकारान्तेभ्यो धातुभ्यः कप्रत्ययः स्यात्। द्वाभ्यां पिबतीति द्विपः। स्थः॥ सुपि तिष्ठते कः स्यात् भावे। आखूनामुत्थानमाखूत्थः। प्रक्रियाकौमुद्यान्तु आखूत्थमिति नपुंसकं पठ्यते तत्प्रामादिकम्। भाष्यादौ सर्वत्र पुल्लिङ्गस्यैवोदाहृतत्वात्। ल्युः कर्त्तरीमनिज्भावे कः किर्योः प्रादितोन्यत इत्यमरकोशा-

द्भावे कस्य पुंस्त्वविधानाच्च । भावे नणकचिद्भ्योन्य इति नपुंसकविधाने कस्य पर्युदासाच्च । ननु स्थ इति सूत्रे णविधीयमानोपि कः कृत्त्वात्कर्त्तर्येव स्यादिति चेन्न । आत इत्यनेनैव सिद्धेः । तथा च स्थ इत्यारम्भसामर्थ्यान्न कर्त्तरि किन्त्वानीर्दिष्टार्थत्वात्स्वार्थे । धातोश्च स्वार्थो भाव एव । नन्वेवं घर्थे कविधानमित्यनेनैव गतार्थत्वमिति चेन्न । वार्त्तिकं दृष्ट्वा सूत्रकृतो ऽप्रवृत्तेः । किञ्च नित्यसमासार्थमिदम् । अन्यथा हि षष्ठीति सूत्रेण पाक्षिकः समासः स्यात् । इष्यते तु नित्यमुपपदसमासः । तथा च आखूनामुत्थानामिति अस्त्वपदविग्रहः क्रियते । घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थमित्यत्र स्थाग्रहणन्तु कर्तृवर्जिते कारके यथा स्यादित्येवमर्थम् । इत ऊर्ध्वं कर्मणि सुपीति च द्वयमप्यनुवर्त्तते । तत्र सकर्मकेषु कर्मण्युपतिष्ठते । स्पृशोनुदकइति यावत् । अन्यत्र सुपीति सुप्यजातौ णिनिरिति यावत् । एवञ्च प्रकृतस्य सुब्ग्रहणस्य उपसर्गेतरपरत्वं सत्सूद्विषेति सूत्रस्थेनोपसर्गेपीत्यनेन ज्ञापितमिति सुप्मात्रपरिग्रहार्थं णिनिविधौ पुनः सुप्ग्रहणमिति वक्ष्यामः ॥

तुन्दशोकयोः परिमृजापनुदोः ॥ तुन्दशोकयोः कर्मणोरुपपदयोः परिमृजापनुदिभ्यां धातुभ्यां कप्रत्ययः स्यात् । आलस्यसुखाहरणयोरिति वक्तव्यम् ॥ आलस्ये सुखोत्पादने च गम्यमाने प्रत्यय इत्यर्थः । तत्र सामर्थ्यादलसे कर्त्तरि सुखस्य चाहर्त्तरि प्रत्यय इति फलितं भवति । तुन्दं परिमार्ष्टीति तुन्दपरिमृजोलसः । अत्र मृजेरजादाविति वैकल्पिकी वृद्धिर्नेति हरदत्तः । भवतीत्यपरे । एतन्मतद्वयबलाबलं तु कृञ्चितिचेति सूत्रे प्रतिपादितम् । अलसादन्यत्र तुन्दपरिमार्ज इत्येव भवति । शोकापनुदः सुखस्याहर्त्ता । यस्तु संसारासारत्वाद्युपदेशेन शोक-

मेव केवलमपनुदति न तु सुखमुत्पादयति स शोकापनोदः । कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम् ॥ तादर्थ्यएषा चतुर्थी । मूलविभुजादिसिध्यर्थमित्यर्थः । मूलानि विभुजतीति मूलविभुजो रथः । नखान्मुञ्चतीति नखमुचानि धनूंषि । कौ मोदते कुमुदं सरोरुहम् । इह यद्यपि काकगुहास्तिला इति भाष्यवृत्त्यादिषु उदाहृतं तथापि काकेभ्यो गूहितव्या इति कर्मार्थावगतेः घञर्थे कविधानमित्यत्रेदं द्रष्टव्यमिति हरदत्तः । आकृतिगणोयम् । तेन महीध्रकुध्रःशिरोध्रशिरोरुहादि सिद्धम् ॥

प्रे दाञ्ः ॥ दारूपाज्जानातेश्च प्रोपसृष्टात्कर्मण्युपपदे कप्रत्ययः स्यात् । अणोपवादः । सर्वप्रदः । पथिप्रज्ञः । प्रइति किम् । गोसन्दायः । अनुपसर्गइत्यनुवृत्तेः प्रेत्यस्मादन्यस्मिन्नुपसर्गे सति को न भवति । किन्त्वणेव । गोसम्प्रदायः । इह वृत्तौ ददातेरित्युक्तं तत्तु सर्वेषां दारूपाणामुपलक्षणम् । गामादाग्रहणेष्वविशेषादिति हरदत्तः ॥

सामि ख्यः ॥ सम्पूर्वात्ख्या इत्यस्मात्कर्मण्युपपदे कप्रत्ययः स्यात् । गाः सञ्चष्टे गोसंख्यः । चक्षिङः ख्याञादेशः । ख्या प्रकथनइत्यस्य तु सम्पूर्वस्य प्रयोगो नास्तीति न्यासकारः ॥

गापोष्टक् ॥ अभ्यां टक् स्यादनुपसर्गे कर्मण्युपपदे । सामगः । सामगी । अत्र वार्त्तिकम् । सुराशीध्वोः पिबतेरिति ॥ अत्र पिबतेरिति लुग्विकरणपरिभाषालब्धार्थकथनम् । उपपदपरिगणनन्तु वाचनिकमेव । सुरापः । सुरापी । शीधुपः । शीधुपी । सुराशीध्वोः किम् । क्षीरपा ब्राह्मणी । पिबतेरिति किम् । सुरां पाति रक्षतीति सुरापा । अनुपसर्गे किम् । सामसङ्गायः । गामादाग्रहणेष्वविशेषेपि गै शब्दइत्यस्यैवात्र ग्रहणं न तु गाङ् गतावित्यस्य सानुबन्धस्य, नापि गा स्तुताविति जुहोत्यादेः । नि-

रनुबन्धेन अलुप्तविकरणेन च पिबतिना साहचर्यात् । अनभिधानाद्वा । बहुलं तणि ॥ या ब्राह्मणी सुरापा भवति नैतां देवाः पतिलोकं नयन्ति ॥

हरतेरनुद्यमनेच् ॥ उत्क्षेपणादन्यास्मिन्नर्थे वर्त्तमानाद्धरतेर्धातोः कर्मण्युपपदे ऽच् स्यात् । अणोपवादः । अंशहरः । रिक्थहरः । अनुद्यमने किम् । भारहारः । अच्प्रकरणे शक्तिलाङ्गलाङ्कुशतोमरयष्टिघटघटीधनुःषु ग्रहेरुपसंख्यानम् ॥ शक्तिग्रहः । लाङ्गलग्रह इत्यादि । लिङ्गविशिष्टपरिभाषया घटग्रहणेनैव सिद्धे घटीग्रहणं परिभाषाया अनित्यत्वज्ञापनार्थम् । तेन मद्रराज्ञीत्यत्र टच् न । द्विषतीताप इत्यत्र द्विषत्परयोरिति खच् नेति दिक् । सूत्रे च धार्यर्थे ॥ ग्रहेरुपसंख्यानमित्येव । सूत्रग्रहः । धार्यर्थइति किम् । यः सूत्रं केवलमुपादत्ते न तु धारयति तत्राणेव यथा स्यात् । सूत्रग्राहः ॥

वयसि च ॥ वयसि गम्यमाने हरतेर्धातोः कर्मण्युपपदे अच् स्यात् । अणोपवादः । उद्यमनार्थ आरम्भः । कवचहरः क्षत्रियकुमारः । इह कवचोद्यमनं क्रियमाणे सम्भाव्यमानं वा वयो गमयति । तेनासत्यपि कवचग्रहणे कवचहर इति भवति ॥

आङि ताच्छील्ये ॥ आङ्पूर्वाद्धरतेः कर्मण्युपपदे ऽच्प्रत्ययः स्यात्ताच्छील्ये गम्यमाने । पुष्पाण्याहरति तच्छीलः पुष्पाहरः । फलाहरः । ताच्छील्ये किम् । भारमाहरति भाराहारः ॥

अर्हः ॥ अर्ह पूजायामित्यस्मात्कर्मण्युपपदे ऽच् स्यात् । अणोपवादः । स्त्रियां विशेषः । पूजार्हा ब्राह्मणी ॥

स्तम्बकर्मयोरमिजपोः ॥ स्तम्बकर्णयोरुपपदयोः यथासंख्यं रमिजपिभ्यामच्प्रत्ययः स्यात् । रमिस्तावद्कर्मकः । ज-

पिस्तु शब्दकर्मकः। मन्त्रं जपतीत्यादिदर्शनात्। उभावपि प्रति स्तम्बकर्णयोः कर्मत्वासम्भवात् सुपीत्येवात्र सम्बध्यते। हस्तिसूचकयोरिति वक्तव्यम्॥ स्तम्बे रमते इति स्तम्बेरमो हस्ती। तत्पुरुषेकृति बहुलामित्यलुक्, हलदन्तादिति वा। कर्णेजपः सूचकः। हस्तिसूचकाभ्यामन्यत्र तु स्तम्बेरन्ता। कर्णेजापिता मशकः। उपांशुशब्दायितेत्यर्थः॥

शमिधातोः संज्ञायाम्॥ शमि उपपदे धातुमात्रात्संज्ञायां विषये अच् स्यात्। शङ्करः। शम्भवः। शंवदः। धात्वधिकारे पुनर्धातुग्रहणमपवादविषयेपि प्रवृत्त्यर्थम्। तथा च वार्त्तिकम्। शमिसंज्ञायां धातुग्रहणं कृत्योहेत्वादिषु टप्रतिषेधार्थमिति॥ असति धातुग्रहणे शमिसंज्ञायामित्यस्यावकाशः। शम्भवः। शंवदः। कृत्योहेतुताच्छील्यइत्यस्यावकाशः श्राद्धकरः। शङ्कर इत्यत्रोभयप्रसङ्गे परत्वाट्ट एव स्यात्। धातुग्रहणसामर्थ्यादजेव भवति। शङ्करा नामपरिव्राजिका तच्छीला। कुणरवाडवस्त्वाचार्यो मन्यते गृणातेः शब्दकर्मणएतद्रूपम्। पृषोदरादित्वाद्गकारस्य ककार इति। तन्मते धातुग्रहणं चिन्त्यप्रयोजनम्॥

अधिकरणे शेतेः॥ सुपीति सम्बध्यते। अच् स्यात्। खे शेते खशयः। पार्श्वादिषूपसङ्ख्यानम्॥ पार्श्वाभ्यां शेते पार्श्वशयः। पृष्ठशयः। उदरशयः। दिग्धसहपूर्वाच्च॥ दिग्धेन सह शेतइतिविग्रहे दिग्धसहशयः। अत्र दिग्धसहशब्दो मयूरव्यंसकादिः। तस्य शयशब्देन सह उपपदसमासः। उत्तानादिषु कर्तृषु॥ उत्तानः शेते उत्तानशयः। अवमूर्धशयः। अवनतो मूर्धा यस्य अवमूर्धः। अधोमुखः शेतइत्यर्थः। गिरौ डश्छन्दसि॥ गिरौ शेते गिरिशः। तद्धितो वा॥ गिरिरस्यास्तीति गिरिशः। लोमादित्वाच्छः। इह यद्यपि कृत्तद्धिताभ्यां गिरिश-

शब्दो द्वेधा भाष्यवार्त्तिकयोर्व्युत्पादितस्तथापि लोके तद्धितान्त एव न तु कृदन्तः । डश्छन्दसीत्युक्तेः । एवञ्च प्रत्याहतास्त्रो गिरिशप्रभावात्, आरोपितं यद्गिरिशेन पश्चात्, गिरिशमुपचचार प्रत्यहं सा सुकेशीत्यादि प्रयुञ्जानानां कवीनां न कोप्यपराधः । गिरौ शेते इति व्याचक्षाणानां तु प्रमाद इत्यवधेयम् ॥

चरेष्टः ॥ अधिकरणे उपपदे चरेष्टः स्यात् । कुरुचरः । कुरुचरी ॥

भिक्षासेनादायेषु च ॥ एषु उपपदेषु चरेष्टः स्यात् । भिक्षां चरतीति भिक्षाचरः । चरतिरत्र चरणपूर्वके अर्जने वर्त्तते । चरणेन भिक्षामर्जयतीत्यर्थः । सेनाञ्चरति प्रविशतीति सेनाचरः । आदायेति ल्यबन्तं आदाय चरति गच्छतीत्यादायचरः । भक्षयतीति वा । कथं प्रेक्ष्य स्थितां सहचरीं व्यवधाय देहमिति । पचादिषु चरादिति पठ्यते । सुप्सुपेति समासः । टविधानन्तु नित्यसमासार्थम् ॥

पुरोग्रतेग्रेषु सर्तेः ॥ टः स्यात् । पुरः सरतीति पुरःसरः । अग्रतःसरः । अग्रमग्रेणाग्रे वा सरतीत्यग्रेसरः । सूत्रे अग्रशब्दस्य एदन्तत्वमपि निपात्यते । कथन्तर्हि यूथं तदग्रसरगार्वितकृष्णसारामिति । बाहुलकादिति हरदत्तः ॥

पूर्वे कर्त्तरि ॥ कर्तृवाचिनि पूर्वशब्दउपपदे सर्तेष्टः स्यात् । पूर्वः सरतीति पूर्वसरः । कर्त्तरीति किम् । पूर्वं देशं सरतीति पूर्वसारः ॥

कृञो हेतुताच्छील्यानुलोम्येषु ॥ हेत्वादिषु द्योत्येषु करोतेष्टः स्यात् । हेतुरिह लौकिकः । यशस्करी विद्या । अतः कृकमीति सः । ताच्छील्ये, श्राद्धकरः । आनुलोम्ये, वचनकरः । एषु कि

म्। कुम्भकारः। इह प्रसिद्धतरत्वात् द्व्यनुबन्धकोपि करोतिरेव गृह्यते न तु कृञ् हिंसायामिति। हेतुः कारणम्। आनुलोम्यमाराध्यचित्तानुवर्त्तनम्॥

दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसङ्ख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु॥ एषु सुबन्तेषु यथायोगं कर्मसु चोपपदेषु करोतेष्टः स्यात्। अहेत्वाद्यर्थ आरम्भः। दिवा दिवसे करोति प्राणिनश्चेष्टायुक्तानिति दिवाकरः। अत्र दिवाशब्दः अन्हीति सप्तम्यन्तस्यार्थे वर्त्ततइति तस्य कर्मत्वानुपपत्तेः सुपीत्यनेन सम्बन्धः। शेषाणान्तु कर्मणीत्येव। यदि तु वृत्तिविषये दोषामन्यमहर्दिवामन्या रात्रिरितिवत् कर्मत्वमभ्युपगम्यते तदा सर्वेषां कर्मणीत्यनेनैव सम्बन्धो बोध्यः। विभाकरः। निशाकरः। प्रभाकरः। भास्करः। सूत्रे भास्करान्तेति भाःशब्दस्य प्रत्ययसन्नियोगेन सकारो निपात्यते। तेन भास्कर इत्यत्र विसर्जनीयजिव्हामूलीयौ न भवतः। यद्वा कस्कादिषु बोध्यः। कारकरः। कर एव कारः। प्रज्ञादित्वात्स्वार्थे अण्। अन्तकरः। अनन्तकरः। अन्तकरशब्देन नञ्समासेप्येतदेव रूपम्। स्वरे तु विशेषः। नञ्समासे हि सतिशिष्टोव्ययपूर्वपदप्रकृतिस्वरः। अनन्तशब्दस्योपपदत्वे तु कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वम्। आदिकरः। बहुकरः। बहुशब्दोत्र वैपुल्यवचनः। संख्यावचनस्य तु संख्यावचनग्रहणेनैव सिद्धेः। नान्दीकरः। किङ्करः। लिपिलिबिशब्दौ पर्यायौ। लिपिकरः। लिबिकरः। बलिकरः। भक्तिकरः। कर्तृकरः। चित्रकरः। क्षेत्रकरः। संख्या, एककरः। द्विकरः। जंघाकरः। बाहुकरः। अहस्करः। अहन्, रोसुपीति रेफः। कस्कादित्वात्सः। यत्करः। तत्करः। धनुष्करः। अरुष्करः। नित्यंसमा-

सेनुत्तरपदस्थस्येति षत्वम् । किंयत्तद्भ्यो हुषु कृञोञ्जिश्वानम् ॥ वार्त्तिकमेतदिति कैयटहरदत्तौ । इष्टिरिति माधवः । किङ्करा । यत्करा । तत्करा । वार्त्तिकेन सूत्रबाधाट्टस्याभावात् किंकरीत्यसाधुरिति कैयटः । हेत्वादावपि टं बाधित्वा परत्वादञेवेति तस्याशयः । वृत्तौ तु पक्षान्तरमप्युक्तम् । अथवा पचादिपाठः करिष्यतइति । इह किमादिग्रहणमपनीय पचादिष्वेव किंयत्तद्भ्यो हुषु कृञिति पठितव्यमिति तस्यार्थः । वार्त्तिकमपीत्थमेव व्याख्येयमित्याशयः । अस्मिन्पक्षे हेत्वादिविवक्षायां परत्वाट्टेन भाव्यम् । तेन किंकरणशीला किंकरीति भवत्येव । पुंयोगविवक्षायान्तु निर्विवादो ङीष् । किंयत्तद्भ्यो हुष्वञ्चेति प्रक्रियायां विकल्पोक्तिस्तु आकरविरुद्धत्वात्कर्मण्यणोपि पक्षे प्रसङ्गाच्चायुक्तैव । न चाजभावे सौत्रष्टः, सूत्रे किमादिग्रहणापनयनस्य हरदत्तादिभिरुक्तत्वात् । अथ वा सौत्रस्यापनयनं मास्त्विति प्रौढिवादेन नेया, ताच्छील्यादौ व्याख्यानभेदात् फलितं विकल्पमाश्रित्य विषयविशेषाभिप्रायेण कथं चिद्वा नेया ॥

कर्मणि भृतौ ॥ कर्मशब्दे कर्मण्युपपदे करोतेष्टः स्याद्भृतौ गम्यमानायाम् । भृतिर्वेतनम् । कर्मनिर्वेशः क्रियायाः निष्क्रयाय देयं भक्तादि द्रव्यमिति यावत् । कर्मकरो भृतकः । कर्मकारोन्यः ॥

न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु ॥ एषूपपदेषु करोतेष्टो न स्यात् । हेत्वादिषु प्राप्तः प्रतिषिध्यते । शब्दकारः । श्लोककार इत्यादि ॥

स्तम्बशकृतोरिन् ॥ एतयोः कर्मणोरुपपदयोः करोतेरिन्प्रत्ययः स्यात् । व्रीहिवत्सयोरिति वक्तव्यम् ॥ स्तम्बकर्व्रीहिः । शकृत्करिर्वत्सः । इनो नित्त्वात्कृदुत्तरपदप्रकृतिस्वरे-

णोत्तरपदमाद्युदात्तम्। व्रीहिवत्सयोः किम्। स्तम्बकारः। शकृत्कारः॥

हरतेर्दृतिनाथयोः पशौ॥ दृतिनाथयोः कर्मणोरुपपदयोर्हरतेर्धातोः पशौ कर्त्तरि इन् प्रत्ययः स्यात्। दृतिं हरतीति दृतिहरिः। नाथं नासारज्जुं हरतीति नाथहरिः। इह प्रत्ययार्थस्य कर्तुः पशुविशेषणं न तु तस्य बाधकः। प्रकृतिप्रत्ययार्थयोरन्वयप्रसङ्गात्। प्रकृत्यर्थो हि प्रत्ययार्थं विशिनष्टि। प्रकृतिश्चेह धातुः। तदर्थश्च क्रिया। सा च साधनेन सम्बन्धार्हा। पशुशब्दस्तु चतुष्पाज्जातीयं वस्तु स्वरूपेणाचष्टे न शक्तिमद्रूपेण नतरां शक्तिरूपेण। अतस्तथैव च प्रत्याय्यमानः पशुः प्रत्ययार्थो भवितुं नार्हति। अतः कर्त्तैव प्रत्ययार्थः। तद्विशेषणं च पशुः सूत्रवाक्यजन्ये बोधे पशुरूपे कर्त्तरि वाच्ये प्रत्ययो भवतीति हि विषयः। उदाहरणे तु पशुरेव विशेष्यः। तत्राभेदेन सम्बन्धेन कर्त्ता विशेषणम्। तत्र प्रकृत्यर्थः परमविशेष्यः। पशुस्तु समुदायशक्त्या उपतिष्ठते। एतेन पंकजमभृतयो व्याख्याताः। पङ्कजनिकर्तृ पद्ममिति हि तत्रार्थः। एवं विधिवाक्येषु अलससुखाहर्त्रोर्व्रीहिवत्सयोरित्यादिषु सर्वत्र प्रत्ययार्थविशेषणत्वम्। उदाहरणेषु च विशेषणत्वमलसादीनां द्रष्टव्यम्। पशौ किम्। दृतिहारः। नाथहारः॥

फले ग्रहिरात्मम्भरिश्च॥ एतौ निपात्येते। फलानि गृह्णातीति फलेग्रहिर्वृक्षः। स्यादवन्ध्यः फलेग्रहिरित्यमरः। भट्टिकाव्ये तु फलग्राहिमात्रे इन् प्रयुज्यते फलेग्रहीद्धंसिवनस्पतीनामिति। उपपदस्यैदन्तत्वं इन्प्रत्ययश्च ग्रहेर्निपात्यते। आत्मानं बिभर्तीत्यात्मम्भरिः। आत्मशब्दस्योपपदस्य मुमागमः इन्प्रत्ययश्च भृञो निपात्यते। चकारोऽनुक्तसमुच्चयार्थः [illegible]

कुक्षिम्भरिः । छन्दसि फलशब्दस्यादन्तत्वमपि दृश्यते । यो वनस्पतीनां फलग्रहिरिति । इदमपि कुक्षिम्भरित्वच्चकारेण सङ्ग्राह्यमिति हरदत्तः । चान्द्रास्तु आत्मोदरकुक्षिष्विति पठन्ति । तथा च मुरारिः । ज्योत्स्नाकरम्भमुदरंभरयश्चकोरा इति । देवापित्रातापिप्रभृतयोप्यनेन सिद्धाः । भाष्ये तु भृत्रः कुक्ष्यात्मनोर्नुम्चेत्येतावदेव स्थितम् ॥

छन्दसि वनसनरक्षिमथाम् ॥ एभ्यः कर्मण्युपपदे इन्प्रत्ययः स्याच्छन्दसि । वन षण सम्भक्तौ गणे सहनिर्दिष्टौ भौवादिकौ इमावेव गृह्येतेनतु वनु याचने षण दाने इति तानादिकौ निरनुबन्धकत्वात् साहचर्याच्च । ब्रह्मवनिं त्वा क्षत्रवनि ब्रह्म वनति क्षत्रं वनतीति विवेक्षायामिन् प्रत्ययः । तदन्ताद् द्वितीयैकवचनम् । उतनोगोषणिन्धियम् । सुषामादित्वात् षत्वं, गां सनतीति विग्रहः । यौतेश्चानौ यमरक्षितरौ चतुरक्षौ पथिरक्षी । ये पथां पथिरक्षयः । पन्थाननरक्षतः रक्षन्ति चेति विग्रहः । हविर्मथीनामभ्याविवासताम् । हविर्मथन्तीति हविर्मथयः तेषाम् ॥

एजः खश् ॥ एजृ कम्पने । अस्माण्ण्यान्तात् कर्मण्युपपदे खश् स्यात् । जनं एजयतीति जनमेजयः । सूत्रे एजेरिति ण्यन्तस्य निर्देशः न तु शुद्धस्येका । खशः शित्करणात् । तद्धि सार्वधातुकत्वे सति शब्यथा स्यादिति । न च शुद्धस्य शपि सत्यसति वा विशेषोस्ति । नचोत्तरार्थं शित्त्वमिति वाच्यम् । इहार्थत्वे सम्भवति केवलोत्तरार्थत्वस्यायुक्तत्वात् । खशः शित्त्वमुमर्थम् । शुनिंधय इत्यादौ ह्रस्वत्वार्थम् । खश्प्रकरणे वातशुनीतिलशर्द्धेष्वजधेट्तुदजहातिभ्य उपसंख्यानम् ॥ वातमजा मृगाः । शुनिन्धयः । खित्यनव्ययस्येति ह्रस्वः । तिलन्तुदः ।

शर्द्धञ्जहा मृगाः। ओहाक् त्यागे। जुहोत्यादित्वाच्छपः श्लौ द्विर्वचनम्। श्नाभ्यस्तयोरित्यालोपः। शर्द्धो ऽपानशब्दः तञ्जहतीति विग्रहः। माधवस्तु शर्द्धंजहा माषा इत्युदाजहार। दुर्गसिंहोप्येवम्। तत्र जहातिरन्तर्भावितण्यर्थः। साध्वासिच्छिनत्तीतिवत्। मांषाणां करणकर्तृत्वमिति वा॥

नासिकास्तनयोर्धमोधेटोः॥ खश् स्यात्। तत्र यथासंख्यं वारयितुं वार्तिकम्। स्तने धेटः॥नासिकायां धमश्च धेटश्च॥स्तनं धयतीति स्तनन्धयः। धेटाष्टित्वस्य अवयवे अचरितार्थत्वात्स्तनन्धयी। अत्रैव च ङीविष्यते नान्यत्रेत्याहुरिति हरदत्तः। अत्रैवेति खश्प्रत्ययान्तोपलक्षणम्। तथा च क्षीरस्वामी। स्तनन्धयीत्यादौ ङीबर्थ इति। वर्द्धमानोपि शुनिंधयी। स्तनन्धयी। खश्प्रत्ययान्तएव ङीबिति। तेन पाघ्राध्माधेट्दृशः श इति शप्रत्यये आतोनुपसर्गे इति कप्रत्यये च टाबेव॥ अत्र च सम्प्रदाय एव शरणम्। नासिकन्धमः। पाघ्रेति धमादेशः। नासिकन्धयः॥

नाडीमुष्टयोश्च॥ एतयोः कर्मणोरुपपदयोर्ध्माधेटोः खश् स्यात्। अत्र यथासंख्यं नेष्यतइति भाष्ये वृत्तौ च स्थितम्। यथासंख्यमनुदेश इति सूत्रे तु भाष्ये यथासंख्यमस्तीत्युक्तम्। तन्मतभेदेन बोध्यम्। नाडिन्धमः। ताडिन्धयः मुष्टिंधमः। मुष्टिन्धयः। भाष्ये घटीखारीशब्दावप्युपसंख्यातौ। घटी- घटः। घटिन्धमः। घटिंधयः। खारिन्धमः। खारिन्धयः। खारीशब्दः परिमाणवचनः। खरीति पाठान्तरम्। खरी गर्दभी। जातिलक्षणो ङीष्। खरिन्धमः। खरिन्धयः। जयादित्यस्तु वातशब्दमप्युदाजहार। वातन्धमः। वातन्धय इति। तन्तु भाष्यादौ न दृश्यते॥

उदिकूले रुजिवहोः॥ उत्पूर्वाभ्यां रुजिवहिभ्यां कूले कर्म-

ण्युपपदे खश् स्यात् । कूलमुद्वुजतीति कूलमुद्वुजः । कुलमुद्वहः । धातूपसर्गयोः कार्यस्यान्तरङ्गत्वात्पूर्वं गतिसमासः पश्चादुपपदसमासः । ननु तत्रोपपदंसप्तमीस्थमित्यत्र तत्र सति प्रत्ययः स्यात् । तत्रैव च सप्तमीनिर्दिष्टमुपपदमिति व्याख्यानात् । उपपदमित्यनेन प्रत्यय आक्षिप्यते । ततश्च प्रत्ययेनैव समासः स्यान्न तु तदन्तेन समासः । संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणस्य दुर्लभत्वादिति चेन्न । प्रत्ययमात्रेण सामर्थ्याभावात्संज्ञाविधावपि प्रत्ययग्रहणपरिभाषाप्रवृत्तेः । न चैवमपि तदादितदन्तनियमादुपसर्गविशिष्टेन समासानुपपत्तिः । कुद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् । न चेदं कृद्ग्रहणमिति भ्रमितव्यम् । उपपदसंज्ञामात्रस्य मा भूदित्यादौ माङादिष्वपि प्रवृत्तिसम्भवेन कृत्प्रत्ययव्यभिचारित्वेप्युपपदसमासस्य कृत्प्रत्ययाव्यभिचारात् । यत्कार्यं हि कृत्प्रत्ययं न व्यभिचरति तत्र कृद्ग्रहणपरिभाषा प्रवर्त्तते । यथा धातोः स्वरूपग्रहणइत्येषा परिभाषा यत्कार्यं धातुं न व्यभिचरति तत्र प्रवर्त्तते । अत एव घृतस्पृग्भ्यामित्यत्रानुदात्तस्यचर्दुपधस्येत्यमागमो न प्रवर्त्तते । एतेन गोसन्दाय इत्यादि व्याख्यातम् । तत्रापि हि धातुमात्रात्कर्मण्यणि गतिसमासे च सगतिकेनोपपदसमासः । स्यादेतत् । सप्तमीनिर्दिष्टत्वाविशेषात्कूलस्येवोच्छब्दस्याप्युपपदत्वं स्यात् । ततश्चोपपदयोः रुजिवहोश्च यथासंख्यं स्यादिति चेन्नैवम् । यत्र हि प्रत्येकमुपपदत्वमिच्छति तत्र समुदायात्सप्तमीमुच्चारयति लाघवात् । नाडीमुष्ट्योरिति यथा । इह तु विपर्ययः कृतः । तस्मादुदीति पञ्चम्याः स्थाने सप्तमी । रुजिवहोरिति पञ्चम्याः स्थाने षष्ठी । तेनोक्तार्थलाभः । एतच्च यथासंख्यसूत्रे कैयटे स्पष्टम् ॥

वहाभ्रे लिहः ॥ वहाभ्रयोः कर्मणोरुपपदयोर्लिहेः खश्

स्यात् । वहः स्कन्धः । तं लेढीति वहंलिहो गौः । लिह आस्वादने । अदादित्वाच्छपो लुक् । खशो ङित्त्वान्न गुणः । अभ्रंलिहो वायुः ॥

परिमाणे पचः ॥ परिमाणं प्रस्थादि तस्मिन्कर्मण्युपपदे पचेः खश् स्यात् । प्रस्थं पचतीति प्रस्थम्पञ्चा स्थाली । खारिम्पचः कटाहः । इह सूत्रे परिमाणइति न स्वरूपग्रहणं तस्य पाचं प्रति कर्मत्वायोगात् । अतस्तद्विशेषाः प्रस्थादयो गृह्यन्ते । तेपि यदि परिमाणनिष्ठा एव स्युस्तर्हि विक्लेदनवाचिना पचिना सह कर्मत्वासम्भव एव । अतः परिमिते व्रीह्यादौ वर्त्तमाना इह ग्राह्याः ॥

मितनखे च ॥ एतयोः कर्मणोः पचेः खश् स्यात् । मितंपचा ब्राह्मणी । नखंपचा यवागूः । पाचित्र ना-पवचनः ॥

विध्वरुषोस्तुदः ॥ एतयोः कर्मणोरुपपदयोस्तुदेर्धातोः खश् स्यात् । विधुन्तुदतीति विधुन्तुदः । अरुन्तुदः । अरुर्द्विषदजन्तस्यमुमित्युकारात्परो मुम् । संयोगन्तस्यलोपः । सैंहिकेयो विधुंतुदः । व्रणोस्त्रियामीर्मरुः । अरुन्तुदं तु मर्मस्पृगित्यमरः ॥

असूर्यललाटयोर्दृशितपोः ॥ एतयोः कर्मणोरुपपदयोर्यथासङ्ख्यं दृशितपिभ्यां खश् स्यात् । असूर्यमित्यसमर्थसमासः । दृशिना नञः सम्बन्धात् । सूर्यं न पश्यन्तीत्यसूर्यपश्याः राजदाराः । पाघ्राध्मेति पश्यादेशः । गुप्तिपरश्चेदं । एवञ्च नाम गुप्ता यदपरिहार्यदर्शनं सूर्यमपि न पश्यन्तीति । तेन सत्यपि सूर्यदर्शने प्रयोगो न विरुध्यते । यदा तु सूर्यदर्शनाभावमात्रं विवक्षितं तदा न भवितव्यमेव प्रत्यये-

नानभिधानादिति न्यासकारः ॥

उग्रम्पश्येरंमदपाणिन्धमाश्च ॥ एते निपात्यन्ते । उग्रमिति क्रियाविशेषणं तस्मिन्नुपपदे दृशेः खश् । उग्रं पश्यतीत्युग्रंपश्यः । इरा उदकन्तेन माद्यति दीप्यते अबिन्धनत्वादिति इरंमदो मेघज्योतिः । मदी हर्षे अस्मादेव निपातनादिवादिभ्यः श्यन्न भवति । पाणयो ध्मायन्ते ऽस्मिन्निति पाणिन्धमो ऽध्वा । स पुनरस्मिन् गच्छद्भिः सर्पाद्यपनोदनाय पाणयः शब्द्यन्ते तादृशः । अन्धकाराद्यावृतो मार्गः ॥

प्रियवशे वदः खच् ॥ प्रिय वश इत्येतयोः कर्मणोरुपपदयोर्वदेर्धातोः खच् स्यात् । प्रियंवदः । वशंवदः । खकारो मुमर्थः । चकारस्तु खचि ह्रस्व इति विशेषणार्थ इति वृत्तिः । खे ह्रस्व इत्युच्यमान एजेः खश् जनमेजयः । अत्रापि स्यादिति भावः । ननु एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्येति खाशि न भविष्यति । न चैवमपि कुलात्खः कुलीनः यस्येतिलोपाप्रवृत्तये ह्रस्वः स्यादिति वाच्यम् । प्रकरणसाहचर्याद्धातुप्रत्ययस्यैव ग्रहणात् । किञ्च दोषोणाविति सूत्रादत्र णावित्यनुवर्त्य खे परे णौ ह्रस्वो विधीयते । अतः कुलीने न दोषः । जनमेजये तु उक्तैव गतिः । सत्यम् । चिन्त्यप्रयोजन एवायञ्चकारः । प्रत्ययान्तरकरणमुत्तरार्थम् । द्विषन्तप इत्यत्र ह्रस्वणिलोपौ यथा स्यातां शप् च मा भूदिति । नन्वेवमुत्तरत्रैव क्रियतामिति चेत् । सत्यम् । इह करणमन्यतोपि भवतीति ज्ञापनार्थम् । तेनानुपपदमेव वक्ष्यमाणं वार्त्तिकं गतार्थम् । खच्प्रकरणे गमेः सुपि ॥ असंज्ञार्थमिदं वार्त्तिकम् । संज्ञायान्तु वक्ष्यमाणेन गमश्चेति सूत्रेणैव सिद्धम् । इदञ्च वार्त्तिकं ज्ञापकसिद्धार्थमित्युक्तम् । मितङ्गमो हस्ती । विहायसो विह च ॥ विहायसो विह इत्ययमादेशो वक्तव्यः ।

खच्च डिद्वा वक्तव्यः। विहङ्गः। विहङ्गमः। डे च ॥ डे परे विहायसो विहादेशो वक्तव्यः। विहगः। अन्यत्रापि दृश्यतइति डप्रकरणे वक्ष्यमाणेनेह डः ॥

द्विषत्परयोस्तापेः। एतयोः कर्मणोरुपपदयोस्तापेः खच् स्यात्। तप दाहे चुरादिः। तप सन्तापे भ्वादिः। द्वयोरपि ग्रहणम्। द्विषन्तं तापयतीति द्विषन्तपः। अरुर्द्विषदिति मुमि संयोगान्तलोपः। परन्तपः। द्विषत्परयोरिति द्वितकारको निर्देशः। तत्रैकेन द्विषच्छब्दो विशेष्यते तकारान्तो यो द्विषच्छब्दइति। सौत्रत्वान्निर्देशस्य विशेषणस्य परनिपातः। तेन स्त्रियां न भवति। घटघटीग्रहणेन लिङ्गविशिष्टपरिभाषाया अनित्यत्वज्ञापनाद्वा। द्विषन्तीं तापयतीति द्विषतीतापः। कर्मण्यणेव भवति॥

वाचि यमो व्रते ॥ वाक्शब्दे कर्मवाचिन्युपपदे यमेः खच् स्यात् व्रते गम्यमाने। शास्त्रेण बोधितः सङ्कल्पविशेषो व्रतम्। वाचं यच्छतीति वाचंयमः। वाचंयमपुरन्दरौचेति पूर्वपदस्यामन्तत्वम्। न चैवं खच्प्रत्ययोपि तत्रैव निपात्यतामिति वाच्यम्। व्रतादन्यत्रापि प्रसङ्गात्। यदि तु निपातनबलादेव व्रतविषयता आश्रीयते तत्रैव वा व्रतग्रहणं क्रियते। वाचंयमो व्रते पुरन्दरश्चेति। तदेह वाचियमोव्रते इति सूत्रं पूः सर्वयोरित्यत्र पुरिदारेरित्यंशश्च शक्यमकर्तुम्। व्रते किम्। यो ह्यशक्त्यादिना वाचं यच्छति तत्राणेव यथा स्यात्। वाग्यामः॥

पूः सर्वयोर्दारिसहोः ॥ पुरसर्व इत्येतयोः कर्मणोरुपपदयोर्यथासङ्ख्यं दारिसहोर्धात्वोः खच् स्यात्। पुरन्दारयतीति पुरन्दरः। वाचंयमपुरन्दरौचेत्यम्। सर्वंसहो राजा। इह सूत्रे दृ विदारणे इत्यस्य ग्रहणम्। न तु दृ भये दृङ् आदरे इत्येतयोरित्युपदेशः। सहिग्रहणमसंज्ञार्थम्। संज्ञायान्तु भृत्-

वृजीत्यादि वक्ष्यति । भगे च दारेरिति वक्तव्यमिति काशिका । भाष्यादावदृष्टमपीदं बाहुलकेन लभ्यते । भगं दारयतीति भगन्दरः ॥

सर्वकूलाभ्रकरीषेषु कषः ॥ एषु चतुर्षु कर्मसूपपदेषु कषेः खच् स्यात् । सर्वंकषः खलः । कूलङ्कषा नदी । अभ्रंकषो वायुः । करीषंकषा वात्या ॥

मेघर्त्तिभयेषु कृञः ॥ एषु त्रिषु कर्मसूपपदेषु करोतेः खच् स्यात् । मेघङ्करः । ऋतिंकरः । भयङ्करः । उपपदविधौ भयादिग्रहणं तदन्तविधिं प्रयोजयतीत्युक्तत्वादभयङ्करः ॥

क्षेमप्रियमद्रेण् च ॥ त्रिष्वेषु कर्मसूपपदेषु करोतेरण् स्याद्यात्खच् । क्षेमङ्करः । क्षेमकारः । प्रियङ्करः । प्रियकारः । मद्रङ्करः । मद्रकारः । वेति वक्तव्ये अण्ग्रहणं हेत्वादिषु टप्रतिषेधार्थम् । कथन्तर्हि अल्पारम्भाः क्षेमकरा इति । कर्मणः शेषत्वविवक्षायां पचाद्यच् भविष्यति । छन्दसि शिवङ्कर इत्यपि दृश्यते । तथा चाथर्वशाखायां शिव एकोध्येयः शिवङ्करः सर्वमन्यत्परित्यज्येति । कर्तव्यत्ययात्सिद्धम् ॥

आशिते भुवः करणभावयोः ॥ अत्र सुपीत्युपतिष्ठते । न तु कर्मणीति । भवतेरकर्मकत्वात् । यद्यपि सोपसर्गस्य प्राप्त्यर्थस्य च भवतेः सकर्मकत्वमस्ति तथापि तत्र खचा न भवितव्यमनभिधानादित्याहुः । आशितशब्दश्च द्विविधोत्र गृह्यते । अशभोजनइत्यस्मादाङ्पूर्वादविवक्षिते कर्मणि कर्त्तरि क्तप्रत्ययान्त एकः । अशेर्ण्यन्तात्प्रयोज्यकर्मणि क्तप्रत्यये कृते अपरः । आशितः कर्त्तेत्याद्युदात्तविधिरप्युभयोरविशिष्टः । तत्र द्वितीये प्रयोज्यएव भूतपूर्वगत्या कर्त्तोच्यते । प्रत्यवसानार्थानामणौ कर्तुर्णौ कर्मसंज्ञाविधानात् । कृषन्नित्फालआशितं कृणोतीत्य-

त्रापि अयमेव ग्राह्यः। अवग्रहादर्शनात्। आद्ये तु साम्प्रतिकमेव कर्तृत्वम्। यस्तु ध्रौव्यगतिप्रत्यवसानार्थेभ्य इति भावकर्माधिकरणेषु क्तः तदन्तो नात्र गृह्यते। अनभिधानात्। सूत्रार्थस्तु, आशितशब्दे सुबन्तउपपदे भवतेर्धातोः करणे भावे चार्थे खच् स्यात्। आशितो भवत्यनेन आशितंभव ओदनः। पचता ओदनेन अतिथ्यादिर्भोजितो भवति स एवमुच्यते। भावे, आशितभवनमाशितम्भवः। इह वासरूपविधिना ल्युडपि भवति। आशितभवनमिति। घञ् तु बाध्यतएव। सरूपत्वादित्याहुः। न चात्र क्तल्युट्तुमुन्खलर्थेषु वासरूपविधिर्नेति निषेधः शङ्क्यः। यत्र हि घञादेरपवादत्वेन ल्युट् प्रसक्तः स उत्सर्गे नित्यं बाधते न तु विकल्पेनेति तदर्थः। इह तु ल्युटोपवादोयं खच्। तत्र वासरूपन्यायो निर्बाध एव। आशितभवनमित्युदाहरतो जयादित्यस्य सम्मतश्चेति दिक्॥

संज्ञायां भृतृवृजिधारिसहितपिदमः॥ भृप्रभृतिभ्योष्टभ्यः यथायोगं कर्मणि सुबन्ते षोपपदे खच् स्यात्संज्ञायाम्। विश्वं बिभर्तीति विश्वम्भरः कैटभजित्। रसा विश्वम्भरा स्थिरा। रथन्तरं साम। रथेन तरतीति व्युत्पत्तिमात्रम्। स्वरसंस्कारावग्रहादिसिद्ध्यर्थम्। न त्वत्रावयवार्थानुगमोस्ति। रथन्तरमाजभारा वसिष्ठ इत्यत्र हि रथमित्यवगृह्णन्ति। अन्तोदात्तं चाधीयते। अखण्डत्वे तु अवग्रहो न स्यात्। नञ्विषयस्येत्याद्युदात्तश्च स्यात्। पतिंवरा कन्या। शत्रुञ्जयो हस्ती। युगन्धरः पर्वतः। शत्रुंसहः। शत्रुन्तपः। अरिन्दमः। अन्तर्भावितण्यर्थोत्र दामिः। संज्ञायां किम्। कुटुम्बं बिभर्तीति कुटुम्बभारः॥

गमश्च॥ अस्मात् खच् स्यात्कर्मण्युपपदे संज्ञायाम्। सुतङ्गमः। पूर्वसूत्रएव गामिनोक्तः। उत्तरसूत्रे गमेरेवानुवृत्तिर्यथा

स्यात् । भृत्प्रभृतीनां मा भूदिति ॥

अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः ॥ संज्ञायामिति निवृत्तम् । सप्तसु कर्मसूपपदेषु गमेर्डः स्यात् । अन्तङ्गच्छतीत्यन्तगः । अत्यन्तगः । अध्वगः । दूरगः । पारगः । सर्वगः । अनन्तगः । डित्त्वसामर्थ्यादभस्यापि टेर्लोपः । सर्वत्रपन्नयोरुपसंख्यानम् ॥ सर्वत्रगः । पन्नं पतितं यथा स्यात्तथा गच्छतीति पन्नगः । पन्नमिति क्रियाविशेषणं पठ्यते क्तान्तम् । उरसो लोपश्च ॥ उरसा गच्छतीत्युरगः । सुदुरोराधिकरणे ॥ सुखेन गच्छत्यत्रेति सुगः । दुर्गः । कर्मणि तु खलेव । सुगमः । दुर्गमः । निरो देशे ॥ निर्गो देशः । अन्यत्रापि दृश्यतइति वक्तव्यम् । ग्रामगः । गुरुतल्पगः ॥

आशिषि हनः ॥ कर्मण्युपपदे हन्तेर्डः स्यादाशिषि गम्यमानायाम् । शत्रु वध्यात् शत्रुहः । आशिषि किम् । शत्रुघातः । अत्र वार्त्तिकानि दारावाहनोणन्तस्य च टः संज्ञायाम् ॥ दारौ इति शब्दापेक्षया पुल्लिङ्गता । दारुशब्दे उपपदे आङ्पूर्वाद्धन्तेरण्, अन्तस्य च टकारादेशो वक्तव्य इत्यर्थः । टविधानार्थमिदम् । अण् तु कर्मण्यणित्येव सिद्धः । अन्तग्रहणं स्पष्टार्थम् । अलोन्त्यस्येत्येव सिद्धेः । अन्यथा हि टः प्रत्ययः सम्भाव्येत । गोधाकालकादार्वाघाटस्तेवनस्पतीनाम् । चारौ वा ॥ चारुशब्दे उपपदे प्रागुक्तं वा वक्तव्यमित्यर्थः । चार्वाघाटः । चार्वाघातः । कर्मणि समि च ॥ कर्मण्युपपदे सम्पूर्वाद्धन्तेरणन्तस्य च टो वा वक्तव्यः । वर्णान्संहन्तीति वर्णसंघाटः । वर्णसंघातः । पदसंघातः । पदसंघाटः ॥

अपे क्लेशतमसोः ॥ अपपूर्वाद्धन्तेर्डः स्यात्क्लेशतमसोः कर्मणोरुपपदयोः । क्लेशापहः पुत्रः । तमोपहः सूर्यः । अनाशीर-

र्थोयमारम्भः ॥

कुमारशीर्षयोर्णिनिः ॥ एतयोः कर्मणोरुपपदयोर्हन्तेर्णिनिः स्यात् । कुमारघाती । शीर्षघाती । सुप्यजाताविल्येवमादिभिः सिद्धे ताच्छील्यावश्यकाधमर्ण्यादिविरहेपि यथा स्यादित्येवमर्थं शिरसः शीर्षभावार्थञ्च वचनम् ॥

लक्षणे जायापत्योष्टक् ॥ हन्तेर्धातोर्जायापत्योः कर्मणोरुपपदयोर्लक्षणवति कर्त्तरि टक्प्रत्ययः स्यात् । जायाघ्नो ब्राह्मणः । पतिघ्नी वृषली । सूत्रे लक्षणशब्दो ऽर्शआद्यच्प्रत्यान्तो न तु केवलः सूत्रारम्भसामर्थ्यात् । केवले हि लक्षणे तिलकरेखाविशेषादौ कर्तृत्वेन विवक्षिते उत्तरसूत्रेणैव सिद्धः प्रत्ययः । तस्माद्यस्य तिलकादि जायामरणनिमित्तमस्ति स तां हन्तीति गौणो वादः । एवम्पतिघ्नीत्यत्रापि ॥

अमनुष्यकर्तृके च ॥ मनुष्याभिन्नकर्तृकेर्थे वर्त्तमानाद्धातोः कर्मण्युपपदे टक् स्यात् । जायाघ्नस्तिलकालकः । पतिघ्नी पाणिरेखा । पित्तघ्नं घृतम् । अमनुष्यकर्तृकइति किम् । आखुघातः शूद्रः । यद्यपि अमनुष्यशब्दो रक्षःपिशाचादिषु रूढस्तथापीह लक्ष्यानुरोधिनो व्याख्यानान्मनुष्यादन्यत्सर्वमेवाह । ननु पूर्वसूत्रे लक्षणग्रहणं यथा प्रत्ययार्थविशेषणम्, तथेहाप्यमनुष्यग्रहणमस्तु, किं कर्तृग्रहणेनेति चे,न्मैवम् । अमनुष्यइत्युच्यमाने उपपदत्वं विज्ञायेत । पूर्वसूत्रे तु उपपदान्तरसत्त्वात्प्रत्ययार्थविशेषणता निश्चीयतइति वैषम्यात् । अथ कथं कृतघ्ने नास्ति निष्कृतिः, बलभद्रः प्रलम्बघ्नः, शत्रुघ्न इत्यादि । मूलविभुजादिषु द्रष्टव्याः । कथन्तर्हि चोरघातो नगरघातो हस्तीति । बाहुलकादणिति वृत्तिर्भाष्यञ्च ॥

शक्तौ हस्तिकपाटयोः ॥ शक्तौ गम्यमानायां हस्तिकपाट-

योः कर्मणोरुपपदयोर्हन्तेर्धातोष्टक् स्यात् । मनुष्यकर्तृकार्थ आरम्भः । हस्तिघ्नो मनुष्यः । कपाटघ्नश्चोरः । शक्ताविति किम् । विषेण हस्तिनं हन्तीति हस्तिघातः । यद्यपीह शक्तिरस्ति अशक्तस्य कर्तृत्वानुपपतेस्तथापि शक्तिग्रहणसामर्थ्यात्प्रकर्षविज्ञानम् । तेन स्वबलेनैव हन्तुं या शक्तिः सा गृह्यते । एवं चोदाहरणेपि हस्तिनं हन्तुं मा वा वधीत् । सामर्थ्यातिशयमात्राच्तु हस्तिघ्न इत्याद्युच्यते । कं शिरः पाटयति प्रविशतइति कपाटम् । कवाटमिति पाठे तु अटतेः पचाद्यच् । कवश्चोष्णइत्यत्र योगविभागात्कोः कवादेश इति हरदत्तः ॥

पाणिघताडघौ शिल्पिनि ॥ एतौ निपात्येते शिल्पिनि कर्त्तरि वाच्ये । पाणि ताड इत्येतयोरुपपदयोर्हन्तेर्धातोष्टक्प्रत्ययः तस्मिंश्च टिलोपः घत्वश्च निपात्यते । पाणिघः । ताडघः । शिल्पिनीति किम् । पाणिघातः । ताडघातः । राजघ उपसङ्ख्यानम् ॥ राजानं हन्तीति राजघः ॥

आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ॥ आढ्यादिषु च्व्यर्थेष्वच्व्यन्तेषु सप्तसु कर्मसूपपदेषु करोतेः ख्युन् स्यात् । करणे च्वेर्वैकल्पिकत्वात् द्विविधाश्च्व्यर्था आढ्यादयः च्व्यन्ता अच्व्यन्ताश्च । तत्र च्व्यन्ताः पर्युदस्यन्ते । अनाढ्यमाढ्यं करोत्यनेन आढ्यंकरणम् । सुभगंकरणमित्यादि । च्व्यर्थेष्विति किम् । आढ्यन्तैलेन कुर्वन्ति । अभ्यञ्जयन्तीत्यर्थः । अनेकार्थत्वाद्धातूनाम् । तेन नात्र प्रागनाढ्यः सन् आढ्यः क्रियते इति अभूततद्भावाभावः । अस्तु वा अभूततद्भावः तथापि प्रकृतेरविवक्षायां प्रत्युदाहरणम् । प्रकृतिरेव परिणामिनीत्वेन यदा विवक्ष्यते यथा अपटास्तन्तवः पटीभवन्तीति तदा च्विप्रत्ययः । तथा च तत्र वार्तिकम् । प्र-

कृतिविवक्षाग्रहणं चेति ॥ अच्वाविति किम्। आढ्यीकरोत्यनेन। स्यादेतत्। करणाधिकरणयोश्चेति ल्युटात्र भवितव्यम्। न च ल्युटः ल्युनश्चेह विशेषोस्ति। उभयथापि हि आढ्यीकरणमित्येव रूपम्। खित्यनव्ययस्य, अरुर्द्विषदजन्तस्यमुमिति हि ह्रस्वत्वं मुम् चानव्ययस्य विधीयते। च्व्यन्तश्चाव्ययम्। ऊर्यादिच्विडाचश्चेति निपातत्वात्। न च ल्युनि सति उपपदमतिङिति नित्यसमासो लभ्यते ल्युटि तु नेति वाच्यम्। ल्युट्यपि गतिसमासस्य सम्भवात्। तस्यापि नित्यसमासत्वाविशेषात्। न च स्त्रीप्रत्यये विशेषः। उभयत्रापि ङीबेव भवति। ल्युटि टिड्ढाणञिति सूत्रेण, ल्युनि तु तत्रत्येन ल्युन उपसंख्यानेन। न च स्वरे विशेषः। ल्युटि हि लित्स्वरेण कृञ उदात्तत्वं ल्युन्यपि नित्स्वरेण तथैवेति। तस्मादच्वाविति व्यर्थमिति चेत्। सत्यम्। उत्तरार्थं तदुक्तमिति भाष्यकाराः। एवञ्च आढ्यीकरणमित्यादिरूपं ल्युटा भवत्येवेति भाव इति कैयटः। यत्तु जयादित्येनोक्तम्। प्रतिषेधसामर्थ्यात् ल्युन्यसति ल्युडपि न भवति। तेन ल्युटोप्ययमर्थतः प्रतिषेध इति। तस्यायमाशयः। केवलोत्तरार्थत्वे तत्रैवाच्वाविति ब्रूयात्। इह करणसामर्थ्यात्तु ल्युडपि न। यथा इकोचिविभक्ताविति अज्ग्रहणस्य उत्तरार्थत्वे सत्यपि इहकरणसामर्थ्यान्नलुमतेत्यस्यानित्यता ज्ञाप्यतइत्यभिप्रायेणाह इह किञ्चित्त्रपो इतीति वक्ष्यते। तथा चोत्तरार्थतापि काममस्तु न तु केवलोत्तरार्थतेति। भाष्यवार्त्तिकस्वरसेन तु केवलोत्तरार्थत्वं लभ्यते। अतस्तद्विरोधाद्वृत्तिकृन्मतमयुक्तमिति कैयटः ॥

कर्त्तरि भुवः खिष्णुच्खुकञौ॥ आढ्यादिषु च्व्यर्थेष्वच्व्यन्तेषु सुबन्तेषूपपदेषु भवतेर्धातोः कर्त्तरि खिष्णुच् खुकञ् एतौ

स्तः । आढ्यम्भाविष्णुः । आढ्यम्भावुकः । सुभगम्भाविष्णुः । सुभगम्भावुक इत्यादि । कर्तृग्रहणं करणाऽनुवृत्त्यर्थमुत्तरार्थञ्च । खकारो मुमर्थः । ञकारो वृद्ध्यर्थः । स्यादेतत् । खिष्णुच इकारो मास्तु खस्नुरिति स्नुख् इति वोच्यताम् । तत्रायमप्यर्थः । स्वरार्थश्चकारो न कर्त्तव्यः । प्रत्ययस्वरेणैवाभिमतसिद्धेः । कथन्तर्हि इकारादित्वमिति चेत्, इडागमेनेति गृहाण । न चैकाच उपदेश इतीण्निषेधः । भवतेरुदात्तत्वात् । अत्रोत्तरं वार्तिककार आह । नञस्तु स्वरसिद्ध्यर्थमिकारादित्वमिष्णुच इति ॥ नञ इति पञ्चमी । नञ उत्तरस्य खिष्णुजन्तस्य स्वरसिद्ध्यर्थमित्यर्थः । यद्ययमिकारादिर्न क्रियेत ततः सत्यपीटि कृत्योकेष्णुच्चार्वादयश्चेति सूत्रे अस्य ग्रहणं न स्यात् । अस्य चकारानुबन्धाभावात् । अथोच्येत । अयमपि चित् । खस्नुच् इति । एवमपि लाक्षणिकत्वात्षत्वणत्वयोश्चासिद्धत्वादिष्णुजिति रूपाभावात् ग्रहणं न स्यादेव । तत इकरादित्वं क्रियते । अत्रेदं वक्तव्यम् । सत्यपीकारादित्वे तदनुबन्धकग्रहणे नातदनुबन्धकस्येति परिभाषया अलंकृञादिष्णुच एव ग्रहणेन भाव्यं, नास्य । अथोच्येत । इकारोच्चारणसामर्थ्यादस्यापि ग्रहणमिति । हन्तैवं खष्णुजयमस्तु तत्रेटि कृते चकारानुबन्धसामर्थ्यादस्यापि ग्रहणमस्त्विति किमिकारेण । तस्माच्चिन्त्यमेतत् । यत्तु हरदत्तेन षत्वणत्वयोः सामर्थ्यादस्य ग्रहणं भवतीत्युक्तम् । तदप्यापाततः । स्नुजपेक्षया ष्णुजुक्तौ प्रत्युत प्रक्रियालाघवेन षत्वणत्वयोः करणस्योचिततया सामर्थ्यायोगादिति दिक् ॥

स्पृशोऽनुदके क्विन् ॥ अनुदके सुबन्तउपपदे स्पृशेः क्विन् स्यात् । यद्यपि स्पृशेः सकर्मकत्वात्कर्मण्युपपदइत्येव प्राप्तस्तथा-

पि पूर्वसूत्रात्कर्त्तरीत्यनुवृत्तेः सुपीत्येवोपपदं निर्णीयते। तथाहि। कर्तरिकृदित्येव कर्तरि क्विनः सिद्धत्वात्कर्त्रनुवृत्तिः कर्तृप्रचयार्था। कर्मण्युपपदे एकः कर्ता करणादौ चापर इत्येवं कर्तृप्रचयः। तथा च सुबन्तउपपदइति फलितं भवति। घृतं स्पृशतीति घृतस्पृक्। मन्त्रेण स्पृशतीति मन्त्रस्पृगिति प्राञ्चः। वस्तुतस्तु पूर्वसूत्रे कर्तृग्रहणं व्यर्थमेव। तद्धि न तत्रैव करणानुवृत्तिनिरासार्थम्। अस्वरितत्वादेव तत्सिद्धेः। नापीह कर्तृप्रचयार्थम्। मन्त्रस्पृगित्यादेः क्विपापि सिद्धेः। न च क्विपि कुत्वं न स्यादिति वाच्यम्। क्विन्प्रत्ययो यस्मात्तस्यान्यत्रापि कुत्वमिति वक्ष्यमाणत्वात्। अन्यथा असृगित्याद्यसिद्धेरित्यवधेयम्। अनुदकइति किम्। उदकस्पर्शः। न चेह क्विपा उदकस्पृगिति रूपं दुर्वारमिति वाच्यम्। अनुदकइति पर्युदाससामर्थ्यात्क्विपोप्यप्रवृत्तेः। कथन्तर्हि मन्त्रस्पृगित्यादेः क्विपा सिद्धिरुक्तेति चेत्, उदके क्विपोप्रवृत्तावपि मन्त्रादावुपपदे प्रवृत्तौ बाधकाभावादिति दिक्। क्विनः ककारो गुणप्रतिषेधार्थः। इकारो वेरपृक्तस्येति विशेषणार्थः। नकारस्तु यद्यपि नाद्युदात्तार्थः। एकाज्भ्यः क्विनो विधानात्तत्र धातुस्वरेणैव सिद्धेः। यस्त्वनेकाच् दधृगिति, तत्रान्तोदात्तस्य वक्ष्यमाणत्वात्। तथापि क्विन्प्रत्ययस्यकुरिति विशेषणार्थः। क्विप्प्रत्ययस्येत्युच्यमाने सन्देहः स्यात्। के: क्विपो वा निर्देश इति। न च क्वेर्निर्देशएकः पकारः क्विपस्तु द्वाविति विशेषः। क्वेरपि निर्देशे पकारस्य अनचिचेति द्विर्वचनोपपत्तेः। न चैवं क्विपि पकारत्रयमिति वाच्यम्। झरोझरीति लोपोपपत्तेः। व्यञ्जनपरस्यैकस्यानेकस्य वोच्चारणे विशेषानुपलम्भाच्च॥

क्त्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च॥ आद्याः पञ्च

क्विबन्ता निपात्यन्ते। ततस्त्रिभ्यः क्विन्विधीयते। तत्रापि निपातनैः सह निर्देशार्त्तिकचिदलाक्षणिकमस्ति। तद्यथा। अञ्चेः सकर्मकत्वात्कर्मण्येव प्राप्तः सुबन्तमात्रे विधीयते। युजिक्रुञ्चिभ्यान्तु केवलाभ्यामेव। युजेर्विधानसामर्थ्याच्च। न हि सोपपदाद्युजेः क्विनि क्विपि वा विशेषोस्ति कुत्वस्य चोः कुरित्यनेनैव सिद्धत्वात्। अनुपपदे तु युजेरसमासइति नुमि कृते नकारस्य कुत्वार्थं क्विनो विधानं भवति सार्थकम्। क्रुञ्चेर्नलोपाभावश्च निपात्यते। ऋतौ यजति ऋत्विक्। इह ऋतुशब्दे उपपदे यजेः क्विन्। त्रिधृषा प्रागल्भ्ये, अस्य क्विन्-द्विर्वचनमन्तोदात्तत्वञ्च निपात्यते। दधृक्। सृजेः कर्मणि क्विन् अमागमश्च निपात्यते। सृज्यते इति स्रक्। दिशेः कर्मणि क्विन्। दिश्यते इति दिक्। उत्पूर्वात्स्निहेः क्विन्। उपसर्गान्तलोपः सस्य षत्वञ्च। उष्णिक्। प्राङ्। प्रत्यङ्। युङ् युञ्जौ। सोपपदात्तु सत्सूद्विषेति क्विप्। अश्वयुक्। यदि तु निपातनसाहचर्यात्सोपपदादनुपपदाच्च युजेः क्विन् भवतीत्युच्येत तदा सत्सूद्विषेति सूत्रे युजिग्रहणं शक्यमकर्तुम्। कुञ्च क्रुञ्च कौटिल्यार्त्तीभावयोः। नोपधाविमौ। तथा च निकुचितीरित्यत्र नलोपो दृश्यते। सन्निपातपरिभाषायाः फलानि पठन् वार्त्तिककारोप्याह। उदुपधत्वमकित्वस्य निकुचित इति। अकारस्तु स्तोरिति चुत्वेन, तस्यासिद्धत्वाच्चोः कुरिति कुत्वं न। अकारोपधं पठतां तु क्रुञ्चौ क्रुञ्च इत्यादौ प्राप्तं कुत्वं सञ्ज्ञलीति वचनाद्वार्यते। सञ्ज्ञिति प्रत्याहारः। सनः सशब्दादारभ्य आ महिङो ङकारात्। अत्र के चित्। कुञ्चिरेक एव धातुः। तस्य ककारात्परो रेफोपि क्विन्सन्नियोगेन निपात्यतइत्याहुः। चोः कुरिति सूत्रे वामनकाशिकायां स्पृष्टमेतत्॥

त्यदादिषु दृशो ऽनालोचने कञ् च॥ अनालोचनार्थाद् दृशेर्धातोस्त्यदादिषु कञ्स्याच्चात्क्विन्। तादृक्। तादृशः। यादृक्। यादृशः। कञो ञकारो विशेषणार्थः। ठक्ठञ्कञिति स्वरार्थश्च। अनालोचने किम्। तत्पश्यतीति तदर्शः। तादृशायस्तु रूढिशब्दाः। ते च असताप्यवयवार्थेन व्युत्पाद्यन्ते। अत एव अनालोचनइत्युक्तम्। दृश्यर्थाभावेप्ययं विधिः। सति तु दृश्यर्थे अणेव भवतीति भावः। भाष्ये तु कर्मकर्त्तरि व्युत्पत्तिर्दर्शिता। तमिवेमं पश्यन्ति जनाः। स इवायं पश्यति ज्ञानविषयो भवतीत्यर्थात्। तथा दृग्दृशदृक्षा इवार्थे तद्धितप्रत्यया एवेत्यपि पक्षान्तरं स्थितं भाष्ये। तच्च टिड्ढाणञिति सूत्रे व्युत्पादयिष्यामः। समानान्ययोश्चेति वक्तव्यम्॥ सदृक्। सदृशः। अन्यादृक्। अन्यादृशः। क्सोपि वक्तव्यः॥ त्यदादिषु समानान्ययोश्च॥ तादृक्षः। सदृक्षः। अन्यादृक्षः॥

सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेपि क्विप्॥ सुपीति वर्त्तते। कर्मग्रहणं तु स्पृशोनुदकइत्यतः प्रभृति नानुवर्तते। तत्र ह्यनुवृत्तेन कर्तृप्रचयार्थेन कर्तृग्रहणेन तन्निवृत्तिरित्युक्तम्। कर्तृग्रहणप्रत्याख्याने तु व्याख्यानादेव कर्मग्रहणनिवृत्तिरित्यन्यदेतत्। सदादिभ्यो धातुभ्यः सुप्युपसर्गेप्यनुपसर्गेप्युपपदे क्विप् स्यात्। उपसर्गग्रहणं ज्ञापनार्थम्। सुपिस्थइत्यतः प्रकृतस्य सुप्ग्रहणस्य उपसर्गेतरपरत्वमिति। युक्तञ्चैतत्। विशेषसन्निधौ आम्नातस्य सामान्यशब्दस्य तदतिरिक्तपरत्वौचित्यात्। तत्फलन्तु स्पृशोनुदकेक्विन्नित्यत्र उपसर्गस्याग्रहणमिति कैयटः। यन्तु सामान्यापेक्षं ज्ञापकमाश्रित्य वदः सुपिक्यप्चेत्यत्रापि उपसर्गेतरपरत्वमुक्तं भाष्यवृत्त्योस्तन्तु मन्दप्रयोजनम्। तत्रत्यभाष्ये गदमदचरयमश्चेति सूत्रादनुपसर्गग्रहणमनुवर्तत-

इति सिद्धान्ततत्वात्। वस्तुतस्तु कैयटोक्तमपि फलं चिन्त्यमेव। स्पृशेरुपसर्गे क्विबनभावेपि क्विपो दुर्वारत्वात्। तत्र च क्विन्क्विपोः स्वरे रूपे वा विशेषस्य दुर्लभत्वात्। अथ वा सत्याभिधाने यङ्लुगन्ते अनेकाच्कत्वेन स्वरे विशेषो वर्णनीयः। वस्तुतस्तु अनुदके इति पर्युदासादत्र सत्ववाचकस्यैव ग्रहणेनोपसर्गे प्राप्तिरेव नास्ति। यत्तु गापोष्टगित्यत्र फलमित्याहुः। तन्न। तत्रापि अनुपसर्गे इत्यनुवृत्तेः। कर्मणीत्यस्य सम्बन्धेपि सुपीत्यस्यासम्बन्धेन ज्ञापकाप्रवृतेश्च। तस्मात् सुपिस्थ इत्यत्रैव यथाकथंचित्फलविशेषो वर्णनीय इत्यास्तान्तावत्। हंसः शुचिषत्। पूर्वपदादिति षत्वम्। तत्र च छन्दसीति वर्त्तते। तेन भाषायां शुचिसदित्येव भवति। तथा च च माघः। मनस्सु येन द्युसदां न्यधीयतेति। आदितेयादिविषदं इत्यत्र तु सुषामादिपाठात् षत्वमिति माधवः। उपनिषत्। सादिरप्रतेरिति षत्वम्। सूइति द्विषा साहचर्यात्सूतेरादादिकस्य ग्रहणम्, न तु सुवातिसूयत्योः। अण्डसूः। प्रसूः। मित्रद्विट्। प्रद्विट्। मित्रध्रुक्। प्रध्रुक्। गोधुक्। प्रधुक्। युजिर् योगे, युज समाधौ द्वयोरपि ग्रहणम्। अश्वयुक्। प्रयुक्। विद ज्ञाने, विद विचारणे, विद सत्तायाम्, त्रयाणामपि ग्रहणम्, न लाभार्थस्य विदेः। अकारस्य विवक्षितत्वात्। वेदचित्। प्रवित्। काष्ठभित्। प्रभित्। रज्जुछित्। प्राछित्। शत्रुजित्। सेनानीः। प्रणीः। उपसर्गादसमासेपीति णत्वम्। अग्रणीः। ग्रामणीः। अत्र ज्ञापकाण्णत्वम्। स एषां ग्रामणीरिति निर्देशो हि पूर्वपदस्थान्निमित्तादुत्तरस्य नयतेर्नकारस्य असंज्ञायामपि णत्वं ज्ञापयति। नीरूपविषयं चेदं ज्ञापकम्। तेन ग्रामनाय इति कर्मण्यणि णत्वन्न। ज्ञापकस्य सामान्यापक्षे

त्वादग्रशब्दादपि णत्वम् । नन्वेवं रामादिशब्देभ्योपि प्राप्नोतीति चेत् । इष्टापत्तिरित्येके । अग्रग्रामाभ्यां नयतेरिति वचनाज्ज्ञापनमपि उपपदद्वयमात्रविषयम् । निरूपमात्रविषयता तु वचनस्याप्यवधेयेत्यन्ये । स्वराट् । विराट् । सम्राट् । मोराजीति मत्वम् । इह युजिग्रहणं शक्यमकर्तुमिति ऋत्विग्दधृक्इतिसूत्रएवावोचाम । अत्र जयादित्यः । अन्येभ्योपिदृश्यतइति सामान्येन क्विब्वक्ष्यते तस्यैवायं प्रपञ्च इति । नन्वेतदसङ्गतम् । तस्य ताच्छीलिकत्वादिति चेत् । सत्यम् । क्विप्चेति सूत्रमिह विवक्षितम् । तत्रापि हि विषुपेछन्दसि, आतोमनिन्क्वनिब्वनिपश्च, अन्येभ्योपिदृश्यन्ते इति सन्निहितं दृशिग्रहणमनुवर्त्य वचनविपरिणामेन व्याख्यातुं शक्यतइत्याशयेनोदाहृतजयादित्यग्रन्थप्रवृत्तेः । एतेन स्थःकचेति सूत्रे क्विप् सिद्धो ऽन्येभ्योपिदृश्यतइतीति भाष्यं तत्रत्यवृत्तिश्चेत्युभयमपि व्याख्यातम् । अत्रेदमवधेयम् । सूत्रस्य प्रपञ्चार्थत्वे स्थिते सूविदेत्यत्र धातुविशेषणपरिग्रहे वृत्तिकृतोक्तो यत्नो निष्फलः । सुवतिसूयत्योर्विन्दतेश्च क्विप्चेति क्विपो दुर्वारत्वात् । न चेह धातुविशेषग्रहणं नियमार्थन्तेन सुवत्यादिषु क्विप्चेति सूत्रं न प्रवर्त्ततइति वाच्यम् । प्रपञ्चार्थमिदं सूत्रमिति स्वोक्तिविरोधात् । किञ्च लुग्विकरणालुग्विकरणयोरिति परिभाषया सुवतिसूयत्योरेव ग्रहणं न्याय्यं साहचर्यमात्रपुरस्कारे वा उच्चारणार्थाकारवद्भिः पूर्वोत्तरैः साहचर्यमुपेक्ष्य कथं विदेत्यकारविवक्षोक्ता कथं वा युजेत्युभयग्रहणमवोचत् । न हि युजविदयोरण्वपि वैषम्यमस्ति । तस्मादिह वृत्तिकृतान्तदनुगामिनामन्येषाञ्च धातुविशेषपरिग्रहे अभिनिवेशो निर्मूलो निष्फलश्च । ननु प्रपञ्चत्वोक्त्या सूत्रमर्थात्प्रत्याख्यातम् । तथा च सुव्ग्रहणे उपसर्गानिवृत्तिर्न ज्ञाप्येतेति चेत्

मा ज्ञापि । तत्फलस्य प्रागेव शिथिलीकृतत्वात् । एवञ्च णिनिविधौ सुब्ग्रहणमपि न कर्त्तव्यमिति महदेव लाघवमिति दिक् ॥

भजोण्विः ॥ सुप्युपसर्गे चोपपदे भजेर्ण्विः स्यात् । अर्द्धभाक् । प्रभाक् ॥

छन्दसि सहः ॥ सुप्युपपदे उपसर्गे च सहेर्धातोश्छन्दसि ण्विप्रत्ययः स्यात् । दुश्च्यवनः पृतनाषाळ्युध्यः । अभीदमेकमेको ऽस्मिन्निःषाट् । कथन्तर्हि तुरासाहं पुरोधाय । धरातुरासाहि मदर्थयाञ्चेत्यादि । छन्दसीत्युक्तेर्भाषायां ण्विप्रत्ययानुपपत्तेरिति चेत् । चिन्त्यमिति हरदत्तः । सहतेरभिभवार्थान्निवृत्तप्रेषणात्प्राकृतेर्थे णिचि क्विब्विचोरन्यतर इति वा समाधेयम् ॥

वहश्च ॥ वहतेर्धातोः सुप्युपसर्गे चोपपदे छन्दसि विषये ण्विः स्यात् । दित्यवाट् च मे दित्यौही च मे । योगविभाग उत्तरार्थः ॥

कव्यपुरीषपुरीष्येषु ण्युट् ॥ एषूपपदेषु छन्दसि वहेर्ण्युट्प्रत्ययः स्यात् । कव्यवाहनः पितॄणाम् । पुरीषवाहनः । पुरीष्यवाहनः ॥

हव्येनन्तःपादम् ॥ हव्यशब्दउपपदे छन्दसि वहेर्ण्युट् स्यात् पादान्ते । अग्निश्च हव्यवाहवः । पादमध्ये तु वहेश्चेति ण्विरेव । हव्यवाळग्निरजरः पिता नः ॥

जनसनखनक्रमगमो विट् ॥ उपसर्गे सुपि चोपपदे छन्दसि विट् प्रत्ययः स्यात् । वेरपृक्तस्येत्यादौ सामान्यग्रहणाविघातार्थश्चकारः । विड्वनोरित्यादौ विशेषणार्थश्च । जन जनने, जनी प्रादुर्भावे द्वयोरपि ग्रहणम् । अब्जाः । गोजाः । षणु दाने, षण सम्भक्तौ, द्वयोरपि ग्रहणम् । गोषा इन्द्रो नृषा

अस्य सावाजसा उत । इयं शुष्मेभिर्विसखा इवारुजत् । आदधिक्राः शवसा पञ्च कृष्टीः । अग्निमुषसमश्विनान्दाधिक्रान्ताः सूर्यो अग्रेशुक्रोअग्रेगाः । उदाहरणेषु विड्वनोरनुनासिकस्यादित्यात्वम् । गोषा नृषा इत्यत्र सनोतेरन इति षत्वम् । अग्रेगा इति सप्तम्या अलुक् ॥

अदोनन्ने ॥ छन्दसीति निवृत्तम् । अन्नभिन्ने सुप्युपपदे अदेर्विट् स्यात् । आममात्ति आमात् । सस्यात् । अनन्ने किम् । अन्नादः । भाषायां कर्मण्यण् । छन्दसि तु कृद्वृत्त्ययेन पचाद्यजित्युक्तम् । तेन अन्नाद इत्यत्र अन्नअद इत्यवग्रहः सिध्यति ॥

क्रव्ये च ॥ क्रव्योपपदे अदेर्धोतोर्विट् प्रत्ययः स्यात् । क्रव्यमत्ति क्रव्यात् । पूर्वेणैव सिद्धे वचनमसरूपबोधनार्थम् । तेनाण् न भवति । कथन्तर्हि क्रव्यादो श्रप आशर इत्यमरः । अत्राहुः । कृत्तविकृत्तपक्वमांसशब्दउपपदे अण् । तस्य च पृषोदरादित्वात्क्रव्यभाव इति । अस्यार्थः । कृत्तं छिन्नं तदेव पुनर्विशेषतः कृत्तं, पूर्वकालेति समासः । तस्य पक्वशब्देन पुनः स एव समासः । ततो मांसशब्देन पुनर्विशेषणसमासः । तस्य क्रव्यादेशः । नन्वेवं क्रव्याद इति रूपस्यावर्जनीयतया किं वासरूपबाधनार्थेनानेन वचनेन । वार्त्तिकविरोधश्च । यदाह । अदोनन्ने क्रव्यग्रहणं वासरूपनिवृत्त्यर्थमितीति चेन्नैवम् । अर्थभेदादुभयसाधुत्वोपपत्तेः । आममांसभक्षको हि क्रव्यात् । विशिष्टपक्वभक्षस्तु क्रव्याद इति ॥

दुहः कब्घश्च ॥ दुहेः सुप्युपपदे कप् स्याद्धश्चान्तादेशः । कामदुघा धेनुः ॥

मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ॥ श्वेतादिपूर्वेभ्यो वहादिभ्यो धातुभ्यो ण्विन्प्रत्ययः स्यान्मन्त्रे । धातूपपदसमुदायाश्चेह

निपात्यन्ते । अलाक्षणिककार्यार्थं प्रत्ययस्तु विधीयते । श्वेतशब्दे कर्तृवाचिन्युपपदे वहेर्धोतोः कर्मणि कारके ण्विन्प्रत्ययो भवति । श्वेता एनं वहन्ति श्वेतवा इन्द्रः । तं श्वेतवाहम् । उक्थे कर्मणि करणे वोपपदे शंसतेः प्रत्ययो नलोपश्च । उक्थानि उक्थैर्वा शंसति उक्थशा यजमानः । उक्थशासौ । उक्थशासः । दाशृ दाने अस्य पुरस्पूर्वस्य आदेर्डत्वं कर्मणि च प्रत्ययः । पुरो दाश्यते पुरोडाशः । श्वेतवाहादीनां डस् पदस्येति वक्तव्यम् ॥ यत्र डसन्तस्य पदत्वं भविष्यति तत्र ण्विनोपवादो डस्प्रत्ययो वक्तव्य इत्यर्थः । ततश्च श्वेतवाहावित्यादावपदान्तविषयएव सूत्रोक्तो ण्विनुदाहार्यः । श्वेतवा इत्यादि तु सौत्रस्य ण्विनोपवादेन औपसंख्यानिकेन डस्प्रत्ययेनैव सिध्यतीत्यवधेयम् । वृत्तौ ण्विनं प्रक्रम्य श्वेतवा इत्याद्युदाहरणन्तु डसविषये ण्विनोपि प्राप्तिः स्थितेत्येतावन्मात्राभिप्रायकतया कथञ्चिन्नेयम् । न च डसं विनापि अवयाःश्वेतवा इत्यनेन रुत्वं निपात्यतामिति वाच्यम् । अविशेषेण निपातने श्वेतवाहावित्यादावतिप्रसक्तेः । पदान्तविषयत्वेपि श्वेतवोभ्यामित्यादावुत्वं न सिध्येत् । तस्माडुस् वाच्य एव । नन्वेवं श्वेतवा इत्यादिनिपातनं व्यर्थमिति चेन्न । तस्य सम्बुद्ध्यर्थत्वात् । एवञ्चोक्थशा इत्यपि सम्बुद्ध्यर्थं निपातनं कर्त्तव्यं यदि मन्त्रे दर्शनमस्तीति कैयटादयः । एवं स्थिते मन्त्रमात्रविषयाणामेषां शब्दानां प्रक्रियाकौमुद्यां लौकिकेषूदाहरणमनुचितम् । वैदिकप्रक्रियायान्तु युज्यते । डसन्तत्वेन सान्तप्रातिपदिकेष्वेवोदाहर्त्तुमुचिता अप्येते ऽपदान्तविषये हकारान्तत्वादिकं पुरस्कृत्य यथायथं तत्तत्प्रघट्टकेषूक्ता इति बोध्यम् ॥

अवे यजः ॥ ण्विन् स्यान्मन्त्रे । त्वं यज्ञे वरुणस्यावया

असीति काशिका। इह अवया इति प्रतीकमुपादाय पूर्वसूत्रेपि श्वेतवा इत्याद्युद्दिश्य अवयाश्वेतवाः पुरोडाश्चेति निपातनाद्दुत्वमिति हरदत्तः। एतच्च सर्वं प्रामादिकम्। ण्विनपवादो ङसिति भाष्यकैयटादौ स्वग्रन्थे च निर्णीतत्वात्। तस्माद्वृत्त्युदाहृतं ङस एवोदाहरणम्। सूत्रस्य त्वपदान्तविषयं मन्त्रान्तरमन्वेषणीयमिति दिक्। पूर्वसूत्रएवावयाजिर्न पठितः। उत्तरत्र हि श्वेतवाहादयोप्यनुवर्तेरन्। यजिश्चावपूर्व एवानुवर्तेत। केवल एव तु सिद्धान्तेनुवर्त्तते॥

विजुपे छन्दसि॥ उपे उपपदे यजेर्विच् स्याच्छन्दासि। उपयड्भिरूर्ध्वं यजन्ति तदुपयजामुपयद्त्वम्। मन्त्रइत्यनुवृत्त्यैव भाषाव्यावृत्तौ सत्यां छन्दोग्रहणं ब्राम्हणसङ्ग्रहार्थम्। उत्तरसूत्रएव विज्ग्रहणे छन्दोग्रहणे च क्रियमाणे यद्यपि सर्वं सिध्यति तथापि नियमार्थमिदम्। उपयजेश्छन्दस्येव न भाषायामिति वृत्तिकारः। ननु डञ्ग्रहणादेव भाषायां न भविष्यतीति चेत्। सत्यम्। तस्यैवायं प्रपञ्च इति हरदत्तः॥

आतो मनिन्क्वनिब्वनिपश्च॥ सुप्युपसर्गे चोपपदे आकारान्तेभ्यो धातुभ्यश्छन्दसि विषये मनिनादयस्त्रयः प्रत्ययाः स्युः। चकाराद्विच्। सुदामा। अश्वइव तिष्ठतीत्यश्वत्थामा। पृषोदरादित्वात्सकारस्य तकारः। सुधीवा। सुपीवा। घुमास्थादिसूत्रेणेत्वम्। भूरिदावा। घृतपावा। विचि तु कीलालपाः॥

अन्येभ्योपि दृश्यन्ते॥ छन्दसीति निवृत्तम्। अपिशब्दः सर्वोपाधिव्यभिचारार्थः। अनाकारान्तेभ्योपि धातुभ्यो मनिन् क्वनिप् वनिप् विच् एते प्रत्ययाः स्युरुपपदे सत्यसति च। सुशर्मा। प्रातरित्वा। विजावा। रेडसि पर्णे नवेः॥

क्विप् च ॥ धातोः क्विप्स्यात्कर्त्तरि । उखास्रत् । पर्णध्वत् । वाहाद् भ्रश्यति वाहभ्रट् । वृत्तौ तु वहाभ्रडिति पाठः । तत्र वहाद् भ्रश्यतीति विग्रहः । अन्येषामपि दृश्यतेइति दीर्घ इति हरदत्तः ॥

स्थः क च ॥ तिष्ठतेः सुप्युपपदे कः स्यात्क्विप्च । सूत्रे केल्यविभक्तिको निर्देशः । शंस्थः । शंस्थाः । इह सुपिस्थ इति कः प्राप्तः । तिष्ठतेरन्तर्भावितण्यर्थतया शमित्यस्य कर्मत्वे तु आतोनुपसर्गेक इति कः प्राप्तः क्विप्चेति क्विबपि । न च विशेषविहितेन कप्रत्ययेन क्विपो बाधः शङ्क्यः । वासरूप इत्युक्तेः । तदित्थम् । ककिवपोः पर्याये प्राप्ते तदुभयबाधेन शमिधातोः संज्ञायामिति अच् प्राप्तः । स हि धातुग्रहणसामर्थ्यात्कृञो हेत्वादिषु टं यथा बाधते तथा तिष्ठतेः ककिवपावपि बाधेत । अतस्तमप्यचं बाधितुं ककिवपाविह पुनर्विधीयेते । ननु शंस्था इत्यत्र क्विपि लुप्ते प्रत्ययलक्षणेन घुमास्थेतीत्वं स्यादिति चेन्न । स्थानिवद्भावस्यानल्विधाविति निषेधात् । प्रत्ययलोपइति सूत्रन्तु नियमार्थमिति सिद्धान्तात् । यत्त्विह कैयटेनोक्तमीत्वमवकारादाविति वचनाद् भाष्यकारवचनप्रामाण्याद्वा प्रत्ययलक्षेणेनेत्वाभाव इति । तदल्विधयर्थं प्रत्ययलोपइति सूत्रमिति पूर्वपक्षमभिप्रेत्य, तत्राप्यवकारादाविति वचनस्वीकारे सुधीवेति न सिध्येदित्यपरितोषेण द्वितीयपक्षस्वीकार इति बोध्यम् । स्यादेतत् । शमिधातोरित्यस्यानन्तरमेव स्थःकचेति सूत्र्यताञ्चकारेणाच् समुच्चीयताम् । तत्र सवर्णदीर्घे शंस्था इति भविष्यति । एवञ्चोत्सर्गापवादयोः समानदेशतया सन्दर्भशुद्धिरपि लभ्यते । ईत्वाभावार्थं च न यतनीयमिति । मैवम् । अशंस्था इत्यत्र अच्कावशक्ताविति उत्तरपदान्तोदात्तत्वा-

पत्तेः । कुद्ग्रहणेगतिकारकपूर्वस्यापीति शंस्था इत्यस्याजन्तत्वात् । क्विबन्तेन नञ्समासे तु नञ्पूर्वपदप्रकृतिस्वर एव सिध्यति ॥

सुप्यजातौ णिनिस्ताच्छील्ये ॥ अजातिवाचिनि सुबन्तउपपदे ताच्छील्ये द्योत्ये धातोः कर्त्तरि णिनिः स्यात् । उष्णभोजी । शीतभोजी । अजाताविति किम् । ब्राह्मणानामन्त्रयिता । ताच्छील्यस्य विवक्षितत्वान्नलोकेति षष्ठीप्रतिषेधः । ताच्छील्ये किम् । उष्णं भुंक्ते कदाचित् । अत्र भाष्यम् । सुपीति वर्त्तमाने पुनः सुब्ग्रहणं किमर्थम् । अनुपसर्ग इत्येवं तदभूत् । इदं तु सुब्मात्रे यथा स्यात् । उदासारिण्यः प्रत्यासारिण्य इति । अस्यायमाशयः । सत्सूद्विषेति सूत्रे सुपिस्थ इत्यतः सुपीत्यनुवर्त्तते तच्चोपसर्गेतरपरम् । उपसर्गेपीति पृथगुक्तेः । तदिहानुवर्तमानमर्थाधिकारादुपसर्गेतरपरमेव स्यात् । न चोपसर्गेपीत्यंशोपीहानुवर्त्तयितुं शक्यः । केवलमज्बाधनार्थत्वेन निर्णीते स्थःकचेति पूर्वसूत्रे उपसर्गेपीत्यंशस्य फलाभावेन विच्छिन्नत्वादिति । यद्यप्युत्तरार्थतया पूर्वत्राप्यनुवृत्तिरिति वा मण्डूकप्लुतिन्यायेनैव सम्बन्ध इति वा सुब्ग्रहणस्यैव शब्दाधिकार इति वा सत्सूद्विषेति सूत्रे वर्णितरीत्या तस्यानावश्यकतेति वा सुवचं तथापि सूत्रकाराशयवर्णनमात्रमेतत् । निष्कर्षे तु मा भूदिह सुब्ग्रहणमनुवृत्त्यैव निर्वाहात् । सर्वथापि सुब्मात्रे उपपदे णिनिः न त्वनुपसर्ग एवेति सिद्धान्तः । तथा च प्रयुज्यते । स बभूवोपजीविनाम् । न्यषेधि शेषोप्यनुयायिवर्गः । आरिष्टशय्यां परितो विसारिणा । पतत्यधो धाम विसारि सर्वतः । विसारिभिः सौधमिवांशुजालैः । प्रभाविनं भाविनमन्तमात्मनः ।

न वञ्चनीयाः प्रभवोनुजीविभिरित्यादि । यत्त्विह वृत्तिकृतोक्तं सूपीति वर्त्तमाने पुनः सुब्ग्रहणमुपसर्गनिवृत्त्यर्थमिति । तन्न । भाष्यविरोधात् । उदाहृतप्रयोगविरोधाच्च । न चैते प्रयोगा आवश्यकादिणिनिना कथं चिन्निर्वाह्या इति वाच्यम् । यथाश्रुते बाधकाभावात् । यद्यपि वृत्तिकृतोक्तमुत्पातिभ्यामाङि सर्त्तेरुपसंख्यानमिति, तदपि न । भाष्ये तादृशवार्त्तिकाभावात् । एतेन उत्पातिभ्यामिति प्रतीकमुपादाय सुवित्यस्योपसर्गनिवृत्त्यर्थत्वादयमारम्भ इति वदन् हरदत्तोपि प्रत्युक्तः । भाष्यविरोधात् । आष्टमिकसकलग्रन्थाविरोधाच्च । तथाहि । कृत्यच इति सूत्रे अनमानानीयानीनिनिष्ठादेशाः प्रयोजयन्तीत्येतद्वाक्यान्तर्गतेनिग्रहणव्याख्यावसरे सुप्यजातौणिनिः । आवश्यके चेति व्याख्यातम् । सुप्यजाताविति स्योपसर्गे प्रवृत्त्यभावे असङ्गतमेव तत्स्यात् । कृत्यच इत्यत्रोपसर्गादित्यनुवृत्तेः । यदप्यनुगादिनष्ठगित्यत्रास्मादेव निपातनाण्णिनिरिति विसारिणोमत्स्यइत्यत्र च पूर्ववण्णिनिरिति तदप्येतेनापास्तम् । यदपि माधवेनोक्तम्, अस्मादेव विसारिण इति निर्देशादण्सन्नियोगेनैव णिनिरित्युक्त्वा निषिद्धश्च पदमञ्जर्याम् । विसारीति पृथक् प्रयोगः । पृथक्प्रयोगमसहमानेनैव न्यासकारेणापि ग्रहादित्वाण्णिनिरित्युक्त्वा अत एव निपातनादित्युक्तम् । निपातनञ्च प्रत्ययसन्नियोगेनैवेति सिद्धान्तितम् । तदपि न । विसारिणोमत्स्यइत्यत्र मत्स्य इति किम् । विसारी देवदत्त इति प्रत्युदाहरता वृत्तिकृता सह विरोधात् । भाष्यविरोधस्त्वस्त्येव । एतेनोपसर्गनिवृत्त्यर्थमिति वृत्तिकृद्वचनं केवलोपसर्गनिवृत्त्यर्थमिति प्रसादकारोक्तिरपि प्रत्युक्ता । यत्तु सस्सप्तपदार्थीटीकायां व्यापीत्याङ्श्लेषादुदासारिण्यः प्रत्या-

सारिण्य इतिवत्साधुरित्युक्तम्। तदपि उदाहृतप्रसादकारवाक्ये केवलपदस्य असहायपरतया अनेकोपसर्गे णिनिर्भवत्येवेत्यर्थं गृहीत्वा रभसादेवोक्तमिति सर्वमिदं भाष्यतत्त्वज्ञैरुपेक्ष्यमेवेति दिक्। अत्र वार्त्तिकद्वयं, ण्विन्विधौ साधुकारिण्युपसंख्यानम्॥ अताच्छील्यार्थमिदम्। एतच्च ज्ञापकात्सिद्धम्। यदयमाक्वेरिति सूत्रे तच्छीलतद्धर्मेइत्यभिधाय साधुकारिग्रहणं करोति तज् ज्ञापयति साधुकारिणि अताच्छील्येपि णिनिर्भवतीति। साधुकारी। साधुदायी। ब्रह्मणि वद उपसंख्यानम्॥ ब्रह्मवादिनो वदन्ति। ब्रह्म वेदः। इदमपि वार्त्तिकमताच्छील्यार्थमिति कैयटहरदत्तौ। यत्तु भट्टवार्त्तिके ब्रम्हवादिशब्दस्य तच्छीलतद्धर्मतत्साधुकारिपरतया व्याख्यानं कृतं तस्यायमाशयः। सुप्यजाताविति सूत्रेण ताच्छील्ये समनन्तरोक्तवार्त्तिकेन साधुकारिणि च णिनिः। आवश्यकाधमर्ण्ययोर्णिनिरिति आवश्यके णिनिस्तु तद्धर्मे पर्यवस्यति। न त्विहाक्वेरिति सूत्रस्य व्यापारोस्तीति दिक्॥

कर्त्तर्युपमाने॥ कर्तृवाचिन्युपमाने उपपदे धातोर्णिनिः स्यात्। उपपदं कर्त्ता प्रत्ययार्थस्य कर्तुरुपमानम्। उष्ट्र इव क्रोशति उष्ट्रक्रोशी। ध्वाङ्क्षरावी। अताच्छील्यार्थं जात्यर्थञ्च वचनम्। कर्तरि किम्। अपूपानिव भक्षयति भाषान्। उपमाने किम्। उष्ट्रः क्रोशति॥

व्रते॥ सुप्युपपदे धातोर्णिनिः स्याद्व्रते गम्यमाने। समुदायोपाधिरयम्। धातूपपदप्रत्ययसमुदायाच्चेद् व्रतं गम्यतइत्यर्थः। स्थण्डिलशायी। अश्राद्धभोजी। यद्यपि द्विधा नियमः सम्भवति स्थण्डिले शेतएव अश्राद्धं भुङ्क्तएवेति वा। स्थण्डिलएव शेते अश्राद्धमेव भुङ्क्ते इति च। तथापि आद्ये प्र-

त्ययो न भवति व्रते इत्युक्तेः। शास्त्रसिद्धो नियमो हि व्रतं न च शयितव्यमेव भोक्तव्यमेवेत्येवंरूपं शास्त्रमस्ति। अस्ति तु स्थण्डिले एव शयितव्यम्, अश्राद्धमेव भोक्तव्यामिति। तस्मात्तत्रैव प्रत्ययः। अताच्छील्यार्थमजात्यर्थं वा आरम्भः॥

बहुलमाभीक्ष्ण्ये॥ सुप्युपपदे धातोर्बहुलं णिनिः स्यात् पौनःपुन्ये द्योत्ये। क्षीरपायिण उशीनराः॥

मनः॥ सुप्युपपदे मन्यतेर्णिनिः स्यात्। दर्शनीयमानी। बहुलग्रहणादिह दैवादिकस्यैव ग्रहणं न तु तानादिकस्य। तेनोत्तरसूत्रे खशि श्यनेव भवति॥

आत्ममाने खश्च॥ मननं मानः। आत्मशब्दः स्वपरः। कर्मणि षष्ठ्या समासः। प्रत्ययार्थत्वेन सन्निहितः कर्त्ता स्वपदार्थः आत्मकर्मकमनने वर्त्तमानान्मन्यतेर्धातोः सुप्युपपदे खश् स्यात्। चाण्णिनिः। यद्यपि वासरूपविधिना सिद्धोसौ तथाप्यविच्छेदाय समुच्चीयते। तेन करणेयज इत्यादौ णिनिरेवानुवर्त्तते न तु खश्। दर्शनीयमात्मानं मन्यते दर्शनीयंमन्यः। दर्शनयीमानी। पण्डितम्मन्यः। पण्डितमानी। आत्ममानइति किम्। दर्शनीयमानी देवदत्तो यज्ञदत्तस्य। खशः खकारो मुमर्थः। दर्शनीयम्मन्या कुमारीत्यादौ ह्रस्वार्थश्च। शकारः सार्वधातुकसंज्ञार्थः। दिवादित्वाश्यन्। स्वरस्तु 'सातिशिष्टोपि विकरणस्वरः सार्वधातुकस्वरं न बाधत'इति खश एव भवति न तु नित्स्वर इति भाष्यकैयटपदमञ्जर्यादिषु स्थितम्। एवञ्च सातिशिष्टोपि विकरणस्वरो लसार्वधातुकस्वरं न बाधतइति यत्नतस्तत्रतत्र प्राचां ग्रन्थेषूक्तम्। तत्र लादेशत्वमविवक्षितमित्यवधेयम्। अत एव दिवादिभ्यश्चानशि श्यनि नित्स्वरेण आद्युदात्तत्वमित्येवंपरः कैयटग्रन्थ आपाततोः न तु श्रद्धेय इति शपश्चितमस्माभिः स्था-

निवत्सूत्रे ॥

इति श्रीशब्दकौस्तुभे तृतीयाध्यायस्य
द्वितीये पादे प्रथममान्हिकम् ॥

भूते ॥ अधिकारोयम् । वर्तमानेलडिति यावत् ॥

करणे यजः ॥ करणे उपपदे भूतार्थवृत्तेर्यजेर्णिनिः स्यात्कर्त्तरि । सोमेनेष्टवान्सोमयाजी । स्यादेतत् । अग्निष्टोमयाजीत्यादौ यागसमानाधिकरणे उपपदे कथं णिनिरिति चेत् । अत्र काशिका । अग्निष्टोमः फलभावनायां करणमिति । अयमाशयः। अस्ति हि सर्वधातूनां धातुत्वेन व्यापारे भावनापरपर्याये शक्तिः। पचियजित्वादिविशेषरूपेण तु पाकयागादिविशेषेष्विति भूवादिसूत्रएवोक्तम् । तत्र यागस्य समानप्रकृत्युपात्तभावनां प्रति करणत्वे कटोपि कर्मेति न्यायेन ज्योतिष्टोमोपि करणमेव । अग्निष्टोमादिशब्दास्तु यद्यपि संस्थावचनाः तथापि तद्वति लक्षणया यागसमानाधिकरणा एवेति दिक् । इह प्रपञ्चके हरदत्तग्रन्थे अग्निष्टोमशब्दः कर्मनामधेयमिति । दीक्षणीयादिरुदवसानीयान्तो ज्योतिष्टोमाख्यो याग एव स्वर्गभावनेति । द्विविधो यजमानस्य व्यापारः सामान्यरूपो विशेषरूपश्च । तत्र सामान्यरूप आभ्यन्तर औदासीन्यप्रच्युतिरूपः कृतिप्रयत्नादिपदाभिलब्धः । बाह्यस्तु दीक्षणीयादिरुदवसानीपान्तः प्रसिद्ध एवेत्यादि व्यवहृतम् । एतच्च यद्यपि मीमांसाविरुद्धमग्निष्टोमशब्दस्य संस्थावाचित्वात् । न च संस्थैवेह कर्मशब्दार्थो विवक्षितः तत्कथमग्निष्टोमस्य यजिं प्रति करणत्वं न हि तदेव तत्र करणं भवतीति तदुत्तरतद्ग्रन्थविरोधात् । दीक्षणीयादेरुदवसानियाया ज्योतिष्टोमाङ्गत्वेपि ज्योतिष्टोमाख्ययागशरीरापवेशात् दीक्षणीयादीनां बाह्यत्वोपवर्णनाविरोधाच्च । देवतोद्देशेन द्रव्य-

त्यागरूपाणान्तेषामाभ्यन्तरत्वात् । प्रक्षेपो हि बाह्यः न तु यागोपीति स्पष्टमेव । तथापि गौण्या लक्षणया वा कथञ्चिन्मीमांसासिद्धान्ताविरोधेन हरदत्तग्रन्थो व्याख्येय इति दिक् ॥

कर्मणि हनः ॥ कर्मण्युपपदे भूताद्यर्थाद्धन्तोर्णिनिः स्यात् । इदं कर्मग्रहणं सहेचेति यावदनुवर्तते । पितृव्यघाती । मातुलघाती । अत्र काशिका । कुत्सितग्रहणं कर्तव्यम् । इह मा भूच्चोरं हतवानिति । यद्यपि इदं भाष्ये नास्ति तथापि शक्तिस्वाभाव्याल्लभ्यतइति भावः ॥

ब्रह्मभ्रूणवृत्रेषु क्विप् ॥ ब्रह्मादिषु कर्मसूपपदेषु हन्तेर्भूते क्विप् स्यात् । ब्रह्महा । भ्रूणहा । वृत्रहा । क्विप्चेत्यनेन सिद्धे नियमार्थमिदम् । नियमश्चेह चतुर्विधोपीष्यतइति वृत्तिकारः । तस्यायमाशयः । इह सूत्रे श्रुतत्वात्पूर्वं ब्रह्मादय उद्देश्याः । ततोनन्तरं प्रकृतित्वाद्धन्तिः ततः परिशेषाद्भूतइति । क्विप् तु सर्वान्ते निर्देष्टव्यः । विधेयत्वात् । तदेवं वचनव्यक्तिः । ब्रह्मादिष्वुपपदेषु हन्तेर्भूते क्विबिति । एवं स्थिते यत्रैवकारस्ततोन्यत्र नियम इति न्यायेन नियमोन्यत्र भवन् अनन्तरे भवति । ततश्च ब्रह्मादिष्वेवेत्यवधारणे हन्तेस्तदनन्तरनिर्दिष्टत्वादुपपदान्तरसम्बन्धनिवृत्तिफलो नियमो भवति । ब्रह्मादिषु हन्तेरेव । भूतइति तु अनन्तरत्वाविशेषेपि प्राथम्यादुपपदनियमः । ब्रह्मादिषु हन्तेर्भूतएव । क्विबिति तु आनन्तर्ये क्विब्धात्वोरविशिष्टेपि प्राधान्यात्प्रत्ययनियमः । ब्रह्मादिषु हन्तेर्भूते क्विब्वेवेति वचनव्यक्तौ कालनियमः । सोयं प्रकृत्युपपदप्रत्ययकालनियमानां विवेकः । अगृह्यमाणविशेषत्वात्तु चतुर्विधस्यापीह ग्रहणम् । तत्र ब्रह्मादिष्वेव हन्तेरिति प्रकृतिनियमे भूतइत्याश्रयणात्कालान्तरे उपपदान्तरेपि भवत्येव । पुरुषं हन्ति हनिष्यति वा पुरुषहा । हरिहयोरि-

योगविचक्षणः। ब्रह्मादिषु हन्तेरेवेत्युपपदनियमेपि भूतइत्याश्रयणात्कालान्तरे धात्वन्तरादपि भवत्येव। वृत्रं जयति जेष्यति वा वृत्रजिदिति। भूतएव क्विबिति प्रत्ययनियमेपि ब्रह्मादिष्वित्युक्तेः पुरुषहा अरिहेति माग्वत्। भूतएव क्विबेवेति कालनियमेपि उपपदान्तरे भूतेपि प्रत्ययान्तरं भवत्येव। पितृव्यं हतवान् पितृव्यघातीति। सोपपदश्च प्रत्ययो नियमेन व्यावर्त्यते। निष्ठा तु भवत्येव। वृत्रं हतवानिति। भाष्यकारस्तु प्रकृतिकालीनयमोवव अशिश्रियत्। तस्यायमाशयः। धातुकालौ हि नेह सूत्रे श्रुतौ किन्तु प्रकरणलक्षणजघन्यप्रमाणेनोपस्थितौ। अतस्तयोरेवोपरोधो न्याय्यः न तूपपदप्रत्ययोः। श्रुत्युपस्थापितत्वात्। एवं न्यायोपष्टम्भेन भाष्येण सह विरोधात् वृत्तिमतमुपेक्ष्यमेवेति कैयटे स्थितम्। यत्त्विह हरदत्तेनोक्तं धातूपपदविषयं नियमद्वयं भाष्ये प्रदर्शितमिति। तत्र धातुकालविषयमिति वक्तव्ये उपपदग्रहणं प्रामादिकमित्यवधेयम्॥

बहुलं छन्दसि॥ पूर्वेण नियमादप्राप्तः किप् प्रतिप्रसूयते। उपपदान्तरेपि हन्तेर्बहुलं क्विप् स्यात्। यो मातृहा पितृहा। क्व चिन्न। पितृघातः॥

सुकर्मपापमन्त्रपुण्येषु कृञः॥ सुकर्मादिषु च कर्मसूपपदेषु कृञः क्विप् स्यात्। त्रिविधोत्र नियमः धातुनियमं वर्जयित्वेति वृत्तिः। सुकृत्। कर्मकृत्। पापकृत्। मन्त्रकृत्। पुण्यकृत्। कालनियमात्कर्मकृतवानित्यत्राण् न भवति। उपपदनियमात् मन्त्रमधीतवान्मन्त्राध्याय इत्यणेव भवति न क्विप्। प्रत्ययनियमात् मन्त्रं करोति करिष्यति वेति विवक्षायामणेव भवति न क्विप्। धातोरनियतत्वादन्यस्मिन्नप्युपपदे क्विप्चेति क्विप् भवत्येव। शास्त्रकृत्। भाष्यकृत्॥

सोमे सुञः ॥ सोमे कर्मण्युपपदे सुनोतेः क्विप् स्यात् । सोमसुत् । चतुर्विधोत्र नियम इति वृत्तिः ॥

अग्नौ चेः ॥ अग्नौ कर्मण्युपपदे चिनोतेः क्विप् स्यात् । अग्निचित् । अत्रापि चतुर्विधो नियम इति वृत्तिः ॥

कर्मण्यग्न्याख्यायाम् ॥ कर्मण्युपपदे चिनोतेर्धातोः कर्मण्येव कारके क्विप् स्यादग्न्याख्यायाम् । श्येन इव चीयते श्येनचित् । अग्निशब्द आहवनीयधारणार्थमिष्टकानिर्मितस्थलविशेषे वेदे बहुशः प्रयुज्यते । य एवं विद्वानग्निं चिनुते । अग्निञ्चेष्यमाण इति । स तत्र मुख्यो जघन्यो वास्तु इह त्वसत्याख्याग्रहणे लोकप्रसिद्धिवशेन ज्वलनएव गृह्येत । समाग्राहि स्थलाविशेषएव च गृह्यतामित्येतदर्थमाख्याग्रहणम् । एवं धातूपपदप्रत्ययसमुदायेन स्थलविशेषे गम्यमाने अयं प्रत्यय इति स्थितम् ॥

कर्मणीनिर्विक्रियः ॥ कर्मण्युपपदे विपूर्वात्क्रीणातेरिनिः स्यात् । अत्र वार्त्तिकम् । कर्मणि कुत्सितग्रहणमिति ॥ एतच्च पुनः कर्मग्रहणसामर्थ्याल्लभ्यते । यत्कर्म क्रियया सम्बध्यमानं कर्तुः कुत्सामावहति तत्रेत्यर्थः । सोमादयश्च विक्रीयमाणाः शास्त्रे प्रतिषेधात्कुत्सावहाः । सोमविक्रयी । घृतविक्रयी । तैलविक्रयी । कुत्सितग्रहणान्नेह । धान्यविक्रायः ॥

दृशेः क्वनिप् ॥ कर्मण्युपपदे भूतार्थाद् दृशेः क्वनिप्स्यात् । अन्येभ्योपि दृश्यतइति सिद्धे नियमार्थमिदं क्वनिबेव यथा स्यात् तत्सहनिर्दिष्टं मनिनादि सोपपदञ्चाणादि मा भूदिति । निष्ठा तु भवत्येव । परलोकं दृष्टवानिति । एवं स्थिते विश्वदृश्वनयना वयमेवेत्यादौ विश्वं पश्यन्तीति वर्त्तमानविग्रहेपि न क्षतिः । प्रत्ययान्तरानिवृत्त्यर्थं सूत्रमिति वृत्तिकारा-

दिभिर्व्याख्यातत्वात्। कालान्तरनिवृत्त्यर्थस्य चाभियुक्तैरनुक्तत्वादिति दिक् ॥

राजनि युधिकृञः ॥ राजशब्दे कर्मवाचिन्युपपदे युध्यतेः करोतेश्च क्वनिप्स्यात्। युध्यतेरकर्मकत्वेप्यन्तर्भावितण्यर्थत्वात्सकर्मकत्वम्। राजानं योधितवान् राजयुध्वा। राजकृत्वा ॥

सहे च ॥ कर्मणीति निवृत्तम्। असत्ववचनत्वेन इहान्वयात्, उत्तरत्राप्यनुपयोगात्। सहशब्दे उपपदे युधेः कृञश्च क्वनिप्स्यात्। सहयुध्वा। सहकृत्वा। दृशेः क्वनिविति वादिदमपि सूत्रद्वयं नियमार्थमिति न्याय्यम्। वस्तुतस्तु दृशिग्रहणेन निर्वाहस्यागतिकगतित्वादियन्त्रिसूत्री विधात्रीत्यपि सुवचम्। प्राचां ग्रन्थास्त्विह उदासीना एवेति बोध्यम् ॥

सप्तम्याञ्जनेर्डः ॥ सप्तम्यन्ते उपपदे जनेर्डप्रत्ययः स्यात्। सरसिजम्। मन्दुरजः। वाजिशाला तु मन्दुरा। ङ्याप्प्रातिपदिकात्सोर्बहुलमिति ह्रस्वः ॥

पञ्चम्यामजातौ ॥ जातिशब्दवर्जिते पञ्चम्यन्तउपपदे जनेर्डः स्यात्। बुद्धिजः। संस्कारजः। गुणशब्दोयम्। यद्यपि बुद्धित्वं जातिरिति बहवस्तथापि गुणगतजात्यनभ्युपगममतेनेदम्। मतान्तरे त्वन्येष्वपीत्यनेन सिद्धम्। प्रकृतसूत्रोदाहरणन्त्वदृष्टजम्, इन्द्रियजम्। शरीरजमित्यादि बोध्यम् ॥

उपसर्गे च संज्ञायाम् ॥ जनेर्डः स्यात्। प्रजा स्यात्सन्ततौ जने ॥

अनौ कर्मणि ॥ अनुपूर्वाज्जनेः कर्मण्युपपदे डः स्यात्। पुमांसमनुरुध्य जाता पुमनुजा। इह जनिः सकर्मकः ॥

अन्येष्वपि दृश्यते ॥ उपपदान्तरेष्वपि जनेर्डः स्यात्।

अजः । द्विजः । ब्राह्मणजः । अपिः सर्वोपाधिव्यभिचारार्थः । तेन धात्वन्तरादपि कारकान्तरेष्वपि यथादर्शनं भवति । परिखातः खाता परिखा । उखा । क्रोडादिगणे निपातनादुदोन्तलोप इति वर्धमानः । यत्त्वन्तात्यन्ताध्वेति प्रकरणे अन्यत्रापि दृश्यतइत्युपसङ्ख्यातं तद्भूतकालं विनापि यथा स्यादित्येवमर्थम् । वस्तुतस्तु प्रकृतसूत्रस्थस्यापिग्रहणस्य सर्वोपाधिव्याभिचारार्थत्वाद्वार्त्तिकमनेनैव गतार्थम् । विभावितं चेदमिकोगुणवृद्धी इतिसूत्रे जनेर्डं प्रक्रम्य गमेरप्ययण्डो वक्तव्य इति वदता भाष्यकारेण । एवञ्च प्रकृतसूत्रस्थमन्येभ्योपिदृश्यतइति वार्त्तिकमपि गतार्थम् ॥

निष्ठा ॥ धातोर्भूते निष्ठा स्यात् । तयोरेवेति क्तः कर्मणि क्तवतुस्तु कर्त्तरि । कृतः कटः । कटं कृतवान् । आदिकर्मणि निष्ठा वक्तव्या ॥ कृतः कटः । कर्त्तुमारब्ध इत्यर्थः । न्याय्यं स्वाद्यपवर्गात् । उपसङ्ख्यानप्रत्याख्यानमेतत् । आदिभूतो यः क्रियाक्षणः अपवृक्तः तस्मिन्नेव अवयवे समूहरूपारोपात्सिद्धः प्रत्यय इति भावः । अत एव लुङादयोपि प्रयुज्यन्ते । उक्तञ्च । समूहः स तथाभूतः प्रतिभेदं समूहिषु । समाप्यते ततो भेदे कालभेदस्य सम्भव इति ॥

सुयजोर्ङ्वनिप् ॥ सुनोतेर्यजेश्च ङ्वनिप् स्यात् । सुत्वा । सुत्वानौ । सुत्वानः । यज्वा । यज्वानौ । यज्वानः । इह तु सु गतौ, षु प्रसवैश्वर्ययोरित्यनयोरेव निरनुबन्धकयोर्ग्रहणं प्राप्तम् । अनभिधानादुभयपदिना साहचर्याद्वा न भवति । ङ्कारः सुनोतेर्गुणप्रतिषेधार्थः । पकारः स्वरार्थस्तुगर्थश्च ॥

जीर्यतेरतृन् ॥ स्पष्टम् । जरन् । जरन्तौ । जरन्तः । वासरूपेण निष्ठा । जीनो जीर्णो जरन्नपीत्यमरः ॥

छन्दसि लिट् ॥ स्पष्टम् । अहं द्यावापृथिवी आततान । ननु छन्दसिलुङ्लङ्लिट इति सिद्धमिति चेन्न । धातुसम्बन्धे-प्रत्यया इत्यधिकृत्य तद्विधेः । इह त्वविशेषेणेति भेदात् । लिट इ-कारटकारावनुबन्धौ ॥

लिटः कानज्वा ॥ लिब्यभ्यासस्येत्यादौ विशेषणार्थः ट-कारष्टेरेत्वार्थोपि ॥

लिटः कानज्वा ॥ क्वसुश्च ॥ छन्दसि लिटः कानच्क्वसू वा स्तः । योगविभाग उत्तरार्थः । योग्निञ्चिक्यानः । मन्दानः । सोमम्षपिवान् । अनन्तरस्यैव लिट इमावादेशौ, लिड्ग्रहणन्तु प्रत्ययान्तरत्वशङ्कानिवृत्त्यर्थम् । वावचनमुत्तरार्थम् । कानचश्चित्क-रणं स्वरार्थम् । क्वसोरुकार उगित्कार्यार्थः । जक्षिवानित्या-दावुगिदचामिति नुम् । उपेयुषीत्यादावुगितश्चेति ङीप् । वसोः संप्रसारणमित्यत्र सामान्यग्रहणमप्युकारस्य प्रयोजनम् । अथ किमर्थं कित्करणम्, ईजानः सस्रुजानस्तेया इत्यादौ सम्प्रसारणं गुणनिषेध एत्वाभ्यासलोपश्चासंयोगाल्लिटः किच्चादेव सिद्धम् । अस्तु तर्हि संयोगान्तार्थम् । बन्ध बन्धने । वृत्रस्य यद्बद्ध-धानस्य रोदसी, त्वमर्णवान् बद्बधानां अरणारम्णाः । अत्रानि-दितामिति नलोपः । अभ्यासधकारस्य हलादिशेषेण निवृत्तिः प्राप्ता छान्दसत्वान्न भवति । झलाञ्जश्झशीति जश्त्वं दकारः । एवमञ्जेः, आजिवान् । उपधालोपः । मैवम् । छान्दसौ हि क्वसुकानचौ । लिट् च छन्दसि सार्वधातुकमपि भवति । छ-न्दस्युभयथेति वचनात् । तत्र सार्वधातुकमपिदिति ङित्त्वम् । न च संयोगान्तेषु कित्त्वङित्त्वयोर्विशेषोस्ति । तस्माद्व्यर्थमनयोः कित्त्वमिति चेत् । अत्राहुः । ऋच्छत्यृतामिति ऋकारान्तानां प्रतिषेधविषये गुण आरभ्यते स यथेह भवति परितस्तेर तेरतु-

स्तेरुरिति, एवमिहापि स्यात्। यतः सुचार्हिरुतिंस्तिराणाः तथा तितीर्वानिति। तद्व्यावृत्तये कित्करणम्। नचैवम् आरिवान् सर्वाभ्रूणान्यारुषी इत्यत्रापि गुणो न स्यादिति वाच्यम्। ऋकारान्तरप्रश्लेषेण ऋधातौ पुनर्विधानादिति दिक्। यन्तु के चित् कित्करणसामर्थ्याद्भाषायामपि क्वसुकानचौ स्त इत्याहुः। तद्भाष्याविरुद्धम्। भाषायां सदेत्यादिसूत्रविरुद्धञ्चेत्युपेक्ष्यम्॥

भाषायां सदवसश्रुवः॥ एभ्यो भूतसामान्ये लिड् वा स्यात्तस्य च नित्यं क्वसुः स्यात्। पक्षे यथास्वं प्रत्ययाः। सेदिवान्। असदत्। असीदत्। ससाद। उषिवान्। अवात्सीत्। अवसत्। उवास। शुश्रुवान्। अश्रौषीत्। अशृणोत् शुश्राव। लङ्लिड्विषयेपि भवति। परस्तादनुवृत्तेः॥

उपेयिवाननाश्वाननूचानश्च॥ उपेत्यविवक्षितम्। व्याख्यानात्। ईयिवांसमतिस्रिध इति दर्शनाच्च। इणो नञ्पूर्वादश्नातेरनुपूर्वाद्वचेश्च भूतसामान्ये वा लिट् तस्य नित्यं क्वसुकानचौ। पक्षे तु लङादयः। अगात्। ऐत्। इयाय। अनाश्वान्। इहेडभावोपि निपात्यते। नाशीत्। नाश्नात्। नाश। वचेः कर्त्तर्येव कानच् न तु भावकर्मणोः। निपातनसामर्थ्यात्। अन्ववोचत्। अन्वब्रवीत्। अनूवाच। अत्रेदमवधेयम्। भाषायां सदवसेति सूत्रएवेण् ग्राह्य, उपेयिवानिति तु न निपात्यम्। द्वित्वात्प्रागेव परत्वादिट्। नन्वेवं बिभिद्वानित्यादावपीट्प्रसङ्गः। तत्र द्वित्वस्य नित्यत्वात्। इणस्तु इडपि नित्यः। द्वयोर्नित्ययोः परत्वादिट्। न च कृते द्वित्वे ऽनेकाच्त्वादिण् न लभ्यतइति वाच्यम्। ईयतुरित्यादाविव सवर्णदीर्घे सत्येकाच्त्वात्। न च दीर्घइणःकितीति दीर्घसामर्थ्यादेकादेशबाधः। इणोयणिति यणि कृते दीर्घस्य चरितार्थत्वात्। न च यणि कृतेपि स्थानि-

वद्भावेनैकादेशः स्यादिति वाच्यम्। पूर्वमात्रस्य विधौ स्थानिवद्भावः न तु पूर्वपरविधौ। विधिग्रहणसामर्थ्यादित्युक्तत्वादिति दिक्॥

लुङ्॥ भूतार्थवृत्तेर्धातोर्लुङ् स्यात्। अभूत्। वसेर्लुङ् रात्रिशेषे जागरणसन्ततावितिवाच्यम्॥ रात्रेश्चतुर्थे यामे यदा वाक्यं प्रयुङ्क्ते तदा अनद्यतनत्वाल्लुङि प्राप्ते तन्निवृत्तये लुङुपसंख्यायते। क्व भवानुषितः। अमुत्रावात्सम्। जागरणसन्ततावि-ति किम्। यदा सुप्त्वा प्रबुध्य प्रयुङ्क्ते तदा लङो निवृत्तिर्मा भूत्। अमुत्रावसमिति॥

अनद्यतने लङ्॥ नास्त्यद्यतनो यस्मिन् भूते तद्वृत्तेर्धातोर्लङ्। अभवत्। बहुव्रीहिव्याख्यानान्नेह। अद्य ह्यश्वाभुज्महि। परोक्षेपि लोकविज्ञाते सम्भावितप्रयोक्तृकर्तृकदर्शने लङ् वक्तव्यः॥ लिटोपवादः। अरुणत्पवनः साकेतम्। लोकविज्ञाते किम्। चकार कटं देवदत्तः। सम्भावितेत्यादि किम्। कृष्णः कंसं जघान। नात्रेदानीन्तनस्य प्रयोक्तुर्दर्शनं सम्भाव्यते चिरातीतत्वात्। यस्तु कृष्णावतारसमकालः प्रयोक्ता स लङं प्रयुक्तवानेव। अहं कंसमिति॥

अभिज्ञावचने लृट्॥ स्मृतिबोधके उपपदे लङ्विषये लृट् स्यात्। अभिजानासि स्मरसि बुध्यसे चेतयसे वा प्रयागे वत्स्यामः॥

न यदि॥ यच्छब्दयोगे पूर्वेण प्राप्तो निषिध्यते। अभिजानासि यत्काश्यामवसाम॥

विभाषा साकाङ्क्षे॥ उभयत्रविभाषेयम्। यच्छब्दयोगे पूर्वेण निषेधादप्राप्ते अन्यत्र नित्यं प्राप्ते। अभिजानासि देवदत्त प्रयागे वत्स्यामः। तत्र माघं स्नास्याम। अवसाम। अस्नामे-

ति वा । एवं यच्छब्दप्रयोगेपि बोध्यम् । इह वासस्नानयोः लक्ष्यलक्षणभावस्य विवक्षितत्वात्साकांक्षता बोध्या ॥

परोक्षे लिट् ॥ भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात् । बभूव । अथ कथम्, अभून्नृपो विबुधसख इति भट्टिः । अभूदभूमिः प्रतिपक्षजन्मनामिति माघश्चेति चेत् । शृणु । वस्तुतो लिड्विषयस्यापि भूतत्वसामान्यांशमात्रविवक्षायां लुङ् । अत्यन्तापन्हवे लिड्वक्तव्यः ॥ नाहं कलिङ्गान् जगाम । अपरोक्षार्थमुपसङ्ख्यानम् । कलिङ्गाख्ये कुत्सिते देशविशेषे त्वया चिरं स्थितमित्यभियोगे कृते नावस्थानमात्रं निषिध्यते किन्तु तत्प्रयोजकं गमनमपीति सोयमत्यन्तापह्नवः ॥

हशश्वतोर्लङ् च ॥ लिड्विषये लङ् चास्मिट् । इति हाकरोच्चकार वा । शश्वदकरोच्चकार वा ॥

प्रश्ने चासन्नकाले ॥ पृच्छ्यते इति प्रश्नः । कर्मणि नङ् । पञ्चवर्षाभ्यन्तरमासन्नकालः । प्रश्नविषयीभूतासन्नकालभूतानद्यतनपरोक्षार्थाद्धातोर्लङ्लिटौ स्तः । अगच्छत्किं देवदत्तः, जगाम वा ॥

लट् स्मे ॥ लिटोपवादः । यजति स्म युधिष्ठिरः । इयाज किलेत्यर्थः ॥

अपरोक्षे च ॥ स्मे लट् स्यात् । लङोपवादः । एवं स्म पिता ब्रवीति ॥

ननौ पृष्टप्रतिवचने ॥ अनद्यतनपरोक्षइति निवृत्तम् । भूतसामान्ये लट् स्यात् । अकार्षीः किम् । ननु करोमि भोः ॥

नन्वोर्विभाषा ॥ भूतसामान्ये पृष्टप्रतिवचने लड्वा । अकार्षीः किम् । न करोमि नाकार्षम् । अहं नु करोम्यकार्षं वा ॥

पुरि लुङ् चास्मे ॥ अनद्यतनग्रहणं मण्डूकप्लुत्यानुवर्तते । स्मवर्जिते पुराशब्दे भूतानद्यतने लुङ्लटौ वा स्तः । तयोरभावे यथाप्राप्तम् । वसन्तीह पुरा छात्राः । अवात्सुः । अवसन् । ऊषुर्वा । अस्मे किम् । नडेन स्म पुराधीयते । नडाख्यं तृणविशेषं हस्ते गृहीत्वेत्यर्थः ॥

वर्त्तमाने लट् ॥ वर्त्तमानार्थधातोर्लट् स्यात् । पचति । अधिश्रयणाधिरधःश्रयणान्त एकफलावच्छिन्नो वितततरूपो व्यापारकलापः पचेरर्थः । तस्य च वर्त्तमानत्वमारब्धापरिसमाप्तत्वम् । तच्च लटो द्योत्यम् । स्यादेतत् । आत्मा अस्तीत्यादौ आरम्भाभावात्कथं लट् । आत्मा वा इदमेक एवाग्रआसीदित्यादौ भूतप्रत्ययाः । आत्मा भाविकल्पेपि भविष्यतीत्यादिभविष्यत्प्रत्ययाश्च कथमिति चेत् । एकस्या अप्यात्मसत्तायास्तत्तत्क्रियोपहितायां औपाधिकं भेदं पुरस्कृत्य सर्वनिर्वाहात् ॥

इति श्रीशब्दकौस्तुभे तृतीयस्याध्यायस्य द्वितीये पादे द्वितीयमान्हिकम् ॥

लटः शतृशानचावप्रथमासमानाधिकरणे ॥ द्वितीयाद्यन्तेन समानाधिकरणे लटि सति तस्य लटः स्थाने शतृशानचौ स्तः । पचन्तं पचमानं पश्य । पचता पचमानेन कृतम् । यद्यपि तिङन्तोपस्थाप्ययोः कर्त्तृकर्मणोरप्रथमान्तेन सामानाधिकरण्यं नास्त्येव तथापि कृदन्तोपस्थाप्ययोः सामानाधिकरण्यदर्शनात्कृत्स्थानिनया प्रक्रियावस्थायां कल्प्यमानो लकारः प्रकृत्यर्थं प्रति प्रधानभूते कर्तृकर्मणी अभिदधानः कल्प्यते । लकारवाच्यांशस्य तिङ्कृतोरविशेषेपि गुणप्रधानभावे वैलक्षण्यमस्तीति फलितोर्थः । अप्रथमेत्यादि किम् । देवदत्तः पचति । कथन्तर्हि सन् ब्राह्मण इत्यादि । अत्राहुः । लटः शतृशानचाविति योगो विभज्यते

नन्वोर्विभाषेत्यतो विभाषानुवर्तते । व्यवस्थितविभाषेयम् । तेन यथादर्शनं प्रयोगोप्यवातिष्ठते । अप्रथमेत्यादि तु योगान्तरं विषयविशेषे शतृशानचोर्नित्यतायाः स्पष्टीकरणाय । एवं सम्बोधनेचेत्याद्यपि बोध्यम् । माङ्याङोश्च इति वक्तव्यम् ॥ मा जीवन् । मा पवमानः । माङ्लुङोपवादोत एव लट् ॥

सम्बोधने च ॥ हे पचन् । हे पचमान ॥

लक्षणहेत्वोः क्रियायाः ॥ लक्षणं चिन्हम् । हेतुः फलं साधनञ्च । क्रियाया लक्षणे हेतौ च यो धातुस्तस्माल्लटः शतृशानचौ स्तः । शयाना भुञ्जते यवनाः । इह शयनं भुजिक्रियायाः परिचायकम् । अर्जयन्वसति । अर्जनं वासस्य फलम् । विद्वान्मुच्यते । ज्ञानं मोक्षसाधनम् । इह लक्षणत्वादिकं द्योत्यम् । लडर्थस्तु कर्त्रादिरेवेति बोध्यम् । परिचायकशयनाश्रययवनरूपानेकाश्रयनिष्ठा वर्तमाना भुजिक्रिया । फलीभूतार्जनाश्रयकर्तृको वासः । जनकज्ञानाश्रयनिष्ठो मोक्षश्च वाक्यार्थ इति दिक् ॥

तौ सत् ॥ शतृशानचौ सत्संज्ञौ स्तः । संज्ञाप्रदेशाः पूरणगुणेत्यादयः । तौग्रहणसामर्थ्यादिह शतृशानचोरानुपूर्वीमात्रं गृह्यते । अन्यथा प्रकृतयोर्वर्त्तमानार्थयोरेव संज्ञा स्यात् । लृडादेशयोस्तु न स्यात् । तेन तद्योगे पूरणगुणेति न प्रवर्तेत । लृटः सद्वेति सूत्रं तु सत्सदृशौ स्त इत्येवंपरं स्यात् । यथा अमी पिष्टपिण्डाः सिंहाः क्रियन्तामित्युक्ते सिंहशब्देन तदाकारतामात्रं लक्ष्यते मुख्यार्थस्य बाधात्तथेहापीति दिक् ॥

पूङ्यजोः शानन् ॥ पवमानः । यजमानः । नन्वेते शानन्नादयः किन्तृजादिवत्स्वतन्त्रा उत लादेशाः । नाद्यः । सोमं पवमान इत्यादौ कृद्योगलक्षणषष्ठ्यापत्तेः । न हीदानीं नलो-

केति निषेधोस्ति । अलादेशत्वात् । न द्वितीयः । भावकर्मणोरपि प्रसङ्गात् । पचमान इत्यत्र ताच्छील्यादौ चानशोलसार्वधातुकस्वरापत्तेश्च । आत्मनेपदसंज्ञाप्रसङ्गेन परस्मैपदिभ्यश्चानशोनुत्पत्तिप्रसङ्गाच्चेति चेत् । अत्राहुः । स्वतन्त्रा एवैते । नलोकेति सूत्रे तृन्निति प्रत्याहारः शतृतृशब्देन तृनो नकारेणेत्युक्तम् । अतो न षष्ठीति ॥

ताच्छील्यवयोवचनशक्तिषु चानश् ॥ ताच्छील्यादिषु द्योत्येषु कर्तरि चानश् स्यात् । मण्डयमानः । शिखण्डं वहमानः । शत्रुं निघ्नानः ॥

इङ्धार्योः शत्रकृच्छ्रिणि ॥ इङ्धारिभ्यां शतृप्रत्ययः स्यादनायासेन क्रियां निर्वर्तयति कर्तरि । अधीयन्पारायणम् । धारयन्नुपनिषदम् । अकृच्छ्रिणीति किम् । कृच्छ्रेणाधीते धारयति वा ॥

द्विषोऽमित्रे ॥ शत्रौ कर्तरि द्विषेः शतृप्रत्ययः स्यात् । द्विषन् शत्रुः । अमित्रे किम् । द्वेष्टि पतिं भार्या ॥

सुञो यज्ञसंयोगे ॥ सुनोतेः शता स्याद्यज्ञाधिकारिणि कर्तरि । ता अश्वदा अश्ववत्सोमसुत्वा । सर्वे सुन्वन्तः सत्रे यजमाना इत्यमुच्यन्ते । संयोगे किम् । अयजमानेषु ऋत्विक्षु मा भूत् ॥

अर्हः प्रशंसायाम् ॥ पूजामर्हन् । प्रशंसायां किम् । अर्हति वधं चोरः ॥

आक्रोशेस्तच्छीलतद्धर्मतत्साधुकारिषु ॥ भ्राजभासेति वक्ष्यमाणं क्विपमभिव्याप्य तच्छीलादिष्वित्यधिक्रियते । प्रत्ययार्थस्य कर्तुर्विशेषणञ्चेदम् । शीलादीनां त्रयाणां विशेषणं समर्पी निर्दिष्टैस्तच्छब्दैः प्रकृतिभूतधात्वर्था निर्दिश्यन्ते ॥

तृन् ॥ धातोस्तृन्स्यात्तच्छीलादिषु कर्तृषु । याता सुतमिन्द्रो अस्तु सोमम् । योद्धारः क्षत्रियाः । कर्ता कटम् । तृन्विधौ ऋत्विक्षु चानुपसर्गस्येति वक्तव्यम् ॥ अताच्छील्याद्यर्थ आरम्भः । होता पोता । अनुपसर्गस्येति किम् । उद्गाता प्रतिहर्ता । अत्र तृन्तृचौशासिक्षदादिभ्यः संज्ञायां चानिटावित्युणादिसूत्रेण तृजेव भवति । तत्र तृन्तृचौ शंसीति पाठान्तरम् । स्वरे विशेषः । तृनि हि सति तादौचनितिकृत्यताविति गतेः प्रकृतिस्वरः स्यात् । तृचि तु कृत्स्वरो भवति । तृन्तृचावित्युणादिसूत्रस्यैव विषयव्यवस्थार्थमिदम् । अनुपसर्गेभ्यस्तृन् सोपसर्गेभ्यस्तु तृजिति । नयतेः षुक्व ॥ अयं गुणे कृते बोध्यः । नेष्टा नेषतिः । प्रकृत्यन्तरमितिवा । त्विषेर्देवतायामकारश्चोपधाया अनिट्त्वञ्च ॥ त्वष्टा । अत्रानिट्त्वमित्युक्तं वक्ष्यमाणसर्वोपसंख्यानशेषो बोध्यः । त्विषेः स्वत एवानिट्त्वात् । तेन पोता क्षत्तेति सिद्धम् । क्षदेश्च युक्ते ॥ धातुष्वपठितोपि क्षदिरत एव वाक्यात्स्वीकार्यः । आत्मनेपदी चायम् । उक्षाणंवावेहतं वाक्षदन्त इति बह्वृचब्राह्मणप्रयोगात् । शतंमेषान्वृक्येचक्षदानमिति मन्त्राच्च । क्षत्ता स्यात्सारथौद्वाःस्थे क्षत्रियायाञ्च शूद्रजे इत्यमरः ॥

अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच् ॥ अलङ्करिष्णुः । निराकरिष्णुरित्यादि । इह पचत्यादयस्त्रय उत्पूर्वा उपात्ताः । तत्र उदः पच पत मद इत्येव वक्तव्ये प्रत्येकमुत्पूर्वपाठ उपसर्गान्तरनिवृत्त्यर्थः । तेन समुत्पतिष्णुरित्यादि न भवतीत्याहुः । पचेरनन्तरं पतिस्तान्तः पठ्यते । उत्पतिष्णुसाहिष्णू च चेरतुः खरदूषणाविति भट्टिः । एलानामुत्पतिष्णव इति रघुकाव्यम् । के चित्तु तत्स्थाने दान्तं पठित्वा पद गतावस्मात्प्रत्ययमाहुः ॥

णेश्छन्दसि ॥ इष्णुच् स्यात् । वीरुधः पारयिष्णवः । अयामन्तेत्यायः ॥

भुवश्च ॥ छन्दसीत्येव । भाविष्णुः । योगविभाग उत्तरार्थः। कथन्तर्हि जगत्प्रभोरप्रभविष्णु वैष्णवमिति माघः, विष्णवे प्रभविष्णवइत्यादि च । निरंकुशाः कवय इति हरदत्तः । चकारोनुक्तसमुच्चयार्थः । तेन भ्राजिष्णुरिति काशिका । एवञ्च क्षयिष्णुरित्यपि केषाञ्चित्प्रयोगः सङ्गच्छते । किन्तु चकारस्यानुक्तसमुच्चयार्थत्वं भाष्ये नोक्तमतो बहवो न पुरस्कुर्वन्ति ॥

ग्लाजिस्थश्च क्स्नुः ॥ चाद्भुवोपि । गिदयम् । क्त्वन्तु सांहितिकचत्वेन बोध्यम् । यदत्र वक्तव्यं तत् क्ङितिचेति सूत्रे वोचाम । ग्लास्नुः । जिष्णुः । स्थास्नुः । भूष्णुः । दंशेश्छन्दस्युपसङ्ख्यानम् ॥ दंक्ष्णवः पशवः ॥

त्रसिगृधिधृषिक्षिपेः क्नुः ॥ त्रस्नुः । गृध्नुः । धृष्णुः । क्षिप्नुः ॥

शमित्यष्टाभ्यो घिनुण् ॥ घकार उत्तरत्र कुत्वार्थः । उकार उगितश्चेति ङीविकल्पार्थः । शमिनितरा । शमिनीतरा । शमिनितमा । शमिनीतमा । न चैवं शमिनौ शमिन इत्यत्रोगिदचामिति नुम्प्रसङ्गः । नुम्विधौ झल्ग्रहणस्यापकर्षात् । इह च झलन्तत्वाभावादिति भाष्ये स्थितम् । वृत्तिकारस्तु उकार उच्चारणार्थः नानुबन्ध इत्याह । शमिनितरादौ घरूपेति नित्यमेव ह्रस्वत्वमिष्यतइति तस्याशयो न्यासकृतोक्तः । तदेतत्सर्वं भाष्यविरोधादप्रमाणमिति प्रामाणिकाः । शमी । तमी । दमी । श्रमी । भ्रमी । क्षमी । क्रमी । इह सप्तसु नोदात्तोपदेशस्येति वृद्धिनिषेधः । प्रमादी । कथन्तर्हि उन्मादीति । अलंकृत्या

दिना उत्पूर्वाद्विशेषविहितस्येष्णुच एवोचितत्वादिति चेत् । वासरूपन्यायेन घिनुणपि भविष्यति । ननु ताच्छीलिकेषु वासरूपन्यायो नास्तीति ज्ञापयिष्यत इति चेन्न । तस्यानित्यताया अपि ज्ञापयिष्यमाणत्वेन सर्वसौष्ठवात् ॥

सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च ॥ सम्पर्की । अनुरोधी । आयामी । आयासी । परिसारी । संसर्गी । परिदेवी । संज्वारी । परिक्षेपी । परिराटी । परिवादी । परिदाही । परिमोही । दोषी । द्वेषी । द्रोही । दोही । योगी । आक्रोडी । विवेकी । त्यागी । रागी । भागी । अतिचारी । अपचारी । आमोषी । अभ्याघाती । येत्र सम्पूर्वास्तेषां द्वन्द्वं कृत्वा सम एभ्य इति वक्तव्यम् । एवमाङ्पूर्वाणां परिपूर्वाणां च । एवञ्च सिद्धे प्रत्येकपाठ उपसर्गान्तरविशिष्टे मा भूदित्येवमर्थः ॥

वौ कषलसकत्थस्नभः ॥ कष हिंसायां, विकाषी । विलासी । विकत्थी । विस्नम्भी ॥

अपे च लषः ॥ चाद्वौ । अपलाषी । विलाषी ॥

प्रे लपस्रुदुमथवदवसः ॥ प्रलापी । प्रसारी । प्रद्रावी । प्रमाथी । प्रवादी । वस निवासे । प्रवासी । आच्छादनार्थस्तु न गृह्यते । लुग्विकरणत्वात् ॥

निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ् ॥ अत्र नश्यतेर्ण्यन्तस्य भाविना णिलोपेन निर्देशः । अकारस्तूच्चारणार्थः । केचित्तु विनाशीति ण्यन्तमेव पठन्ति । असूयति । कण्ड्वादियगन्तः । समाहारद्वन्द्वः । व्यत्ययेन पुंस्त्वम् । पञ्चम्यर्थे च प्रथमा । निन्दक इत्यादि । स्यादेतत् ।

असूयतिभिन्नानामिह ग्रहणं व्यर्थम् । ण्वुलैव रूपसिद्धेः । असूयतेस्तु ण्वुलि प्रत्ययात्पूर्वमुदात्तं वुञि तु ञ्नित्यादिरिति स्वरे विशेषः । इतरेषां त्वेकाच्त्वान्न स्वरे भेदः । न च तृना ण्वुलो बाधः । वासरूपन्यायस्य जागरूकत्वादिति चे, त्सत्यम् । ताच्छीलिकेषु वासरूपन्यायेन ण्वुल्तृजादयो न भवतीति ज्ञापनार्थमेतत् ॥

देविकुशोश्चोपसर्गे ॥ आदेवकः । परिक्रोशकः । उपसर्गे किम् । देवयिता । क्रोष्टा । दीव्यतेर्हेतुमण्णिजन्तस्य दिवु कूजन इत्यस्य चुरादिण्यन्तस्य च ग्रहणमित्याहुः ॥

चलनशब्दार्थादकर्मकाद्युच् ॥ चलनः । चोपनः । शब्द शब्दने, चुरादिः । शब्दनः । रवणः । अकर्मकात्किम् । पठिता विद्याम् ॥

अनुदात्तेतश्च हलादेः ॥ अकर्मकाद्युजित्यनुवर्त्तते । वर्तनः । अनुदात्तेतः किम् । भविता । हलादेः किम् । एधिता । आदिग्रहणं किम् । हलन्तादित्यर्थो मा भूत् । तथाहि सति एधितेत्यादावतिप्रसङ्गः । जुगुप्सनो मीमांसन इत्यत्राव्याप्तिश्च स्यात् । गुपादिष्वनुबन्धः समुदायस्य विशेषक इत्युक्तत्वादस्तीहानुदात्तेत्वम् । न चार्द्धधातुके विवक्षिते ऽतोलोपे सति हलन्तत्वमस्त्येव । ततश्च व्यावर्त्यालाभात् तदन्तविधिबाधे हलादेरित्येवार्थोस्त्विति चे, न्मैवम् । आर्धधातुके परे लोपाभ्युपगमात् । अत्र चेदमेवादिग्रहणं ज्ञापकम् । अत एव परानिमित्तत्वादल्लोपस्य स्थानिवत्त्वे घटयतीत्यादौ न वृद्धिः । नपदान्तसूत्रे वरेग्रहणमपीह लिङ्गमित्युक्तम् । यत्त्वचोयदिति सूत्रे दित्स्यान्धित्स्यामित्यादावजन्तभूतपूर्वादपि प्रत्ययार्थमनग्रहणमित्युक्तं तदार्धधातुकइत्यस्य विषयसप्तमीत्वमभ्युपेत्य । वस्तुतस्तु तत्राज्ग्रहणं व्यर्थमेवेति

दिक् । अकर्मकात्किम् । वसिता वस्त्रम् ॥

जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः ॥ जु इति सौत्रो धातुः । जवनः । चङ्क्रमणः । दन्द्रमणः । सरणः । गर्द्धनः । ज्वलनः । शोचनः । लषणः । पतनः । पदनः । ननु पदिग्रहणं व्यर्थम् । पूर्वसूत्रेण युचः सिद्धत्वादिति चेत् । सकर्मकार्थमिति वृत्तिकारः । भाष्ये त्वनभिधानादेव सकर्मकान्न भविष्यतीत्यभिप्रेत्य पदिग्रहणं ज्ञापनार्थमित्युक्तम् । तथाहि । लषपतेति सूत्रेण पदेरुकञ् विशेषविहितः युचं बाधेत । वासरूपन्यायेन युजपीति चेत् । ताच्छीलिकेषु परस्परं वासरूपविधिर्नास्तीति ज्ञापनार्थमिदमिति । तेनालङ्कृञादिभ्यस्तृन्न । प्रायिकञ्चेदमिति सूददीपेत्यत्र वक्ष्यते ॥

क्रुधमण्डार्थेभ्यश्च ॥ क्रोधनः । रोषणः । मण्डनः । भूषणः ॥

न यः ॥ यकारान्ताद्धातोर्युच् न । क्नूयिता । क्ष्मायिता ॥

सूददीपदीक्षश्च ॥ युच् न । सूदिता । दीपिता । दीक्षिता । ननु दीपिग्रहणं व्यर्थम् । नामिकम्पीतिरेणैव युचो बाधात् । ताच्छीलिकेषु वासरूपविधिर्नास्तीति पदिग्रहणेन ज्ञापितत्वादिति चेत्सत्यम् । तस्यानित्यत्वमनेन ज्ञाप्यते । तेन कम्रा कमना । इह युञ्रयोरेव सामावेशो ज्ञाप्यतइति भाष्यस्वरसः । यदाह, भवति युचो रेण समावेश इति । वृत्तिकारस्तु उपलक्षणामिदं मन्यते । तेन वौकषलसेतिघिनुणो विषयेपि अनुदात्तलक्षणो युच् भवति । विकत्थन इति यथा ॥

लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ् ॥ अभिलाषुकः । पातुकः । पादुकः । स्थायुक इत्यादि ॥

जल्पभिक्षकुट्टलुण्टवृङः षाकन् ॥ जल्पाकः । जल्पाकी । भिक्षाकः । भिक्षाकीत्यादि ॥

प्रजोरिनिः ॥ प्रजवी ॥

जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च ॥ जयी । दरी । क्षयी । विश्रयी । अत्ययी । वमी । व्यथ भयसञ्चलनयोः । नञ्पूर्वः । सूत्रे निपातनादेव नञो धातुना समासः । ततो नलोपः ततः प्रत्ययः । अव्यथी । परिभवी । प्रसवी । इह क्षि क्षये, क्षि निवासगत्योः, षू प्रेरणे, एते गृह्यन्ते । निरनुबन्धकत्वात् । क्षिषु हिंसायाम् । षूङ् प्राणिगर्भाविमोचने । षूङ् प्राणिप्रसवे, एते न गृह्यन्ते । सानुबन्धकत्वात् । प्रजोरप्यत्रैव ग्रहणं कृत्वा सूत्रभेदश्चकारश्च सुत्यजः ॥

स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ॥ स्पृह ईप्सायाम् । गृह ग्रहणे । पत गतौ । एते चुरादावदन्ताः । अयामन्तेत्ययादेशः । स्पृहयालुः । गृहयालुः । पतयालुः । निद्रालुः । तत्पूर्वको द्रा । अत्र समासस्तदोदान्तत्वञ्च निपात्यते । तन्द्रालुः । श्रद्धालुः । शीङो वाच्यः ॥ शयालुः । कथं कृपालुः स्पर्धालुरिति । कृपां स्पर्धां च लातीति विग्रहे मृगय्वादित्वात्कुः ।

दाधेट्सिध्वदसदो रुः ॥ दारुः । धारुः । सेरुः शड्डुः । सद्रुः ॥

स्पृघस्यदः क्मरच् ॥ घासिः प्रकृत्यन्तरम् । सृमरः । घस्मरः । अब्बरः ॥

भञ्जभासमिदो घुरच् ॥ भङ्गुरम् । भासुरम् । मेदुरम् ॥

विदिभिदिच्छिदेः कुरच् ॥ वेत्तेरेव ग्रहणं व्याख्यानात् । विदुरः । भिदुरः । छिदुरः । भञ्जेर्भिदिच्छिदिभ्याञ्च कर्मकर्तरि प्रत्ययाविति वृत्तिकाराः । न त्वेतद्भाष्ये दृष्टम् । तथा च माघः शुद्धे कर्तरि प्रायुङ्क्त, प्रियतमाय वपुर्गुरुमत्सराच्छिदुरपादुरयाञ्चितमङ्गना इति । कथन्तर्हि संमुग्धकान्तास्तनसङ्गभंगुरौरीति

माघ इति चेत् । न हि वयं कर्मकर्तरि नेति ब्रूमः । तस्यापि कर्तृतया तत्र प्रत्ययस्याप्रत्यूहत्वात् । किन्तु शुद्धेपि कर्तरि यथासम्भवं भवत्येवेति । स्यादेतत् । प्रकृतस्यैव घुरचो ङित्वमतिदिश्यतां विदिभिदिछिदेर्ङिदिति, किं प्रत्ययान्तरेणेति चेत् । अत्र केचिदाहुः । आतिदेशिकं ङित्त्वमनित्यमिति ज्ञापनायेदम् । तेन धवित्रं सिद्धम् । धू विधूनने, कुटादिः । इत्रस्य ङित्त्वाभावाद् गुण इति । अन्ये तु धुवित्रमित्येवेच्छन्ति ॥

इण्नशजिसर्तिभ्यः क्वरप् ॥ इत्वरः । नश्वरः । जित्वरः । सुत्वरः । टिड्ढेति ङीप् । इत्वरी ॥

गत्वरश्च ॥ गमेरनुनासिकलोपोपि निपात्यते ॥

जागुरूकः ॥ जागुरिति पञ्चम्यन्तम् । जागरूक इत्येव तु न निपातितम् । उत्तरसूत्रे ऊक इत्यस्यानुवृत्तये ॥

यजजपदशां यङः ॥ दंशेर्भाविना नलोपेन निर्देशो लाघवार्थः । यायजूकः । जञ्जपूकः । दन्दशूकः ॥

नमिकम्पिस्म्यजसकमहिंसदीपो रः ॥ नम्रः । कम्रः । स्मेरः । जसु मोक्षणे, नञ्पूर्वः क्रियासातत्ये वर्तते । ततो निपातनात्समासे कृते रः । अजस्रम् । कथमजस्रा अग्नय इति । अजस्रधारणादजस्राः ॥

सनाशंसभिक्ष उः ॥ सनप्रत्ययो गृह्यते न तु षणु दाने षण सम्भक्ताविति धातू । गर्गादिषु जिगीषुशब्दस्य पाठात् । आङः शंसुइ च्छायामित्ययं गृह्यते न तु शंसु स्तुताविति । आङा सह निर्देशात् । चिकीर्षुः । आशंसुः । भिक्षुः ॥

विन्दुरिच्छुः ॥ विद ज्ञाने । इष इच्छायाम् । आभ्यामुप्रत्ययः विदेर्नुमिइषेश्छत्वञ्च निपात्यते । विन्दुशब्दस्तु पवर्गीयादिः । विदि अवयवे अस्मान्मृगय्वादित्वात्कुप्रत्ययो

बोध्यः ॥

क्याच्छन्दसि ॥ उः स्यात् । अदेवयुं विदथेदेवयुभिः । किंयः क्य इति व्याख्यानात्कण्ड्वादियगन्तादपि भवति । यमस्य योनौ शकुनं भुरण्युम् । तुरण्यवोङ्गिरसो नक्षन्त । सपर्यंम सपर्यवः । अथ कथं सन्तः प्रणयि वाक्यानि गृह्णन्ति ह्यनसूयव इति भट्टपादाः । मृगय्वादिषु द्रष्टव्य इति हरदत्तः ॥

आदृगमहनजनः किकिनौ लिट् च ॥ आकारान्तेभ्य ऋवर्णान्तेभ्यः गमादिभ्यश्च किकिनौ स्तश्छन्दसि तौ च लिड्वत् । आदिति नायं तकारः कस्तर्हि दकार, ऋदोरबितिवत् । तेन तादपि परस्तपर इत्येतन्न । वभ्रिर्वज्रम् । पापिः सोमम् । ददिर्गाः । ततुरिः । जगुरिः । जग्मिर्युवा नृषदनम् । जघ्निर्वृत्रममित्रियम् । जाज्ञिः । स्वरूपाबाधेनातिदेशप्रवृत्तेस्तिबादयो न । यद्यप्यसंयोगाल्लिडिति कित्त्वं लभ्यतएव तथापि ऋच्छत्यृतामिति प्रतिप्रसूतमपि गुणं निषेद्धुं किकिनोः कित्करणम् । तेन तृगृ, एतयोर्गुणाभावादित्वे प्राप्ते बहुलंछन्दसीत्युत्वे ततुरिरित्यादि सिद्धम् । छन्दसि सर्वेभ्यः किकिनौ वाच्यौ ॥ सोदिः । नेमिरित्यादि । भाषायां धात्वृकृसृजनिनमिभ्यो वाच्यौ । दाधिः । चक्रिः । सस्रिः । जज्ञिः । नेमिः । इह काशिकायां धातुवृत्तौ च गमिरपि पठ्यते । जग्मिः । सासहिवावहिचाचलिपापतीनामिति वार्त्तिकम् ॥ सहिवहिचलिपतिभ्यो यङन्तेभ्यः किकिनौ निपात्येते । नीग्वञ्चीत्यादिना पतेरभ्यासस्य नीग्प्राप्तस्तदभावश्च । अत्र भाषायामित्यपेक्षते इति हरदत्तन्यासकारादयः । ननु वार्तिकद्वयेपि भाषायामिति निष्फलम् । अहिर्महीसासहिरस्तिकोन्य इति श्रीहर्षादिप्रयोगाणां निर्वाहः फलमिति चेन्न । छन्दसीत्यस्यानुवृत्तिमात्रेण तन्निर्वाहात् । प्र-

त्युत भाषायामित्यनुवृत्तौ वेदे एषां किकिनौ नेति लभ्येत । तच्चायुक्तम् । अषीलहमुग्रं पृतनासुसासहिम् । ध्रुवस्तिष्ठाविचाचलिरित्यादिप्रयोगविरोधादितिचे, त्सत्यम् । छन्दसीत्यस्येहासम्बन्धस्फोरणमात्रं फलम् ॥

स्वपितृषोर्नजिङ् ॥ स्वप्नक् । तृष्णक् । धृषेश्चेति काशिका । धृष्णक् ॥

भृवन्द्योदारुः ॥ शरारुः । वन्दारुः ॥

भियः क्रुल्कुकनौ ॥ भीरुः । भीलुकः । क्रुकन्नपि वक्तव्यः ॥ भीरुकः ॥

स्थेशभासपिसकसो वरच् ॥ स्थावरः । ईश्वरः । भास्वरः । पस्वरः । कस्वरः ॥

यश्च यङः ॥ यातेर्यङन्ताद्वरच् । यायावरः ॥

भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप् ॥ व्रश्चेति षत्वम् । विभ्राट् । विभ्राजौ । भाः । भासौ । राल्लोप इति वलोपः । धूः । धुरौ । विद्युत् । ऊर्क् । पूः पुरौ । दृशिग्रहणाज्जवतेर्दीर्घः । जूः । जुवौ । जुवः । ग्रावस्तुत् ॥

अन्येभ्योपि दृश्यते ॥ दृशिग्रहणं विध्यन्तरोपसङ्ग्रहार्थम् । तच्च वार्तिककारः स्फुटीचकार । आह हि । वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घश्च ॥ द्युतिगमिजुहोतीनां द्वे च ॥ दृणातेर्ह्रस्वश्च ॥ ध्यायतेः सम्प्रसारणञ्चेति ॥ वक्तीति वाक् । शब्दप्राट् । आयतस्तूः । कटपूः । जूः । श्रीः । वचिप्रच्छोः सम्प्रसारणन्तु न । दीर्घवचनसामर्थ्यात् । अपर आह । दृशिग्रहणादेव वचिप्रच्छयोः सम्प्रसारणञ्चेति । द्युतिगमीति वार्त्तिके चकारेण दीर्घः समुच्चीयते स च जुहोतेरेव । दीर्घश्रुत्युपास्थितेनाचा तदन्तविधिविज्ञापनात् । दिद्युत् । द्युतिस्वाप्योरित्य-

भ्यासस्य सम्प्रसारणम्। जगत्। जुहूः। नन्विहाभ्याससंज्ञैव दुर्लभा। प्रत्यासत्त्या षाष्ठद्वित्वे एव तत्प्रवृत्तेः। अत एवाष्टमिके सा नेति चे, त्सत्यम्। दृशिग्रहणादेवाभ्याससंज्ञेति हरदत्तः। वस्तुतस्तु लिटिधातोरित्यतो धातोरित्यनुवृत्त्या धातोरिति द्वित्वे ऽभ्याससंज्ञा। एवञ्च न कोपि दोष इत्यवधेयम्। ददृत्। दृणातेर्दीर्यतेर्वा। ध्यायतीति धीः। इह जुहूधीरित्यनयोः करणस्य कर्तृत्वविवक्षायां प्रत्यय इति हरदत्तः॥

भुवः संज्ञान्तरयोः॥ भवतेः क्विप्स्यात्संज्ञायामन्तरे च गम्यमाने। मित्रभूर्नाम कश्चित्। धनिकाधमर्णयोरन्तरे यस्तिष्ठति विश्वासार्थं स प्रतिभूः। यस्तु ग्रामयोरन्तरे तिष्ठति तत्र न। दृशिग्रहणस्यानुवृत्तेः॥

विमसंभ्यो ऽसंज्ञायाम्॥ एभ्यो भुवो डुः स्यात् न तु संज्ञायाम्। विभुः सर्वगतः। प्रभुः स्वामी। सम्भुर्जनिता। असंज्ञायां किम्। विभूर्नाम कश्चित्। मितद्वादिभ्य उपसंख्यानम्॥ मितं द्रवतीति मितद्रुः। शम्भुः। अन्तर्भावितण्यर्थोत्र भवतिः। सुखं भावयतीत्यर्थात्॥

धः कर्मणि ष्ट्रन्॥ धयतेर्दधातेश्च कर्म्मणि कारके ष्ट्रन् स्यात्। धीयते पीयते धात्री स्तनदायिनी। धीयते धार्यते वैषज्यार्थमिति धात्री आमलकी॥

दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे॥ एभ्यः करणे ष्ट्रन्स्यात्। दात्यनेन दात्रम्। नेत्रम्। शस्त्रम्। योत्रम्। योक्त्रम्। स्तोत्रम्। तोत्रम्। सेत्रम्। सेक्तृम्। मेढ्रम्। पत्रम्। अजादित्वाद्ष्टा। नद्री। दंशेर्नलोपेन निर्देशो ज्ञापकः। क्वचिदक्ङित्यपि नलोप इति। तेन ल्युटि दशनाः। अनिदितामिति सूत्रस्थभाष्यस्वरसस्तु शबन्तोयन्निर्देशः॥

हलसूकरयोः पुवः ॥ पूङ्पूञोः करणे ष्ट्रन् स्याद्धलसूकरयोरवयवश्चेत्सः । पोत्रम् । हलस्य सूकरस्य च मुखम् ॥

अर्तिलूधूसूखनसहचरइत्रः ॥ करणइत्येव । अरित्रं मूलम् । लवित्रम् । धुवित्रम् । सवित्रम् । खनित्रम् । सहित्रम् । चरित्रम् ॥

पुवः संज्ञायाम् ॥ पूङ्पूञ्भ्यां करणे इत्रः स्यात् । दर्भपवित्रम् । येनाज्यमुत्पूयते तत्पवित्रम् । जपादिष्वनामिकांगुल्यवेष्टनञ्च ॥


कर्तरि चर्षिदेवतयोः ॥ कर्तरिकरणे च पुव इत्रः स्यात् । यथासंख्यसम्बन्धादृषौ करणे देवतायां कर्त्तरीति काशिका । कर्तरिकृदिति सूत्रस्थभाष्यकैयटयोस्तु यथासंख्यं नेति गम्यते । ऋषिर्मन्त्रः । तदुक्तमृषिणेति दर्शनात् । पूयतेनेनेति पवित्रम्पावमान्यादि । देवतायान्तु अग्निः पवित्रं स मा पुनातु ॥

क्रीतः क्तः ॥ क्रीतो धातोर्वर्तमाने क्तः स्यात् । अनेन विशेषविधानात् क्रीतः क्तस्य भूतविषयता बाध्यते । एवमुत्तरसूत्रे बोध्यम् । क्रिघृषा । घृष्टः ॥

मतिबुद्धिपूजार्थेभ्यश्च ॥ मतिरिच्छा न तु बुद्धिस्तस्याः पृथगुपात्तत्वात् । राज्ञां मत इष्टः । बुद्धो विदितः । पूजितो ऽर्चित इत्यादि । कथन्तर्हि जनैरविदितविभवो भवानीपतिरिति भारविः । तेनेत्यधिकारे उपज्ञातइति सूत्रितत्वाज्ज्ञानार्थेभ्यो भूतेपि क्तः । पूजितो यः सुरासुरैरित्यादि तु चिन्त्यमिति हरदत्तः । सामान्योपक्षं ज्ञापकमित्यनुन्यासादयः । चकारोनुक्तसमुच्चयार्थः । तथा च भाष्यम् । शीलितो रक्षितः क्षान्त आक्रष्टो जुष्ट इत्यपि । रुष्टश्च रुषितश्चोभावभिव्याहृत इत्यपि ॥ हृष्टतुष्टौ तथाकान्तस्तथोभौ संयतोद्यतौ । कष्टम्भविष्यतीत्याहुरमृता :

पूर्ववत्स्मृता इति ॥ रुष रोषे । रुष्यमत्वरेतीड्विकल्पः । कष्टश-ब्दो भविष्यत्काले । अमृतास्तु पूर्ववत् । वर्तमानइत्यर्थः । न म्रि-यन्ते अमृताः ॥

इति श्रीशब्दकौस्तुभे तृतीयाध्यायस्य द्वितीये
पादे तृतीयमान्हिकं, समाप्तश्च द्वितीयपादः ॥



स्फोटचन्द्रिका

श्रीमन्मौन्युपाध्यायश्रीकृष्णभट्टविरचिता

काशीस्थराजकीयसंस्कृतप्रधानपाठशालाध्यापक-
पटवर्धनोपनामकतात्याशास्त्र्यपराभिधान-
पण्डितरामकृष्णशास्त्रिणा संस्कृता

चौखम्बासंस्कृतपुस्तकालयाध्यक्षेण
श्रीमता हरिदासगुप्तेन

काश्यां

राजराजेश्वरी मुद्रायन्त्रालये संमुद्र्य
प्रकाशिता ।

सं० १९५५

To be had of the Manager, Choukhamba-Sanskrit Book-Depot, Benares City.

यौगिकपदत्वम् । सत्यतं योगरूढातिव्याप्तिवारणाय । तत्र विशिष्टे शक्तिग्रहात् । एवं गौरिति रूढ्युदाहरणमप्यसङ्गतम् । व्याकरणकल्पितप्रकृतिप्रत्ययार्थप्रत्ययाभावे सति समुदायसुबन्तस्यार्थबोधकत्वे रूढपदत्वं यथा मणिनूपुरादीति रूढिलक्षणानाक्रान्तत्वात् । शास्त्रकल्पितावयवार्थानुसन्धानपूर्वकसमुदायशक्त्यार्थबोधकपदत्वं योगरूढत्वम् । यथा पंकजादीति तदाक्रान्तत्वाद्योगरूढत्वं युक्तम् । यौगिकरूढ इति तार्किकोक्तो भेदोपि न युक्तः । सकृदुच्चरितः सकृदर्थं प्रत्याययतीति न्यायान्मण्डपपदं गृहविशेषे रूढं भिन्नं मण्डपानकर्तरि भिन्नमिति अतिरिक्तभेदस्वीकारे मानाभावात् । एवं रूढिलक्षणाया कर्मणि कुशल इत्युदाहरणमप्ययुक्तम् । उक्तरीत्या कुशले रूढत्वस्य कुशादानकर्तरि यौगिकत्वस्य सम्भवात् । द्विरेफपदं भ्रमरे रूढमेव । कोशे भ्रमरपर्याये उपादानात् । नहि कोशे लाक्षणिकोपदानं पर्यायेष्वस्ति । एवं च स्ववाच्यपदवाच्यत्वसम्बन्धेन द्विरेफपदस्य भ्रमरे लक्षणेति तार्किकोक्तमपास्तम् । अक्षूरेपि उक्तसम्बन्धसत्वेन तत्राप्यतिव्याप्तेश्च । यद्वा एकाक्षरकोशावधृतशक्तिकानां सर्वेषां वर्णानामेव स्फोटत्वम् अर्थवतो वर्णा इत्यनेन भाष्ये तथा प्रतिपादनात् । न चैवं धनं वनमित्यादौ प्रातिपदिकसंज्ञापत्तिः । समुदायशक्तेः स्वाश्रयशक्तावच्छेदकानुपूर्वीभङ्गजनकार्थकार्यं प्रति प्रतिबन्धकत्वात् । यत्तु भूषणे स्फुटति अर्थो यस्मादिति स्फोटः वाचक इति यावदिति केवलयौगिकः स्फोटशब्द उक्तः । तन्न सम्यक् । साधुशब्दानामिवासाधुशब्दानामपि शक्तिसत्वेन वाचकत्वाविशेषात्स्फोटत्वापत्तेः । न चेष्टापत्तिः । शाब्दिकैस्तथानङ्गीकारात् । लाक्षणिकव्यञ्जकयोरसंग्रहापत्तेः । न च 'शब्दोत्र व्यञ्जकस्त्रिधे' ति अत्र ग्रहणात्काव्यएव व्यञ्जकः न व्याकरणे इति भ्रमितव्यम् । पदेन स्फोटो ऽखण्डो व्यज्यतइति वदद्भिस्तत्स्वीकृतत्वात् । ननु तार्किकमते ईश्वरेच्छा शक्तिः । मीमांसकमते अतिरिक्ता पदार्थान्तरं, नवीनतार्किकैरीश्वरेच्छा ज्ञानं वा, कृतिर्वेति विनिगमनाविरहान्मीमांसकमतमेवाङ्गीकृतम् । उभयथापि साधुष्वेव सा नासाधुषु । अन्यथा शक्तिमत्त्वं साधुत्वम् इति साधुत्वलक्षणाक्रान्तत्वेनासाधूनामपि साधुत्वापत्तेः । शक्तिग्राहकव्याकरणकोशादेरभावाच्चेति चेन्न । तत्र शक्त्यभावेन तेभ्यो बोधानापत्तेः । न च शक्तिभ्रमात्साधुशब्दस्मरणाद्वा बोध इति तार्किकोक्तं युक्तम् । साधुशब्दस्मरणं विनापि व्युत्पन्नानामपि बोधस्यानुभवसिद्धत्वात्, गौरवाच्च । भ्रमाद्बोध इत्यपि न । रजतभ्रमाद्गृहीतायाः शुक्ते रजतव्यवहारानाधायकत्ववच्छक्तिभ्रमाज्जातबोधस्यापि व्यवहारानाधायकत्वापत्तेः । सन्मात्रविषयिण्या ईश्वरेच्छायास्तत्र अभावस्य वक्तुमशक्यत्वात् । किञ्च शक्तिभ्रमः कस्य, सर्वव्यवहारकर्तुरीश्वरस्योतान्यस्य । नाद्यः । ईश्वरस्य भ्रमित्वानुपपत्तेः । नान्त्यः । सर्गादौ प्रयोज्यप्रयोजकास्वरूपसाधुसाधुशब्दव्यवहारकर्त्रीश्वरादन्यस्या-

भावात् । यथा पुण्यपापोभयजनिकार्थसृष्टिरीश्वरकर्तृका तथैव साध्वसाधूभयविधशब्दसृष्टिरपीश्वरकर्तृकैव । तथा च भ्रम इति अयुक्तमेव । न च तटस्थबालस्यानुमितिभ्रमः साधुशब्दे सा वासाधुशब्देष्वपि । शक्त्यनुमापकसामग्रीसत्वेन बाधकाभावेन च भ्रमत्वायोगात् । नन्वसाधुष्वपि शक्तिस्वीकारे शक्तिमत्वं साधुत्वमिति तार्किकलक्षणाक्रान्तत्वात्साधुत्वापत्तिः । तथा च न म्लेच्छितवै नापभाषितवै इति निषेधानवकाश इति चेन्न । लाक्षणिकानामसाधुतापत्तेः । न च वृत्तिमत्वं तत् । शक्तिलक्षणान्यतरत्वनिवेशे गौरवात् । तस्मात्पुण्यजनकतावच्छेदकजातिविशेषः साधुत्वं प्रत्ययजनकतावच्छेदकश्चासाधुत्वम् । यद्वा व्याकरणबोध्यत्वं साधुत्वं तद्भिन्नत्वमसाधुत्वम् । तथा चैकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवतीति व्याकरणेनार्थविशेषे प्रकृतिप्रत्ययेन व्युत्पादित इति ज्ञातः । तादृशार्थविशेषे प्रयुक्तः । तेन गोणीशब्दस्य गोण्यामेव साधुत्वं न गवि । विनिगमनाविरह इत्यपि न युक्तम् । अन्यतरपक्षपातिनी युक्तिर्हि विनिगमना । सा च ज्ञानस्य पूर्वाभिव्यक्तिरूपा प्रकृतेस्ति । अत एवेश्वरज्ञानं शक्तिरिति वर्द्धमानोपाध्यायाः । शाब्दिकास्तु बोधजनकत्वं शक्तिः । तच्चानादिबोधजनकतावच्छेदकधर्मवत्वम् । तदुक्तं हरिणा । इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा । अनादिरर्थैः सम्बन्धः शब्दानां योग्यता तथेति । तज्जनकतावच्छेदकधर्मवत्वरूपा योग्यता । न चागृहीतशक्तिकस्य शाब्दबोधानुदयाच्छाब्दबोधे शक्तिग्रहस्य हेतुत्वाद् बोधोत्तरं शक्तिग्रहः शक्तिग्रहोत्तरं बोध इति अन्योन्याश्रयः । व्याकरणकोशादिना शक्तिग्रहात् । अन्यथेश्वरेच्छाशक्तिरिति पक्षेपि शक्तिग्रहोत्तरं बोधः बोधोत्तरं शक्तिग्रह इति अन्योन्याश्रयस्य तुल्यत्वात् । यद्वा शब्दार्थयोरनादिसम्बन्धः शक्तिः मम तु प्रतिभाति । शक्तिः सामार्थ्यं यथा दीपादौ तेजसि प्राह्यत्वग्राहकत्वसामर्थ्यं वन्ह्यादौ दाहकत्वसामर्थ्यमिन्द्रियादौ विषयप्रकाशनं, तत्स्वरूपसदेवोपयुज्यते न तु ज्ञातम् । एवं शब्देपि ग्राह्यत्वग्राहकत्वसामार्थ्यं स्वरूपसदेवोपयुक्तं न तु ज्ञातम् । न चागृहीतशक्तिकस्यापि बोधापत्तिः । सन्निकर्षादिवत् बोधाभावप्रयोजकीभूताभावप्रतियोगितात्पर्यग्रहाभावात् । न च नानार्थेष्वेव तात्पर्यग्रहस्य कारणत्वमिति चेत् । सत्यम् । शाब्दिकमते सर्वेषां नानार्थत्वात् । अत एव वृद्धिरादैजिति सूत्रे भाष्ये ऽनेकशक्तेःशब्दस्येत्युक्तम् । अनेकेष्वनेका वा शक्तिरस्येति विग्रहः । अवच्छेदकभेदे शक्तिभेद इति तार्किकादिसिद्धान्तः । लाघवाच्छक्तिरेकैवेति शाब्दिकराद्धान्तः । न चान्यायश्चानेकार्थत्वमिति वाच्यम् । भवन्मतेपि तुल्यत्वात् । एतावान् परं भेदः त्वन्मते वृत्तिभेदेन मन्मते तु एकया वृत्त्या । न च लक्षणोच्छेदापत्तिः । इष्टत्वात् । यथा भवद्भिः सर्वानुभवसिद्धापि व्यंजना लाघवान्न स्वीक्रियते । तत्र च व्यंजनोच्छेदापत्ते-

रदूषकत्ववन्मन्मतेपि लाघवाच्छक्त्यैव निर्वाहे लक्षणोच्छेदापत्तेरदूषकत्वात् । वस्तुत एकवृक्त्यैव निर्वाहे अनेकवृत्तिकल्पनमन्याय्यमित्येव तदर्थः । अर्थपदस्य वृत्तिपरत्वात् । अन्यायश्चेत्यस्य लाघवमूलत्वात् । न चानन्यलभ्यः शब्दार्थ इति वाच्यम् । तस्य लक्षणया लभ्ये शक्तिकल्पनमन्याय्यमिति नार्थः किन्तु संसर्गमर्यादया सिद्धे शक्तिकल्पनमयुक्तमिति तदर्थात् । एवं च शाब्दिकानां शब्दवद्वन्हौ अतिरिक्तशक्तिस्वीकारः । तार्किकाणां तु शब्दे शक्तिस्वीकारः वन्हौ तु नेत्यर्द्धजरतीयस्वीकारोनुचितः । न चोत्तेजकाभावविशिष्टमन्यभावेनोपपत्तौ तत्स्वीकारोऽव्यर्थ इति वाच्यम् । गुरुभूतविशिष्टस्य कारणतावच्छेदकत्वस्वीकारापेक्षया लघुभूतस्वीकृतातिरिक्तशक्तिसम्बन्धस्यैवोचितत्वात् । किञ्च शाब्दिकमते भेदसहिष्णुरभेदस्तादात्म्यम् । गुणत्वद्रव्यत्वादिना भेदेपि गुणं विना द्रव्यानुपलम्भाद् द्रव्यं विना गुणानुपलम्भाच्च तयोस्तादात्म्यम् । एवं च समवायो यत्र तत्र तादात्म्यमिति व्यवहारः । तथा च तैः गुणं प्रति घटस्य पूर्ववर्त्तित्वासम्भवेन कारणत्वाभावादन्यथानुपपत्त्या विशिष्टस्यैव कारणतावच्छेदकत्वमङ्गीकृत्य गुणविशिष्टघटं प्रति गुणविशिष्टकपालस्य कारणत्वमिति स्वीकृतम् । तार्किकैस्तु विशिष्टस्य कारणतानवच्छेदकत्वाद्विशिष्टस्य कारणत्वासम्भवान्निर्गुणघटोत्पत्तिः स्वीकृता, तत्र च गुणाश्रयत्वरूपद्रव्यत्वलक्षणानाक्रान्तत्वाद् गुणसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्वमिति निष्कर्षः कृतः सोयुक्तइति मम भाति । तथाहि । प्रतिबन्धकोत्तेजकाभ्यां वन्हौ ज्ञातापि शक्तिरुत्तेजकाभावविशिष्टमन्यभावस्य कारणत्वं स्वीकृत्यातिरिक्ता शक्तिः खण्डिता शब्दे च सा स्वीकृता । एवं विशिष्टस्य तत्र अवच्छेदकत्वं स्वीकृत्येह नेत्युक्त्वा खपुष्पवन्निर्गुणघटोत्पत्तिः स्वीकृता । सर्वेषामनुभवानारूढत्वादेतत्सर्वमयोग्यमिति दिक् । शाब्दिकैस्तु शब्दवद्वह्नौ कर्णविवरवर्त्तिनभसिचातिरिक्ता शक्तिः स्वीकृता सैव श्रोत्रं शक्तिविशिष्टं नभो वा । एवं च दूरस्थभेरीशब्दस्य स्वस्थानस्थितस्यैव श्रोत्रस्य दीपवत् प्रकाशनसामर्थ्यम् । एवं च वीचीतरङ्गन्यायेन भेरीशब्दस्य श्रवणदेशागमनमिति न मनोरमम् । साक्षात्भेरीशब्दं शृणोमीत्यनुभवापलापापत्तेः । अनेकशब्दकल्पने गौरवाच्च । न च श्रोत्रमेव तत्र गच्छतीति युक्तम् । आकाशस्य गमनासम्भवात् । कर्णविवरे आकाशाभावप्रसङ्गाच्च । श्रोत्रेन्द्रियं गुणमात्रसाक्षात्कारजनकम् । के चित्तु श्रोत्रेंद्रियवदस्नेन्द्रियघ्राणेन्द्रिययोरपि गुणमात्रसाक्षात्कारजनकत्वमिति वदन्ति । तदयुक्तमित्यपरे । तथाहि । शब्दस्याकाशगुणत्वात्समवायेन साक्षात्सम्बन्धसत्वेन केवलप्रत्यक्षसम्भवेपि रसगन्धयोस्तु संयुक्तसमवायः सन्निकर्षः । स च द्रव्यसम्बन्धे घटतइति परम्परासम्बन्धः । तत्र द्रव्यसाक्षात्कारसन्निकर्षसत्वेन द्रव्यं विना के-

वलगुणस्यासत्वेन च केवलगुणसाक्षात्कारासम्भवः । तस्माद् द्रव्यविशिष्टगुणसाक्षात्कारजनकत्वं तयोः । न तु गुणविशिष्टद्रव्यसाक्षात्कारजनकत्वम् । अनुभवेन तथैव शक्त्युन्नयनात् । चक्षुरिन्द्रियत्वगिन्द्रिययोस्तु गुणविशिष्टद्रव्यं द्रव्यविशिष्टो वा गुण इत्युभयविधसाक्षात्कारजनकत्वम् । विस्तरस्तु मत्कृतशब्दार्थतर्कामृते द्रष्टव्यः गौरवभयान्नेह तन्यतइति दिक् । प्रकृतमनुसरामः । असाधुशब्दस्य वाचकत्वेपि व्याकरणप्रतिपाद्यत्वाभावात्स्फोटत्वाभावः । तदन्तर्गतवर्णानां तु एकाक्षरकोशावधृतशक्तिकानामर्थान्तरप्रकाशकत्वे पदस्फोट इति पदस्फोटे विवेचयिष्यते । अनुकरणशब्दानां तु अनुकार्यानुकरणयोर्भेदविवक्षया ऽनुकार्यरूपार्थप्रतिपादकत्वात् स्फोटत्वम् । ननु साध्वनुकरणस्य साधुत्वेन स्फोटत्वेप्यसाध्वनुकरणस्यासाधुत्वात्कथं स्फोटव्यवहार इति चेन्न । असाध्वनुकरणस्यापि साधुत्वस्वीकारात् । दैत्यैर्हे ऽरय इति प्रयोक्तव्ये हे ऽलय इति प्रयुक्तं, तदनुकरणं हेलयो हेलय इति कुर्वन्तो न पराबभूवुरिति न वाक्येपि तस्यासाधुत्वम् । तथा यद्वानः तद्वानः भवतु इत्यर्थे यर्वाणस्तर्वाणः भवतु इति प्रयुक्तं तदनुकरणं कुर्वन्तो यर्वाणस्तर्वाणो नाम ऋषयो बभूवुरिति न वाक्येपि तस्यासाधुत्वं कस्यापि सम्मतम् । तस्मादसाधोरनुकरणस्य साधुत्वं सर्वसम्मतम् । तत्र यदा तयोरभेदविवक्षा तदार्थप्रकाशकत्वाभावान्न स्फोटत्वम् । शुद्धब्रह्मज्ञानाय सर्वबहिर्भूतान्नमयकोशवदखण्डवाक्यबोधनाय वर्णस्फोट इति दिक् । इति वर्णस्फोटः ॥ अथ पदस्फोटो वर्णस्फोटापेक्षया अन्नमयकोशापेक्षयान्तरङ्गप्राणमयकोशवदन्तरङ्गो निरूप्यते । अन्तरङ्गत्वं तु साक्षाद्वाक्यघटकत्वेन । वर्णस्य बहिरङ्गत्वं पदनिष्पत्तिद्वारा तद्घटकत्वम् । पदस्फोटो द्विधा सखण्डो ऽखण्डश्च । व्यवहारादिना पदे एव शक्तिग्रहात् । तत्र यो ऽस्माकं सखण्डपदस्फोटः पचति राम इत्यादिसुबन्ततिङन्तरूपः, शक्तं पदमिति मते स एव वाक्यस्फोटस्तार्किकाणाम् ॥ अथाखण्डपदस्फोटो निरूप्यते ॥ स च सर्वैः पदस्थितवर्णैर्व्यज्यते । स चार्थप्रत्यायक इति शाब्दिकसिद्धान्तः । न च प्रतीतस्य प्रत्यायकत्वनास्ति अन्यथा शब्दं वेत्तीत्यत्रार्थं वेत्तीति प्रत्ययापत्तेरिति अणुदित्सूत्रस्थभाष्यविरोधः । तस्य सामान्यतः प्रतीतस्य प्रत्यायकत्वं नास्तीति नार्थः । किन्तु शब्दसंज्ञया प्रतीतस्य शब्दस्येति । प्रकरणानुरोधेन तस्य सङ्कोचात् । एवञ्च रहसि पुस्तकमीक्षमाणस्यार्थप्रत्ययानापत्तिमाशङ्क्य तत्रापि सूक्ष्मोच्चारणमस्त्येवेति नव्योक्तमपास्तम् । अनुभवविरोधाच्च । यत्त्वत्र तार्किकवेदान्तिनः । यावद्वर्णव्यङ्ग्यो वा यत्किञ्चिद्वर्णव्यङ्ग्यो वा चरमवर्णव्यङ्ग्यो वा सः । न तावदाद्यः । आशुविनाशिनां मेलनासम्भवात् । न द्वितीयः । पशब्देनैव व्यञ्जिते स्फोटे टवर्णवैयर्थ्यम् । न तृतीयः । पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहितच-

रमवर्णेनैवार्थप्रतीतिसिद्धौ किं स्फोटेनेति । तत्र । वर्णानामाशुविनाशित्वे मानाभावात् । न चोत्पन्नो गकारः नष्टो गकार इति प्रतीतिर्मानम् । तस्माच्चाकाशः सम्भूत इतिवदाविर्भावतिरोभावेनाप्युपपत्तेः । अनन्तप्रागभावध्वंसकल्पने गौरवाच्च । अनित्यत्वेपि वर्णानुभवजन्यसंस्कारजन्यस्मृतौ मेलनसम्भवात् । द्वितीयपि न द्वितीयादिवर्णवैयर्थ्यम् । पशब्दोच्चारणे किं पस्फोट उत पटस्फोट उत पटः स्फोट इति सन्देहनिवर्त्तकत्वेन सार्थक्यात् । तृतीये यथा पटपदशक्यः विजातीयतन्तुसंयोगविशिष्टचरमसंयोगस्यैव पटकार्यकारित्वेपि अतिरिक्तो ऽवयवी स्वीक्रियते तथा मयापि स्वीक्रियते । न च तथानुभवादतिरिक्तः । पटस्फोटेपि तुल्यत्वात् । गौरवाच्च । स्फोटे तु लाघवं कथमिति चेच्छृणु । ध्वनिभिरेव स्फोटो व्यज्यते । एवञ्चानन्तवर्णतत्प्रागभावध्वंसकल्पना नदी दीन सुरो रस जरा राजेत्यादौ भिन्नार्थप्रतीत्यर्थमानुपूर्व्याः पूर्ववर्णानुभवजन्यसंस्कारसहितचरमवर्णस्य कारणता च न वाच्येत्यतिलाघवम् । त्वया तु तद्वाच्यमिति गौरवम् । एतावत्प्रघट्टकेन वर्णातिरिक्तः वर्णव्यङ्ग्यः चैतन्ये सर्वभूतानां शब्दब्रह्मेति मे मतिरिति शब्दब्रह्मरूपोतिरिक्तः स्फोटस्तार्किकादिदूषणाभासनिरसनपूर्वको व्याख्यातः । प्रकारान्तरेणाप्युच्यते । अखण्डपदस्फोटो नातिरिक्तः । यत्र तार्किकादिभिर्यौगिकं योगरूढं च पदमित्युच्यते पाचकः पङ्कजमित्यादि तदेवास्माभिः सखण्डपदस्फोटत्वेन व्यवह्रियते । खण्डशक्त्यनुसन्धानपूर्वककोशादिना समुदायशक्तिग्रहात् । यस्य तु व्याकरणज्ञानशून्यस्य केवलव्यवहारेण समुदायशक्तिग्रहस्तस्य स एवाखण्डपदस्फोटः । यन्तु रूढं पदं मणिनूपुरादि वः न इत्यादि तत्सर्वेषामपि अखण्डपदस्फोटत्वेनाभिमतम् । तत्र सर्वेषामपि अवयवार्थज्ञानाभावविशिष्टव्यवहारेण समुदाये शक्तिग्रहात् । एवञ्च रूढयौगिकपदयोः सखण्डाखण्डस्फोटयोश्च पर्यायत्वे नाममात्रे विवाद इति दिक् । एवञ्च तार्किकादीनां दूषणाभासाः गर्भस्रावेणैव पराहता इति दिक् । नहि तार्किकादितर्का एव सत्तर्का इति नियमः । तत्रापि बहुशो ऽनुभवाविषयासत्तर्कादर्शनात् । तथाहि। विशिष्टस्य कार्यत्वकारणत्वेनैव सिद्धौ निर्गुणघटोत्पत्तिरयुक्तेति पूर्वमुक्तम् । तथा रूपस्य व्याप्यवृत्तित्वनियमाद् घटस्य प्रत्यक्षान्यथानुपपत्त्या स्वीक्रियमाणातिरिक्तञ्चित्रं रूपमिति कल्पनाप्ययुक्तैव । तादृशनियमे प्रमाणाभावात् । अस्तु वा नियमः । तथापि तत्तद्द्रव्यावच्छिन्नतत्तदवयवसन्निकर्षसहितचरमरूपावच्छिन्नचरमावयवसन्निकर्षेणैव घटसाक्षात्कारसिद्धौ अतिरिक्तचित्ररूपस्वीकारे गौरवात् । एवं विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात्तस्य चायं घट इत्यादावसम्भवात् घटघटत्वयोः सम्बन्धानवगाहिनिर्विकल्पकज्ञानकल्पनाप्ययोग्यत्वादयुक्तैव । नित्यसम्बन्धाति-

रिक्तसंयोगसम्बन्धदावेव तत्कल्पना दण्डीपुरुष इत्यादौ, न तु अयं घट इत्यादौ। तत्र विशिष्टज्ञानस्यैव जायमानत्वात्। एवञ्च निर्विकल्पकज्ञानं न स्वकार्यामिति महल्लाघवम्। एवमखण्डखण्डभेदेन कालद्वैविध्यकल्पनमप्ययुक्तमेव। अखण्डस्य व्यवहारानाधायकत्वात्। न च जन्यानां जनकः कालो जगतामाश्रयो मत इति जगदाधारत्वेन जनकत्वेन च तत् स्वीकारः। ईश्वरस्यैव तत्प्रसिद्धत्वात्। न च पदार्थखण्डने दिक्कालौ नेश्वरादतिरिच्येते इत्यादिना ऽस्माभिस्तदुक्तामिति वाच्यम्। तत्र दिक्कालयोरेव विशिष्येश्वराभेद उक्तः। स च सर्वं खल्विदं ब्रह्मेति श्रुतिविरुद्धः। तथा यतो वा इमानि भूतानि जायन्ते, तस्मिन्सर्वं प्रतिष्ठितमित्यादिश्रुतिभिर्जगत्कर्तृत्वं जदाधारकत्वं चेश्वरस्यैव न तु कालस्य। तेन जन्यानां जनकः काल इत्यस्य पृथिव्यादिसप्तपदार्थानामपीश्वराभेदेन विशिष्योभयोरेव तद्भेदप्रतिपादनस्य चायुक्तत्वात्। एवं खण्डकालोऽप्ययुक्तः। सूर्यगतिविशेषरूपोपाधिभेदेन हि खण्डकालः। एवञ्च सूर्यगतिविशेषस्यैवास्तु खण्डकालत्वं किन्तदतिरेकेण। तथा च खण्डकालस्य क्रियात्वम्। एवं पीलुपाकवादिभिः परमाणौ पाकं स्वीकृत्य श्यामघटनाशः रक्तघटोत्पत्तिः स्वीकृता, तत्र चक्रदण्डादिनिमित्तकारणाभावात्कथमुत्पत्तिः। निमित्तकारणं विनापि तत्स्वीकारे दण्डचक्रादीनां निमित्तकारणतैवोच्छिद्येत। एवं विधानेकानुभवानारूढगुरुभूततर्काश्रयणं लाघवमूलातिरिक्ताखण्डस्फोटखण्डनं दूषणाभासैरनुचितमिति दिक्। वाक्यार्थज्ञानं प्रति पदार्थज्ञानस्य कारणत्वात्पदस्फोटं निरुप्य वाक्यास्फोटो निरूप्यते। स चाखण्डसखण्डभेदेन द्विधा। तत्राखण्डः पदातिरिक्तो ऽखण्डपदव्यंग्यो लाघवात्स्वीक्रियते। तच्चाखण्डपदस्फोटे निरूपितम्। अन्यच्चाकांक्षायोग्यतासत्त्वानां कारणता न वाच्येति महल्लाघवम्। सखण्डस्तु प्रसिद्ध एव। यद्वा। हरेवेत्यादौ एकादेशे कृते पदविभागो दुर्वारस्तत्राखण्डवाक्यस्फोटोऽन्यत्र सखण्ड इति विवेकः। एवञ्च दूषणानां गर्भस्राव एव। तत्र वाक्यं नामैकातिङन्तार्थमुख्यविशेष्यकम्। यथा पचति भवतीति। तत्रापि पचतीत्यस्य विशेष्यत्वेपि मुख्यविशेष्यत्वाभावान्नाव्याप्तिः। तार्किकास्तु पूर्वापरग्रन्थैकवाक्यताप्रतिपत्तये ऽर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यादिति मिमांसासूत्रमुपन्यस्य विशेष्यभूतभावनैकत्वादिति अर्थैकत्वादित्यस्य तेषामर्थं त्यक्त्वा तात्पर्यविषयैक्यमिति स्वयं तदर्थं व्याख्याय प्रत्यक्षानुमानयोरेकवाक्यत्वमुक्तम्। स्वातन्त्र्ये यद्यत्सङ्कृतिमत्तदेकं वाक्यामिति वक्तव्यं न तु यत्किंचिदर्थकल्पनमुचितं दोषदुष्टञ्च। तथाहि। पठनतात्पर्ये यथैव देवदत्तः पठति तव पुत्रस्तथैव पठतीत्यत्राप्येकवाक्यत्वापत्तिः। न चेष्टापत्तिः। समानवाक्यत्वात्तत्रआदेशापत्तेः। तथा स्योनन्ते सदनं करोमि घृतस्य धारया सुषेवं कल्पयामीति सदनप्रतिपादकोमन्त्रः।

प्रत्यक्षग्रन्थवत्।तस्मिन्सीदामृतेप्रतितिष्ठश्रीहीणां मेधसुमनस्यमान इति सादनप्रतिपादकोमन्त्रः । अनुमानवत् । प्रमाणनिरूपणवद्यागाङ्गनिरूपणं तात्पर्यविषयः । एवमनुमानस्य प्रत्यक्षापेक्षत्वेपि प्रत्यक्षस्य तदनपेक्षत्ववत् सादनप्रतिपादकमन्तस्य सदनप्रतिपादकापेक्षत्वेपि सदनप्रतिपादकस्य न तदपेक्षत्वम् । एवं चानयोरप्येकवाक्यत्वापत्तिः । न चेष्टापत्तिः । अर्थैक्यादित्यस्य भवदुक्तप्रत्युदाहरणविरोधात् । किं चेयं पदैकवाक्यता उत वाक्यैकवाक्यता उत ग्रन्थैकवाक्यता । नाद्यः । क्रियाकारकाणामेव तत्सम्भवात् । तयोरेवं परस्परमाकांक्षासम्भवात् । उभयाकांक्षायामेव तत्सम्भवेनान्यतराकाङ्क्षायां तदसम्भवाच्च । न द्वितीयः । इतरनिरपेक्षतया सिद्धेनैकवाक्येन सापेक्षेतरवाक्यस्यान्वयो हि सा । प्रकृते च वाक्यसंदर्भरूपग्रन्थयोरेव सा । न तु वाक्ययोः । अनुभूनस्थितवाक्यानां परामर्शजन्यं ज्ञानमनुमितिरित्यादिवाक्यानां प्रत्यक्षवाक्याकाङ्क्षाभावात् । आसन्त्यभावाच्च । किं च वाक्यैकवाक्यता हि प्रकरणम् । अन्यतराकाङ्क्षाप्रकरणमिति तल्लक्षणात् । तस्याप्येकवाक्यत्वस्वीकारे वाक्यात्प्रकरणस्य दुर्बलत्वप्रतिपादकश्रुतिलिङ्गवाक्यप्रकरणेत्यादिबलाबलाधिकरणविरोधः । न तृतीयः । प्रत्यक्षानुमानयोराकाङ्क्षा आर्थी न तु शाब्दी । तस्मादत्र सूत्रलिखनं यत्किं चिदर्थकल्पनमनुचितम् । शिरोमणिग्रन्थस्तु यद्यत्सङ्गतिमत्तदेकवाक्यमित्यनेनैव सिद्धत्वादिति दिक् । प्रकृतमनुसरामः । व्यवहारेण वाक्ये शक्तिग्रहाद्वाक्यस्यैव वाचकत्वाद्वाक्यस्फोटः । न च पूर्वं गृहीतापि वाक्ये शक्तिरावापोद्वापाभ्यां त्यक्ता पदे गृह्यतइति वाच्यम् । एवं सति पदार्थज्ञानम्प्रति वाक्यार्थज्ञानस्य हेतुतापत्तौ वाक्यार्थज्ञानम्प्रति पदार्थज्ञानस्य हेतुत्वमिति सर्वसिद्धान्तभङ्गापत्तेः । वाक्यस्फोटो द्विधा । सखण्डो ऽखण्डश्च । अखण्डो द्विधा । वर्णातिरिक्तो ऽनतिरिक्तश्च । यदा वर्णा न स्वीक्रियन्ते गौरवात्, लाघवात् ध्वनिभिरेवाखण्डो वाक्यस्फोटो व्यज्यते इति मतं, तदातिरिक्तः । अस्मिन्पक्षे वर्णाभावेन यावद्वर्णव्यङ्ग्य इत्यादिदूषणाभासा गर्भस्रावेणैव पराहताः । यदा तु ध्वनिभिर्वर्णा व्यज्यन्तइति मतं तदा घटमानयेति सखण्डवाक्यस्फोटः । क्रियाकारकयोर्विभागस्य कर्तुं शक्यत्वात् । हरेव विष्णोवेत्यादौ एकादेशे कृते प्रातिपदिकाख्यातयोर्विभागाशक्यतयानतिरिक्तवाक्यस्फोटः क्रियाकारकज्ञानशून्यस्यावैयाकरणस्य घटमानयेत्ययमपि अनतिरिक्ताखण्डवाक्यस्फोट एव । पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च । वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चनेत्ययमखण्डातिरिक्तवाक्यस्फोटप्रकाशः । यथा वर्णे अवयवा न सन्ति तथेत्यर्थः । पश्य मृगो धावति पचति भवतीत्यादावपि अखण्डसखण्डातिरिक्तानतिरिक्तत्वं पूर्ववदेव बो-

द्धव्यम् । मृगकर्तृकवर्त्तमानधावनक्रियायाः दृशिक्रियायां कर्मतासम्बन्धेनान्वयः । देवदत्तकर्तृकपचिक्रियाया वर्त्तमानभवनक्रियायामन्वयः । तदुक्तम् । सुबन्तं हि यथानेकं तिङन्तस्य विशेषणम् । तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणमिति ॥ यन्तु धावनानुकूलकृतिमान् मृग इति प्रथमान्तविशेष्यकशाब्दबोध इतिपक्षे मृगस्य दृशिधात्वर्थनिरूपितकर्मत्वात् द्वितीयापत्तिः । तामिलध्याहारे च वाक्यभेदापत्तिरित्याशङ्क्य पश्य लक्ष्मणपम्पायां बकः परमधार्मिक इत्यादाविव वाक्यार्थस्य कर्मत्वान्न वाक्यभेद इति कैश्चित्समाहितम् । तन्मुधैव । अन्तरङ्गधावनक्रियानिरूपितमृगस्य कर्तृत्वात्तस्य चाख्यातेनोक्तत्वात्प्रथमोत्पत्तौ बहिर्भूतदृशिधात्वर्थनिरूपितकर्मत्वेपि अन्तरङ्गत्वाज्जातसंस्कारबाधे मानाभावेनैव शक्यत्वाच्च श्वमांसादिभिः क्षुद्रं हन्तुमितिवदुपपत्तेः । एवञ्चात्र प्रथमान्तविशेष्यकपक्षेपि शाब्दिकदूषणाभावेपि एकदेवदत्तकर्तृकपचिक्रियाकर्तृकं भवनमित्यर्थे पचतिभवतीत्येकवाक्यतानापत्तेः । न च पाकानुकूलकृतिमान्देवदत्तो भवतीत्यर्थे निष्पन्ने सविशेषणे विधिनिषेधौ विशेषणमुपसङ्क्रामतः सति विशेष्ये बाध इति न्यायेन क्रियाया एवकर्तृत्वं भविष्यति । एकवाक्यतायां फलाभावाच्च । न च समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति निघातः फलम् । तिङ्ङतिङ इति अतिङ्ग्रहणेन तदभावात् । सत्यम् । त्वत्सम्बन्धिनी देवदत्तकर्तृका पचिक्रिया भवतीत्यर्थे देवदत्तः पचति ते भवतीति प्रयोगे समानवाक्यत्वाभावेनादेशानापत्तेः । अनेकदेवदत्तकर्तृकैका पचिक्रियेत्यर्थे देवदत्ताः पचन्ति भवतीति प्रयोगोपि न स्यात् । अनेककर्तृत्वेन भवतीत्यत्र बहुवचनापत्तेः । पश्य मृगो धावतीत्यत्र निघातरूपप्रयोजनसत्वाच्च । किञ्चात्र वाक्यार्थस्य कर्मत्वमिति तार्किकोक्तं न युक्तिमत् । तथाहि । वाक्यार्थोतिरिक्तोनतिरिक्तो वा । नाद्यः । तस्य वृत्त्यनुपस्थापितत्वेन दृशिक्रियायां कर्मतयान्वयानुपपत्तेः । वृत्त्युपस्थापितस्यैव शाब्दबोधविषयत्वनियमात् । अन्यथा घटपदात्समवायेनोपस्थिताकाशस्यापि शाब्दबोधविषयत्वापत्तेः । न द्वितीयः । विभक्त्यर्थमद्वारीकृत्य नामार्थस्य धात्वर्थेन समम्भेदसम्बन्धेनान्वयोऽव्युत्पन्नः । अन्यथौदनः पचतीत्यापत्तेः । न च तत्र वाक्यार्थस्य कर्मत्वं न नामार्थस्येति वाच्यम् । रमणीय ओदनः पचतीत्यस्यानापत्तेः । पश्यलक्ष्मणपम्पायामित्यादौ तमिति पदाध्याहारेण वाक्यभेद एव । एवञ्च वाक्यार्थस्य कर्मत्वमित्यपि चरिताभिधानम् । एवं नीलो घटो भवतीति वाक्ये नीलकर्तृकभवनाश्रयो घट इति व्युत्पत्तिवादोक्तमपि न युक्तिमत् । नामार्थस्येत्यादिव्युत्पत्तिबाधे मानाभावात् । नीलो घटो भवनाश्रय इति बोधसम्भवाच्च । सविशेषणे हि विधिनिषेधौ विशेषणमुपसङ्क्रामतः सति विशेष्ये बाधे इति विशेषणे नीले एव भवनस्यान्वयो भ-

विष्यतीति दिक् । एवं तत्त्वमसि, सोयं देवदत्त इत्यादौ सखण्डाखण्डत्वं पूर्ववदेव बोध्यम् । तत्त्वमसीत्यत्र तत्पदवाच्यसर्वज्ञत्वादिविशिष्टचैतन्यस्य त्वंपदवाच्येनान्तःकरणविशिष्टचैतन्येनैक्यासम्भवादैक्यसिद्ध्यर्थं स्वरूपे जहदजहल्लक्षणेति साम्प्रदायिकाः । नन्वनयोरैक्ये किं मानम् । न च नामार्थौति व्युत्पत्तेः । तस्याः किं नामार्थयोरेवाभेदान्वय, उत नामार्थयोरभेद एवेति । नाद्यः । स्तोकं पचति वैश्वदेवी आमिक्षेत्यादौ व्यभिचारात् । नान्त्यः । घटपटौ इत्यादौ व्यभिचारात् । तस्मात्सम्भवति सामानाधिकरण्ये वैयधिकरण्यमन्याय्यमिति लाघवमूलको हि सः । सत्यम् । मृत्योः सम्मृत्युमाप्नोति यइह नानेव पश्यतीति भेदनिन्दापूर्वकाभेदप्रतिपादकश्रुतिर्मानम् । न च तत्रापि यः नाना इव पश्यति सम्मृत्योर्मृत्युमाप्नोति यस्तु वस्तुतः नानात्वं पश्यति स नेतीतीवशब्दात्प्रतीयमानार्थेन भेदस्यैव प्रतीतेरिति वाच्यम् । छान्दोग्येपि सदेव सौम्येदमग्र आसीदित्यारभ्य तत्सत्यं स आत्मतत्त्वमसि श्वेतकेतो इत्युपसंहारेणोपक्रमोपसंहारयोरेकरूपेण वेदतात्पर्यनिर्णायकैनैक्यस्य निर्णीतत्वात् । ब्रम्हतम्पराद्योन्यत्रात्मनो ब्रम्ह वेदेति श्रुत्यापि ऐक्यावधारणात् । अस्मिन्पक्षे लाक्षणिकवाक्यस्फोटः । वस्तुतस्तु अयं वाचकवाक्यस्फोट एव । तथाहि । विशिष्टशक्त्युपस्थापितयोस्तत्त्वंपदार्थयोरभेदान्वयानुपपत्तावपि विशेष्ययोः शक्त्युपस्थापितयोरभेदान्वये बाधकाभावः । यथा घटो नित्य इत्यत्र घटपदवाच्यैकदेशघटत्वस्यायोग्यत्वेपि योग्यघटव्यक्त्या सहानित्यत्वान्वयः । यद्वा विशेष्यएव शक्तिः, विशेषणं तूपलक्षणम् । अस्मिन्पक्षे न कोपि दोषः । यद्वा यथा नानार्थस्थले संयोगादिनाभिधानियमस्तन्तथाभेदान्वयानुरोधाद्विशेष्ये एवाभिधानियमनम् । अस्तु वा लक्षणा सा च जहल्लक्षणा । तया च विशेषणांशत्यागमात्रं न तु विशेष्येपि तस्या उपयोगः । शक्त्यैव तदुपस्थितिसम्भवात् । एवं सोयं देवदत्त इत्यत्रापि । तथा च जहदजहल्लक्षणोदाहरणमसङ्गतमिति दिक् । एवमेको वृक्षः पंच नौका भवन्तीति वाक्ये सखण्डाखण्डत्वे पूर्ववदेव बोध्ये । अत्र तार्किकाः । गृह्णाति वाचकः सङ्ख्यां प्रकृतेर्विकृतेर्नहीति वचनात्प्रकृत्यर्थवृक्षगतमेकवचनमेव भूधातूत्तरं भवतीत्याहुः । तदयुक्तम् । गृहणातीत्यस्य च्व्यन्तविषयत्वात् । यथा संघीभवन्ति ब्राह्मणाः त्वद्भवान्यहं मद्भवसि त्वमित्यादौ वचनपुरुषयोः प्रकृतिगतयोरेव दर्शनात् । ननु सङ्कोचे किं मानम् । सुवर्णपिण्डः खदिरांगारसदृशो कुण्डले भवत इति भाष्यप्रयोग एव । उद्देश्यविधेयभावस्थले तु उद्देश्यगता सङ्ख्याऽऽख्यातप्रत्यये "शास्त्राणि चेत्प्रमाणं स्युरि" त्यादिषु । पुनरपि वाक्यं द्विधा । काव्यात्मकमकाव्यात्मकं च । द्वितीयं तूक्तम् । आद्यन्तु तददोषौ शब्दार्थौ स-

गुणावनलङ्कृती पुनः क्वापीत्यनेन लक्षितम् । अत्र यावद्दोषाभावो वक्तुमशक्यः । असम्भवात् । यत्किंचिद्दोषाभावे अदोषपदवैयर्थ्यम् । तस्मान्नञो ऽल्पत्वमर्थः । अनुदरा कन्येति वत् । अल्पत्वं च स्फुटप्रतीयमानदोषराहित्यम् । इदं काव्यलक्षणं रसगंगाधरे दूषितम् । शब्दार्थयोर्व्यासज्यवृत्तिकाव्यत्वे काव्यं श्रुतमर्थो न ज्ञात इति व्यवहारासम्भवात् । तदसमञ्जसम् । एकदेशे दग्धेपि पटो दग्ध इतिवदेकदेशेपि प्रयोगसम्भवात् । समुदायवृत्ताः शब्दाः क्वचिदेकदेशेपि वर्तन्तइति भाष्यात् । तल्लक्षणमेव तु न समंजसम् । तथाहि । रमणीयार्थप्रतिपादिकशब्दः काव्यम् । रमणीयत्वं च लोकोत्तराल्हादजनकज्ञानविषयत्व, मिति तल्लक्षणम् । इदञ्च तत्वमसीत्यादावतिव्याप्तम् । न वाल्हादे वैजात्यम् । किन्तत: । लोकोत्तराल्हादजनकज्ञानविषयत्वस्योभयत्र तुल्यत्वात । ब्रह्मानन्दत्वेन सर्ववर्णितत्वाच्च । किंच रमणीयपदस्य रमणीयार्थप्रतिपादकत्वमस्ति न वा । नाद्यः । रमणीयशब्दस्यापि रमणीयार्थप्रतिपादकशब्दत्वेन काव्यत्वापत्तेः । इदं च भाष्ये ऽपशब्दार्थकः शब्दो ऽपशब्द इति चेन्न । अपशब्दस्यापि अपशब्दत्वापत्तेरित्यनेन ध्वनितम् । नान्त्यः । रमणीयार्थप्रतिपादकत्वाभावे लक्षणत्वानुपपत्तेः । तस्मात्प्रकाशोक्तमेव लक्षणं सम्यक् । एवं वन्हिना सिञ्चतीति वाक्यस्फोट एव । ननु वाक्यार्थबोधे ऽयोग्यतानिश्चयस्य प्रतिबन्धकत्वं योग्यताज्ञानस्य कारणत्वं तार्किकादिसिद्धान्तसिद्धं प्रकृते च वन्हेः सेककरणं नेति विषयबाधरूपायोग्यतानिश्चयरूपबाधकसत्वाद्विषयाबाधरूपयोग्यताज्ञानासत्त्वात्कथमेतस्य वाक्यस्फोटत्वमिति चे, त्सत्यम् । तात्पर्यविषयाबाधो हि योग्यता । तदभावोऽयोग्यता । प्रकृते चात्युष्णजलेन सिञ्चतीति तात्पर्यविषयः । यथा, अस्य क्षोणिपतेः परार्द्धपरया लक्षीकृतासंख्यया प्रज्ञाचक्षुरवेक्षमाणधिरप्रख्या: किलार्कीर्तयः । गीयन्ते स्वरमष्टकमं कलायता जोतन वन्द्योदरान्मूकानां प्रकरेण वर्मरमणीदुग्धोदधे रोधसि । गगनं गगनाकारं सागराः सागरोपमाः । रामरावणयोर्युद्धं रामरावणयोरिव ॥ कैलासस्य प्रथमशिखरे वेणुसंमूर्च्छनाभिः श्रुत्वा कीर्तिं विबुधरमणीगीयमानां यदीयाम् । स्रस्तापांगासरसबिसिनीकाण्डसञ्जातशङ्का दिङ्मातङ्गाः श्रवणपुलिने हस्तमावर्तयान्ति ॥ पश्य नीलोत्पलद्वन्द्वानि सरन्ति शिताः शराइति आद्यालङ्कारिकवाक्येषु गङ्गायां घोष इत्यादौ. तत्वमसीत्यादौ च तात्पर्यविषयाबाधो योग्यत्वमिति सर्वसिद्धान्तः । तथात्रापि । यद्वां शाब्दबोधे ऽयोग्यतानिश्चयस्य न प्रतिबन्धकत्वं तत्सत्वेपि त्वं बृहस्पतिरिति स्तावकवाक्यात्स्तन्तोपोपलब्धेः । नाहं रंडापुत्र इति बाधनिश्चये सत्यपि त्वं रण्डापुत्र इति वाक्यात् क्रोधोपलब्धेश्च । शाब्दबोधाभावे एतदनुपपत्तेः । किञ्च पश्य नीलोत्पलद्वन्द्वादित्यादिसाध्यवसानादिलक्षणास्थले शरानीलोत्पलद्वन्द्वापादानकाः नेत्यधोग्यतानिश्चये सति तद्वाक्यश्रवणानन्तरं वाक्यबोधोत्तरमयोग्यतानिश्चयः पूर्वं वा । नाद्यः । बाधनिश्चये सति बोधाभावात् । नान्त्यः । बोधाभावेन्वयानुपपत्तेर-

भावात् । न हि स्वरूपसती अन्वयानुपपत्तिर्लक्षणाबीजम् । किन्तु ज्ञाता । न च पूर्वमयोग्यतानिश्चयसत्वेन तज्ज्ञानमप्यस्त्येवेति वाच्यम् । वाक्यार्थबोधजन्यान्वयानुपपत्तिज्ञानस्य पूर्वमभावात् । गङ्गा घोषाधिकरणं नेति लौकिकज्ञानसत्वे गङ्गायां घोष इति वाक्याद्गङ्गाधिकरणको घोष इति बोधोत्तरमन्वयानुपपत्तिर्हि अनुभवसिद्धा । न च तस्याः पूर्वं ज्ञानं सम्भवति । न च भ्रमात्मको बोध इति तार्किकोक्तं युक्तिमत् । अयोग्यतानिश्चयस्य प्रतिबन्धकत्वं योग्यताज्ञानस्य कारणत्वं प्रकल्पनीयम् । भ्रमात्मको बोधश्च कल्पनीय इति महद्गौरवम् । स्फोटवादिनां त्रितयमपि न कल्प्यमिति लाघवम् । वाक्यार्थबोधजन्यप्रवृत्तावेव तत्स्वीकारात् । किञ्च नाहं परमेश्वर इति बाधनिश्चये सति तत्वमसीति वाक्याद्बोधाभावे भ्रमात्मकबोधे वा न प्रमात्मकं ज्ञानं सम्भवति भ्रमात्मकबोधस्य प्रमात्मकबोधजननायोग्यत्वात् । एवं दशमस्त्वमसीत्यत्रापि । ननु अनेकवर्णातिरिक्तोनेकध्वनिव्यङ्ग्यः ऽखण्डवाक्यस्फोटः कः पदार्थ इति चेत्, शृणु । यथा तार्किकैः पूर्वोक्तमद्रीत्या गत्यन्तरसम्भवेपि चित्ररूपमातिरिक्तं स्वीक्रियते यथा शाब्दिकैः रेफद्वयाज्भागविशिष्टः एको वर्णः ऋतिऋवा लृति लृवेत्यत्र वार्त्तिके स्वीक्रियते यथा वा सिद्धमेतत् सस्थानत्वादैचोश्चोत्तरभूयस्त्वादितिवार्तिके ऽनेकाचामेकवर्णात्मकत्वमुक्तन्तथा मयापि अनेकध्वनिव्यङ्ग्यः वाक्यात्मक एको वर्ण इति स्वीक्रियते । स च शब्दब्रम्हरूपः । तत्र मतत्रयं, शब्दब्रम्हेति शब्दार्थः शब्दमित्यपरे जगुः । चैतन्ये सर्वभूतानां शब्दब्रह्मेति मे मतिरिति ॥ शब्दब्रम्हेतिनिर्वचनेनापि तस्य वर्णत्वं सिद्धम् । अनुमानादपि । तथाहि । अखण्डवाक्यस्फोटः एकवर्णरूपः श्रावणत्वात् । ध्वनिव्यङ्ग्यत्वाद्वा । यन्नैवं, तन्नैवं यथापृथिव्यादि । अन्वयदृष्टान्तस्तु मतान्तरसिद्धवर्णादि । वस्तुतस्तु अन्वयव्यतिरेकानुमानं व्यर्थम् उपनीतभानेनैव गतार्थत्वात् । तथाहि । यथा चन्दनखण्डस्य लौकिकप्रत्यक्षं सौरभ्यस्यालौकिकं तथा धूमस्य लौकिकं वन्हेरलौकिकमिति अस्मिन्पक्षे उपनीतभानेनैव गतार्थत्वात् । यद्वा लाघवाद्दोषाभावाद्ध्वनिव्यङ्ग्यस्यान्यस्याभावाच्च वर्णत्वस्वीकारः । न च ध्वनिव्यङ्ग्यत्वस्य गुणीभूतव्यङ्ग्यप्रभेदे काङ्क्षिप्तस्यापि अन्यस्य सम्भव इति वाच्यम् । तस्य ध्वनिविकारकाकुव्यङ्ग्यत्वेपि ध्वनिव्यङ्ग्यत्वाभावात् । किञ्च कामः सङ्कल्पो विचिकित्सा श्रद्धा ऽश्रद्धा भीः ह्रीः इत्येतत्सर्वमन एवेति श्रुत्या कामादीनां मनो धर्मत्वे प्रतिपादितेपि तार्किकैरात्मधर्मत्वमुक्तं तच्च सर्वैरप्यङ्गीकृतं, तन्तु भ्रमात्मकं, तद्बीजं तु यथा जपाकुसुमसन्निधाने स्फटिको लोहित इति ज्ञानम् । प्रकृते तु मनःसान्निध्यम् आत्मधर्मे बीजं श्रुतिबाधश्च । स्फोटे तु न तथा । तस्मादेकवर्णात्मकोखण्डवाक्यस्फोटो वाचक इति सिद्धम् ॥

इति श्रीमन्मौनिकुलतिलकायमानगोवर्द्धनभट्टात्मजजानकीजानि-
रघुनाथभट्टात्मजश्रीकृष्णकृतस्फोटचन्द्रिका सम्पूर्णा ॥

॥ श्रीः ॥

विज्ञप्तिः ।

—o—

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तबको मुद्रयित्वा प्रकाश्यते ।

२ एकस्मिन् स्तबके एक एव ग्रन्थो मुद्र्यते ।

३ प्राचीना दुर्लभाश्चाऽमुद्रिता मीमांसावेदान्तादिदर्शन,व्याकरण,धर्मशास्त्र,साहित्य, पुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्र्यन्ते

४ काशिकराजकीयप्रधानसंस्कृतपाठालयाऽध्यापकाः पण्डिता एव एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

५ भारतवर्षीयै,ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं

वार्षिकमग्रिमं	मूल्यम् मुद्राः	७	आणकाः	८ ।
मासिकं (व्याल्युपेबल्-द्वारा)	,, ,,	०	,,	१२ ।
कालान्तरे प्रतिस्तबकं	,, ,,	१	,,	०

७ प्रापणव्ययः पृथग् नास्ति ।

८ साम्प्रतं मुद्र्यमाणा ग्रन्थाः—

	मुद्रिताः स्तबकाः
(१) संस्काररत्नमाला । गोपीनाथभट्टकृता (संस्कारः)	२
(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः (व्याकरणम्)	१०
(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् (मीमांसा)	२

९ अग्रे मुद्रणीयत्वेनाभीप्सितौ ग्रन्थौः—

विधिरसायनम् । अप्पयदीक्षितकृतम् ,,

न्यायकणिका । वाचस्पतिमिश्रकृता ,,

एतदन्यानि कानि चित्पुस्तकानि अपेक्ष्यन्ते चेदस्मत्कार्यालय-पुस्तकानां मुद्रिता महती सूची आणकार्धं संप्रेष्य द्रष्टव्या ।

पत्त्रादिप्रेषणस्थानम्

कार्याध्यक्षः-हरिदासगुप्तः,
चौखम्बा-संस्कृतपुस्तकालयस्य
बनारस सिटी ।

The Chowkhamba Sanskrit Series, Benares.

This Monthly Magazine treats of very rare and invaluable ancient Sanskrit works on Vedic Literature, Hindu Philosophy, different sciences, general literature and Purânas &c, that have not yet seen the light of the day. The monthly issue of this Magazine dealing with one subject contains 100 pages of Demy octavo size, printed neatly in beautiful types on good thick paper, after carefully corrected by the Pandits of the Government Sanskrit College, Benares.

The works included in the Magazine hitherto issued and those in course of preparation for publication are as follows :—

Names of Books,	*Fasciculus ready for Sale.*	
1. Sanskâraratnamâlâ, by Gopînâtha Bhatta.	(Sanskâra)	2.
2. Śabdakoustubha, by Bhattoji Dîkshita.	(Vyâkarana)	10.
3. Śloka Vârtika of Kumârila Bhatta together with the Commentary called Nyâyaratnâkara, by Pârthasârathi Miśra	(Mîmânsâ)	2.
4. Nyâyakanikâ of Vâchaspati Miśra.	do.	(in preparation.)
5. Vidhirasâyana of Appaya Dîkshita.	do.	do.

FOR INDIA, BURMA & CEYLON.

Annual subscription	(in advance)	Rs.	7 8 0
Monthly Do.	(Per V. P. Post)	„	0 12 0
Single copy		„	1 0 0

FOR FOREIGN COUNTRIES.

		£.	s.	d.
Annual subscription	(in advance) ...	0	15	0
Single copy ...	... ...	0	1	9

Postage free.

To be had from :—

H. D. GUPTA, *Secretary,*

The Chowkhambâ Sanskrit Bk. Depot,

BENARES CITY.

अथ स्फोटचन्द्रिका प्रारभ्यते ॥

पित्रोः पादयुगं नत्वा जानकीरघुनाथयोः ॥
मौनिश्रीकृष्णभट्टेन तन्यते स्फोटचन्द्रिका ॥ १ ॥

शाब्दिकानां वाच्यलक्ष्यव्यंग्यार्थप्रतिपादकानां वाचकलाक्षणिकव्यञ्जकानां शब्दानां तन्निष्ठजातेर्वा स्फोट इति व्यवहारः। स्फुटति अर्थो यस्मादिति व्युत्पत्त्या पंकजादिपदवद्योगरूढः स्फोटशब्दः। केवलयोगस्वीकारे वाच्यलक्ष्यव्यंग्यानां चेष्टायाश्च व्यंग्यार्थप्रतिपादकत्वेन तत्रातिव्याप्तेः। न च वाचकादिपर्यायः स्फोटशब्दो ऽप्रसिद्धः। अक्षराणामकारस्त्वं स्फोटस्त्वं वर्णसंश्रय इति हरिवंशे दृष्टत्वात्। तथा च वर्णपदवाक्यांखण्डपदाखण्डवाक्येति पञ्च व्यक्तिस्फोटाः। शक्यतावच्छेदिकाया जातेर्वाच्यत्ववत् शक्तितावच्छेदिकाया जातेर्वाचकत्वमिति मते वर्णपदवाक्यभेदेन त्रिविधो जातिस्फोटः। एवं चाष्टौ स्फोटाः। यथानन्दवल्यां शुद्धब्रह्मज्ञानार्थमन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयेति पञ्चसु कोशेषु अपारमार्थिकब्रह्मत्वप्रतिपादनमुपायः। यथा वारुन्धतीज्ञानार्थं स्थूलनक्षत्रे अपारमार्थिकारुन्धतीत्वबोधनम्। तथा पारमार्थिकाखण्डवाक्यबोधार्थमेते वर्णपदवाक्याखण्डपदस्फोटा उपायाः। तदुक्तम्। उपायाः शिक्षमाणानां बालानामुपलालनाः। असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते इति। सुप्तिङन्तं पदमिति एकातिङन्तार्थमुख्यविशेष्यकं वाक्यमिति पदवाक्यलक्षणानाक्रान्तवर्णसमूहस्य वर्णस्य वा प्रकृतिप्रत्ययरूपस्य व्याकरणेन गृहीतशक्तिकस्य पच् तिप् इत्यादिकस्य वाचकत्वे वर्णस्फोटः। ते च प्रयोगसमवायिनः विसर्गतिवादयः। न तु तत्स्थानित्वेन कल्पिताः सकारलकारादयः। तेषामनियतत्वात्। तथाहि। विसर्गेण रोःस्मरणं तेन सोः। एवं णलातिपः स्मरणं तेन लकारस्य, एवं च गौरवं स्पष्टमेव। किं च स्थान्यादेशज्ञानशून्यस्यावैयाकरणस्यादेशमात्रादबोधापत्तेश्च। एवं च स्थान्येव वाचको लाघवात् न त्वादेशो गौरवादिति तार्किकोक्तमपास्तम्। विपरीतगौरवापत्तेः। अयं तार्किकाणां पदस्फोटत्वेनाभिमतः। शक्तं पदमिति तैः स्वीकृतत्वात्। तच्च मानाभावात् फलाभावात्स्वग्रन्थविरोधाच्चायुक्तमिति शाब्दिकाः। तथाहि। शक्तं पदं चतुर्धा रूढं यौगिकं योगरूढं यौगिकरूढं चेति। गौः पाचकः पंकजमश्वकर्ण इति क्रमेणोदाहरणानि। तत्र पाचक इति यौगिकोदाहरणे यच्छक्तं पदं पच् अक इति न तद्यौगिकं, समुदायस्तु यद्यपि यौगिकस्तथापि न शक्तः। एवं च शक्तं पदं यौगिकमित्यविचारिताभिधानम्। विशिष्टशक्त्यभावे सति व्याकरणबोधितार्थप्रकृतिप्रत्ययसमुदायरूपसुबन्ततिङन्तपदत्वं